# MudgalapurAna Khanda 2 Ekadantacharitam

# મુદ્ગલપુરાણં ખણ્ડઃ ૨ એકદન્તચરિતમ્

## Document Information

Text title : Mudgala Purana Khanda 2 Ekadantacharitam

File name : mudgalapurANam2.itx

Category : purana, ganesha

Location : doc_purana

Proofread by : Yash Khasbage

Latest update : September 18-19, 2023 Ganeshachaturthi

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2023

*sanskritdocuments.org*

# મુદ્ગલપુરાણં ખણ્ડઃ ૨ એકદન્તચરિતમ્

॥ મુદ્ગલપુરાણં ખણ્ડઃ ૨ ॥

॥ અથ શ્રીમુદ્ગલપુરાણે દ્વિતીયઃ ખણ્ડઃ પ્રારભ્યતે ॥

(Page ખં. ૨ અ. ૧ પાન ૧)

## ૨.૧ બ્રહ્મસૃષ્ટિપ્રારમ્ભો નામ પ્રથમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

શૌનકાદ્યા ઊચુઃ ।
સૂત ત્વયા મહાભાગ કૃતકૃત્યા વયં કૃતાઃ ।
અતુલં વક્રતુણ્ડસ્ય ચરિત્રં શ્રાવિતં મહત્ ॥ ૧॥

ધન્યોઽસિ ત્વં મહાબુદ્ધે સર્વજ્ઞોઽસિ વિશેષતઃ ।
પરિપૃચ્છામહેઽતસ્ત્વાં તદ્વદસ્વ યથાર્થતઃ ॥ ૨॥

શ્રુત્વા શ્રુત્વા ન નસ્તૃપ્તિર્જાયતેઽમૃતપાનવત્ ।
અતસ્ત્વમેકદન્તસ્ય ચરિત્રં વદ સામ્પ્રતમ્ ॥ ૩॥

કસ્મિન્ બ્રહ્મણિ સંસ્થોઽયમેકદન્તો ગજાનનઃ ।
કતિ તસ્યાવતારાશ્ચ કિં કર્મ વદ નિશ્ચિતમ્ ॥ ૪॥

ઇતિ સમ્પ્રાર્થિતઃ સૂતસ્તાનુવાચ મહામુનીન્ ।
પ્રશ્રયાવનતો ભૂત્વા ભક્ત્યા તેષાં પ્રણોદિતઃ ॥ ૫॥

સૂત ઉવાચ ।
એવમેવ ચ દક્ષેણ પરિપૃષ્ટો મહામુનિઃ ।
મુદ્ગલસ્તમથોવાચ તચ્છૃણુધ્વં મુનીશ્વરાઃ ॥ ૬॥

દક્ષ ઉવાચ ।
પુરાતનં મહત્પુણ્યમસ્તિ મે મુનિસત્તમ ।

તેન તે દર્શનં જાતં સર્વજ્ઞસ્ય ન સંશયઃ ॥ ૭॥

વક્રતુણ્ડચરિત્રં ચ શ્રુતં તવ મુખામ્બુજાત્ ।
તેન વિશ્રાન્તતા પ્રાપ્તા હૃદયે મે વિશેષતઃ ॥ ૮॥

યજ્ઞવિધ્વંસશોકોઽપિ ગતો મત્તોઽધુના પ્રભો ।
હર્ષયુક્તઃ કૃતો ભક્ત્યા ઢુણ્ઢેસ્તુ મુનિસત્તમ ॥ ૯॥

એકદન્તચરિત્રં મે કથયસ્વ વિશેષતઃ ।
કિઙ્કુર્મા કથમુત્પન્ન એકદન્તો ગજાનનઃ ॥ ૧૦॥

કિં વાહનસમાયુક્તઃ કીદૃશં બ્રહ્મ તસ્ય વૈ ।
ઇત્યાદિ સર્વમાખ્યાનં વદ માં કરુણાનિધે ॥ ૧૧॥

સૂત ઉવાચ ।
એવં પૃષ્ટો મહાતેજાસ્તમુવાચ પ્રજાપતિમ્ ।
ભક્તિં જ્ઞાત્વા વિશેષેણ ગણેશે સર્વસિદ્ધિદે ॥ ૧૨॥

મુદ્ગલ ઉવાચ ।
શ‌ૃણુ દક્ષ ત્વયા પૃષ્ટં સર્વપાપપ્રણાશનમ્ ।
એકદન્તસ્ય માહાત્મ્યં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૧૩॥

ધન્યોઽસિ ત્વં મહાભાગ યેન તે શ્રવણે રતિઃ ।
ગજાનનસ્ય દેવસ્ય ચરિત્રે સર્વભાવતઃ ॥ ૧૪॥

અત્ર તે વર્ણયિષ્યેઽહમિતિહાસં પુરાતનમ્ ।
ગૃત્સમદસ્ય સંવાદં પ્રહ્લાદસ્ય મહાત્મનઃ ॥ ૧૫॥

શ્રુત્વા મુદ્ગલવાક્યં તદ્ દક્ષો હૃષ્ટમના મુને ।
ઉવાચ તં મહર્ષિં સ પ્રશ્રયાવનતઃ સ્વયમ્ ॥ ૧૬॥

દક્ષ ઉવાચ ।
બ્રહ્મણઃ સૃષ્ટિમારભ્ય સૃષ્ટિમાર્ગં વદ પ્રભો ।
યથા ત્રિભુવનં સૃષ્ટં બ્રહ્મણા વિશ્વયોનિના ॥ ૧૭॥

તત્ર પ્રહ્લાદમાહાત્મ્યં સ્વયમેવાગમિષ્યતિ ।
ગૃત્સમદસ્ય સંવાદં યથાવદ્વર્ણય પ્રભો ॥ ૧૮॥

સૂત ઉવાચ ।
દક્ષસ્ય વચનં શ્રુત્વા મુદ્ગલસ્તમુવાચ હ ।

સૃષ્ટિમાર્ગં પુરાવૃત્તં શાપમોહિતમાદરાત્ ॥ ૧૯॥

મુદ્ગલ ઉવાચ ।
શ્ૃણુ દક્ષ મહાબુદ્ધે બ્રહ્મા લોકપિતામહઃ ।
સસર્જ વિવિધં વિશ્વં તથા તે કથયામ્યહમ્ ॥ ૨૦॥

ગણેશવરદાનેન બ્રહ્મા સ્રષ્ટું મનો દધે ।
યોગમાયાં સમાસ્થાય વિવેશાઽસૌ જનાર્દનમ્ ॥ ૨૧॥

નિલીય તસ્મિન્નબ્દાન્તે નાભિપદ્માદ્વિનિઃસૃતઃ ।
વરદાનેન વિષ્ણોશ્ચ પુત્રત્વમગમદ્વિધિઃ ॥ ૨૨॥

તત્ર પદ્મે સમાસીનો ધ્યાયન્ હેરમ્બમન્તરે ।
તતસ્તસ્ય વિધેર્દેહાજ્જલં વૈ નિઃસૃતં બહુ ॥ ૨૩॥

પશ્યતસ્તસ્ય સર્વત્ર જલં વ્યાપ્તં દિશો દશ ।
તસ્મિન્ જલે નિમગ્નોઽભૂદ્ બભ્રામ ભ્રાન્તમાનસઃ ॥ ૨૪॥

સસ્માર ગણનાથં તં વિભો પાહિ ભયાનકાત્ ।
(Page  ખં. ૨ અ. ૧ પાન ૨)
મજ્જન્તં માં જલાત્ ઢુણ્ઢે વક્રતુણ્ડ નમોઽસ્તુ તે ॥ ૨૫॥

સ્મૃતિમાત્રેણ તત્રાસૌ દદર્શ વટમુત્તમમ્ ।
તત્ર પત્રે ગણેશાનં સુપ્તં દૃષ્ટ્વા પ્રહર્ષિતઃ ॥ ૨૬॥

ત્રિનેત્રં ચ ચતુર્બાહું શુણ્ડાદણ્ડવિરાજિતમ્ ।
મહોદરં શેષનાભિં ભાલચન્દ્રં કિરીટિનમ્ ॥ ૨૭॥

સર્વાવયવસમ્પૂર્ણં નાનાભૂષણભૂષિતમ્ ।
વસ્ત્રૈઃ સઞ્છાદિતં બાલમઙ્ગુષ્ઠપરિમાણકમ્ ॥ ૨૮॥

એતાદૃશં ગણેશાનં દૃષ્ટ્વા વિસ્મિતમાનસઃ ।
મહાજલે વટો યોઽયમવશિષ્ટઃ કથં જલે ॥ ૨૯॥

વટસ્ય સન્નિધાને સ યયૌ બ્રહ્મા પ્રજાપતે ।
સિષેચ ગણનાથશ્ચ જલં બ્રહ્મણિ શુણ્ડયા ॥ ૩૦॥

તેન હૃષ્ટઃ સ્વયં બ્રહ્મા તુષ્ટાવ સ ગજાનનમ્ ।
બદ્ધાઞ્જલિપુટો ભૂત્વા ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૩૧॥

બ્રહ્મોવાચ ।

નમસ્તે ગણનાથાય પ્રલયામ્બુવિહારિણે ।
વટપત્રશયાયૈવ હેરમ્બાય નમો નમઃ ॥ ૩૨॥

ચતુર્ભુજધરાયૈવ નાભિશેષાય તે નમઃ ।
ગજવક્ત્રાય સર્વેશ લમ્બોદર નમોસ્તુ તે ॥ ૩૩॥

એકદન્તાય વૈ તુભ્યં નાનાશોભાસમન્વિત ।
અઙ્ગુષ્ઠપર્વમાત્રં ચ સ્વરૂપં દધતે નમઃ ॥ ૩૪॥

સિદ્ધિબુદ્ધિયુતાયૈવ ભક્તસંરક્ષકાય ચ ।
અનન્તવિભવાયૈવ ગણેશાય નમો નમઃ ॥ ૩૫॥

નિર્ગુણાય ગુણાધાર સગુણાય નમો નમઃ ।
એકાનેકાદિભેદૈશ્ચ લીલાકાર નમોઽસ્તુ તે ॥ ૩૬॥

અનાદિબાલરૂપાય સૃષ્ટિસ્થિત્યન્તકારિણે ।
માયાવિને મહામોહદાત્રે તુભ્યં નમો નમઃ ॥ ૩૭॥

નિવારય મહાવિઘ્નં સૃષ્ટિકર્તુર્ગજાનન ।
જલં પ્રાપ્તં મહાઘોરં તત્રાઽહં મજ્જિતો બલાત્ ॥ ૩૮॥

શરણં ત્વાં પ્રપન્નોઽસ્મિ રક્ષ માં ભક્તવત્સલ ।
તવ દેવેશ દાસોઽહં કૃપાં કુરુ દયાનિધે ॥ ૩૯॥

બ્રહ્મા સ્તુત્વા પુનશ્ચિત્રં તસ્ય તુણ્ડે દદર્શ હ ।
વિશ્વં ચરાચરં પૂર્ણં સંસ્થિતં સેશ્વરં કિલ ॥ ૪૦॥

તતો નાનાસમીરેણ નીતો બ્રહ્મા મહોદરે ।
તત્ર વિશ્વં દદર્શાઽસૌ નાનાશ્ચર્યમયં પુનઃ ॥ ૪૧॥

એવં નાનાણ્ડસંયુક્તમુદરં વીક્ષ્ય ચ પ્રભોઃ ।
રોમદ્વારેણ બ્રહ્માઽસૌ બહિર્યાતો યથા પુરા ॥ ૪૨॥

દદર્શ તં ગણેશાનં બાલરૂપં સુવિસ્મિતઃ ।
તમુવાચ તતો દેવો બ્રહ્માણં ભક્તમુત્તમમ્ ॥ ૪૩॥

શ્રીગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિકરં ભવેત્ ।
સર્વાર્થસાધકં ચૈવ ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૪૪॥

યઃ પઠેચ્છૃણુયાદ્વાઽપિ સ મે માન્યો ભવિષ્યતિ ।

યં યં ચિન્તયતે ભાવં તં તં દાસ્યામિ નિશ્ચિતમ્ ॥ ૪૫॥

નાભેઃ કલમતો વિષ્ણોર્નિઃસૃતો વરદાનતઃ ।
તત્રાઽઽદૌ મે સ્મૃતિં પૂજાં વિસ્મૃતસ્ત્વં પિતામહ ॥ ૪૬॥

તેન ત્વં વિઘ્નસંયુક્તઃ પુનર્જાતો ન સંશયઃ ।
અધુના મે સ્મૃતિં કૃત્વા દૃષ્ટ્વા માં વિઘ્નવર્જિતઃ ॥ ૪૭॥

અતઃ પરં વિધે કિઞ્ચિત્ત્વયા કાર્યં મહામતે ।
મત્સ્મૃતિં નમનં કૃત્વા કુરુ ત્વં સિદ્ધિમેષ્યસિ ॥ ૪૮॥

યથા દૃષ્ટં મદીયેઽદ્ય જગત્સ્થાવરજઙ્ગમમ્ ।
ઉદરે તાદૃશં વિશ્વં સૃજ ત્વં મેઽધુનાજ્ઞયા ॥ ૪૯॥

ઇત્યુક્ત્વાન્તર્દધે સદ્યો ગણેશો બાલરૂપધૃક્ ।
(Page ખં. ૨ અ. ૨ પાન ૩)
બ્રહ્મા પદ્મે સમાસીનો યથાપૂર્વં બભૂવ હ ॥ ૫૦॥

તતો ગણેશમન્ત્રં ચ જજાપ કમલાસનઃ ।
પૂજયિત્વા યથાન્યાયં ધ્યાનસંસ્થો બભૂવ હ ॥ ૫૧॥

તસ્ય હૃદ્દેશમધ્યેઽસૌ પ્રકટોઽભૂદ્ગજાનનઃ ।
તં નનામ સ્વયં બ્રહ્મા પૂજાં ચક્રે સ માનસીમ્ ॥ ૫૨॥

દક્ષિણાવસરે તત્ર સિદ્ધિર્બુદ્ધિરુભે પરે ।
આગતે હૃદિ મધ્યે ચ તે દદૌ વિઘ્નહારિણે ॥ ૫૩॥

યથાશાસ્ત્રવિધાનેન તસ્ય પૂજાં પ્રગૃહ્ય સઃ ।
અન્તર્ધાનં યયૌ સદ્યો ગણેશઃ સર્વનાયકઃ ॥ ૫૪॥

અન્તર્હિતે ગણેશાને હૃદિસ્થે બ્રહ્મરૂપિણિ ।
તં પ્રણમ્ય સ્વયં બ્રહ્મા સૃષ્ટિં કર્તું મનો દધે ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે બ્રહ્મસૃષ્ટિપ્રારમ્ભો નામ પ્રથમોઽધ્યાયઃ ॥ ૨.૧

## ૨.૨ નારદશાપનિવર્તનં નામ દ્વિતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

ગણેશં મનસા ધ્યાત્વા સૃષ્ટિં કર્તું મનો દધે ।
આદૌ તસ્ય વિધેર્દેહાદવિદ્યા સા વિનિઃમૃતા ॥ ૧॥

સા પઞ્ચધા તતો ભિન્ના સ્વયં જાતા પ્રજાપતે ।
તાં દૃષ્ટ્વા વિસ્મિતો બ્રહ્મા મનસા દુઃખિતોઽભવત્ ॥ ૨॥

અવિદ્યાભ્રાન્તિરૂપાઽત્ર હ્યનન્તવિભવાત્મિકા ।
રક્તા કૃષ્ણા તથા શ્વેતા નાનાશ્ચર્યમયી બભૌ ॥ ૩॥

ત્રિવિધાનાં પ્રસૂતિશ્ચ જગત્ત્રયવિમોહિની ।
તયા વિમોહિતં વિશ્વં ભ્રાન્તિયુક્તં બભૂવ હ ॥ ૪॥

તમો મોહો મહામોહઃ શૃણુ દક્ષ મહાદ્ભુતમ્ ।
તામિસ્રશ્ચાન્ધતામિસ્રઃ પઞ્ચધા જગતિ સ્થિતા ॥ ૫॥

તમોઽજ્ઞાનસ્વરૂપં યત્તેન સઞ્છાદિતં જગત્ ।
દેહસ્વાર્થસમાયુક્તં બભૂવ ભ્રાન્તમાનસમ્ ॥ ૬॥

મોહઃ સ કામનાયુક્તં કર્મ નાના વિનિર્મમે ।
તેન વિશ્વં શરીરસ્ય કુરુતે કર્મભોગદમ્ ॥ ૭॥

મહામોહેન સંસૃષ્ટં વિકર્મ વિવિધં પ્રભો ।
તેન દેહસ્ય ભોગાર્થં પાપાનિ કુરુતે નરઃ ॥ ૮॥

તામિસ્રેણ ફલં સૃષ્ટં રોગદારિદ્ર્યકાદિકમ્ ।
તેનાઽઽધિવ્યાધિસંયુક્તમભૂદ્વિશ્વં પ્રપીડિતમ્ ॥ ૯॥

અન્ધતામિસ્રતો દક્ષ નરકો યાતનાત્મકઃ ।
તેન સ્વકર્મદોષેણ યાતનાં બુભુજે જગત્ ॥ ૧૦॥

એષાઽવિદ્યાગણેશાનં સ્મૃત્વા સ્વાર્થપરાઽભવત્ ।
તતો બ્રહ્મા વિનિન્દ્યૈનાં પુનઃ સ્રષ્ટું મનો દધે ॥ ૧૧॥

તતસ્તસ્ય શરીરાત્તુ ચતુઃપુત્રાઃ પ્રજજ્ઞિરે ।
સનકશ્ચ મહાયોગી તથાન્યશ્ચ સનન્દનઃ ॥ ૧૨॥

સનાતનોઽપિ ચ સનત્કુમારશ્ચ ચતુર્થકઃ ।
તેષાં માતૃસ્વરૂપેણ વિદ્યા જ્ઞાનાત્મિકા બભૌ ॥ ૧૩॥

બોધરૂપાં નિરાકારાં સાક્ષાદાત્મમયીં પરામ્ ।
તાં દૃષ્ટ્વા હર્ષયુક્તોઽભૂદ્બ્રહ્મા સર્વપિતામહઃ ॥ ૧૪॥

સહજસ્ય ધરસ્તત્ર સનકઃ સમ્બભૌ સુતઃ ।
સમયોગધરો દક્ષ પ્રતાપી ચ સ નન્દનઃ ॥ ૧૫॥

જ્ઞાનયોગમયો યોગી સનાતન ઇતિ સ્મૃતઃ ।
કર્મયોગસ્વરૂપઃ સનત્કુમારઃ સ આબભૌ ॥ ૧૬॥

તાન્ દૃષ્ટ્વા હર્ષસંયુક્ત ઉવાચ જગદીશ્વરઃ ।
(Page ખં. ૨ અ. ૩ પાન ૪)
સ્મૃત્વાઽસૃજત સંસૃષ્ટિં ગણેશં તૈઃ કૃતં તથા ॥ ૧૭॥

નાનાવિધં યોગમાર્ગં સસૃજુસ્તે મહૌજસઃ ।
તં દૃષ્ટ્વા નાભ્યનન્દત્સ બ્રહ્મા પ્રોવાચ તાન્ પુનઃ ॥ ૧૮॥

અલં યોગમયીં સૃષ્ટિં મા કુરુધ્વં મહૌજસઃ ।
તથેતિ તે મહાભાગા ઊચુસ્તં સંસ્થિતા બભુઃ ॥ ૧૯॥

બ્રહ્મા જ્ઞાનમયીં સૃષ્ટિં તતો દૃષ્ટ્વા ચુકોપ હ ।
કોષાત્તસ્ય લલાટાદ્વૈ શમ્ભુઃ પુત્રો બભૂવ હ ॥ ૨૦॥

તુષ્ટાવ તેજસા દીપ્તં પઞ્ચવક્ત્રધરં પ્રભુમ્ ।
ત્રિનેત્રં દશબાહું તં ચન્દ્રરેખાવિભૂષિતમ્ ॥ ૨૧॥

અર્ધનારીનરં પ્રાજ્ઞં ત્રિશૂલાદિસુચિહ્નિતમ્ ।
જટાધરં મહાકાયં વ્યાઘ્રેભાજિનધારકમ્ ॥ ૨૨॥

સહસા જાતમાત્રેણ રુદિતં શઙ્કરેણ ચ ।
તં બ્રહ્મા સાન્ત્વયામાસ કિં રોદિષિ વૃષધ્વજ ॥ ૨૩॥

બ્રહ્માણમવદદ્બાલઃ સ્થાનં દેહિ પિતઃ પ્રભો ।
મહ્યં નામાનિ સર્વેશ કાર્યં કથય વિસ્તરાત્ ॥ ૨૪॥

તં પ્રત્યુવાચ ધાતા સ રોદનાદ્રુદ્રસંજ્ઞિતઃ ।
શિવઃ સર્વસુખાધારસ્ત્વં જાતોઽસિ મહેશ્વર ॥ ૨૫॥

વરદાનપ્રભાવેણાધુના સર્વેશ્વરઃ પ્રભો ।
સાક્ષાચ્છઙ્કરવેષેણ પુત્રતાં મે સમાગતઃ ॥ ૨૬॥

પૃથ્વી જલં તથા તેજો વાયુરાકાશમેવ ચ ।
ચન્દ્રાઃ સૂર્યો દીક્ષિતોઽષ્ટૌ તવ સ્થાનાનિ શઙ્કર ॥ ૨૭॥

અષ્ટમૂર્તિધરઃ શર્વઃ સર્વેભ્યઃ ફલદાયકઃ ।
તવ નામાનિ દેવેશ એકાદશ ભવન્તુ વૈ ॥ ૨૮॥

કુરુ સૃષ્ટિં મહાદેવ ધ્યાત્વા દેવં ગજાનનમ્ ।
તથેતિ સૃષ્ટિમારેભે ધ્યાત્વા ગણપતિં શિવઃ ॥ ૨૯॥

રુદ્રાન્નાનાવિધાન્ શમ્ભુઃ સસર્જ બહુતેજસઃ ।
અનન્તાન્વિવિધાકારાનમૃતાત્મપ્રધારકાન્ ॥ ૩૦॥

તાન્ દૃષ્ટ્વા બ્રહ્મદેવોઽપિ મા કુરુષ્વ જગત્પતે ।
જન્મમૃત્યુયુતાન્ શમ્ભો સૃજસ્વ વિવિધાંસ્તથા ॥ ૩૧॥

તતઃ શિવો વિધાતારમુવાચ ન સૃજામ્યહમ્ ।
જન્મમૃત્યુયુતાન્ દેવેત્યુક્ત્વા તૂષ્ણીં બભૂવ હ ॥ ૩૨॥

તેન સ્થાણુરિતિ પ્રોક્તં નામ તસ્ય મહાત્મનઃ ।
ઊર્ધ્વરેતાઃ સ્વયં શમ્ભુઃ સ્થિતો ગણપતિં ભજન્ ॥ ૩૩॥

તતો બ્રહ્મા મુખેભ્યો વૈ વેદાન્ શાસ્ત્રસમન્વિતાન્ ।
પુરાણાનિ સસર્જાઽસૌ તાનુવાચ કૃતાઞ્જલીન્ ॥ ૩૪॥

સૃજધ્વં વિવિધાં સૃષ્ટિં તથેતિ ગણપં તદા ।
તપસા તોષયામાસુઃ સસૃજુસ્તદ્વરૈઃ પ્રજાઃ ॥ ૩૫॥

કર્માણિ વિવિધાનીહ સસૃજુઃ પરમાદરાત્ ।
તાનિ દૃષ્ટ્વા વિધાતાઽસૌ હર્ષયુક્તો બભૂવ હ ॥ ૩૬॥

તતો યજ્ઞં સમારેભે બ્રહ્મા વિષ્ણુમચિન્તયત્ ।
પુત્રાર્થં તં મહાભાગં સોઽપિ તત્પુત્રતાં ગતઃ ॥ ૩૭॥

યજ્ઞાચ્ચતુર્ભુજો દેવો યજ્ઞરૂપો જનાર્દનઃ ।
સમુદ્ભૂતઃ સ્વયં વિષ્ણુસ્તમુવાચ કૃતાઞ્જલિઃ ॥ ૩૮॥

આજ્ઞાં દેહિ પિતર્માં ત્વં તતસ્તં વિધિરબ્રવીત્ ।
સૃષ્ટિં કુરુ ગણેશ ત્વં તથા સ્મૃત્વા ચકાર સઃ ॥ ૩૯॥

યજ્ઞાન્ કર્મસમુદ્ભૂતાન સસર્જ વિવિધાન્ હરિઃ ।
નાનાફલપ્રદાન પૂર્ણાન્ કલ્પવૃક્ષાનિવ પ્રભુઃ ॥ ૪૦॥

તાન્ દૃષ્ટ્વા હર્ષિતો બ્રહ્મા તતઃ સ સસૃજે પુનઃ ।
(Page ખં. ૨ અ. ૨ પાન ૫)

તસ્ય દેહાત્સમુત્પન્નાઃ પુત્રા દશ મહૌજસઃ ॥ ૪૧॥

મરીચિર્ભૃગુરત્રિશ્ચ પુલસ્ત્યઃ પુલહઃ ક્રતુઃ ।
દક્ષ ત્વમઙ્ગિરાશ્ચૈવ વસિષ્ઠો નારદઃ પ્રભો ॥ ૪૨॥

તાનુવાચ સ્વયં બ્રહ્મા સૃજધ્વં વિવિધાઃ પ્રજાઃ ।
ઓમિત્યુક્ત્વા યયુઃ સર્વે તપસે વનમુત્તમમ્ ॥ ૪૩॥

તતો નારદ આદ્યન્તમુવાચ પિતરં મુનિઃ ।
નાહં સૃજામિ દેવેશ ભજામિ ગણનાયકમ્ ॥ ૪૪॥

માયામયં સર્વમિદં મિથ્યાભૂતં ભ્રમાત્મકમ્ ।
શ્રામ્યેજ્જ્ઞાતા તદર્થં યો મૂર્ખવન્નાત્ર સંશયઃ ॥ ૪૫॥

તતસ્તં પુનરપ્યાહ સૃજ ત્વં વિવિધાઃ પ્રજાઃ ।
અન્ત્યે વયસિ દેવેશં ગણેશં ભજ પુત્રક ॥ ૪૬॥

સ ઊચે ત્વં બોધયસિ કિમર્થં માં પ્રજાપતે ।
મિથ્યાભૂતાર્થમાદૌ કઃ સૃજતિ ભ્રાન્તિસંયુતઃ ॥ ૪૭॥

તતસ્તં શપ્તવાન્ બ્રહ્મા પત ત્વં શૂદ્રયોનિતઃ ।
ગન્ધર્વશ્ચ તથા ભાવી નાનાસ્ત્રીભોગકારકઃ ॥ ૪૮॥

તતસ્તં નારદસ્તાતં શશાપ ક્રોધસંયુતઃ ।
અપૂજ્યો ભવિતાઽસિ ત્વં વૃથા શપસિ માં યતઃ ॥ ૪૯॥

તતો નારદ એવાઽસૌ ગત્વા તપસિ સંસ્થિતઃ ।
ગણેશં તોષયામાસ મન્ત્રેણૈકાક્ષરેણ ચ ॥ ૫૦॥

દિવ્યવર્ષશતે પૂર્ણે તં યયૌ ગણપઃ સ્વયમ્ ।
વરં વૃણુ મહાભાગ દાસ્યામિ મનસીપ્સિતમ્ ॥ ૫૧॥

તતસ્તં સ્તુતવાન્ દેવં ગણેશં સર્વસિદ્ધિદમ્ ।
અવૃણોચ્ચ વરં ચેતિ શાપં મે વિનિવર્તય ॥ ૫૨॥

તતસ્તં ગણરાજઃ સ ઊચિવાન્ ભક્તવત્સલઃ ।
પિતૃશાપં કથં મિથ્યા કરોમિ વદ સામ્પ્રતમ્ ॥ ૫૩॥

મયા વરસ્તથા દત્તો બ્રહ્મણે તેન સત્યવાક્ ।
અતઃ શૃણુ મહાભાગ વચનં મે સદા હિતમ્ ॥ ૫૪॥

ગન્ધર્વો ભવિતાસિ ત્વં તત્ર જ્ઞાનં વદામિ તે ।
સદા સ્ત્રીભિઃ સમાયુક્તં ત્વાં માયા ન પ્રબાધતે ॥ ૫૫॥

પુનસ્ત્વં શૂદ્રયોનૌ ચ ભવિષ્યસિ ન સંશયઃ ।
તત્ર સંન્યાસિભિઃ સઙ્ગો ભવિષ્યતિ યદાઽનઘ ॥ ૫૬॥

તેભ્યો જ્ઞાનં સમાસાદ્ય ગમિષ્યસિ વનેષુ ચ ।
તત્ર વૈષ્ણવમાર્ગેષુ ત્વં સંસક્તો ભવિષ્યસિ ॥ ૫૭॥

તદ્દેહપતનાત્ ભાવી પુનસ્ત્વં બ્રહ્મણઃ સુતઃ ।
નારદો નાઽત્ર સન્દેહસ્તત્ર શમ્ભું ભજિષ્યસિ ॥ ૫૮॥

નારાયણમુખાત્તત્ર માં જ્ઞાત્વા મત્પ્રિયો મુને ।
ભવિષ્યસિ ચ યોગેન્દ્રો ગાણપત્યો ન સંશયઃ ॥ ૫૯॥

ઇત્યુક્ત્વા ગણનાથસ્તં તત્રૈવાન્તરધીયત ।
નારદસ્તં નમસ્કૃત્ય શાપં ભુક્ત્વા દિવં ગતઃ ॥ ૬૦॥

પુનઃ સ નારદો જાતઃ શિવભક્તિપરાયણઃ ।
નારાયણેન સંજ્ઞપ્તો ગાણપત્યો બભૂવ હ ॥ ૬૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે નારદશાપનિવર્તનં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨.૨

## ૨.૩ નારદભક્તિવર્ણનં નામ તૃતીયોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
કથં નારાયણેનાઽસૌ બોધિતો મુનિસત્તમઃ ।
તન્મે કથય યોગીન્દ્ર ન તૃપ્યામિ કથામૃતાત્ ॥ ૧॥

મુદ્ગલ ઉવાચ ।
(Page ખં. ૨ અ. ૩ પાન ૬)
એકદા નારદો દક્ષ પર્યટઞ્છઙ્કરં ગતઃ ।
તત્ર સમ્પૂજયન્તં તં ગણેશં સ દદર્શ હ ॥ ૨॥

મૂર્તિં ચિન્તામણેઃ સાક્ષાત્ સ્થાપિતાં રત્નનિર્મિતામ્ ।
શુણ્ડાદણ્ડમુખીં ચૈવ શઙ્કરસ્તામપૂજયત્ ॥ ૩॥

તં દૃષ્ટ્વા નિયમે સંસ્થં વિસ્મિતો નારદો મુનિઃ ।
પ્રયયૌ તં નમસ્કૃત્ય વિકુણ્ઠે વિષ્ણુમાદરાત્ ॥ ૪॥

તં પ્રણમ્ય મહાતેજા નારદો વિનયાન્વિતઃ ।
ઉવાચ ભક્તિસંયુક્તો નારાયણ નમોઽસ્તુ તે ॥ ૫॥

ત્વં સાક્ષાજ્જગતામીશો નુદ મે સંશયં પ્રભો ।
કૈલાસમગમં દ્રષ્ટુમહં શઙ્કરમુત્સુકઃ ॥ ૬॥

તત્ર સોઽપિ ગણેશસ્ય મૂર્તિં કૃત્વા જનાર્દન ।
અપૂજયન્મહાભક્ત્યા રોમાઞ્ચિતશરીરવાન્ ॥ ૭॥

અશ્રુપ્રવાહસંયુક્તં પ્રેમ્ણા ચૈવ પરિપ્લુતમ્ ।
ધ્યાનસ્થં શઙ્કરં દૃષ્ટ્વા મૌનવાનભવં પ્રભો ॥ ૮॥

તં પ્રણમ્ય મહાવિષ્ણો ત્વદન્તિકમુપાગતઃ ।
ત્વં ચાપિ ગણરાજસ્ય વદસે નામમન્ત્રકમ્ ॥ ૯॥

શઙ્કરાન્ન પરં કિઞ્ચિદવ્યક્તં બ્રહ્મ કથ્યતે ।
શિવો વિકારહીનશ્ચ સર્વસિદ્ધિપ્રદો મતઃ ॥ ૧૦॥

ત્વં તદીયા મહાશક્તિઃ પ્રભો નારાયણાહ્વયા ।
સદાનન્દસ્વરૂપશ્ચ સર્વાત્મા ચૈવ કથ્યતે ॥ ૧૧॥

કોઽસૌ ગણેશ્વરો નામ ત્વં કથં સ્મરસિ પ્રભો ।
વિશ્વનાથઃ કથં શમ્ભુસ્તં પૂજયતિ નિત્યશઃ ॥ ૧૨॥

એનં મે સંશયં દેવ ચ્છેત્તુમર્હસિ કેશવ ।
સર્વજ્ઞસ્ત્વં રમાનાથ શાધિ માં શિષ્યમાગતમ્ ॥ ૧૩॥

મુદ્ગલ ઉવાચ ।
નારદસ્ય વચઃ શ્રુત્વા પ્રહૃષ્ટઃ કેશવોઽબ્રવીત્ ।
તં ગણેશસ્ય સમ્ભક્તેઃ પાત્રં દૃષ્ટ્વા યથાર્થતઃ ॥ ૧૪॥

નારાયણ ઉવાચ ।
શ ૃણુ નારદ મે વાક્યં સંશયં કુરુ મા મુને ।
યોગશાન્તિસ્વરૂપોઽયં ગણેશો નાત્ર સંશયઃ ॥ ૧૫॥

સિદ્ધિબુદ્ધિપતિઃ સાક્ષાત્ સ્વાનન્દાખ્યે પુરે સ્થિતઃ ।
તસ્ય ભક્તિપ્રભાવેણ વયં વૈ સર્વસિદ્ધિદાઃ ॥ ૧૬॥

વિનાયકઃ સ એકો વૈ વયં નાયકસંયુતાઃ ।
ભજામો ભક્તિયુક્તાસ્તં યોગશાન્ત્યર્થમાદરાત્ ॥ ૧૭॥

એકદાઽહં ગતસ્તત્ર કૈલાસે શઙ્કરાલયે ।
ગણેશં પૂજયન્તં તં શિવં દૃષ્ટ્વા સુવિસ્મિતઃ ॥ ૧૮॥

તસ્ય નિત્યવિધિં પૂર્ણં જાતં દૃષ્ટ્વા તમબ્રવમ્ ।
ત્વં સાક્ષાન્નિર્વિકારશ્ચ મોહહીનઃ સદાશિવ ॥ ૧૯॥

અવ્યક્તં બ્રહ્મ યત્પ્રોક્તં બ્રહ્માધિપતિસંજ્ઞિતમ્ ।
ત્વમેવ વેદવાદેષુ કથં વદસિ વિઘ્નપમ્ ॥ ૨૦॥

કોઽસૌ ગણેશ્વરો નામ તદ્વદસ્વ મમ પ્રભો ।
સર્વજ્ઞસ્ત્વં સદા શમ્ભુઃ શિષ્યં તે તારયસ્વ મામ્ ॥ ૨૧॥

શિવ ઉવાચ ।
શ‍ૃણુ વિષ્ણો રહસ્યં મે શાન્તિદં યોગસેવયા ।
યોગપૂર્ણં ગણેશાખ્યં બ્રહ્મભૂયપદપ્રદમ્ ॥ ૨૨॥

પઞ્ચધા ચિત્તવૃત્તિર્યા સા બુદ્ધિઃ કથ્યતે બુધૈઃ ।
પઞ્ચભેદતયા સર્વં ભુનક્તિ પ્રકૃતિઃ પરા ॥ ૨૩॥

તત્ર મોહપ્રદા સિદ્ધિર્નાનાભ્રાન્તિપ્રકાશિકા ।
સિધ્યર્થં પઞ્ચધા ચિત્તં યત્નયુક્તં બભૂવ હ ॥ ૨૪॥

ધર્માર્થકામમોક્ષાણાં સિદ્ધિઃ સર્વત્ર કથ્યતે ।
(Page ખં. ૨ અ. ૩ પાન ૭)
બ્રહ્મભૂયકરી સાક્ષાજ્જાનીહિ પુરુષોત્તમ ॥ ૨૫॥

બ્રહ્મણિ બ્રહ્મભૂતો યસ્તસ્ય કિં ભ્રાન્તિરુચ્યતે ।
ધર્માર્થકામમોક્ષાણાં બ્રહ્મભૂતસ્ય વા વિભો ॥ ૨૬॥

તસ્ય પઞ્ચવિધં ચિત્તં નાસ્તિ જાનીહિ નિશ્ચિતમ્ ।
તદા યોગી સમાખ્યાતો ગણેશાભેદતાં ગતઃ ॥ ૨૭॥

સમ્પ્રજ્ઞાતસમાધિસ્થો ગકારઃ કથ્યતે બુધૈઃ ।
અસમ્પ્રજ્ઞાતરૂપો વૈ ણકારો વેદવાદિભિઃ ॥ ૨૮॥

તયોઃ સ્વામી ગણેશોઽયં શાન્તિયોગમયઃ સદા ।
નેતિરૂપોઽહમવ્યક્તસ્ત્વં સમાત્મક ઉચ્યસે ॥ ૨૯॥

યત્ર કુત્ર પ્રદૃષ્ટા વૈ વયં સર્વે ભવાત્મકાઃ ।
ભવપ્રત્યયયોગસ્થો ગણેશઃ પઞ્ચધાઽભવત્ ॥ ૩૦॥

સ તુ માયામયઃ પ્રોક્તો વેદેષુ ખલુ કેશવ ।
માયાહીનો ગણેશાન ઉપાયપ્રત્યયાત્મકઃ ॥ ૩૧॥

સાક્ષાદ્ગણેશરૂપે ચ માયાયુક્તવિયુક્તતા ।
નાસ્તિ તસ્માત્સ વૈ શાન્ત્યા લભ્યતે નાન્યથા ક્વચિત્ ॥ ૩૨॥

ગણેશોઽહં સદા બ્રહ્મ બ્રહ્મણાં પતિરઞ્જસા ।
યોગોઽયં ગાણપત્યાખ્યઃ કથિતસ્તે મયા પ્રભો ॥ ૩૩॥

અનેન વિધિના જ્ઞાનં ગાણેશાખ્યં ભવિષ્યતિ ।
ત્યક્ત્વા પઞ્ચવિધં ચિત્તં ભવ ચિન્તામણિઃ પ્રભો ॥ ૩૪॥

એવમુક્ત્વા મહાદેવો વિરરામ ચ નારદ ।
મયા તે કથિતં જ્ઞાનં ગાણેશાખ્યં મહામુને ॥ ૩૫॥

અસ્માકં પદદાતા સ બ્રહ્મભૂયપ્રદસ્તથા ।
ગણેશઃ કુલદેવશ્ચ તસ્માત્તં પ્રભજામહે ॥ ૩૬॥

મુદ્ગલ ઉવાચ ।
તં વિષ્ણું પ્રણિપત્યાઽથ નારદઃ પ્રયયૌ મુનિઃ ।
તપોવનં સમાસાદ્ય યોગાભ્યાસરતોઽભવત્ ॥ ૩૭॥

ગણેશં મનસા ધ્યાયન્નજપન્ મન્ત્રમુત્તમમ્ ।
દશવર્ષૈઃ પ્રસન્નોઽભૂદ્ગણેશસ્તં યયૌ મુનિમ્ ॥ ૩૮॥

તં દૃષ્ટ્વા વિસ્મિતોઽત્યન્તં નારદઃ પ્રણનામ ચ ।
કૃતાઞ્જલિપુટો ભૂત્વા તુષ્ટાવ ગણપં મુનિઃ ॥ ૩૯॥

નારદ ઉવાચ ।
નમામિ ગણનાથં તં સર્વવિઘ્નવિનાશિનમ્ ।
વેદાન્તાગોચરં તજ્જ્ઞૈર્ગમ્યં બ્રહ્મૈવ સંસ્થિતમ્ ॥ ૪૦॥

મનોવાણીવિહીનં નો મનોવાણીમયં ન ચ ।
બ્રહ્મેશાનં કથં સ્તૌમિ સિદ્ધિબુદ્ધિપતિં પરમ્ ॥ ૪૧॥

ત્વદ્દર્શનેન હેરમ્બ કૃતકૃત્યોઽહમઞ્જસા ।
ઇત્યુક્ત્વા પૂજયામાસ ભક્તિભાવસમન્વિતઃ ॥ ૪૨॥

પૂજયિત્વા ગણેશાનં પુનસ્તુષ્ટાવ નારદઃ ।
રોમાઞ્ચિતશરીરોઽસૌ ભાવયુક્તો મહામુનિઃ ॥ ૪૩॥

નમો નમો ગણેશાય વિઘ્નરાજાય તે નમઃ ।
ભક્તાનાં વિઘ્નહન્ત્રે ચાભક્તાનાં વિઘ્નકારિણે ॥ ૪૪॥

અમેયમાયયા ચૈવ સંયુક્તાય નમો નમઃ ।
યોગરૂપાય વૈ તુભ્યં યોગિભ્યો મોહદાય તે ॥ ૪૫॥

વિનાયકાય સર્વેશ નમશ્ચિન્તામણે નમઃ ।
અનન્તમહિમાધાર નમસ્તે ચન્દ્રમૌલયે ॥ ૪૬॥

એકદન્તાય દેવાય માયિભ્યો મોહદાય તે ।
નમો નમઃ પરેશાય પરાત્પરતમાય તે ॥ ૪૭॥

નિર્ગુણાય નમસ્તુભ્યં ગુણાકારાય સાક્ષિણે ।
મહાખુવાહનાયૈવ મૂષકધ્વજધારિણે ॥ ૪૮॥

અનાદયે નમસ્તુભ્યં જ્યેષ્ઠરાજાય ઢુણ્ઢયે ।
હર્ત્રે કર્ત્રે સદા પાત્રે નાનાભેદમયાય ચ ॥ ૪૯॥

ત્વદ્દર્શનસુધાપાનાદ્ધતં મે ભ્રાન્તિજં મહત્ ।
(Page ખં. ૨ અ. ૪ પાન ૮)
મરણં ભિન્નભાવાખ્યં ગણેશોઽહં કૃતસ્ત્વયા ॥ ૫૦॥

ન ભિન્નં પરિપશ્યામિ ત્વદૃતે ગણનાયક ।
શાન્તિદં યોગમાસાદ્ય પ્રસાદાત્તે ન સંશયઃ ॥ ૫૧॥

ભક્તિં દેહિ ગણાધીશ પરાં ત્વત્પાદપદ્મયોઃ ।
કુરુ માં ગાણપત્યં ત્વં પ્રેમયુક્તં ચ તે પદિ ॥ ૫૨॥

ઇત્યુક્ત્વા વિરરામાથ તં પુનર્ગણપોઽવદત્ ।
મદીયા ભક્તિરત્યન્તં ભવિષ્યતિ સદાઽચલા ॥ ૫૩॥

ન યોગાચ્ચલનં ક્વાપિ ભવિષ્યતિ મહામુને ।
સદા યોગીન્દ્રપૂજ્યસ્ત્વં સર્વમાન્યો ભવિષ્યસિ ॥ ૫૪॥

ત્વયા કૃતમિદં સ્તોત્રં શાન્તિયોગપ્રદં ભવેત્ ।
પઠતે શ‌ૃણ્વતે ચૈવ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૫૫॥

ઇત્યુક્ત્વા તસ્ય હૃદયે યયૌ લીનો ગજાનનઃ ।

સદા હૃદિ ગણેશાનં પશ્યતિ સ્મ મુનિઃ સ્વયમ્ ॥ ૫૬॥

ઇત્યાખ્યાનં નારદીયં કથિતં તે પ્રજાપતે ।
શૃણુયાદ્યઃ પઠેદ્વા યઃ સોઽપિ સદ્ગતિમાપ્નુયાત્ ॥ ૫૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીય ખણ્ડે એકદન્તચરિતે નારદભક્તિવર્ણનં નામ તૃતીયોઽધ્યાયઃ ॥ ૨.૩

## ૨.૪ મધુકૈટભવધો નામ ચતુર્થોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતો બ્રહ્મા સસર્જાઽસૌ મુખતો બ્રાહ્મણાન્ સ્વયમ્ ।
બાહુભ્યઃ ક્ષત્રિયાન્ સર્વાનૂરુભ્યો વૈશ્યકાંસ્તથા ॥ ૧॥

પદ્ભ્યઃ શૂદ્રાન્ મહાદેવઃ સસર્જ ગુણપ્રેરિતઃ ।
સંન્યાસં શિરસસ્તદ્વદ્વાનપ્રસ્થાશ્રમં હૃદઃ ॥ ૨॥

નાભ્યાશ્ચ બ્રહ્મચર્યં સ જઙ્ઘાભ્યાં ગૃહિતાં તથા ।
વર્ણાશ્રમાન્ સ વૈ દૃષ્ટ્વા હર્ષિતોઽભૂત્ પિતામહઃ ॥ ૩॥

તતો ધર્મં સ્વયં બ્રહ્મા સસર્જોરઃપ્રદેશતઃ ।
પૃષ્ઠતોઽધર્મરૂપં ચ સુરદૈત્યપ્રવર્તકૌ ॥ ૪॥

તતો દેવાંશ્ચ ગન્ધર્વાનપ્સરોયક્ષકાદિકાન્ ।
અસુરાન્ યાતુધાનાંશ્ચ સસર્જ નિજદેહતઃ ॥ ૫॥

સર્પાન્ પક્ષિગણાંશ્ચૈવ પશુમાનવકાદિકાન્ ।
ક્રિયાયુક્તાન્ સસાર્જાઽસૌ સ્વદેહં પ્રદદૌ તતઃ ॥ ૬॥

તે સર્વે બ્રહ્મણો દેહાત્સમુત્પન્ના મહૌજસઃ ।
વ્યવહારયુતા દક્ષ વવૃધુર્ન તથાપિ તે ॥ ૭॥

તેષાં સ્વર્ગપ્રમાણં ચ શૃણુ મુખ્યં પ્રજાપતે ।
સઙ્ક્ષેપેણ પ્રવક્ષ્યામિ પ્રાકૃતં વૈ કૃતં પરમ્ ॥ ૮॥

પ્રથમો મહતઃ સર્ગો બ્રહ્મણઃ સ તુ કથ્યતે ।
તન્માત્રાણાં દ્વિતીયસ્તુ ભૂતસર્ગઃ પ્રકીર્તિતઃ ॥ ૯॥

વૈકારિકસ્તૃતીયસ્તુ સર્ગ ઐન્દ્રિયકઃ સ્મૃતઃ ।

ઇત્યેતે પ્રાકૃતાઃ સર્ગાઃ સમ્ભૂતા બુદ્ધિપૂર્વકાઃ ॥ ૧૦॥

મુખ્યસર્ગશ્ચતુર્થસ્તુ મુખ્યા વૈ સ્થાવરાઃ સ્મૃતાઃ ।
તિર્યક્સ્રોતસ્તુ યઃ પ્રોક્તસ્તિર્યક્યોનિઃ સ પઞ્ચમઃ ॥ ૧૧॥

તથોર્ધ્વસ્રોતસાં ષષ્ઠો દેવસર્ગસ્તુ સ સ્મૃતઃ ।
તતોઽર્વાક્સ્રોતસાં સર્ગઃ સપ્તમઃ સ તુ માનવઃ ॥ ૧૨॥

અષ્ટમો ભૌતિકઃ સર્ગો ભૂતાદીનાં પ્રકીર્તિતઃ ।
નવમશ્ચૈવ કૌમારો જ્ઞાતવ્યો વિબુધૈસ્તથા ॥ ૧૩॥

વિકૃતાઃ ષટ્ સમાખ્યાતા પ્રાકૃતાશ્ચ ત્રયો મતાઃ ।
(Page ખં. ૨ અ. ૪ પાન ૯)
નવસર્ગાઃ પ્રવિજ્ઞેયાઃ પ્રાકૃતા વૈકૃતા ઇમે ॥ ૧૪॥

પ્રાકૃતા યે ત્રયઃ સર્ગા બુદ્ધિપૂર્વાઃ પ્રકીર્તિતાઃ ।
બુદ્ધિપૂર્વં પ્રવર્તન્તે તત્ત્વાદ્યૈઃ સર્વજન્તવઃ ॥ ૧૫॥

એવં સૃષ્ટ્વા સ્વયં બ્રહ્મા પ્રજા નાનાવિધાઃ પ્રભો ।
વવૃધુર્ન પ્રજાસ્તસ્ય તેન સન્દુઃખિતોઽભવત્ ॥ ૧૬॥

તતસ્તસ્ય શરીરાદ્વૈ દામ્પત્યં નિઃસૃતં પરમ્ ।
વામાઙ્ગાત્મકૃતી રમ્યા શતરૂપા ચ સા સ્મૃતા ॥ ૧૭॥

દક્ષિણાઙ્ગાત્તુ સમ્ભૂતઃ પુરુષઃ સ મનુઃ સ્મૃતઃ ।
સ્વાયમ્ભુવો મહાભાગ આદ્યઃ ક્ષત્રિયધર્મવિત્ ॥ ૧૮॥

બદ્ધાઞ્જલિપુટૌ ચોભૌ વચો બહ્માણમૂચતુઃ ।
આજ્ઞાં કુરુ મહાભાગ કિં કુર્યાવ પ્રજાપતે ॥ ૧૯॥

તતો બ્રહ્મા સ્વયં જાતૌ તૌ જગાદ પ્રહર્ષિતઃ ।
અતુલાં સૃજતં સૃષ્ટિં મૈથુનીં તપસો બલાત્ ॥ ૨૦॥

તતસ્તૌ તં પ્રણમ્યાદૌ જગ્મતુર્વનમુત્તમમ્ ।
પ્રતેપાતે તપો ઘોરં વિચિન્ત્ય ગણપં હૃદિ ॥ ૨૧॥

તતો વિધાતૃચ્છાયાયાઃ કર્દમો મુનિસત્તમઃ ।
સનુત્પન્નશ્ચ તં દૃષ્ટ્વા બ્રહ્મોવાચ સૃજ પ્રજાઃ ॥ ૨૨॥

સ મુનિર્વનમાગત્ય તતાપ પરમં તપઃ ।
વિષ્ણું ધ્યાત્વા પ્રજાકામઃ શુક્લરૂપં યથાવિધિ ॥ ૨૩॥

એતસ્મિન્નન્તરે જાતૌ વિષ્ણુકર્ણમલોદ્ભવૌ ।
મધુકૈટભનામાનૌ દૈત્યૌ પરમદારુણૌ ॥ ૨૪॥

તાભ્યાં સ્વભુજવીર્યેણ જિતં ત્રિભુવનં તદા ।
દેવાઃ સર્વે ભયોદ્વિગ્નાઃ પલાયન્ત દિશાસુ ચ ॥ ૨૫॥

બ્રહ્માણં ભક્ષિતું યાતૌ તેન નિદ્રા સ્તુતા તદા ।
નિદ્રયા વિષ્ણુરવ્યક્તો મુક્તઃ સન્નુત્થિતો બભૌ ॥ ૨૬॥

તેન યુદ્ધં મહાઘોરં કૃતં તાભ્યાં ભયાનકમ્ ।
મલ્લયુદ્ધેન તૌ જેતું ન શશાક જનાર્દનઃ ॥ ૨૭॥

પઞ્ચવર્ષસહસ્રાણિ યુયુધે હરિરવ્યયઃ ।
તતો હરિં મમૃદતુર્મહાદૈત્યૌ બલાન્વિતૌ ॥ ૨૮॥

તતો વિષ્ણુઃ સ્વમાત્માનમતંર્ધાય પલાયત ।
શરણં શઙ્કરં ચૈવ યયૌ ભાવસમન્વિતઃ ॥ ૨૯॥

પ્રણિપત્ય મહેશાનં જગાદ ભયસઙ્કુલઃ ।
વૃત્તાન્તં યુદ્ધસમ્ભૂતં જયોપાયં વદસ્વ મે ॥ ૩૦॥

તેન સઙ્કથિતં તસ્મૈ ગણેશો વિસ્મૃતસ્ત્વયા ।
તમારાધય યત્નેન તતઃ સિદ્ધિમવાપ્સ્યસિ ॥ ૩૧॥

ષડક્ષરં મહામન્ત્રં ગણેશાય દદૌ શિવઃ ।
સ યયૌ તપસે દેશે દણ્ડકારણ્યસંજ્ઞકે ॥ ૩૨॥

તત્ર પદ્માસનં કૃત્વા ધ્યાત્વા દેવં ગજાનનમ્ ।
ષડક્ષરવિધાનેન તતાપ પરમં તપઃ ॥ ૩૩॥

સહસ્રવર્ષપર્યન્તં તપસ્તપ્તં સુદારુણમ્ ।
તદા તં વરદાનાય વિષ્ણું ગણપતિર્યયૌ ॥ ૩૪॥

તં દૃષ્ટ્વા પ્રણનામાથ પૂજયામાસ ભક્તિતઃ ।
મહાવિષ્ણુઃ પ્રસન્નાત્મા પ્રણનામ ગજાનનમ્ ॥ ૩૫॥

બદ્ધાઞ્જલિપુટો ભૂત્વા તં તુષ્ટાવ ગણેશ્વરમ્ ।
નાનાભાવસમાયુક્તં વરદં ભક્તવત્સલમ્ ॥ ૩૬॥

શ્રીમહાવિષ્ણુરુવાચ ।

નમો ગણપતે તુભ્યં વિઘ્નરાજાય તે નમઃ ।
નમઃ કૃપાનિધે ઢુણ્ઢે ભક્તસંરક્ષકાય તે ॥ ૩૭॥

સિદ્ધિબુદ્ધિપતે તુભ્યં નમસ્તે વિઘ્નહારિણે ।
અભક્તેભ્યઃ સદા વિઘ્નદાત્રે હેરમ્બરૂપિણે ॥ ૩૮॥

(Page ખં. ૨ અ. ૫ પાન ૧૦)
નિર્ગુણાય ગુણાનાં વૈ ચાલકાય નમો નમઃ ।
નમઃ પ્રપઞ્ચરૂપાય પ્રપઞ્ચરહિતાય તે ॥ ૩૯॥

બ્રહ્મભ્યો બ્રહ્મદાત્રે ચ બ્રહ્મણે બ્રહ્મરૂપિણે ।
નરકુઞ્જરરૂપાય નાનામાયામયાય તે ॥ ૪૦॥

કારણાનાં ચ દેવેશ કારણાય નમો નમઃ ।
જ્યેષ્ઠરાજાય વૈ તુભ્યં કારણૈ રહિતાય ચ ॥ ૪૧॥

યોગિનાં હૃદિ સંસ્થાય યોગિભ્યો યોગદાયિને ।
યોગરૂપધરાયૈવ ગણેશાય નમો નમઃ ॥ ૪૨॥

માયાશ્રયાય માયાયા આધારાય નમો નમઃ ।
માયિભ્યો માયયા ત્વં વૈ મોહદાતા નમો નમઃ ॥ ૪૩॥

ત્વાં સ્તોતું કઃ સમર્થઃ સ્યાદ્યોગાકારેણ વર્તસે ।
યત્ર વેદા વિકુણ્ઠાશ્ચ શાસ્ત્રૈઃ સર્વૈઃ સહાઙ્ગકૈઃ ॥ ૪૪॥

મનોવાણીવિહીનસ્ત્વં ન હિ દેવ કૃપાકર ।
મનોવાણીમયો નૈવ કથં ત્વાં સ્તૌમિ વિઘ્નપમ્ ॥ ૪૫॥

તથાપિ બુદ્ધિદાતા ત્વં ત્વત્પ્રસાદેન સંસ્તુતઃ ।
ધન્યોઽહં દેવદેવેશ તવ દર્શનતોઽધુના ॥ ૪૬॥

સાક્ષાદ્ દૃષ્ટ્વા ગણેશં ત્વાં તેનાહં બ્રહ્મરૂપકઃ ।
જાતો નાસ્ત્યત્ર સન્દેહો યોગીન્દ્રો યોગદાયકઃ ॥ ૪૭॥

ઇત્યુક્ત્વા તં પ્રણમ્યાઽસૌ ત્વનૃત્યદ્ ભક્તિભાવિતઃ ।
રોમાઞ્ચિતશરીરશ્ચ હર્ષાશ્રુભિરપિપ્લુતઃ ॥ ૪૮॥

તમુવાચ ગણાધીશો વરં વૃણુ જનાર્દન ।
તપસા ભક્તિભાવેન તુષ્ટો દાસ્યામિ વાઞ્છિતમ્ ॥ ૪૯॥

ત્વયા કૃતમિદં સ્તોત્રં સર્વસિદ્ધિપ્રદાયકમ્ ।

ભવિષ્યતિ નૃણાં વિષ્ણો પઠતાં શ્ૃણ્વતાં સદા ॥ ૫૦॥

ધર્માર્થકામમોક્ષાણાં સાધકં પ્રભવિષ્યતિ ।
ઈપ્સિતાર્થપ્રદં સદ્યઃ પ્રસાદાન્મે ચ કેશવ ॥ ૫૧॥

મુદ્ગલ ઉવાચ ।
ગણેશવચનં શ્રુત્વા વિષ્ણુર્હર્ષસમન્વિતઃ ।
જગાદ તં પ્રણમ્યાદૌ વાઞ્છિતં સંવૃણે ત્વિતિ ॥ ૫૨॥

વિષ્ણુરુવાચ ।
યદિ પ્રસન્નતાં યાતસ્તદા ભક્તિં સુદુર્લભામ્ ।
તવ પાદયુગે દેહિ દૃઢામવ્યભિચારિણીમ્ ॥ ૫૩॥

અન્યદ્દેહિ ગણાધીશ જ્ઞાનં મે હ્યતુલં તથા ।
કીર્તિં સર્વત્ર મે દેહિ સામર્થ્યં વિવિધં તથા ॥ ૫૪॥

મધુકૈટભનાશાર્થમુપાયં વદ સામ્પ્રતમ્ ।
અન્યદૈત્યાભિહનને સામર્થ્યં દેહિ વિઘ્નપ ॥ ૫૫॥

તસ્ય તદ્વચનં શ્રુત્વા તથેતિ ગણપોઽબ્રવીત્ ।
યુદ્ધાય ગચ્છ દેવેશ દૈત્યૌ જેષ્યસિ તૌ બલાત્ ॥ ૫૬॥

તયોર્મરણમત્યન્ત સુગુપ્તં બ્રહ્મણા કૃતમ્ ।
સમયે વરદાનસ્ય તપસા તોષિતેન ચ ॥ ૫૭॥

સ્વમુખેન યદા મૃત્યું દૈત્યૌ તૌ કથયિષ્યતઃ ।
તદા તેન પ્રકારેણ જહિ દૈત્યૌ મહાબલૌ ॥ ૫૮॥

અહં માયાં સમાશ્રિત્ય તયોસ્તવ હૃદિ પ્રભુઃ ।
વાસં કૃત્વા તવાધીનૌ કરિષ્યામિ ન સંશયઃ ॥ ૫૯॥

મદીયસ્મરણં ચિત્તે કરિષ્યતિ યદા ભવાન્ ।
જયોપાયં તદા વિષ્ણો જ્ઞાસ્યસે દૈત્યનાશકમ્ ॥ ૬૦॥

એવમુક્ત્વાન્તર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
વિષ્ણુસ્તત્ર મહામૂર્તિં સ્થાપયામાસ સુદ્વિજૈઃ ॥ ૬૧॥

પૂજયામાસ તાં મૂર્તિમુપચારૈઃ સુપુષ્કલૈઃ ।
સિદ્ધિક્ષેત્રં સુવિખ્યાતં તદાદૈઃ પ્રબભૂવ હ ॥ ૬૨॥

અનુષ્ઠાને કૃતે તત્ર નાનાસિદ્ધિકરં પરમ્ ।

ક્ષેત્રં બભૂવ વિખ્યાતં ગાણેશં સિદ્ધસેવિતમ્ ॥ ૬૩॥

(Page ખં. ૨ અ. ૫ પાન ૧૧)
તત્ર વિષ્ણુઃ સદા વાસં ચક્રે વૈ ભક્તિસંયુતઃ ।
સદારઃ પરિવારેણાપૂજયન્નિત્યમાદરાત્ ॥ ૬૪॥

તં પ્રણમ્ય ગણાધીશં યયૌ યુદ્ધાય સત્વરઃ ।
ગણેશં મનસા ધ્યાત્વા તૌ ચિચ્છેદ મહાબલૌ ॥ ૬૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે મધુકૈટભવધો નામ ચતુર્થોઽધ્યાયઃ ॥ ૨.૪

## ૨.૫ સ્વાયમ્ભુવવરપ્રદાનં નામ પઞ્ચમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
નવબ્રહ્મસુતાઃ પ્રોક્તાસ્તેપુસ્તે પરમં તપઃ ।
દિવ્યવર્ષસહસ્રં ચ ગણેશં હૃદ્યચિન્તયન્ ॥ ૧॥

એકાક્ષરવિધાનેન પૂજયન્તશ્ચ નિત્યશઃ ।
વાયુમાત્રાશિનઃ સર્વે તોષયામાસુરાદરાત્ ॥ ૨॥

તતસ્તેષાં પ્રસન્નોઽભૂદ્ગણેશો ભક્તવત્સલઃ ।
આયયૌ તાન્ વરં દાતું મૂષકોપરિ સંસ્થિતઃ ॥ ૩॥

અનન્તસૂર્યસઙ્કાશં દૃષ્ટ્વા તં હર્ષસંયુતાઃ ।
સૌમ્યરૂપં પ્રણેમુસ્તે નિબદ્ધકરસમ્પુટાઃ ॥ ૪॥

તુષ્ટુવુઃ પરમાત્માનં ગણેશં દક્ષમુખ્યકાઃ ।
તદ્દર્શનજબોધેન ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૫॥

પ્રજાપતય ઊચુઃ ।
નમસ્તે વિઘ્નનાથાય નમસ્તે સર્વસાક્ષિણે ।
સર્વાત્મને સ્વસંવેદ્યરૂપિણે તે નમો નમઃ ॥ ૬॥

યોગાય જગતાં પાત્રે બ્રહ્મદાત્રે નમો નમઃ ।
યોગિનાં ગમ્યરૂપાય શાન્તિયોગપ્રદાય તે ॥ ૭॥

સ્રષ્ટ્રે પાત્રે ચ સંહર્ત્રે નાનારૂપધરાય તે ।

અવ્યક્તાય વ્યક્તકાય વ્યક્તાવ્યક્તાય તે નમઃ ॥ ૮॥

બ્રહ્મણે વિષ્ણવે ચૈવ શઙ્કરાય ચ ભાનવે ।
શક્તયે ચન્દ્રરૂપાય યમાય ચ નમો નમઃ ॥ ૯॥

અગ્નયે નૈરૃતાયૈવ વારુણાય ચ વાયવે ।
કુબેરાય ચ રુદ્રાય શેષાય ચ નમો નમઃ ॥ ૧૦॥

ગ્રહનક્ષત્રરૂપાય સિદ્ધસાધ્યમયાય ચ ।
પશવે નરરૂપાય વૃક્ષાકારાય તે નમઃ ॥ ૧૧॥

પર્વતાય સમુદ્રાય નદીનદસુરૂપિણે ।
દૈત્યાય દૈત્યનાથાય રાક્ષસાય નમો નમઃ ॥ ૧૨॥

અન્નાય ફલરૂપાય રસરૂપાય તે નમઃ ।
પઞ્ચભૂતમયાયૈવ સર્વાકારાય તે નમઃ ॥ ૧૩॥

ચિદ્રૂપાય ચ બોધાય વિદેહાય નમો નમઃ ।
અસત્યાય ચ સત્યાય સમરૂપાય સાધયે ॥ ૧૪॥

સ્વાનન્દાય હ્યયોગાય યોગાય ગણધારિણે ।
ગણેશાય નમસ્તુભ્યં સર્વશાન્તિપ્રદાય ચ ॥ ૧૫॥

ચિન્તામણિં ત્વાં કઃ સ્તોતું સમર્થઃ સ્યાત્પ્રકાશકમ્ ।
ચિત્તસ્ય ચિત્તવૃત્તીનામતસ્ત્વાં પ્રણમામહે ॥ ૧૬॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા ગણેશં તં પ્રણતાસ્તે પ્રજાપતે ।
તાનુવાચ ગણાધીશો વૃણુધ્વં વિવિધાન્ વરાન્ ॥ ૧૭॥

ભવદ્ભિર્યત્ કૃતં સ્તોત્રં મમ માન્યં ભવિષ્યતિ ।
યઃ પઠિષ્યતિ ભાવેન શ્રોષ્યતે સર્વસિદ્ધિદમ્ ॥ ૧૮॥

પુત્રપૌત્રકલત્રાદિપ્રદં તેભ્યો ભવિષ્યતિ ।
વન્ધ્યદોષહરં ધાન્યધનદં પશુદં પરમ્ ॥ ૧૯॥

ભુક્તિમુક્તિપ્રદં સ્તોત્રં બ્રહ્મભૂયકરમ્ભવેત્ ।
(Page ખં. ૨ અ. ૫ પાન ૧૨)
મનઈપ્સિતદં પુણ્યં નરાણાં નાત્ર સંશયઃ ॥ ૨૦॥

ગણેશવચનં શ્રુત્વા ત એવં હર્ષસંયુતાઃ ।

તં પ્રણમ્ય મહાભક્ત્યા ઊચુઃ પ્રાઞ્જલયોઽભવન્ ॥ ૨૧॥

ત ઊચુઃ ।
યદિ પ્રસન્નતાં યાતસ્તદા દેહિ ગજાનન ।
ત્વદીયામચલાં ભક્તિં યયા મોહો વિનશ્યતિ ॥ ૨૨॥

સામર્થ્યમતુલં સૃષ્ટેર્દેહિ નો વિઘ્નનાયક ।
યદ્યદિચ્છામહે ઢુણ્ઢે તત્તત્ સિધ્યતુ સર્વદા ॥ ૨૩॥

ઓમિત્યુક્ત્વા ગણાધીશોન્તર્ધાનં પ્રચકાર વૈ ।
તેઽપિ તં મનસા ધ્યાત્વા યયુઃ સ્વસ્વપદં તતઃ ॥ ૨૪॥

તતો બ્રહ્મા પુનર્દક્ષમગાદીત્ પુત્રમુત્તમમ્ ।
શક્તેસ્તપસ્ત્વયા કાર્યં સા તે પુત્રી ભવિષ્યતિ ॥ ૨૫॥

તતો દક્ષેણ તપસારાધિતા શક્તિરાદરાત્ ।
શતવર્ષે પ્રસન્ના સા યયૌ તસ્યાન્તિકં સ્વયમ્ ॥ ૨૬॥

તતસ્તાં પ્રણનામાથ તુષ્ટાવ પ્રકૃતાઞ્જલિઃ ।
દક્ષ ઉવાચ ।
નમસ્તે શક્તિરૂપાયૈ માયામોહસ્વરૂપિણિ ॥ ૨૭॥

જગદ્ધાત્ર્યૈ નમસ્તુભ્યં જગન્માતર્નમો નમઃ ।
સર્વેષાં પ્રાણદાત્ર્યૈ તે સર્વરૂપિણિ તે નમઃ ॥ ૨૮॥

અનાદ્યૈ ચાદિભૂતાયૈ પાર્વત્યૈ તે નમો નમઃ ।
ગાયત્રિકા શ્રીસાવિત્રીરૂપાયૈ તે નમો નમઃ ॥ ૨૯॥

પ્રકૃત્યૈ પુરુષાખ્યાયૈ નામરૂપપ્રકાશિનિ ।
નિર્ગુણાયૈ ગુણાનાં વૈ ધારિકાયૈ નમો નમઃ ॥ ૩૦॥

પ્રસીદ ભવ મે પુત્રી દાક્ષાયણિ નમો નમઃ ।
તતસ્તં પાર્વતી પ્રાહ ભક્તં દક્ષપ્રજાપતિમ્ ॥ ૩૧॥

શક્તિરુવાચ ।
ભવિષ્યામિ સુતા તેઽહં નાનારૂપધરા સુત ।
જગચ્ચ પૂરયિષ્યામિ જનયિત્વા સુતાઃ સુતાન્ ॥ ૩૨॥

ત્વયા કૃતં મદીયં યત્સ્તોત્રં ખ્યાતિં ગમિષ્યતિ ।
સર્વકામપ્રદં પૂર્ણં પઠતે શ ૃણ્વતે ભવેત્ ॥ ૩૩॥

અન્તર્ધાનં યયૌ દેવી પશ્યતસ્તે પ્રજાપતે ।
ત્વયા ગણેશનામ્નશ્ચ સ્મરણં ત્યક્તમદ્ય વૈ ॥ ૩૪॥

મન્ત્રસ્તસ્ય પરિત્યક્તઃ સ્વેન દુર્બુદ્ધિધારિણા ।
ત્વયા તિરસ્કૃતા પુત્રી સતી ભસ્મત્વમાગતા ॥ ૩૫॥

ત્વમપિ શોકસંયુક્તઃ કૃતો વિઘ્નેશ્વરેણ વૈ ।
પૂર્વસંસ્કારયોગેન સ્મૃતિસ્તવ સમાગતા ॥ ૩૬॥

અધુના ભાવયુક્તસ્તં શૃણુ મે તત્કથામૃતમ્ ।
રાજ્યલક્ષ્મીશ્ચ સમ્પ્રાપ્તા યં ચ તસ્ય પ્રમાદદા ॥ ૩૭॥

તયા યુક્તઃ પુમાન્ સદ્યો મદાન્ધો જાયતે કિલ ।
અતઃ સન્તશ્ચ નેચ્છન્તિ લક્ષ્મીં જ્ઞાનવિનાશિનીમ્ ॥ ૩૮॥

મનુઃ સ્વાયમ્ભુવઃ ખ્યાતઃ સપત્નીકો યયૌ વનમ્ ।
અષ્ટાક્ષરવિધાનેન તોષયામાસ વિઘ્નપમ્ ॥ ૩૯॥

તતાપ સ તપો ઘોરં દિવ્યવર્ષસહસ્રકમ્ ।
પ્રસન્નોઽભૂત્તદા તસ્મૈ વરં દાતું સમાયયૌ ॥ ૪૦॥

તં દૃષ્ટ્વા પ્રણનામાદૌ મનુઃ સ્વાયમ્ભુવઃ પ્રભો ।
પૂજયન્ પરયા ભક્ત્યા તતસ્તુષ્ટાવ વિઘ્નપમ્ ॥ ૪૧॥

સ્વાયમ્ભુવ ઉવાચ ।
નમસ્તે ગજવક્ત્રાય હેરમ્બાય નમો નમઃ ।
ઓઙ્કારાકૃતિરૂપાય સગુણાય નમો નમઃ ॥ ૪૨॥

નૈર્ગુણ્યે ગજરૂપાય સદા બ્રહ્મસુખાત્મને ।
ગણેશાય સદા ભક્તપોષકાય નમો નમઃ ॥ ૪૩॥

નરકુઞ્જરરૂપાય યોગાભેદાય તે નમઃ ।
ચતુર્બાહુધરાયૈવ પુરુષાર્થપ્રસિદ્ધયે ॥ ૪૪॥

(Page ખં. ૨ અ. ૫ પાન ૧૩)
નાનાભોગધરાયૈવાનન્તલીલાસ્વરૂપિણે ।
વિઘ્નરાજાય દેવાય ભક્તવિઘ્નવિદારિણે ॥ ૪૫॥

સત્યાસત્યમયાયૈવાવ્યક્તભેદાત્મને નમઃ ।
સ્વાનન્દપતયે તુભ્યં સદા સ્વાનન્દદાયિને ॥ ૪૬॥

નમસ્તે મૂષકારૂઢસર્વાન્તરસુભોગિને ।
નાનામૃતસમુદ્રે ચ ક્રીડાકર નમોઽસ્તુ તે ॥ ૪૭॥

સિદ્ધિબુદ્ધિપતે તુભ્યં દ્વેધામાયાપ્રસારિણે ।
ભક્તેભ્યો યોગદાત્રે ચ યોગાકારાય તે નમઃ ॥ ૪૮॥

વેદોપનિષદાં લભ્યમહાવાક્યમયાય તે ।
બ્રહ્મભૂતાય વૈ તુભ્યં નમસ્તે બ્રહ્મરાશયે ॥ ૪૯॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યત્ર વેદાશ્ચ વિસ્મિતાઃ ।
યોગિનઃ શેષમુખ્યા વૈ શઙ્કરાદ્યા મહેશ્વરાઃ ॥ ૫૦॥

તથાપિ તવ જાતેન દર્શનેન ગજાનન ।
સ્ફૂર્તિઃ પ્રાપ્તા તયા નાથ સંસ્તુતોઽસિ મયા પ્રભો ॥ ૫૧॥

અહો ભાગ્યમહો ભાગ્યં યેન દૃષ્ટો ગજાનનઃ ।
વેદાન્તાગોચરો ગમ્યો ધન્યોઽહં જગતીતલે ॥ ૫૨॥

ધન્યો મે જનકો દેવ તપો જ્ઞાનં કુલં પ્રભો ।
વિદ્યા વ્રતાદિકં સર્વં ધન્યં તે પાદદર્શનાત્ ॥ ૫૩॥

ઇતિ સ્તુત્વા ગણાધીશં ભક્ત્યા પરમયા યુતઃ ।
સરોમાઞ્ચોઽભવત્તત્ર પ્રણનામ પુનઃ પુનઃ ॥ ૫૪॥

તમુત્થાપ્ય ગણાધીશોઽગાદીત્તં ભક્તમુત્તમમ્ ।
વરં વૃણુ મહાભાગ યસ્તે મનસિ વર્તતે ॥ ૫૫॥

કૃતં ત્વયા મદીયં યત્ સ્તવનં તોષકારકમ્ ।
પઠતે શ◌ૃણ્વતે ચાપિ સર્વદં પ્રભવિષ્યતિ ॥ ૫૬॥

પુત્રપૌત્રાદિવિભવપ્રદં શોકવિનાશનમ્ ।
ધનધાન્યસમૃદ્ધ્યાદિપ્રદં ભાવિ ન સંશયઃ ॥ ૫૭॥

ધર્માર્થકામમોક્ષાણાં સાધનં બ્રહ્મદાયકમ્ ।
દૃઢભક્તિકરં મે ચ ભવિષ્યતિ ન સંશયઃ ॥ ૫૮॥

ઇતિ બ્રુવન્તં વિઘ્નેશમુવાચ મનુસત્તમઃ ।
સ્વાયમ્ભુવઃ પ્રસન્નાત્મા કૃતાઞ્જલિરુદારધીઃ ॥ ૫૯॥

મનુરુવાચ ।
યદિ પ્રસન્નતાં યાતસ્તદા દેહિ ગજાનન ।

ભક્તિં દૃઢાં ત્વદીયાં મે યયા મોહો ન વિદ્યતે ॥ ૬૦॥

સૃષ્ટેઃ કરણસામર્થ્યં ધર્મપાલનમુત્તમમ્ ।
પ્રજારક્ષકતાં દેહિ દેવ દેવેશ મે ચિરમ્ ॥ ૬૧॥

યદ્યદિચ્છામિ વિઘ્નેશ તત્તત્ સિધ્યતુ સર્વદા ।
તવ ભક્તેષુ વાસો મે સદા ભવતુ માનદ ॥ ૬૨॥

તથેતિ તમુવાચાદાવન્તર્ધાનં ચકાર હ ।
ગણેશાનો નિજે લોકેઽગમદ્વૈ ભક્તવત્સલઃ ॥ ૬૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે સ્વાયમ્ભુવવરપ્રદાનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૨.૫

## ૨.૬ દક્ષકન્યાવંશવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતઃ સ્વાયમ્ભુવો યાતો બ્રહ્માણં પ્રણનામ સઃ ।
શતરૂપા તથા તં વૈ જગ્મતુસ્તૌ તદાજ્ઞયા ॥ ૧॥

(Page ખં. ૨ અ. ૭ પાન ૧૪)
રાજ્યં ચકાર ધર્મેણ મનુઃ શસ્ત્રધરઃ પ્રભુઃ ।
ધર્મયુક્તો મહાતેજા ગાણપત્યપ્રિયોઽભવત્ ॥ ૨॥

દ્વૌ પુત્રૌ શતરૂપાયાઃ કન્યાસ્તિસ્રઃ પ્રજાપતે ।
મૈથુનેનૈવ માર્ગેણ સમુત્પાદ્ય બભૌ મનુઃ ॥ ૩॥

પ્રિયવ્રતોત્તાનપાદૌ પુત્રૌ તસ્ય ચ ધીમતઃ ।
આકૂતિર્દેવહૂતિશ્ચ પ્રસૂતિશ્ચ સુલોચનાઃ ॥ ૪॥

કન્યાસ્તિસ્રઃ સમાખ્યાતા મનોસ્તસ્ય મહાત્મનઃ ।
પ્રસૂતિં સ દદૌ તુભ્યમાકૂતિં રુચયે તથા ॥ ૫॥

દેવહૂતિં મનુસ્તત્ર કર્દમાય દદૌ સ્વયમ્ ।
એવમાદિ મહારાજશ્ચકાર વિધિનોદિતઃ ॥ ૬॥

કર્દમસ્તપસા વિષ્ણું તોષયામાસ યત્નતઃ ।
શતવર્ષૈઃ પ્રસન્નોઽભૂદ્યયૌ દાતું વરં દ્વિજમ્ ॥ ૭॥

તં યયાચે સ પુત્રસ્ત્વં ભવ મે જગદીશ્વર ।
વરં દત્ત્વા સ્વયં વિષ્ણુર્યયૌ વૈકુણ્ઠમઞ્જસા ॥ ૮॥

તતઃ સ દેવહૂત્યાં વૈ વિષ્ણુઃ કપિલરૂપધૃક્ ।
તસ્ય પુત્રત્વમાપન્નો વરદાનપ્રભાવતઃ ॥ ૯॥

આકૂત્યાં મિથુનં જજ્ઞે રુચેર્વૈ માનસં પરમ્ ।
યજ્ઞશ્ચ દક્ષિણા દેવી યાભ્યાં સંવર્ધિતં જગત્ ॥ ૧૦॥

યજ્ઞો વિષ્ણુર્મહાભાગો દક્ષિણાયાં સુતાન્ શુભાન્ ।
દ્વાદશાજનયચ્ચૈવ યામા દેવાશ્ચ તે સ્મૃતાઃ ॥ ૧૧॥

તતો યજ્ઞસ્તપોયુક્તઃ સસ્ત્રીકશ્ચાભવત્ પ્રભુઃ ।
ગણપં યોગમાર્ગેણ તોષયામાસ સર્વદા ॥ ૧૨॥

કૃત્વા મણિમયીં મૂર્તિં ગણેશસ્ય ચતુર્ભુજામ્ ।
નિત્યં મુનિગણૈર્યુક્તોઽપૂજયત્ ભક્તિભાવિતઃ ॥ ૧૩॥

તતો ગણપતિઃ પ્રીતો દદૌ યોગં મહાદ્ભુતમ્ ।
તેન યોગીન્દ્રમુખ્યોઽસૌ ગાણપત્યો બભૂવ હ ॥ ૧૪॥

હેરમ્બેતિ સદા મન્ત્રં યજ્ઞો હર્ષાજ્જજાપ હ ।
શિષ્યેભ્યઃ પ્રદદૌ યોગં ગાણપત્યં મુદાન્વિતઃ ॥ ૧૫॥

પ્રસૂત્યાં જનયામાસ કન્યા દક્ષઃ પ્રજાપતિઃ ।
ચતુર્વિંશતિ સઙ્ખ્યાતા શક્ત્યંશાઃ સર્વમાતરઃ ॥ ૧૬॥

શ્રદ્ધા લક્ષ્મીર્ધૃતિસ્તુષ્ટિઃ પુષ્ટિર્મેધા ક્રિયા તથા ।
બુદ્ધિર્લજ્જા વપુઃ શાન્તિઃ સિદ્ધિઃ કીર્તિસ્ત્રયોદશ ॥ ૧૭॥

દદૌ ધર્માય પત્ન્યર્થં દક્ષો હૃષ્ટમના મુને ।
બ્રહ્મણા નોદિતશ્ચૈવ તાસાં સૂતિં વદામિ તે ॥ ૧૮॥

શ્રદ્ધાપુત્રઃ સ્મૃતઃ કામોઽર્થશ્ચ લક્ષ્મીસુતોઽભવત્ ।
ધૃત્યાસ્તુ નિયમઃ પુત્રસ્તુષ્ટ્યાઃ સન્તોષસંજ્ઞિતઃ ॥ ૧૯॥

પુષ્ટ્યાં લાભઃ સુતો જજ્ઞે મેધાપુત્રઃ શમઃ સ્મૃતઃ ।
ક્રિયાયાશ્ચ સ્મૃતૌ પુત્રૌ દણ્ડઃ સમય એવ ચ ॥ ૨૦॥

બુદ્ધ્યા બોધોઽભવત્પુત્રશ્ચાપ્રમાદઃ પ્રકીર્તિતઃ ।
લજ્જાયા વિનયશ્ચૈવ વપુષો વ્યવસાયકઃ ॥ ૨૧॥

શાન્તિપુત્રસ્તથા ક્ષેમઃ સિદ્ધેઃ સિદ્ધઃ સુતોઽભવત્ ।
યશઃકીર્તિસુતઃ પ્રોક્ત ઇત્યેતે ધર્મસૂનવઃ ॥ ૨૨॥

કામસ્યાઽભૂત્ સુતો હર્ષ આનન્દશ્ચાપરઃ સ્મૃતઃ ।
ઇત્યેષ સુખરૂપસ્તુ સર્ગો ધર્મસ્ય કીર્તિતઃ ॥ ૨૩॥

પ્રસઙ્ગાત્તં વદિષ્યામિ સર્ગોઽધર્મસ્ય દુઃખદઃ ।
બ્રહ્મણઃ પૃષ્ઠતસ્તદ્વન્મિથુનં સમ્બભૂવ હ ॥ ૨૪॥

અધર્મશ્ચ તથા હિંસા તયોઃ પુત્રોઽનૃતઃ સ્મૃતઃ ।
નિકૃતિશ્ચ સુતા પ્રોક્તા તયોર્જજ્ઞે ભયં તથા ॥ ૨૫॥

નરકશ્ચ તથા માયા વેદના ચ સુતે સ્મૃતે ।
(Page ખં. ૨ અ. ૬ પાન ૧૫)
ભયાજ્જજ્ઞે ચ માયાયાં મૃત્યુઃ સર્વાપહારકઃ ॥ ૨૬॥

નરકાદ્વેનાયાં ચ દુઃખં સંસારકારકમ્ ।
મૃત્યોર્વ્યાધિર્જરા શોકસ્તૃષ્ણા ક્રોધશ્ચ જજ્ઞિરે ॥ ૨૭॥

દુઃખોદર્કાઃ સ્મૃતાઃ સર્વે હ્યધર્મપ્રભવા મુને ।
નૈતેષાં પ્રસવશ્ચાસ્તિ સર્વે તે તૂર્ધ્વરતેસઃ ॥ ૨૮॥

એકાદશ સુતાઃ શિષ્ટાસ્તાસાં વંશં નિબોધય ।
સતીં દદૌ સ રુદ્રાય ખ્યાતિં ચ ભૃગવે તથા ॥ ૨૯॥

મરીચયે ચ સમ્ભૂતિં સ્મૃતિમઙ્ગિરસે દદૌ ।
પુલસ્ત્યાય તથા પ્રીતિં ક્ષમાં ચ પુલહાય વૈ ॥ ૩૦॥

સન્તતિં ક્રતવે ચાસાવનસૂયાં તથાઽત્રયે ।
દદાવૂર્જાં વસિષ્ઠાય મુને સ્વાહાં ચ વહ્નયે ॥ ૩૧॥

પિતૃભ્યશ્ચ સ્વધાં દેવીં દદૌ દક્ષઃ પ્રહર્ષિતઃ ।
નિયોગાદ્બ્રહ્મણઃ સાક્ષાત્તાસાં વંશં વદામિ તે ॥ ૩૨॥

સત્યાં ચ શઙ્કરાજ્જજ્ઞે કાર્તિકેયો મહાબલઃ ।
દેવસેનાપતિત્વેઽસાવભિષિક્તશ્ચ વેધસા ॥ ૩૩॥

ખ્યાત્યાં ભૃગોઃ સમુત્પન્ના લક્ષ્મીનારાયણપ્રિયા ।
દેવૌ ધાતૃવિધાતારૌ મેરોર્જામાતરૌ સ્મૃતૌ ॥ ૩૪॥

અયતિર્નિયતિશ્ચૈવ કન્યે મેરોશ્ચ તે મુને ।
તયોર્ધાતૃવિધાતૃભ્યાં જાતૌ શ્રેષ્ઠૌ સુતાબુભૌ ॥ ૩૫॥

મૃકણ્ડોઽન્યસ્તથા પ્રાણો માર્કણ્ડેયો મૃકણ્ડજઃ ।
તથા વેદશિરાઃ પ્રોક્તઃ પ્રાણસ્ય દ્યુતિમાન્ સુતઃ ॥ ૩૬॥

મરીચિરપિ સમ્ભૂત્યાં પૂર્ણમાસમસૂયત ।
કન્યાચતુષ્ટયં ચૈવ સર્વલક્ષણમણ્ડિતમ્ ॥ ૩૭॥

કૃષિર્વૃષ્ટિસ્તથા કૃષ્ટિશ્ચતુર્થ્યપચિતિર્મુને ।
વિરજાઃ પર્વતશ્ચૈવ પૂર્ણમાસસ્ય તૌ સુતૌ ॥ ૩૮॥

ક્ષમા ચ સુષુવે પુત્રાન્ પુલહાચ્ચ પ્રજાપતેઃ ।
કર્મશ્રેષ્ઠં વરીયાંસં સહિષ્ણું મુનિપુઙ્ગવમ્ ॥ ૩૯॥

તથા વનકવીનાસં તપસ્તેજસ્વિનં સુતમ્ ।
અત્રેર્વંશં પ્રવક્ષ્યામિ શ◌ૃણુ શૌનક ચાદરાત્ ॥ ૪૦॥

અત્રિઃ સઞ્જનયામાસાનસૂયાયાં સુતાઞ્છુભાન્ ।
સોમં દુર્વાસસં ચૈવ દત્તં યોગધરં તથા ॥ ૪૧॥

ત્રયો દેવા ઇમે પ્રોક્તા અત્રેઃ પુત્રા મહાત્મનઃ ।
બ્રહ્મા ભવશ્ચ વિષ્ણુશ્ચ કલાંશેન પ્રજાધરાઃ ॥ ૪૨॥

સ્મૃત્યામઙ્ગિરસો જજ્ઞે સિનીવાલી સુલોચના ।
કુહૂરાકા તથા પુત્ર્યનુમતિશ્ચ પતિવ્રતા ॥ ૪૩॥

પ્રીત્યાં પુલસ્ત્યયોગીશાદયોનિરભવત્સુતઃ ।
પૂર્વજન્મનિ વિપ્રેશોઽગસ્ત્યોઽયં પરિકીર્તિતઃ ॥ ૪૪॥

દેવબાહુસ્તથા કન્યા સર્વાઙ્ગૈઃ શોભિની સ્મૃતા ।
સન્તત્યાં ષષ્ટિસાહસ્રીં પુત્રાણામસૃજત્ ક્રતુઃ ॥ ૪૫॥

ત ઊર્ધ્વરેતસઃ સર્વે વાલખિલ્યા ઇતિ સ્મૃતાઃ ।
સપ્ત પુત્રાન્ સ ઊર્જાયાં વસિષ્ઠોઽજનયત્પ્રભુઃ ॥ ૪૬॥

કન્યાં કમલપત્રાક્ષીં ચિત્રકેતુઃ સુરોચકઃ ।
વિરજા મિત્રસંજ્ઞશ્ચ ઉલ્બણો વસુભૃત્પરઃ ॥ ૪૭॥

દ્યુમાન્ શક્ત્યાદયશ્ચાન્યે સપ્તપુત્રા મહૌજસઃ ।
યોઽસૌ રુદ્રાત્મકો વહ્નિઃ સ્વાહાયાં ત્રીન્ સુતાંસ્તથા ॥ ૪૮॥

જનયામાસ તેજસ્વી તેઽગ્નયઃ પરિકીર્તિતાઃ ।
પાવકઃ પવમાનશ્ચ શુચિસ્તેઽજનયન્ સુતાન્ ॥ ૪૯॥

પ્રત્યેકં વૈ પઞ્ચદશૈકોનપઞ્ચાશદગ્નયઃ ।
સર્વે તેજસ્વિનઃ પ્રોક્તાઃ સર્વે યજ્ઞેષુ ભાગિનઃ ॥ ૫૦॥

નિર્મથ્યઃ પવમાનસ્તુ સસુતઃ પરિકીર્તિતઃ ।
વૈદ્યુતઃ પાવકઃ પ્રોક્તઃ સસુતઃ શાસ્ત્રસમ્મતઃ ॥ ૫૧॥

સૂર્યે તપતિ યોઽગ્નિશ્ચ સ પુત્રસ્તુ શુચિઃ સ્મૃતઃ ।
(Page ખં. ૨ અ. ૭ પાન ૧૬)
સર્વત્રગઃ સ રુદ્રાત્મા બ્રહ્મપુત્રોઽગ્નિરુચ્યતે ॥ ૫૨॥

અમૂર્તયોઽગ્નિષ્વાત્તા હિ સાઙ્ગા બર્હિષદઃ સ્મૃતાઃ ।
પિતરશ્ચ સ્વધા તેભ્યોઽસૂત દ્વે તનયે તથા ॥ ૫૩॥

મેના ચ ધરણી નામ્ની તે ઉભે બ્રહ્મવિત્તમે ।
અસૂત મેના મૈનાકં ક્રૌઞ્ચં હિમવતો મુને ॥ ૫૪॥

ગઙ્ગાં લોકપવિત્રાં ચ પાર્વતીં પરમેશ્વરીમ્ ।
તે ઉભે શઙ્કરં દેવં લેભાતે પતિમુત્તમમ્ ॥ ૫૫॥

તપસા ગિરિરાજેન મેનયારાધિતા સતી ।
વરદાનપ્રભાવેણ પાર્વતી તનયાઽભવત્ ॥ ૫૬॥

ધરણી મેરુશૈલસ્ય પત્ની કન્યે પ્રજાપતે ।
સુષુવે ચાયતિં ચૈવ નિયતિં કથિતે પુરા ॥ ૫૭॥

એષા દક્ષસ્ય કન્યાસુ સન્તતિઃ કથિતા મયા ।
પઠતે શ ૃણ્વત ચૈવ સર્વકામફલપ્રદા ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે દક્ષકન્યાવંશવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૨.૬

## ૨.૭ ભોગમોક્ષવર્ણનં નામ સપ્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

દક્ષકન્યાપ્રસૂતેભ્યઃ પિતરઃ પરમાદૃતાઃ ।
ગણેશારાધનં તેભ્યો દદુઃ પ્રત્યેકમાદરાત્ ॥ ૧॥

નાનામન્ત્રાન્યથાન્યાયં સાધયિત્વા ચ તે વને ।
ગત્વાઽજપંશ્ચ હેરમ્બં ધ્યાત્વા તપસિ સંસ્થિતઃ ॥ ૨॥

તતો વર્ષસહસ્રેણ પરિતુષ્ટા ગજાનનઃ ।
વરં દાતું યયૌ તત્ર ભક્તિભાવેન તોષિતઃ ॥ ૩॥

તં દૃષ્ટ્વા તુષ્ટુવુઃ સર્વે બદ્ધાઞ્જલિપુટાઃ પ્રભુમ્ ।
ભક્તિભાવસમાયુક્તા ગણેશં સર્વસિદ્ધિદમ્ ॥ ૪॥

ઋષિપુત્રા ઊચુઃ ।
નમસ્તે વક્રતુણ્ડાય ભક્તરક્ષકરૂપિણે ।
બ્રહ્માકારાય દેવાય બ્રહ્મભૂતાય તે નમઃ ॥ ૫॥

મનોવાગતિરૂપાય મનોવાગગમ્યમૂર્તયે ।
યોગાકારાય યોગાય યોગિને તે નમો નમઃ ॥ ૬॥

નિરાકારાય વિઘ્નેશ ભક્તવિઘ્નનિવારક ।
શાન્તિરૂપાય સર્વત્ર શાન્તિદાય નમો નમઃ ॥ ૭॥

સૃષ્ટિરક્ષણસંહારકારિણે તે નમો નમઃ ।
સર્વપૂજ્યાય સર્વાય નમઃ સર્વાદિમૂર્તયે ॥ ૮॥

માયાવિકારહીનાય માયિને મોહદાયિને ।
માયાધારાય માયાયાશ્ચાલકાય નમો નમઃ ॥ ૯॥

અનન્તવિભયાયૈવાનન્તોદારપરાક્રમ ।
અનન્તાનનહસ્તાય સર્વસાક્ષિન્નમોઽસ્તુ તે ॥ ૧૦॥

વેદાન્તાગમ્યરૂપસ્ત્વં દૃષ્ટો વૈ ભાગ્યગૌરવાત્ ।
સ્તુતિં કર્તું સમર્થા ન વયં તવ ગજાનન ॥ ૧૧॥

ધન્યો નો જનકો દેવ વયં ધન્યતમા વિભો ।
વિદ્યા વ્રતં તપો મન્ત્રોઽસ્માકં ગણપદર્શનાત્ ॥ ૧૨॥

વરદશ્ચેદેકદન્ત ભક્તિં દેહિ દૃઢાં ત્વયિ ।
યયા માયામયો મોહો નશ્યેદ્વૈ વરદ પ્રભો ॥ ૧૩॥

સ્વસ્વકાર્યેષુ સામર્થ્યં દેહિ દેવ ગજાનન ।

યદ્યદિચ્છામહે તત્તત્ સફલં ભવતુ પ્રભો ॥ ૧૪॥

એવમુક્ત્વા પૂજયન્ત ઉપચારૈરનેકશઃ ।
(Page ખં. ૨ અ. ૭ પાન ૧૭)
પ્રણેમુર્ભક્તિયુક્તાસ્તં સરોમાઞ્ચા બભૂવિરે ॥ ૧૫॥

તતસ્તાનબ્રવીદ્દેવો ભવતાં યચ્ચિકીર્ષિતમ્ ।
તદેવ સફલં સર્વં ભવિષ્યતિ ન સંશયઃ ॥ ૧૬॥

ભક્તિર્મદીયપાદેષુ ભવિષ્યતિ સુખપ્રદા ।
સામર્થ્યં સ્વસ્વકાર્યેષુ દૃઢા ખ્યાતિર્ભવિષ્યતિ ॥ ૧૭॥

ભવત્કૃતમિદં સ્તોત્રં સર્વસિદ્ધિકરં ભવેત્ ।
યઃ શ ृણોતિ નરો ભક્ત્યા પઠેદ્વૈ તસ્ય સિદ્ધિદમ્ ॥ ૧૮॥

એકવિંશતિવારં ચ પઠેત્તાવદ્દિનાનિ યઃ ।
સ સદ્યઃ ફલમાપ્નોતિ ચિત્તેપ્સિતમસંશયમ્ ॥ ૧૯॥

એવમુક્ત્વા ગણાધીશસ્તત્રૈવાન્તરધીયત ।
તે ચ સ્વસ્વગૃહે સર્વે યયુર્હર્ષસમન્વિતાઃ ॥ ૨૦॥

સ્ત્રિયશ્ચ પુરુષાઃ સર્વે દક્ષકન્યા સમુદ્ભવાઃ ।
સુખિનઃ સ્વસ્વકાર્યેષુ બભૂવુર્જ્ઞાનસંયુતાઃ ॥ ૨૧॥

શૌનક ઉવાચ ।
અત્રિપુત્રા મહાભાગા બ્રહ્મવિષ્ણુશિવાત્મકાઃ ।
તચ્ચરિત્રં વિસ્તરતઃ શ્રોતુમિચ્છામિ તદ્વદ ॥ ૨૨॥

સૂત ઉવાચ ।
બ્રહ્મણોંઽશસમુદ્ભૂતશ્ચન્દ્રસ્તપસિ સંસ્થિતઃ ।
ગણેશાત્સ વરં લબ્ધ્વાઽમૃતરૂપો બભૂવ હ ॥ ૨૩॥

કલાભિઃ સર્વદેવાનાં પોષકઃ સ તથા નૃણામ્ ।
કિરણૈરન્નભાવસ્ય વૃદ્ધિકૃત્ સર્વદાઽભવત્ ॥ ૨૪॥

દત્તો વિષ્ણુકલાંશેન સમ્ભૂતો યોગધારકઃ ।
ક્રમેણ યોગમાર્ગેણ નાનાબ્રહ્મસુ સંસ્થિતઃ ॥ ૨૫॥

જડોન્મત્તપિશાચાદિબાલાનન્દાદિકા મુને ।
અવસ્થાઃ સાધયામાસ નાનાભૂમિપ્રકાશિકાઃ ॥ ૨૬॥

તં દૃષ્ટ્વા યોગિનં સર્વે સેવાયામભવન્ પરાઃ ।
દ્વિજાદ્યાઃ સર્વવર્ણાશ્ચાશ્રમસ્થા ભક્તિભાવતઃ ॥ ૨૭॥

ક્ષણં વિશ્રામમત્યન્તં ન લેભે મુનિસત્તમઃ ।
દત્તો વિહ્વલતાં યાતઃ કિઙ્કરોમીત્યચિન્તયત્ ॥ ૨૮॥

તતસ્તેન જલે વિપ્ર મમજ્જે યોગધારણાત્ ।
પ્રતીક્ષયન્તસ્તત્તીરે સ્થિતાઃ સર્વેઽભવન્ જનાઃ ॥ ૨૯॥

તતો દત્તેન સિધ્યા ચ મોક્ષલક્ષ્મીઃ પ્રકાશિતા ।
ગૃહીત્વા વામભાગે તાં નિઃસૃતો જલામધ્યતઃ ॥ ૩૦॥

દક્ષિણે મદ્યકુમ્ભં સ હસ્તે ધૃત્વા પપૌ સ્વયમ્ ।
સ્ત્રિયા સહ વિલાસેન ભોગયુક્તો બભૂવ હ ॥ ૩૧॥

ત્યક્તસ્તૈરત્રિજો યોગી ભ્રષ્ટોઽયમિતિ ભાવતઃ ।
સુખેન યોગમાસ્થાય સંસ્થિતોઽત્રિસમુદ્ભવઃ ॥ ૩૨॥

ગતે કિયતિ કાલે ચ દેવાસુરસમુદ્ભવમ્ ।
યુદ્ધં દારુણરૂપં વૈ જાતં તત્ર સમીપતઃ ॥ ૩૩॥

દૈત્યૈર્દેવાસ્તતો ભગ્નાઃ પલાયન્ત દિશો દશ ।
તત્રાઽઽયયુઃ સુસમ્ભીતા રક્ષ રક્ષેતિ ચાબ્રુવન્ ॥ ૩૪॥

તતો સુરા યયુઃ સર્વે નગ્નશસ્ત્રધરા બલાત્ ।
તાન્ દૃષ્ટ્વાઽમરસઙ્ઘાસ્તે પલાયનપરા બત ॥ ૩૫॥

દૈત્યા દૃષ્ટ્વા મહાલક્ષ્મીં મોક્ષરૂપાં સુરૂપિણીમ્ ।
તાં ગૃહીત્વા યયુઃ સર્વે ધૃત્વા મોહેન મસ્તકે ॥ ૩૬॥

મોક્ષલક્ષ્મીશ્ચ તૈસ્તત્ર યદિ પાદેષુ સન્ધૃતા ।
તદા તેષાં જયપ્રાપ્તિર્જાતાસીન્નાત્ર સંશયઃ ॥ ૩૭॥

અતો નિસ્તેજસા સ્પૃષ્ટા દૈત્યા દેવૈઃ પ્રપીડિતાઃ ।
પલાયન્ત ભયાત્ સર્વે પાતાલં વિવિશુઃ પુનઃ ॥ ૩૮॥

મોક્ષલક્ષ્મીસ્તતસ્તેષાં પશ્યતાં મુનિસત્તમ ।
અન્તર્ધાનં યયૌ દેવી બ્રહ્મણિ બ્રહ્મભાવિતા ॥ ૩૯॥

શૌનક ઉવાચ ।
સૂત કૂટં ત્વયા પ્રોક્તં ન બુધ્દં તન્મયાધુના ।

(Page  ખં. ૨ અ. ૭ પાન ૧૮)
મોક્ષલક્ષ્મીઃ શિરઃ સ્પૃષ્ટા દૈત્યાનાં દુઃખદા કથમ્ ॥ ૪૦॥

સૂત ઉવાચ ।
સમ્યક્પૃષ્ટં ત્વયા બ્રહ્મન્ કથયામિ યથા શ્રુતમ્ ।
વ્યાસાત્ સર્વજ્ઞમુખ્યાચ્ચ શ‍ૃણુ શૌનક યત્નતઃ ॥ ૪૧॥

રજસ્તમોયુતા દૈત્યા ભોગલક્ષ્મીપરાયણાઃ ।
પરદ્રવ્યહરાઃ સર્વે પરસ્ત્રીગામિનસ્તથા ॥ ૪૨॥

પરાપકારકર્તારો જન્તુભ્યો દુઃખદાઃ સ્મૃતાઃ ।
સદા મદ્યાદિભિર્યુક્તાઃ પાપાચારા વિશેષતઃ ॥ ૪૩॥

સાધૂનાં મુનિમુખ્યાનાં દેવાનાં યોગિનાં તથા ।
વેદશાસ્ત્રપુરાણાનાં નિન્દકા ભયદાયકાઃ ॥ ૪૪॥

ઇત્યાદિબહુભિર્દોષૈઃ સંયુક્તાસ્તે મહાસુરાઃ ।
સદા ભોગપ્રિયા જ્ઞેયા મુક્તૌ નાર્હા અતઃ કદા ॥ ૪૫॥

દેહં સર્વક્રિયાણાં તે કર્તારં પ્રાપ્ય દૈત્યપાઃ ।
સર્વથા મુક્તિમુત્સૃજ્ય ભોગેચ્છાયાં મનો દધુઃ ॥ ૪૬॥

અતસ્તૈશ્ચરણાઘાતૈર્હતા મુક્તિર્વિશેષતઃ ।
ભોગલક્ષ્મીઃ શિરોભિસ્તૈર્વન્દિતા તત્ર યત્નતઃ ॥ ૪૭॥

દેવર્ષયઃ સદા યત્નૈર્મુક્તિમિચ્છન્તિ સર્વદા ।
અતસ્તે મસ્તકે દેવીં ધારયામાસુરઞ્જસા ॥ ૪૮॥

અસુરૈર્યોગિસઙ્ગેન ધૃતા મુક્તિર્યદા મુને ।
શિરસ્યપિ શુભા સા ન કારણં કથયામિ તે ॥ ૪૯॥

દુરાચારાદિસંયુક્તા ભોગબુદ્ધિપરાયણાઃ ।
તેભ્યઃ કુતઃ સા શુભદા કુપિતા તાન્નિહન્તિ વૈ ॥ ૫૦॥

ગૃહીતા વિષયાસક્તૈર્નેચ્છિતા પશ્ય શૌનક ।
ચરણાઘાતકૈર્દેવી તાડિતા ચ તદા ભવેત્ ॥ ૫૧॥

અતો ભોગેપ્સુભિર્વિપ્ર વન્દ્યા ભોગપ્રદાયિની ।
યદિ મુક્તિર્દુરાચારૈર્ધૃતા તાન્નાશયિષ્યતિ ॥ ૫૨॥

ઇતિ તે કથિતં સર્વં કારણં મુનિસત્તમ ।

તથા મોક્ષેપ્સુભિર્ભોગલક્ષ્મીશ્ચરણતાડિતા ॥ ૫૩॥

યત્ર ભોગઃ પ્રિયો નિત્યં તત્ર મુક્તિર્ન વિદ્યતે ।
યત્ર મુક્તિઃ પ્રિયા નિત્યં તત્ર ભોગઃ કુતો ભવેત્ ॥ ૫૪॥

વાસાનાયુક્તરૂપા ચ ભોગલક્ષ્મીર્ન સંશયઃ ।
નિર્વાસનમયી મોક્ષલક્ષ્મીર્જાનીહિ શૌનક ॥ ૫૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ભોગમોક્ષવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૨.૭

## ૨.૮ દત્તચરિતં નામાઽષ્ટમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
એવં દત્તસયોગેન યોગભૂમિં સમાચરન્ ।
નાનાચેષ્ટાયુતો દક્ષ અવધૂતઃ પ્રકાશતે ॥ ૧॥

ગોવદ્ભક્ષણસંયુક્તઃ પશુવત્પક્ષિવત્કદા ।
મૂત્રાદિદેહચેષ્ટાં સ ચકાર મુનિસત્તમઃ ॥ ૨॥

સહજાવસ્થયા યુક્તો બભૂવાન્તેઽત્રિસમ્ભવઃ ।
તત્રાન્તર્યામિતાં જ્ઞાત્વા ખેદયુક્તો બભૂવ હ ॥ ૩॥

વ્યક્તાવ્યક્તસમેત્યાદિનાનાબ્રહ્મસુસંસ્થિતઃ ।
યોગેન ન સ શાન્તોઽભૂદ્યયૌ સ્વપિતરં તતઃ ॥ ૪॥

પ્રણમ્ય ભગવાનત્રિં દત્તો યોગિસમાવૃતમ્ ।
સાક્ષાદ્બ્રહ્મમયં પૂર્ણં પ્રાઞ્જલિઃ પુરતોઽભવત્ ॥ ૫॥

(Page ખં. ૨ અ. ૮ પાન ૧૯)
અત્રિણા માનિતઃ સોઽપિ નિષસાદાસને સ્વયમ્ ।
ઉવાચ બ્રહ્મપુત્રં તમત્રિં વિનયસંયુતઃ ॥ ૬॥

દત્ત ઉવાચ ।
સ્વામિન્નાનાવિધં બ્રહ્મ મયા યોગેન સાધિતમ્ ।
તત્રોપાધિઃ સમાદૃષ્ટ ઉપાધિરહિતોઽભવમ્ ॥ ૭॥

ઉપાધિં નિરુપાધિં ચ ત્યક્ત્વા સામ્યેઽહમાસ્થિતઃ ।

તત્ત્યક્ત્વા તૂર્યભૂતોઽહં સહજે સંસ્થિતોઽભવમ્ ॥ ૮॥

તત્ર દૃષ્ટ્વા મહાયોગિન્ સ્વાધીનત્વં સદા પ્રભો ।
તેન શાન્તિવિહીનોઽહં કિં કરોમિ વદસ્વ ભોઃ ॥ ૯॥

સહજાન્ન પરં બ્રહ્મ લભ્યતે યોગસેવયા ।
અતો માં શાન્તિયોગં ત્વં કથયસ્વ મહામુને ॥ ૧૦॥

દત્તસ્ય વચનં શ્રુત્વા બ્રહ્મપુત્રો મહાતપાઃ ।
અત્રિસ્તૂવાચ તં પુત્રં શાન્તિમિચ્છન્તમાદરાત્ ॥ ૧૧॥

શ ૃણુ પુત્ર પ્રવક્ષ્યામિ શાન્તિયોગં સનાતનમ્ ।
બ્રહ્મણા કથિતં મે તં યેન શાન્તોઽહમઞ્જસા ॥ ૧૨॥

અસ્માકં કુલદેવ ત્વં પ્રાપ્તો ગણપતિઃ પ્રભુઃ ।
સ વૈ શિવાદિદેવાનાં કુલદેવઃ પ્રકીર્તિતઃ ॥ ૧૩॥

શાન્તિયોગસ્વરૂપં ત્વં તં જાનીહિ મહામતે ।
ભજસ્વ સુપ્રયત્નેન તદા શાન્તિમવાપ્સ્યસિ ॥ ૧૪॥

ગણેશાત્સર્વમુત્પન્નં તેન સંસ્થાપિતં સુત ।
તસ્યારાધનમાત્રેણ કૃતકૃત્યાઃ શિવાદયઃ ॥ ૧૫॥

નામરૂપાત્મકં સર્વં જગદ્બ્રહ્મ પ્રકથ્યતે ।
તદેવ શક્તિરૂપાખ્યં બ્રહ્માસદ્રૂપકં પરમ્ ॥ ૧૬॥

તત્રામૃતમયં સૌરમાત્માકારેણ સંસ્થિતમ્ ।
સદ્રૂપં તદ્વિજાનીહિ બ્રહ્મ વેદે પ્રકીર્તિતમ્ ॥ ૧૭॥

તયોરભેદતો બ્રહ્મ સમં સર્વત્ર સંસ્થિતમ્ ।
સદસન્મયમેવં ચ વિષ્ણું જાનીહિ વેદતઃ ॥ ૧૮॥

તેભ્યો વિલક્ષણં તુર્યં નેતિ રૂપં પ્રકીર્તિતમ્ ।
નિર્મોહશિવસંજ્ઞં ચ સ્વાધીનં બ્રહ્મ તદ્ બુધૈઃ ॥ ૧૯॥

ચતુર્ણાં બ્રહ્મણાં યોગે સ્વાનન્દઃ કથ્યતે બુધૈઃ ।
સ તુ માયામયઃ સાક્ષાદ્ગણેશો વેદવાદિભિઃ ॥ ૨૦॥

અન્તર્બાહ્યા ક્રિયા સર્વા બ્રહ્માકારા પ્રદૃશ્યતે ।
કર્મયોગઃ સ વિજ્ઞેયઃ સંયોગઃ કર્મણાં સુત ॥ ૨૧॥

જ્ઞાનાત્મચક્ષુષા જ્ઞાનં યદ્યદ્ભવતિ યોગિનામ્ ।
તેષામભેદકો યોગો જ્ઞાનયોગઃ પ્રકીર્તિતઃ ॥ ૨૨॥

જ્ઞાનાનાં કર્મણાં ચૈવાભેદયોગઃ સમાત્મકઃ ।
આનન્દાત્મકરૂપો યં દ્વૈધનાશે સ આપ્યતે ॥ ૨૩॥

સ્વેચ્છયા કર્મયોગશ્ચ ધૃતો યેન મહાત્મના ।
સ્વેચ્છયા જ્ઞાનયોગશ્ચ સ્વેચ્છયાનન્દયોગકઃ ॥ ૨૪॥

સ્વેચ્છયા સ ત્રિભિર્હીનઃ સહજાખ્યઃ પ્રકથ્યતે ।
સદા સ્વાધીનરૂપશ્ચ સ્વેચ્છયા ક્રીડતિ સ્વયમ્ ॥ ૨૫॥

બ્રહ્મભૂતાત્મકો યોગઃ સ્વાનન્દાખ્યઃ પ્રકીર્તિતઃ ।
તત્ર સ્વાધીનતા ત્રેધા પરાધીનકતા કુતઃ ॥ ૨૬॥

બ્રહ્મણિ બ્રહ્મભૂતસ્ય સ્વતઃ પરત એવ ચ ।
ઉત્થાનં નાસ્તિ સંયોગાત્ સ્વસ્વરૂપિણિ યોગતઃ ॥ ૨૭॥

સ્વાનન્દે સુતસંયોગો જગતાં બ્રહ્મણાં ભવેત્ ।
સર્વાભેદેન યોગોઽયં તસ્માન્માયાસમન્વિતઃ ॥ ૨૮॥

અયોગાત્મકયોગશ્ચ સદા સંયોગવર્જિતઃ ।
જગતાં બ્રહ્મણાં તત્ર પ્રવેશોઽતો ન વિદ્યતે ॥ ૨૯॥

સદા નિર્માયિકો યોગઃ સ્વસંવેદ્યવિવર્જિતઃ ।
સ્વકીયા ભેદહીનત્વાન્નિર્વૃત્તિર્યોગિભિર્ધૃતા ॥ ૩૦॥

બ્રહ્મ બ્રહ્મણિ સંસ્થં યન્નાગતં ન ગતં પુનઃ ।
(Page ખં. ૨ અ. ૮ પાન ૨૦)
સ્વાનન્દનાશતો લભ્યં બ્રહ્મભૂયમયોગકમ્ ॥ ૩૧॥

બ્રહ્મસ્વાનન્દવાસી સ ગણેશઃ કથ્યતે બુધૈઃ ।
ન સ્વાનન્દાત્મકઃ પ્રોક્તો વેદે વૈ વેદવાદિભિઃ ॥ ૩૨॥

ક્રીડાત્મકગણેશાનઃ સ્વાનન્દઃ પરિકીર્તિતઃ ।
સંયોગાત્મકરૂપેણ સ્વસ્વરૂપિણિ તિષ્ઠતિ ॥ ૩૩॥

ક્રીડાહીનો ગણેશાનો યોગરૂપઃ પ્રકીર્તિતઃ ।
નિરાનન્દાત્મકત્વેન સદા બ્રહ્મણિ સંસ્થિતઃ ॥ ૩૪॥

સંયોગાયોગયોશ્ચૈવ તયોર્નાશે ગણેશ્વરઃ ।

શાન્તિયોગાત્મકઃ પ્રોક્તો યોગિભિર્યોગસેવયા ॥ ૩૫॥

પૂર્ણયોગાત્મકસ્તત્ર ગણેશઃ પરિકીર્તિતઃ ।
માયાયુક્તવિહીનત્વં ભ્રાન્તિમાત્રં પ્રકીર્તિતમ્ ॥ ૩૬॥

પઞ્ચચિત્તસ્વરૂપાં ત્વં બુદ્ધિં જાનીહિ પુત્રક ।
તત્ર મોહકરી સિદ્ધિર્ભ્રાન્તિદા મોહરૂપિણી ॥ ૩૭॥

ધર્માર્થકામમોક્ષાણાં સિદ્ધિર્ભિન્ના પ્રદૃશ્યતે ।
બ્રહ્મભૂતમયી સિદ્ધિઃ કથિતા યોગિભિસ્તથા ॥ ૩૮॥

પઞ્ચધા ચિત્તવૃત્તિર્યા તત્ર યદ્બિમ્બિતં સુત ।
તદેવ ગણરાજસ્ય રૂપં બિમ્બાત્મકં પરમ્ ॥ ૩૯॥

ધર્માર્થકામમોક્ષેષુ બ્રહ્મભૂતેષુ યત્સ્મૃતમ્ ।
ઐશ્વર્યં મોહદં જન્તુર્યત્ર ભ્રમતિ લાલસી ॥ ૪૦॥

પઞ્ચૈશ્વર્યેષુ યદ્બિમ્બં તદેવ ગણપસ્ય ચ ।
જીવં જાનીહિ પુત્ર ત્વં શાન્તિયોગસ્ય સેવયા ॥ ૪૧॥

પઞ્ચચિત્તપ્રણાશે વ પઞ્ચૈશ્વર્યે લયં ગતે ।
અધુના ગણરાજસ્ત્વં ભવિતાઽસિ ન સંશયઃ ॥ ૪૨॥

ત્યજાવધૂતમાર્ગં ત્વં ભવ મુખ્યોઽવધૂતકઃ ।
અવધૂય મહચ્ચિત્તં મહદૈશ્વર્યમાદરાત્ ॥ ૪૩॥

અતઃ શાન્તિં ભજસ્વ ત્વં દત્તયોગેન સત્વરમ્ ।
દદામિ તે મહામન્ત્રં ગણેશસ્ય વિધાનતઃ ॥ ૪૪॥

તત એકાક્ષરં મન્ત્રં દદૌ પુત્રાય ભાવતઃ ।
અત્રિર્યોગવિદાં શ્રેષ્ઠસ્તં પ્રણમ્ય યયાવજઃ ॥ ૪૫॥

સાક્ષાદ્વિષ્ણુસ્વરૂપશ્ચ દત્તો યોગવિદાં વરઃ ।
ગઙ્ગાયા દક્ષિણે તીરે પૂજયામાસ વિઘ્નપમ્ ॥ ૪૬॥

ત્યક્ત્વા ભૂમિસ્વરૂપં સ શાન્તિમાસ્થાય યોગવિત્ ।
અભજત્તં સુભાવેન ગણપં હૃદિ ચિન્તયન્ ॥ ૪૭॥

મહાયોગી સ્વયં દત્તો વર્ષેણૈકેન શૌનક ।
શાન્તિં પ્રાપ્તો વિશેષેણ ગાણપત્યો બભૂવ હ ॥ ૪૮॥

તં દ્રષ્ટું ગણપસ્તત્ર યયૌ ભક્તં નિજેચ્છયા ।
ભક્તવાત્સલ્યતો દેવ આશ્રમે સુખશાન્તિદે ॥ ૪૯॥

તં દૃષ્ટ્વા સહસોત્થાય પ્રણનામ કૃતાઞ્જલિઃ ।
તુષ્ટાવ સુસ્થિરો ભૂત્વા વિઘ્નેશં કુલદૈવતમ્ ॥ ૫૦॥

શ્રીદત્ત ઉવાચ ।
નમો ગણપતે તુભ્યં નમો યોગસ્વરૂપિણે ।
યોગિભ્યો યોગદાત્રે ચ શાન્તિયોગાત્મને નમઃ ॥ ૫૧॥

સિદ્ધિબુદ્ધિપતે તુભ્યં પઞ્ચચિત્તપ્રધારક ।
નાનાવિહારશીલાય ગણેશાય નમો નમઃ ॥ ૫૨॥

સિદ્ધિદાત્રે નમસ્તુભ્યં નાનૈશ્વર્યપ્રદાયિને ।
મોહહન્ત્રે મોહકર્ત્રે હેરમ્બાય નમો નમઃ ॥ ૫૩॥

સ્વાનન્દવાસિને તુભ્યં સંયોગાભેદધારિણે ।
નાનામાયાવિહારાય વિઘ્નેશાય નમો નમઃ ॥ ૫૪॥

સાઙ્ખ્યાય બ્રહ્મનિષ્ઠાય બોધહીનાય ધીમતે ।
પરાદુત્થાનરૂપાય વિદેહાય નમો નમઃ ॥ ૫૫॥

બોધાય સર્વરૂપાય દેહદેહિમયાય ચ ।
સ્વત ઉત્થાનરૂપાય પ્રકૃતિપ્રલયાય તે ॥ ૫૬॥

સાહઙ્કારાય દેવાય જગદીશાય તે નમઃ ।
(Page ખં. ૨ અ. ૮ પાન ૨૧)
મહતે બિન્દુરૂપાય જગદ્રૂપાય તે નમઃ ॥ ૫૭॥

નાદાત્મકગુણેશાય નાનાવેષપ્રધારિણે ।
બ્રહ્મણે સૃષ્ટિકર્ત્રે તે પિતામહ નમોઽસ્તુ તે ॥ ૫૮॥

હરયે પાલકાયૈવ નાનાદેહધરાય તે ।
સંહર્ત્રે શઙ્કરાયૈવ કર્માકારાય ભાનવે ॥ ૫૯॥

શક્તયે ચ ક્રિયામૂર્તે દેવમાનવરૂપિણે ।
નાગાસુરમયાયૈવ ઢુણ્ઢિરાજાય તે નમઃ ॥ ૬૦॥

સ્થાવરાય નમસ્તુભ્યં જઙ્ગમાય નમો નમઃ ।
જગદ્રૂપાય દેવાય બ્રહ્મણે તે નમો નમઃ ॥ ૬૧॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગાકારેણ સંસ્થિતમ્ ।
વેદાદયઃ સમર્થા ન ત્વામતઃ પ્રણમામ્યહમ્ ॥ ૬૨॥

ધન્યો દેહો મદીયોદ્ય પિતરૌ કુલમેવ ચ ।
વિદ્યાયોગસ્તપશ્ચૈવ ત્વદઙ્ઘ્રિયુગદર્શનાત્ ॥ ૬૩॥

ઇત્યુક્ત્વા ભક્તિભાવેન સમ્પ્લુતોઽસૌ મહામુનિઃ ।
નનર્ત હૃષ્ટરોમાસાવાનન્દાશ્રુ સૃજન્મુહુઃ ॥ ૬૪॥

તતસ્તં સ્વકરે ધૃત્વા ગણનાથઃ સ સસ્વજે ।
ઉવાચ યોગિનં પૂર્ણં વચનં પરમાદ્ભુતમ્ ॥ ૬૫॥

શ્રીગણેશ ઉવાચ ।
ધન્યોઽસિ દત્ત યોગીન્દ્રો જાતોઽસિ મદનુગ્રહાત્ ।
ત્વં પૂર્ણાં લભસે શાન્તિમચલાં મયિ સર્વદા ॥ ૬૬॥

ન ભેદસ્તે કદાચિત્તે ભવિષ્યતિ મહામુને ।
ત્વત્પ્રીતિસમ્પ્રવૃદ્ધ્યર્થમત્ર સ્થાસ્યામિ નિશ્ચલઃ ॥ ૬૭॥

ગાણેશજ્ઞાનમાહાત્મ્યં ત્વયાત્રેશ્ચ મુખાચ્છ્રુતમ્ ।
સાક્ષાત્કારકરં તસ્માદ્ વિજ્ઞાનક્ષેત્રકં ત્વિદમ્ ॥ ૬૮॥

વિજ્ઞાનગણપો દત્તનામ્નાખ્યાતો ભવામ્યહમ્ ।
દર્શનાચ્છાન્તિસન્દાતા ભવિષ્યામ્યત્ર માનદ ॥ ૬૯॥

અત્ર વાસં પ્રકુર્વન્તિ મદર્થં ભક્તિસંયુતાઃ ।
શાન્તિયોગં સદા તેભ્યો દાસ્યામિ તવ સન્નિધૌ ॥ ૭૦॥

પુરાઽત્ર તુ શિવેનૈવ જ્ઞાનં સાક્ષાત્કૃતં પરમ્ ।
વિજ્ઞાનેશ્વરનામેતિ સ મયા શઙ્કરઃ કૃતઃ ॥ ૭૧॥

તસ્યાત્ર સન્નિધૌ સ્થિત્વા ત્વયા જ્ઞાનં પ્રસાધિતમ્ ।
અતઃ શઙ્કરમિત્રત્વં પ્રાપ્તોઽસિ મદનુગ્રહાત્ ॥ ૭૨॥

ત્વયા કૃતમિદં સ્તોત્રં યોગશાન્તિપ્રદં ભવેત્ ।
પઠતાં શ‍ૃણ્વતાં નૃણાં બ્રહ્મભૂયકરં તથા ॥ ૭૩॥

ધર્માર્થકામમોક્ષાણાં દાયકં પ્રભવિષ્યતિ ।
સર્વસિદ્ધિપ્રદં ચૈવ સર્વેભ્યો જ્ઞાનદાયકમ્ ॥ ૭૪॥

ઇત્યુક્ત્વાન્તર્દધે તત્ર ગણેશો ભક્તવત્સલઃ ।

દત્તઃ ખિન્નશ્ચ તં ધ્યાત્વા તસ્થૌ તત્ર પ્રજાપતે ॥ ૭૫॥

તતસ્તત્કૃપયા તેન સ્વાત્મા તત્ર સમર્પિતઃ ।
યોગાભેદમયત્વેન જાત આત્મનિવેદકઃ ॥ ૭૬॥

દત્તો ભક્તો ગણેશશ્ચ સ્વામી તસ્યેતિ નાશિતમ્ ।
સ્વામિન્યસૌ સેવકોઽપિ તદાકારેણ સંસ્થિતઃ ॥ ૭૭॥

ઇયં ભક્તિર્ગણેશસ્યાત્મનિવેદનરૂપિણી ।
દત્તેન સાધિતા મુખ્યા શાન્તિયોગપ્રયત્નતઃ ॥ ૭૮॥

એતસ્મિન્નન્તરે તત્ર પ્રકટોઽભૂત્ સ્વયં શિવઃ ।
વિજ્ઞાનેશ્વરનામાઽસૌ દત્તં તં પરિષસ્વજે ॥ ૭૯॥

અહો દત્ત મહાભાગ મમ મિત્રત્વમાગતઃ ।
અત્રૈવૈનં ગણેશાનમધ્યાયં યોગસેવયા ॥ ૮૦॥

તતો દત્તં પુરસ્કૃત્ય શઙ્કરો બ્રાહ્મણૈઃ સહ ।
ગણેશં સ્થાપયામાસ ગઙ્ગાયા દક્ષિણે તટે ॥ ૮૧॥

વિજ્ઞાનગણરાજેતિ નામ ચક્રે મહર્ષિભિઃ ।
(Page ખં. ૨ અ. ૮ પાન ૨૨)
ક્ષેત્રં તદાદેર્વિખ્યાતં બભૂવ ગણપસ્ય તત્ ॥ ૮૨॥

વિજ્ઞાનનામકં પુણ્યં શાન્તિયોગફલપ્રદમ્ ।
સર્વસિદ્ધિકરં ક્ષેત્રં યાત્રાકારિ જનસ્ય ચ ॥ ૮૩॥

જ્યેષ્ઠશુક્લચતુર્થ્યાં તૈઃ સ્થાપિતો ગણનાયકઃ ।
અતસ્તત્ર મહોત્સાહસ્તદ્દિને કુર્વતે નરાઃ ॥ ૮૪॥

યોગિભિર્દેવગન્ધર્વૈઃ સિદ્ધૈર્નાગૈશ્ચ માનુષૈઃ ।
નાનાજનૈસ્તથા દક્ષસેવિતં ક્ષેત્રમુત્તમમ્ ॥ ૮૫॥

એતદ્દત્તસ્ય માહાત્મ્યં યઃ શ‍ૃણોતિ નરોત્તમઃ ।
પઠેદ્વા ભવિતા તસ્ય સર્વસિદ્ધિર્ન સંશયઃ ॥ ૮૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે દત્તચરિતં નામાઽષ્ટમોઽધ્યાયઃ ॥ ૨.૮

## ૨.૯ પ્રિયવ્રતરાજ્યપ્રાપ્તિવર્ણનં નામ નવમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

સૂત ઉવાચ ।
દુર્વાસાઃ શઙ્કરસ્યાંશસ્તતાપ પરમં તપઃ ।
નેતિ બ્રહ્મણિ સઞ્જાતો બ્રહ્મભૂતો મહામુનિઃ ॥ ૧॥

તમતિક્રોધસંયુક્તમશાન્તં શાન્તિલાલસમ્ ।
સંવીક્ષ્ય દત્તવજ્જ્ઞાનં દદાવત્રિર્મહામુનિઃ ॥ ૨॥

મયૂરેશક્ષેત્રકે સ ગણેશધ્યાનમાસ્થિતઃ ।
સ્વભક્ત્યા ગણરાજેન શાન્તિયોગયુતઃ કૃતઃ ॥ ૩॥

તદારભ્ય મહાયોગી દુર્વાસાઃ શાન્તિધારકઃ ।
ક્રોધહીનસ્વભાવઃ સ સઞ્જાતો બ્રહ્મવિત્તમઃ ॥ ૪॥

એતદત્રિસુતાનાં તે ચરિતં કથિતં મયા ।
યથા દક્ષાય ભો વિપ્ર મુદ્ગલેન પ્રકાશિતમ્ ॥ ૫॥

અધુના કથયિષ્યામિ સ્વાયમ્ભુવજસન્તતેઃ ।
ચરિતં સર્વપાપઘ્નં કથિતં મુદ્ગલેન યત્ ॥ ૬॥

શૌનક ઉવાચ ।
કથં મુદ્ગલવિપ્રેણ કથિતં તસ્ય ધીમતઃ ।
ચરિત્રં વદ સર્વં મે યથા દક્ષેણ સંશ્રુતમ્ ॥ ૭॥

સૂત ઉવાચ ।
શાપમોહિતદક્ષસ્તુ શ્રુત્વાત્રેયસમુદ્ભવમ્ ।
ચરિતં યોગરૂપં સ મુદ્ગલં પુનરબ્રવીત્ ॥ ૮॥

દક્ષ ઉવાચ ।
ધન્યોઽત્રિર્યસ્ય પુત્રા વૈ ગાણપત્યા મહૌજસઃ ।
યોગિનો યોગદાતારઃ શ્રુતં તેષાં ચરિત્રકમ્ ॥ ૯॥

અધુના વદ મે બ્રહ્મન્ સૃષ્ટિમાર્ગં પુરાતનમ્ ।
સ્વાયમ્ભુવમનોઃ પુત્રૌ ચક્રતુઃ કિં મહૌજસૌ ॥ ૧૦॥

સૂત ઉવાચ ।
દક્ષસ્ય વચનં શ્રુત્વા હર્ષયુક્તેન ચેતસા ।

જગાદ તં મહાયોગી મુદ્ગલઃ પરમાર્થવિત્ ॥ ૧૧॥

મુદ્ગલ ઉવાચ ।
સ્વાયમ્ભુવમનોઃ પુત્રૌ સઞ્જાતો પૂર્ણધાર્મિકો ।
પ્રિયવ્રતોત્તાનપાદૌ નામ્ના ખ્યાતૌ પ્રજાપતી ॥ ૧૨॥

જગામ સાધનરતો વનં જ્યેષ્ઠઃ પ્રિયવ્રતઃ ।
દેહાદિ નશ્વરં મત્વાઽભૂત્સ ખિન્નો મનુસ્તતઃ ॥ ૧૩॥

જગામ નારદસ્તત્ર સહસા તં મનુર્જગૌ ।
પુત્રં પ્રિયવ્રતં વિપ્ર બોધયસ્વ વિધાનતઃ ॥ ૧૪॥

તથેતિ નારદસ્તત્ર યયૌ તસ્ય મહાશ્રમમ્ ।
તં દૃષ્ટ્વોત્થાય રાજર્ષિઃ પ્રણનામ કૃતાઞ્જલિઃ ॥ ૧૫॥

સ્વકીયાજ્ઞાવશં પુત્રં માનસે વીક્ષ્ય સંસ્થિતમ્ ।
તં જગાદ મહાતેજા નારદો રાજસત્તમમ્ ॥ ૧૬॥

(Page ખં. ૨ અ. ૯ પાન ૨૩)
નારદ ઉવાચ ।
શ ૃણુ પુત્ર મહાભાગ પ્રિયવ્રત મહામતે ।
દેહાદિ નશ્વરં સર્વં ત્વયા જ્ઞાતં મહાદ્ભુતમ્ ॥ ૧૭॥

તથાપિ નરદેહોઽયમૃણત્રયસમન્વિતઃ ।
નરદેહકૃતં કર્મ તન્મૂલં સકલં જગત્ ॥ ૧૮॥

સર્વેષામન્નરૂપોઽયં નરદેહો ન સંશયઃ ।
તસ્ય પોષણમત્યન્તં કર્તવ્યં દેહધારિણા ॥ ૧૯॥

સ્વધર્મપાલનેનૈવ વર્ણાશ્રમવિધાનતઃ ।
દેહિના કૃતપુણ્યેનાન્નેન વિશ્વં પ્રપોષિતમ્ ॥ ૨૦॥

યજ્ઞાદિભિરૃણં દૈવં શ્રાદ્ધાદ્યૈશ્ચૈવ પૈતૃકમ્ ।
પુત્રોત્પાદનમાર્ગેણ માનુષ્યં નાશમેષ્યતિ ॥ ૨૧॥

અધુના ઋણયુક્તસ્ત્વં વનં કસ્માત્સમાગતઃ ।
કુરુ રાજ્યં મહાભાગ સ્વધર્મનિરતો મુદા ॥ ૨૨॥

પુત્રેષુ રાજ્યમાત્મીયં સ્થાપયિત્વા ચ શાશ્વતમ્ ।
પશ્ચાત્ત્વં વનમાવિશ્ય યોગાભ્યાસરતો ભવ ॥ ૨૩॥

મુદ્ગલ ઉવાચ ।
નારદસ્ય વચઃ શ્રુત્વા હર્ષિતો રાજસત્તમઃ ।
ઉવાચ તં મનોઃ પુત્રઃ પ્રાઞ્જલિઃ શ્રદ્ધયાન્વિતઃ ॥ ૨૪॥

પ્રિયવ્રત ઉવાચ ।
સ્વામિન્વિજ્ઞમુમિચ્છામિ વદ મે ત્વં મહામતે ।
કેનોપાયેન યોગીન્દ્ર બ્રહ્મભૂતો ભવેન્નરઃ ॥ ૨૫॥

નારદ ઉવાચ ।
શ‍ૃણુ પુત્ર પ્રવક્ષ્યામિ બ્રહ્મભૂયપદપ્રદમ્ ।
માર્ગં સંસાધ્ય શાન્તિં ચ લભતે માનવઃ સ્વયમ્ ॥ ૨૬॥

ગણેશં યોગરૂપં તં જ્ઞાત્વૈવ બ્રહ્મનાયકમ્ ।
બ્રહ્મભૂતો ભવેજ્જન્તુઃ સાધનેન મહામતે ॥ ૨૭॥

ગણશબ્દઃ સમૂહસ્ય વાચકઃ પરિકીર્તિતઃ ।
સમૂહા યોગરૂપાશ્ચ બાહ્યાન્તરવિભેદતઃ ॥ ૨૮॥

અન્નાનાં સકલાનાં ચ સમૂહેન્નમયં સુત ।
કથિતં બ્રહ્મ વેદેષુ એવં નાનાગણાઃ સ્મૃતાઃ ॥ ૨૯॥

તેષાં પતિં ગણેશાનં તં જ્ઞાત્વા યોગિનઃ પુરા ।
શાન્તિં પ્રાપ્તા વિશેષેણ શાન્તિયોગમયં પરમ્ ॥ ૩૦॥

અસ્માકં કુલદેવત્વં સમ્પ્રાપ્તોઽસૌ ગજાનનઃ ।
તમારાધય યત્નેન તતઃ ક્ષેમં ભવિષ્યતિ ॥ ૩૧॥

ગુણેશો ગણરાજ સમ્પૂજ્ય વૈ ભક્તિભાવતઃ ।
બભૂવ બ્રહ્મભૂતશ્ચ ભક્ત્યાસ્માકં પિતામહઃ ॥ ૩૨॥

તસ્ય પુત્રાઃ સમાખ્યાતા બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
સૂર્યઃ શક્તિશ્ચ પઞ્ચૈતે તં સમારાધ્ય ભોગિનઃ ॥ ૩૩॥

તતસ્તે શાન્તિમત્યન્તં પ્રાપ્તા વિશ્વેશ્વરાઃ સુત ।
બ્રહ્મણશ્ચ વયં પુત્રા ભજામસ્તં ગણાધિપમ્ ॥ ૩૪॥

તતો યોગીન્દ્રમુખ્યાશ્ચ વયં જાતાઃ પ્રિયવ્રત ।
સર્વજ્ઞાનસમાયુક્તા બન્ધહીના વિશેષતઃ ॥ ૩૫॥

તથા ત્વમપિ રાજેન્દ્ર ગણેશં ભજ ભાવતઃ ।

તવાતઃ સુલભં સર્વં ભવિષ્યતિ સદાનઘ ॥ ૩૬॥

તત એકાક્ષરં મન્ત્રં દદૌ તસ્મૈ મહામુનિઃ ।
ગણેશારાધનં સર્વં બોધયામાસ યત્નતઃ ॥ ૩૭॥

એતસ્મિન્નન્તરે તત્ર બ્રહ્મણા સહ સઙ્ગતઃ ।
સ્વાયમ્ભુવો મનુઃ સુજ્ઞસ્તૌ દૃષ્ટ્વા પ્રણતૌ સુતૌ ॥ ૩૮॥

બ્રહ્મણા બોધિતોઽત્યન્તં પુનઃ પૌત્રઃ પ્રિયવ્રતઃ ।
મનુના સહરાજર્ષિર્યયૌ સ્વનગરે તદા ॥ ૩૯॥

પુત્રૌ સ્વાયમ્ભુવો રાજ્યે સમાસ્થાપ્ય વનં યયૌ ।
યોગેનારાધયામાસ ગણેશં ભક્તિસંયુતઃ ॥ ૪૦॥

ક્રમેણ પઞ્ચભૂમીનાં ચિત્તસ્ય પરતો ગતઃ ।
ત્યક્ત્વા ચિત્તં મહાયોગી બ્રહ્મભૂતો બભૂવ હ ॥ ૪૧॥

શાન્તિયોગં સમાશ્રિત્ય બ્રહ્મલોકં જગામ હ ।
તત્રૈવ સંસ્થિતોઽભૂત્સ ગણેશભજને રતઃ ॥ ૪૨॥

(Page  ખં. ૨ અ. ૧૦ પાન ૨૪)
પ્રિયવ્રતઃ સ્વયં રાજા પાલયામાસ મેદિનીમ્ ।
ધર્મેણ નીતિદાનેન ત્યાગેન યશ આર્જયત્ ॥ ૪૩॥

સ્વસ્વધર્મરતાઃ સર્વે જના વર્ણાશ્રમાન્વિતાઃ ।
મુદિતાઃ સત્યશીલાચ સ્થિતે રાજ્યે પ્રિય વ્રતે ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પ્રિયવ્રતરાજ્યપ્રાપ્તિવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૨.૯

## ૨.૧૦ દ્વીપવર્ણનં નામ દશમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પ્રિયવ્રતસ્ય પુત્રાશ્ચ દશોત્પન્ના મહૌજસઃ ।
તેજસ્વિનો ધર્મશીલા વિખ્યાતા બલવત્તરાઃ ॥ ૧॥

આગ્નીધ્ર ઇધ્મજિહ્વશ્ચ યજ્ઞબાહુસ્તથા મહાન્ ।
વીરો હિરણ્યરેતાશ્ચ સવનો ધૃતપૃષ્ઠકઃ ॥ ૨॥

મેધાતિથિર્વીતિહોત્રઃ કવિઃ પિતૃસમા બભુઃ ।
કવિઃ સવનવીરૌ ચ ન રાજ્યે દધિરે મતિમ્ ॥ ૩॥

સપ્તદ્વીપેશ્વરાસ્તેન સપ્ત પુત્રાઃ કૃતાઃ પરે ।
જમ્બુદ્વીપેશ્વરં પુત્રં આગ્નીધ્રમકરોન્નૃપઃ ॥ ૪॥

પ્લક્ષદ્વીપેશ્વરસ્તેનેધ્મજિહ્વશ્ચ કૃતઃ સુતઃ ।
શાલ્મલે વૈ યજ્ઞબાહું રાજા તમભિષિક્તવાન્ ॥ ૫॥

હિરણ્યરેતસં ચક્રે કુશદ્વીપેશ્વરં સુતમ્ ।
ક્રૌઞ્ચદ્વીપેશ્વરં ચૈવ ઘૃતપૃષ્ઠં ચકાર હ ॥ ૬॥

મેધાતિથિં પતિં ચક્રે શાકદ્વીપસ્ય શાશ્વતમ્ ।
પુષ્કરેશં સ રાજા તુ વીતિહોત્રં ચકાર હ ॥ ૭॥

તતઃ પ્રિયવ્રતો રાજા વનં પ્રાપ્તઃ પ્રતાપવાન્ ।
નારદાદ્યોગમાસ્થાય ગાણપત્યો બભૂવ હ ॥ ૮॥

અન્તે ગણેશરૂપશ્ચ સઞ્જાતો યોગસેવયા ।
પ્રિયવ્રતસમો રાજા ન ભૂતો ન ભવિષ્યતિ ॥ ૯॥

પુષ્કરે વીતિહોત્રસ્ય દ્વૌ પુત્રૌ સમ્બભૂવતુઃ ।
રમણો ધાતકિર્નામ મહાવીર્યૌ સુધર્મિણૌ ॥ ૧૦॥

રમણસ્ય સ્મૃતં વર્ષં તન્નામ્ના ચ મહાત્મનઃ ।
ધાતકેશ્ચાપિ ખણ્ડોઽયં બુધૈર્ધાતકિરુચ્યતે ॥ ૧૧॥

એકોદ્રિર્માનસાખ્યશ્ચ તન્મધ્યે વલયાકૃતિઃ ।
યોજનાનાં સહસ્રાણિ દશોત્સેધઃ સન્નાન્તતઃ ॥ ૧૨॥

દશસાહસ્રવર્ષાણિ જીવનં તત્ર વિદ્યતે ।
તત્ર બ્રહ્મા સ્વયં સાક્ષાદ્ દ્વીપે તિષ્ઠતિ પુષ્કરે ॥ ૧૩॥

તં સુરા માનવાદ્યાશ્ચ પૂજયન્તિ નિરન્તરમ્ ।
સ્વાદૂદકેન વૈ દક્ષ વૃતો દ્વીપઃ સમન્તતઃ ॥ ૧૪॥

યોજનાનાં ચતુઃષષ્ટિલક્ષં સિન્ધુશ્ચ સોઽદ્ભુતઃ ।
તત્રાન્તે પર્વતો રમ્યો લોકાલોકાહ્વયઃ સ્મૃતઃ ॥ ૧૫॥

એકત્ર લોકસંવાસ એકતો લોકવર્જિતઃ ।
લોકાલોકાચલાદત્ર પ્રકાશશ્ચન્દ્રસૂર્યયોઃ ॥ ૧૬॥

તસ્માત્પરત્ર ભો દક્ષ અન્ધકારઃ સમન્તતઃ ।
લોકાલોકાચલસ્તેન કથિતો મુનિભિઃ પુરા ॥ ૧૭॥

પુષ્કરે બહવો નદ્યો માનસાચલસમ્ભવાઃ ।
સ્વાદૂદકાઃ પુણ્યરૂપા નિર્મલાઃ સર્વભાવતઃ ॥ ૧૮॥

તાસાં જલસ્ય પાનેન રોગા નશ્યન્તિ દુઃખદાઃ ।
(Page ખં. ૨ અ. ૧૦ પાન ૨૫)
ક્લમસ્વેદાદિકં સર્વં વિદ્યતે ન કદાચન ॥ ૧૯॥

શાકદ્વીપેશ્વરસ્યાથ સપ્તપુત્રાસ્તથાઽભવન્ ।
પવમાનસ્તતઃ પૂર્વૌ પુરોજવમનોજવૌ ॥ ૨૦॥

ધૂમ્રાનીકશ્ચિત્રરેફો બહુરૂપો જગદ્ગુરુઃ ।
સપ્તખણ્ડાશ્ચ તદ્દ્વીપે પર્વતાઃ સપ્ત મુખ્યકાઃ ॥ ૨૧॥

પુરોજવસ્ય તન્નામ્ના વર્ષં પ્રથમમુચ્યતે ।
મનોજવસ્ય તન્નામ્ના ખણ્ડમન્યત્પ્રકથ્યતે ॥ ૨૨॥

પવમાનસ્ય ખણ્ડં વૈ પાવમાનાત્મકં તથા ।
ધૌમ્રાનીકં ચતુર્થં વૈ પઞ્ચમં ચૈત્રરેફકમ્ ॥ ૨૩॥

બહુરૂપસ્ય તન્નામ્ના વૈશ્વધારં ચ સપ્તમમ્ ।
પાલયામાસુરવ્યગ્રાઃ સ્વં સ્વં ખણ્ડં પ્રજાપતે ॥ ૨૪॥

દશસાહસ્રવર્ષાણિ તત્ર વૈ જીવનં સ્મૃતમ્ ।
નરાણાં દોષહીનાનાં સદા યૌવનશાલિનામ્ ॥ ૨૫॥

દધિમણ્ડોદકાખ્યેન સંવૃતો દ્વીપ ઉત્તમઃ ।
તાવન્માનેન યુક્તેન યોજનાનાં પ્રજાપતે ॥ ૨૬॥

વિસ્તારો યોજનાનાં ચ દ્વાત્રિંશલ્લક્ષસમ્મિતઃ ।
દ્વીપસ્ય ચ નરાસ્તત્ર યજન્તે વાયુમીશ્વરમ્ ॥ ૨૭॥

ક્રૌઞ્ચદ્વીપસ્ય વિસ્તારો લક્ષષોડશકં મુને ।
યોજનાનાં સમાખ્યાતઃ ખણ્ડાસ્તત્ર ચ સપ્ત વૈ ॥ ૨૮॥

પર્વતાઃ સપ્ત તત્રૈવ નદ્યઃ સપ્ત પ્રકીર્તિતાઃ ।
અન્યાઃ ક્ષુદ્રસ્વરૂપાશ્ચ નદ્યઃ સર્વત્ર સંસ્થિતાઃ ॥ ૨૯॥

ઘૃતપૃષ્ઠસુતાસ્તત્ર સપ્ત ખણ્ડેશ્વરાઃ સ્મૃતાઃ ।
સ્વસ્વનામ્ના સમાખ્યાતાઃ ખણ્ડાસ્તેષાં પ્રજાપતે ॥ ૩૦॥

આમોમધુરુહઃ સપ્ત ઘૃતપૃષ્ઠઃ સુધાત્મકઃ ।
ભ્રાજિષ્ઠો લોહિતો વર્ણવનસ્પતિરિતિ સ્મૃતાઃ ॥ ૩૧॥

એકાદશસહસ્રં તુ વર્ષાણાં જીવનં નૃણામ્ ।
યજન્ત્યાપોમયં તત્ર સદા નારાયણં જનાઃ ॥ ૩૨॥

ક્ષીરોદેન સમન્તાચ્ચ સંવૃતો દ્વીપ આદરાત્ ।
તાવદ્વિસ્તારભૂતશ્ચ શ્વેતદ્વીપોઽપિ સ સ્મૃતઃ ॥ ૩૩॥

હિરણ્યરેતસઃ સપ્ત કુશદ્વીપપતેઃ સુતાઃ ।
વસુશ્ચ વસુદાનશ્ચ દૃઢરુચિસ્તૃતીયકઃ ॥ ૩૪॥

સત્યવ્રતો નાભિગુપ્તો વિવિક્તો નામ દેવકઃ ।
સ્વસ્વનામ્ના ચ તેષાં વૈ ખણ્ડાઃ સપ્ત પ્રજાપતે ॥ ૩૫॥

તત્રૈવ પર્વતાઃ સપ્ત મર્યાદાગિરયઃ સ્મૃતાઃ ।
નદ્યઃ સપ્ત મહાવેગાઃ સુજલા દુઃખહારકાઃ ॥ ૩૬॥

દશસાહસ્રવર્ષાણિ જીવનં તત્ર વિદ્યતે ।
યોજનાનાં કુશદ્વીપશ્ચાષ્ટલક્ષપ્રમાણકઃ ॥ ૩૭॥

ઘૃતોદેનાવૃતઃ સમ્યક્ તાવદાયામરૂપિણા ।
સર્વતસ્તત્ર દેવેશં હવ્યવાહં યજન્તિ તે ॥ ૩૮॥

શાલ્મલદ્વીપનાથસ્ય યજ્ઞબાહોઃ સુતાઃ સ્મૃતાઃ ।
સુરોચનઃ સૌમનસ્યો રમણો દેવવર્ષકઃ ॥ ૩૯॥

આપ્યાયનઃ પારિભદ્રો વિજ્ઞાતઃ સપ્તમઃ સ્મૃતઃ ।
તત્તન્નામ્ના ચ વિખ્યાતાઃ ખણ્ડાસ્તેષાં પ્રજાપતે ॥ ૪૦॥

નદ્યઃ સપ્ત મહાવેગાઃ પર્વતાઃ સપ્ત તત્ર વૈ ।
યોજનાનાં ચતુર્લક્ષં વિસ્તારસ્તસ્ય સર્વતઃ ॥ ૪૧॥

સુરોદેનાવૃતઃ સોઽપિ તાવદાયામરૂપિણા ।
નરાણાં જીવનં તત્રાષ્ટસહસ્રસમાઃ કિલ ॥ ૪૨॥

પ્લક્ષદ્વીપેશ્વરસ્યાથેધ્મજિહ્વસ્ય સુતાસ્તથા ।
શિવો યવયસશ્ચૈવ ક્ષાન્તક્ષેમસુભદ્રકાઃ ॥ ૪૩॥

અમૃતોઽભયસંજ્ઞશ્ચ સપ્તૈતે પરિકીર્તિતાઃ ।
સ્વસ્વનામાઙ્કિતાઃ ખણ્ડાસ્તેષાં તત્ર પ્રકીર્તિતાઃ ॥ ૪૪॥

(Page ખં. ૨ અ. ૧૧ પાન ૨૬)
ગિરયઃ સપ્ત તત્રૈવ નદ્યઃ સપ્ત મહાજલાઃ ।
નરાણાં જીવનં તત્ર પઞ્ચવર્ષસહસ્રકમ્ ॥ ૪૫॥

દ્વિલક્ષયોજનાન્યેવ વિસ્તારસ્તસ્ય સર્વતઃ ।
ઇક્ષૂણાં ચ રસોદેન તાવતા પરિસંવૃતઃ ॥ ૪૬॥

લક્ષદ્વીપે યજન્તે વૈ સૂર્યં ધર્મપરાયણાઃ ।
વૃષ્ટિસંસ્રાવિણં દેવં તેજોરૂપેણ સંસ્થિતમ્ ॥ ૪૭॥

પ્લક્ષદ્વીપાદિષુ જ્ઞેયં શાકદ્વીપાન્તિમેષુ વૈ ।
વર્ણાશ્રમવિભાગેન સ્વધર્મે સંસ્થિતા જનાઃ ॥ ૪૮॥

પુષ્કરે સર્વધર્મજ્ઞા એકમાર્ગં સમાશ્રિતાઃ ।
એકવર્ણાશ્રમાસ્તત્ર સમશીલાઃ પ્રજાપતે ॥ ૪૯॥

ન તેષુ યુગમાનં ચ યુગધર્મઃ સ્વભાવતઃ ।
સદા સમાનઃ કાલશ્ચ સ્વધર્મસ્તાદૃશઃ સ્મૃતઃ ॥ ૫૦॥

ન લોભો ન ચ માત્સર્યં પરસ્પરહિતે રતાઃ ।
નરાસ્તે પુણ્યશીલા વૈ સ્વદારરતતોષિણઃ ॥ ૫૧॥

કર્મણાં ફલભોક્તારો તેષુ દ્વીપેષુ શૌનક ।
બભૂવુર્ભાવિકાઃ સર્વે દેવવત્ ક્રીડને રતાઃ ॥ ૫૨॥

સ્વસ્વદ્વીપસ્થિતં દેવમભજંસ્તે તતઃ સુખમ્ ।
સમ્પ્રાપુસ્તે જનાઃ સર્વે સાલોક્યાદિચતુષ્ટયમ્ ॥ ૫૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિત્રે દ્વીપવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૨.૧૦

## ૨.૧૧ ભૂગોલવર્ણનં નામૈકાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

જમ્બુદ્વીપેઽશ્વરસ્યાથ નવપુત્રા બભૂવિરે ।
નાભિઃ કિમ્પુરુષશ્ચૈવ તથા હરિરિલાવૃતઃ ॥ ૧॥

હિરણ્મયઃ કુરૂ રમ્યો ભદ્રાશ્વઃ કેતુમાલકઃ ।
સ્વસ્વનામાઙ્કિતાન્ ખણ્ડાન્ પિતા તેભ્યો દદૌ સ્વયમ્ ॥ ૨॥

એવં દત્ત્વા ચ સમ્પ્રૈતે પ્રિયવ્રતસુતાસ્તતઃ ।
યયુર્વનં તપસ્તપ્ત્વા ગાણપત્યા બભૂવિરે ॥ ૩॥

યયુર્ગાણેશ્વરં ધામ તે ત્વન્તે બ્રહ્મવાદિનઃ ।
પુનરાવૃત્તિશૂન્યં યદ્યોગાભેદં પ્રભાવતઃ ॥ ૪॥

જમ્બુદ્વીપસ્ય વિસ્તાર એકલક્ષં સમન્તતઃ ।
યોજનાનાં તથા દક્ષ લવણોદેન સંવૃતઃ ॥ ૫॥

તત્ર મધ્યે મહાશૈલો મેરુર્હેમમયઃ શુભઃ ।
નાનાધાતુવિચિત્રાઙ્ગો નાનૌષધિસમન્વિતઃ ॥ ૬॥

નદીભિઃ સુજલાભિશ્ચ યુતોઽસૌ કનકાચલઃ ।
ગુહાભિશ્ચ તથા દક્ષ નાનાજન્તુસમન્વિતઃ ॥ ૭॥

લક્ષયોજન ઉત્સેધસ્તસ્ય પ્રોક્તો મહાત્મનઃ ।
ષષ્ટિસાહસ્રમેતસ્ય યોજનાનાં પ્રમાણકમ્ ॥ ૮॥

બહિસ્થિતેસ્તથા દ્વાત્રિંશત્સહસ્રમધઃસ્થિતેઃ ।
અષ્ટસાહસ્રકં ચૈવ યોજનાનાં સમન્તતઃ ॥ ૯॥

અધ ઊર્ધ્વવિભેદેન સ્થિતોઽસૌ કનકાચલઃ ।
પદ્માકારસ્વરૂપેણ ભૂમિમધ્યે સ્થિતો બભૌ ॥ ૧૦॥

પદ્મપત્રસમાનેન હ્યાકારેણ વ્યવસ્થિતાઃ ।
પર્વતાઃ પરિતસ્તસ્ય નાનાધાતુમયા બભુઃ ॥ ૧૧॥

તેષુ સર્વત્ર દેવાનાં ગુહ્યકાનાં ચ પક્ષિણામ્ ।
યોગિનાં રક્ષસાં ચૈવ સિદ્ધાનાં ચ મહાત્મનામ્ ॥ ૧૨॥

નાગેન્દ્રાણાં મુનીન્દ્રાણાં ગન્ધર્વાણાં પ્રજાપતે ।
પિશાચાનાં ચ ભૂતાનાં નિવાસા અદ્ભુતા બભુઃ ॥ ૧૩॥

(Page ખં. ૨ અ. ૧૧ પાન ૨૭)
ઉદ્યાનાનિ વિચિત્રાણિ દેવક્રીડનકાનિ ચ ।

જરાશોકહરાણ્યેવ જલાનિ ખલુ સર્વતઃ ॥ ૧૪॥

કૈલાસાદ્યષ્ટ શૈલેન્દ્રા દિક્ષુ તસ્ય વ્યવસ્થિતાઃ ।
તેષુ રુદ્રાદિદેવેન્દ્રા વસન્તિ દિગધીશ્વરાઃ ॥ ૧૫॥

મધ્યે સ્થાનં મહારણ્યં બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
ઇત્યેવં સર્વદેવાનાં સુખદઃ સ ગિરિર્બભૌ ॥ ૧૬॥

તસ્ય દક્ષિણભાગે ચ દ્વીપખણ્ડાસ્ત્રયોઽભવન્ ।
ઉત્તરે ચ તથા ખણ્ડાસ્ત્રયસ્તસ્ય પ્રકીર્તિતાઃ ॥ ૧૭॥

પૂર્વપશ્ચિમભાગે દ્વૌ વર્ષૌ તસ્ય હિ સમ્મતૌ ।
મધ્યે સમન્તતો વર્ષ એકસ્તસ્ય પ્રજાપતે ॥ ૧૮॥

એવં ખણ્ડાઃ સમાખ્યાતા નવ દ્વીપે ચ મધ્યમે ।
હિમાચલાદયસ્તેષુ મર્યાદાગિરયઃ સ્મૃતાઃ ॥ ૧૯॥

દ્વિસહસ્રં સમુત્સેધો યોજનાનાં પ્રજાપતે ।
અષ્ટૌ ચૈવ પ્રવિસ્તારા મહાશૈલા સમન્તતઃ ॥ ૨૦॥

સહસ્રં યોજનાનાં ચ ખણ્ડે ખણ્ડે ચ વિસ્તરઃ ।
પ્રત્યેકં ભિન્નભાવેન તેષુ લોકા વસન્તિ ચ ॥ ૨૧॥

વર્ષેષુ પર્વતાશ્ચૈવ નદ્યો નાનાવિધાઃ સ્મૃતાઃ ।
તત્ર સર્વે જના દક્ષ વસન્તિ સુખભોગિનઃ ॥ ૨૨॥

અજનાભવિહીનાશ્ચ ખણ્ડા અષ્ટૌ પ્રકીર્તિતાઃ ।
તેષુ સ્વાભાવિકી સિદ્ધિઃ સ્થિરભાવેન સંસ્થિતા ॥ ૨૩॥

સદા યૌવનયુક્તાશ્ચ નરા નાર્યઃ સુરૂપિણઃ ।
દેવવત્સુખભોક્તારો બભુઃ સાધુગુણાન્વિતાઃ ॥ ૨૪॥

પરસ્પરેષુ સંસક્તાઃ સમકાલપ્રભોગિનઃ ।
વર્ણાશ્રમરતાઃ સર્વે ધર્મયુક્તા દયાન્વિતાઃ ॥ ૨૫॥

ન તત્ર યુગધર્મશ્ચ સદા સામાન્યધર્મિણામ્ ।
શીતોષ્ણાદિભવં દુઃખં નાસ્તિ ખણ્ડેષુ માનદ ॥ ૨૬॥

એકાદશશતાન્યેવ સહસ્રં તેષુ કુત્રચિત્ ।
શતાનિ દ્વાદશાપ્યેવ ત્રયોદશશતાનિ ચ ॥ ૨૭॥

શતાનિ કુત્રચિત્પઞ્ચ દશાપ્યેવ પ્રજાપતે ।
શતાનિ પઞ્ચવર્ષાણિ જીવન્તિ કિલ માનવાઃ ॥ ૨૮॥

નાભેઃ ખણ્ડોઽજનાભશ્ચ હિમાચલસમીપગઃ ।
કર્માત્મકઃ સમાખ્યાતઃ સર્વમાન્યો બભૂવ હ ॥ ૨૯॥

તત્ર કર્માણિ કૃત્વા તુ નરા યાન્તિ સમન્તતઃ ।
દ્વીપેષુ ખણ્ડેષુ તથા તથા પાતાલભૂમિષુ ॥ ૩૦॥

સ્વર્ગેષુ ભોગપ્રાપ્ત્યર્થં કર્મણાં ફલમેવ ચ ।
તેષુ ભુક્ત્વા પુનર્હ્યત્ર યાન્તિ કર્માર્થમઞ્જસા ॥ ૩૧॥

અથવા પાપકર્માણિ કૃત્વાત્રૈવ વ્રજન્તિ તે ।
નરકેષુ નરા નાર્યઃ પુનરત્ર પ્રયાન્તિ ચ ॥ ૩૨॥

અત્ર યોગેન યોગીન્દ્રો ભવેદ્વૈ નાત્ર સંશયઃ ।
ગાણપત્યસ્વરૂપં ચ તદ્ભક્ત્યા લભતે નરઃ ॥ ૩૩॥

અતઃ શ્રેષ્ઠતમઃ પ્રોક્તો વર્ષોઽયં ચ હિમાલયઃ ।
સર્વદાતૃત્વમાપન્નો માન્યસ્તેષાં પ્રજાપતે ॥ ૩૪॥

ભોગેષુ સ્વલ્પરૂપોઽયં સર્વેભ્યઃ કથિતો બુધૈઃ ।
શીતોષ્ણાદિસમાયુક્તો નાનારોગસમન્વિતઃ ॥ ૩૫॥

તત્ર વર્ણાશ્ચ ચત્વારસ્તેષાં વૈ વ્યભિચારતઃ ।
વર્ણા નાનાવિધાઃ પ્રોક્તા ભિન્નધર્માત્મકાઃ પ્રભો ॥ ૩૬॥

અસ્મિન્ યુગભવં માનં યુગધર્માઃ સમન્તતઃ ।
નરાઃ પ્રકૃતિભિન્નાશ્ચ સ્વાર્થાદિકસમન્વિતાઃ ॥ ૩૭॥

બહવોઽગ્રે બભુઃ શૈલા વિન્ધ્યસહ્યાદ્રિકાદયઃ ।
તેભ્યઃ પ્રસૂતા નદ્યશ્ચ બહ્વ્યઃ સર્વત્ર સંસ્થિતાઃ ॥ ૩૮॥

પુણ્યદાઃ સ્નાનમાત્રેણ મિષ્ટતોયા મહામતે ।
નરાઃ કર્મકરાસ્તત્ર ત્રિવિધાચારસંયુતાઃ ॥ ૩૯॥

તીર્થાનિ સર્વદેવાનાં સ્થાનાનિ ત્વગ્રજન્મનામ્ ।
તત્સેવકાનામધિકકર્મોત્થફલદાનિ વૈ ॥ ૪૦॥

એવમાદ્યગુણૈર્યુક્તો જના ભો વર્ષ એવ ચ ।
કર્મણાં ભરણાત્સુજ્ઞૈર્ભારતોઽયં પ્રકીર્તિતઃ ॥ ૪૧॥

એતદ્ભૂમણ્ડલં કૃત્સ્નં કથિતં તે સમાસતઃ ।
શ્રવણાત્પઠનાચ્ચાપિ પાપાપહરણં ભવેત્ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિત્રે ભૂગોલવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૨.૧૧

## ૨.૧૨ સૂર્યમણ્ડલવર્ણનં નામ દ્વાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પ્રસઙ્ગાત્સર્વલોકાનાં વચ્મિ વૈ સંસ્થિતિં પરામ્ ।
સ્વર્ગાણામપિ સઙ્ક્ષેપાન્મુખ્યાનાં કથયામિ તે ॥ ૧॥

ભૂર્લોકોઽથ ભુવર્લોકઃ સ્વર્લોકશ્ચ મહો જનઃ ।
તપોલોકસ્તથાસત્યો લોકાસ્ત્વણ્ડોદ્ભવાઃ સ્મૃતાઃ ॥ ૨॥

અર્યમા ચન્દ્રમા યાવત્કિરણૈરવભાસતે ।
તાવાન્ ભૂર્લોક આખ્યાતઃ પુરાણેષુ પ્રજાપતે ॥ ૩॥

પદ્ભયાં નરૈર્ભવેદ્ગમ્યઃ સ એવં શાસ્ત્રસમ્મતઃ ।
ભૂર્લોકઃ કથિતો દક્ષ સપ્તદ્વીપાત્મકઃ ખલુ ॥ ૪॥

પ્રમાણમખિલં યાવદ્ભૂર્લોકસ્ય સમન્તતઃ ।
તાવચ્ચૈવ ભુવર્લોકે પરિમાણં ચ કથ્યતે ॥ ૫॥

ભૂર્લોકાત્સૂર્યપર્યન્તં ભુવર્લોકઃ પ્રકીર્તિતઃ ।
તસ્માચ્ચ ધ્રુવપર્યન્તં સ્વર્લોકઃ કથિતો બુધૈઃ ॥ ૬॥

તત્ર વાયોઃ સમાખ્યાતા નેમયોઽષ્ટવિધાઃ પ્રભો ।
આવહઃ પ્રવહશ્ચૈવ તથૈવાન્નવહઃ પરઃ ॥ ૭॥

સંવહો વિવહશ્ચાથ તદૂર્ધ્વં ચ પરાવહઃ ।
તથા પરિવહશ્ચોર્ધ્વં વહસ્તસ્માત્પરઃ સ્મૃતઃ ॥ ૮॥

ભૂમેર્યોજનલક્ષે તુ ભાનોર્વૈ મણ્ડલં સ્થિતમ્ ।
લક્ષે દિવાકરાત્પ્રોક્તં ચન્દ્રમણ્ડલમાસ્થિતમ્ ॥ ૯॥

નક્ષત્રમણ્ડલં કૃત્સ્નં તસ્માલ્લક્ષે પ્રકાશતે ।

દ્વે લક્ષયોજને તસ્માત્ ગ્રહાણાં મણ્ડલં સ્મૃતમ્ ॥ ૧૦॥

તસ્માલ્લક્ષે ઋષીણાં યન્મણ્ડલં ચ પ્રકાશતે ।
ઋષીણાં મણ્ડલાદૂર્ધ્વં લક્ષમાત્રે સ્થિતો ધ્રુવઃ ॥ ૧૧॥

મેઢીભૂતઃ સમસ્તસ્ય જ્યોતિશ્ચક્રસ્ય વૈ ધ્રુવઃ ।
વાયુરશ્મિધરઃ સોઽપિ ચાલયન્ જ્યોતિષાં ગણમ્ ॥ ૧૨॥

દશયોજનસાહસ્રં મણ્ડલં ભાસ્કરસ્ય ચ ।
તથા દ્વાદશસાહસ્રં મણ્ડલં શશિનઃ સ્મૃતમ્ ॥ ૧૩॥

સૂર્યાધસ્તાત્ સ્થિતો રાહુર્દશસાહસ્રયોજનઃ ।
ત્રયોદશસહસ્રં ચ મણ્ડલં તસ્ય કથ્યતે ॥ ૧૪॥

તમોમયં તમઃસ્થાનં ગત્યા પર્વણિ ધાવતિ ।
છાયયા સૂર્યચન્દ્રૌ વા આચ્છાદયતિ સત્વરમ્ ॥ ૧૫॥

તદેવ ગ્રહણં દક્ષ કથ્યતે શાસ્ત્રવાદિભિઃ ।
અખિલં તમસા વ્યાપ્તં મણ્ડલં રવિસોમયોઃ ॥ ૧૬॥

(Page  ખં. ૨ અ. ૧૨ પાન ૨૯)
ચન્દ્રસ્ય ષોડશો ભાગો મણ્ડલં ભાર્ગવસ્ય ચ ।
ભાર્ગવાત્પાદહીનં યત્ દ્વિજ તચ્ચ બૃહસ્પતેઃ ॥ ૧૭॥

બૃહસ્પતેઃ પાદહીનં મણ્ડલં ભૌમસૌરયોઃ ।
વિસ્તારાચ્ચ તયોઃ પાદહીનં સૌમ્યસ્ય મણ્ડલમ્ ॥ ૧૮॥

તારાનક્ષત્રરૂપાણિ હીનાનિ તુ પરસ્પરાત્ ।
શતાનિ પઞ્ચચત્વારિ ત્રીણિ દ્વે યોજનાનિ વૈ ॥ ૧૯॥

સર્વેભ્યોઽપિ નિકૃષ્ટાનિ તારાણાં મણ્ડલાનિ તુ ।
યોજનાધ્યર્ધમાત્રાણિ તેભ્યો ન્યૂનં ન વિદ્યતે ॥ ૨૦॥

ઉપરિષ્ટાત્ ત્રયસ્તેષાં ગ્રહા યે દૂરસર્પિણઃ ।
સૌરોઙ્ગિરાશ્ચ ભૌમશ્ચ વિજ્ઞેયા મન્દગામિનઃ ॥ ૨૧॥

તેભ્યોધસ્તાચ્ચ ચત્વારઃ પુનરન્યે મહાગ્રહાઃ ।
સૂર્યઃ સોમો બુધશ્ચૈવ ભાર્ગવશ્ચૈવ શીઘ્રગાઃ ॥ ૨૨॥

અયને દ્વે સમાસ્થાય ભાનુશ્ચરતિ સર્વદા ।
પ્રભુઃ સર્વગ્રહાણાં સ સર્વાધસ્તાત્પ્રસર્પતિ ॥ ૨૩॥

વિસ્તીર્ણં મણ્ડલં કૃત્વા ચરત્યૂર્ધ્વં તતઃ શશી ।
નક્ષત્રમણ્ડલં કૃત્સ્નં સોમાદૂર્ધ્વં પ્રસર્પતિ ॥ ૨૪॥

નક્ષત્રેભ્યઃ કવિશ્ચોર્ધ્વં તસ્માદૂર્ધ્વં બુધઃ સ્મૃતઃ ।
ભૌમઃ સોમસુતાદૂર્ધ્વં તસ્માદૂર્ધ્વં બૃહસ્પતિઃ ॥ ૨૫॥

શનૈશ્ચરસ્તતો હ્યૂર્ધ્વં તસ્માત્ સપ્તર્ષિમણ્ડલમ્ ।
ઋષીણાં ચૈવ સપ્તાનાં ધ્રુવશ્ચોર્ધ્વં વ્યવસ્થિતઃ ॥ ૨૬॥

નવયોજનસાહસ્રો ભાસ્કરસ્ય રથઃ સ્મૃતઃ ।
ઈષાદણ્ડસ્તથૈવાસ્ય દ્વિગુણો વૈ પ્રજાપતે ॥ ૨૭॥

લક્ષપ્રમાણમક્ષશ્ચ ધ્રુવાધારેણ સંસ્થિતઃ ।
દ્વિતીયેઽક્ષે તુ તચ્ચક્રં સંસ્થિતં માનસાચલે ॥ ૨૮॥

ચક્રં રાશિમયં તસ્ય દ્વાદશારં પ્રકીર્તિતમ્ ।
ગાયત્રીમુખ્યકાસ્તસ્ય સપ્ત છન્દોમયા હયાઃ ॥ ૨૯॥

દક્ષિણાયનમાસાદ્ય ક્ષિપ્રં ક્ષિપ્રં પ્રસર્પતિ ।
યદોત્તરગતો ભાનુરક્ષિપ્રં ચૈવ સર્પતિ ॥ ૩૦॥

માનસોપરિ માહેન્દ્રી પ્રાચ્યાં દિશિ મહાપુરી ।
દક્ષિણે ધર્મરાજસ્ય વરુણસ્ય ચ પશ્ચિમે ॥ ૩૧॥

ઉત્તરે તુ કુબેરસ્ય તન્નામાનિ નિબોધ મે ।
અમરાવતી સંયમની સુખા ચૈવ વિભા ક્રમાત્ ॥ ૩૨॥

જ્યોતિષાં ચક્રમાદાય દેવદેવઃ પ્રજાપતિઃ ।
ઉદયે ચ મહેન્દ્રસ્ય નગર્યાં સ પ્રકાશતે ॥ ૩૩॥

યમપુર્યાં ચ મધ્યાહ્ને સાયાહ્ને વરુણસ્ય તુ ।
નિશામધ્યે ચ કૌબેર્યામેવં ચરતિ ભાસ્કરઃ ॥ ૩૪॥

ઉદયાસ્તમયેનાયં સર્વકાલસમાનગઃ ।
અશેષાસુ દિશાસ્વેષ સર્વાસુ વિદિશાસુ ચ ॥ ૩૫॥

કુલાલચક્રવલ્લોકે ભ્રમત્યેવં દિનેશ્વરઃ ।
સ્વસ્વબોધસમાનં ચ ભિન્નં કાલં પ્રકાશયન્ ॥ ૩૬॥

કરોત્યહસ્તથા રાત્રિં કિરણૈઃ સ્થાપયન્ પ્રજાઃ ।

દિવાકરકરૈરેતત્ પૂરિતં ભુવનત્રયમ્ ॥ ૩૭॥

જલં સ્થલં નભઃ પ્રોક્તં લોકાનાં સ્થાનમુત્તમમ્ ।
આદિત્યમૂલમેતચ્ચ ત્રિવિધં નાત્ર સંશયઃ ॥ ૩૮॥

ભવત્યસ્માજ્જગત્કૃત્સ્નં સદેવાસુરમાનુષમ્ ।
મધ્યભાગે તદાધારમન્તે તત્ર પ્રતિષ્ઠિતમ્ ॥ ૩૯॥

બ્રહ્મવિષ્ણુમહેશેન્દ્રચન્દ્રતારાગ્નિનાગજમ્ ।
વીરુદ્ધિપ્રોદકાનાં યત્તેજસ્તદ્રવિસમ્ભવમ્ ॥ ૪૦॥

દ્યુતિર્દ્યુતિમતાં કૃત્સ્ના યત્તેજઃ સાર્વલૌકિકમ્ ।
વિભજ્ય સ્વયમેવેશઃ ક્રીડતિ સ્મ દિવાકરઃ ॥ ૪૧॥

સર્વાત્મા સર્વલોકેશો ગણેશાંશઃ પ્રભાકરઃ ।
મૂલં ત્રિભુવનસ્યાપિ કર્મરૂપી ચ દૈવતમ્ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે સૂર્યમણ્ડલવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૨.૧૨

## ૨.૧૩ નવગ્રહરથાદિવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
રવેઃ કલાંશસમ્ભૂતા દ્વાદશાન્યે ચ ભાનવઃ ।
દ્વાદશસ્વેવ માસેષુ તે તપન્તિ રથસ્થિતાઃ ॥ ૧॥

સરથોઽધિષ્ઠિતો દેવૈરાદિત્યૈર્મુનિભિઃ તથા ।
ગન્ધર્વૈરપ્સરોભિશ્ચ ગ્રામણીસર્પરાક્ષસૈઃ ॥ ૨॥

ધાતાર્યમાઽથ મિત્રશ્ચ વરુણઃ શક્રસંજ્ઞિતઃ ।
વિવસ્વાનથ પૂષા ચ પર્જન્યશ્ચાંશુરેવ ચ ॥ ૩॥

ભગસ્ત્વષ્ટાઽથ વિષ્ણુશ્ચ દ્વાદશૈતે ચ ભાનવઃ ।
તપન્તિ રથસંસ્થા વૈ વસન્તાદિક્રમેણ ચ ॥ ૪॥

પુલસ્ત્યઃ પુલહોઽથાત્રિર્વસિષ્ઠશ્ચાઙ્ગિરા ભૃગુઃ ।
ભરદ્વાજો ગૌતમશ્ચ કશ્યપઃ ક્રતુરેવ ચ ॥ ૫॥

જમદગ્નિઃ કૌશિકોઽથ મુનયો બ્રહ્મવાદિનઃ ।

સ્તુવન્તિ પુરતો દેવં છન્દોભિર્વિવિધૈસ્તસ્થા ॥ ૬॥

રથકૃચ્ચ રથૌજા વૈ રથચિત્રઃ સ્વબાહુકઃ ।
રથસ્વનોઽથ વરુણઃ સુષેણઃ સેનજિત્તથા ॥ ૭॥

તાર્ક્ષ્યશ્ચારિષ્ટનેમિર્વૈ રથજિત્સત્યજિત્તથા ।
ગ્રામણ્યો દેવદેવસ્ય કુર્વતેઽભીષુસઙ્ગ્રહમ્ ॥ ૮॥

અથ હેતિઃ પ્રહેતિશ્ચ પૌરુષેયો વધસ્તથા ।
સર્પો વ્યાઘ્રસ્તથા વ્યાધો વાતો વિદ્યુદ્દિવાકરઃ ॥ ૯॥

બ્રહ્મોપેતશ્ચ ભો દક્ષ યજ્ઞોપેતસ્તથાપરઃ ।
રાક્ષસપ્રવરા એતે પ્રયાન્તિ પુરતઃ ક્રમાત્ ॥ ૧૦॥

વાસુકિઃ કઙ્કનીરશ્ચ તક્ષકો નાગમુખ્યકઃ ।
એલાપત્રઃ શઙ્ખપાલસ્તથૈરાવતસંજ્ઞિતઃ ॥ ૧૧॥

ધનઞ્જયો મહાપદ્મસ્તથા કર્કોટકોઽપરઃ ।
કમ્બલાશ્વતરૌ ચૈવ વહન્ત્યેતે પ્રભાકરમ્ ॥ ૧૨॥

નાગા દ્વાદશમાસેષુ પ્રજાધીશ યથાક્રમમ્ ।
તુમ્બરુર્નારદો હાહા હૂહૂર્વિશ્વાવસુસ્તથા ॥ ૧૩॥

ઉગ્રસેનો વસુરુચિરવીવસુરથાપરઃ ।
ચિત્રસેનસ્તથોર્ણાયુર્ધૃતરાષ્ટ્રઃ પ્રજાપતે ॥ ૧૪॥

સૂર્યવર્ચા દ્વાદશૈતે ગન્ધર્વા ગાયનાઃ પુરઃ ।
ઘનસ્તની ચ રમ્ભા વૈ તથાન્યા પુઞ્જિકસ્થલી ॥ ૧૫॥

મેનકા સહજન્યા ચ પ્રમ્લોચાઽથ પ્રજાપતે ।
અનુમ્લોચા ઘૃતાચી ચ વિશ્વાચી ચોર્વશી પરા ॥ ૧૬॥

અન્યા ચ પૂર્વચિત્તિર્યા ભાસ્કરં ચ તિલોત્તમા ।
તાણ્ડવૈસ્તોષયન્ત્યેનં વસન્તાદિષુ વૈ ક્રમાત્ ॥ ૧૭॥

એવં દેવા વસન્ત્યર્કે દ્વૌ દ્વૌ માસૌ ક્રમેણ તુ ।
સૂર્યમાપ્યાયયન્ત્યેતે તેજસા તેજસાં નિધિમ્ ॥ ૧૮॥

ગ્રથિતૈઃ સ્વવચોભિસ્તં સ્તુવન્તિ મુનયો રવિમ્ ।
(Page ખં. ૨ અ. ૧૩ પાન ૩૧)
ગન્ધર્વાપ્સરસશ્ચૈનં ગેયૈર્નૃત્યૈરુપાસતે ॥ ૧૯॥

ગ્રામણીર્હ્યક્ષભૂતાનિ કુર્વતેઽભીષુસઙ્ગ્રહમ્ ।
સર્પા વહન્તિ દેવેશં યાતુધાનાઃ પ્રયાન્તિ તમ્ ॥ ૨૦॥

વાલખિલ્યા નયન્ત્યસ્તં પરિવાર્યોદયાદ્રવિમ્ ।
એતે તપન્તિ વર્ષન્તિ ભાન્તિ વાન્તિ સૃજન્તિ ચ ॥ ૨૧॥

ભૂતાનામશુભં કર્મ વ્યપોહન્ત્યનુકીર્તિતાઃ ।
એતે સહૈવ સૂર્યેણ ભ્રમન્તિ દિવિ સર્વદા ॥ ૨૨॥

વિમાનેઽધિષ્ઠિતા નિત્યં કામગે વાતરંહસિ ।
વર્ષન્તશ્ચ તપન્તશ્ચ હ્લાદયન્તઃ સદા પ્રજાઃ ॥ ૨૩॥

ગોપાયન્તીહ ભૂતાનિ સર્વાણ્યેતે યુગક્ષયે ।
એતેષાં રૂપમાસ્થાય સૂર્યસ્તપતિ નિત્યશઃ ॥ ૨૪॥

અહોરાત્રવ્યવસ્થાનાં કારણં સ પ્રજાપતિઃ ।
પિતૃદેવમનુષ્યાદિનિત્યમાપ્યાયયેદ્રવિઃ ॥ ૨૫॥

એવમેષ ગણેશાંશો દેવદેવો દિવાકરઃ ।
કરોતિ નિયતં કાલં કાલાત્મા ભગવાન્ સ્વયમ્ ॥ ૨૬॥

અન્યે ચાષ્ટગ્રહાઃ પ્રોક્તા ધ્રુવે બદ્ધા ભ્રમન્તિ તે ।
દિવાકરકરૈઃ પુષ્ટા તં રવિં વાતરશ્મિભિઃ ॥ ૨૭॥

રથસ્ત્રિચક્રઃ સોમસ્ય કુન્દાભાસ્તસ્ય વાજિનઃ ।
વામદક્ષિણતો યુક્તા દશ તે વૈ ક્ષપાકરાઃ ॥ ૨૮॥

વીથ્યાશ્રયેણ નક્ષત્રં ચરત્યેવ રવિર્યથા ।
હ્રાસવૃદ્ધિસમાયુક્તો ધ્રુવાધારેણ સર્વદા ॥ ૨૯॥

સ સોમઃ શુક્લપક્ષે તુ ભાસ્કરે પરતઃ સ્થિતે ।
આપૂર્યતે કલામાત્રઃ સતતં વર્ધતે તતઃ ॥ ૩૦॥

કૃષ્ણે પીતં સુરૈઃ સોમમાપ્યાયયતિ નિત્યદા ।
એકેન રશ્મિના દક્ષ સુષુમ્નાખ્યેન ભાસ્કરઃ ॥ ૩૧॥

એવં સૂર્યસ્ય વીર્યેણ સોમસ્યાપ્યાયિતા તનુઃ ।
દૃશ્યતે પૌર્ણમાસીસ્થા સમ્પૂર્ણા દિવસૈઃ ક્રમાત્ ॥ ૩૨॥

સમ્પૂર્ણમર્ધમાસેન તં સોમમમૃતાત્મકમ્ ।

પિબન્તિ દેવતાઃ સર્વાઃ ક્રમેણામૃતભોજિનઃ ॥ ૩૩॥

તતઃ પઞ્ચદશે ભાગે કિઞ્ચિચ્છેષે કલાત્મકે ।
પિતરશ્ચાપરાહ્ણે તં જઘન્યં પર્યુપાસતે ॥ ૩૪॥

પિબન્તિ દ્વિલવં કાલં શિષ્ટા તસ્ય કલા તુ યા ।
સ્વધામૃતમયી પુણ્યા સા ચન્દ્રસ્યામૃતાત્મિકા ॥ ૩૫॥

નિઃસૃતં તદમાયાં તુ ગભસ્તિભ્યઃ સ્વધામૃતમ્ ।
માસતૃપ્તિકરં તેષાં પિતરઃ સન્તિ નિર્વૃતાઃ ॥ ૩૬॥

ન સોમસ્ય વિનાશઃ સ્યાત્સુધાદેવસ્ય પાનતઃ ।
એવં સૂર્યનિમિત્તોઽસ્ય ક્ષયો વૃદ્ધિશ્ચ સર્વદા ॥ ૩૭॥

સોમપુત્રસ્ય સિંહૈશ્ચ ચતુર્ભિર્વાયુવેગિભિઃ ।
સ્યન્દનસ્તૈઃ સમાયુક્તસ્તેનાસૌ યાતિ સર્વતઃ ॥ ૩૮॥

ભાર્ગવસ્ય તથાષ્ટાશ્વઃ સ્યન્દનો હેમનિર્મિતઃ ।
અષ્ટાભિરપિ મેષૈશ્ચ રથો ભૌમસ્ય શોભનઃ ॥ ૩૯॥

બૃહસ્પતેશ્ચ રક્તાશ્વૈરષ્ટભિર્હેમનિર્મિતઃ ।
રથોઽષ્ટનીલગૃધ્રૈશ્ચ મન્દસ્યાયસનિર્મિતઃ ॥ ૪૦॥

સ્વર્ભાનોઃ કૃષ્ણસિંહૈશ્ચ યુક્તઃ કેતોઃ કપોતકૈઃ ।
એતે નવગ્રહાણાં વૈ સમાખ્યાતા મહારથાઃ ॥ ૪૧॥

સર્વે ધ્રુવે સમાબદ્ધા વાતરશ્મિભિરાદરાત્ ।
ગ્રહર્ક્ષતારાધિષ્ણ્યાનિ ધ્રુવે બદ્ધાનિ સર્વદા ॥ ૪૨॥

ભ્રમતિ ભ્રામયત્યેતાન્ સર્વાશાનિલરશ્મિભિઃ ।
અતો ધ્રુવાધારમિદં જ્યોતિશ્ચક્રં પ્રજાપતે ॥ ૪૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે નવગ્રહરથાદિવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૨.૧૩
(Page ખં. ૨ અ. ૧૪ પાન ૩૨)

## ૨.૧૪ ઊર્ધ્વસ્થલોકવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।

ધ્રુવાદૂર્ધ્વં મહર્લોકઃ કોટિયોજનદૂરગઃ ।
કલ્પાધિકારિણસ્તત્ર વસન્તિ સુખભોગિનઃ ॥ ૧॥

જનલોકો મહર્લોકાત્ કોટિયોજનદૂરગઃ ।
સનકાદ્યાઃ સ્થિતાસ્તત્ર ત્રસરેણુવિમાનગાઃ ॥ ૨॥

જનલોકાત્તપોલોકઃ કોટિયોજનદૂરગઃ ।
વૈરાજાસ્તત્ર વૈ દેવાઃ સ્થિતા ભયવિવર્જિતાઃ ॥ ૩॥

સત્યલોકસ્તપોલોકાત્કોટિયોજનદૂરગઃ ।
અપુનર્ભવરૂપા ચ બ્રહ્મણો વસતિઃ પરા ॥ ૪॥

તત્ર લોકગુરુર્બ્રહ્મા વિશ્વાત્મા વિશ્વભાવનઃ ।
આસ્તે સ યોગિભિર્નિત્યં પીત્વા યોગામૃતં પરમ્ ॥ ૫॥

વસન્તિ યતયસ્તત્ર નૈષ્ઠિકા બ્રહ્મચારિણઃ ।
વ્રતિનસ્તાપસાઃ સિદ્ધા યાજકાઃ પરમેષ્ઠિનઃ ॥ ૬॥

દ્વારં તદ્યોગિનામેકં ગચ્છતાં ગણપં પરમ્ ।
ન તદ્વર્ણયિતું શક્યં જ્વાલામાલાસમાકુલમ્ ॥ ૭॥

તસ્માદૂર્ધ્વં નિરાલમ્બં વિશ્વરૂપવિવર્જિતમ્ ।
સત્યલોકાન્તમેતદ્વૈ વૈરાટં રૂપમુત્તમમ્ ॥ ૮॥

પઞ્ચકોટિયુતં પૂર્ણં તસ્માદ્દશગુણા મહી ।
બ્રહ્માકારા ચ વિજ્ઞેયા પઞ્ચાશત્કોટિવિસ્તરા ॥ ૯॥

વિધેર્લોકાત્કોટિયુગ્મે યોજનાનાં પ્રજાપતે ।
શક્તિલોકો નિરાધારો જ્યોતિર્મયવિરાજિતઃ ॥ ૧૦॥

તેજઃ પુઞ્જમયે દક્ષ મહામાયાસમાશ્રિતે ।
નિષ્કામાઃ શક્તિભક્તા યે તત્ર ગચ્છન્તિ યોગિનઃ ॥ ૧૧॥

દશસાહસ્રવિસ્તારે સમન્તાજ્જનસઙ્કુલે ।
યોજનાનાં મહાભાગ શક્તયસ્તત્ર સંસ્થિતાઃ ॥ ૧૨॥

સ્વતેજસા વિનિર્માય પુરુષાન્ સમરૂપિણઃ ।
તૈઃ સમં ક્રીડને સક્તાઃ સ્ત્રીભાવેન જગન્મયા ॥ ૧૩॥

તસ્માત્કોટિચતુષ્કે ચ સૂર્યલોકઃ પુરાતનઃ ।
યોજનાનાં મહાતેજઃ પુઞ્જરૂપો વિરાજતે ॥ ૧૪॥

નિરાધારે સદા નિત્યે નિષ્કામાસ્તત્ર યાન્તિ વૈ ।
શુક્લગત્યા મહાભાગાઃ સાક્ષાદ્ભાનુનિવાસિનઃ ॥ ૧૫॥

અન્યે સૂર્યસ્ય યે ભક્તા નિષ્કામભજને રતાઃ ।
તત્ર ગચ્છન્તિ તે દક્ષ ભાનુતેજઃસમપ્રભાઃ ॥ ૧૬॥

તસ્યાપિ વિસ્તરસ્તાવાન્ શક્તિલોકસમેન વૈ ।
તત્ર ક્રીડતિ યો ભાનુઃ પુરુષાકારસંસ્થિતઃ ॥ ૧૭॥

સ્વવામાઙ્ગાચ્ચ નિર્માય માયાં કર્મમયીં પ્રભુઃ ।
સંજ્ઞાં તયા સદા રેમે પુરુષો બ્રહ્મસંજ્ઞિતઃ ॥ ૧૮॥

તસ્માદ્યોજનકોટિષ્વષ્ટાસુ વિષ્ણુઃ સમાસ્થિતઃ ।
સદાવિકુણ્ઠવાસીય આનન્દમયમૂર્તિમાન્ ॥ ૧૯॥

વિસ્તારસ્તસ્ય લોકસ્ય વિકુણ્ઠસ્ય પ્રમાણતઃ ।
અયુતં યોજનાનાં ચ સમન્તાચ્ચ વિરાજતે ॥ ૨૦॥

નિરાધારે સદા નિત્યે જ્યોતીરૂપમયે પરે ।
તત્ર ગચ્છન્તિ નિષ્કામા વૈષ્ણવા ભક્તિતત્પરાઃ ॥ ૨૧॥

સદાનન્દસમાયુક્તાસ્તત્ર નિત્યસુખે રતાઃ ।
જનાસ્તિષ્ઠન્તિ નાર્યશ્ચ સ્વેચ્છાગતિવિહારિણઃ ॥ ૨૨॥

વામભાગાત્સ નિર્માય ભોગલક્ષ્મીં પ્રજાપતે ।
દક્ષિણાઙ્ગાન્ મુક્તિલક્ષ્મીં તાભ્યાં ક્રીડતિ સર્વદા ॥ ૨૩॥

સદાનન્દમયઃ સાક્ષાત્ વિષ્ણુઃ પરમધર્મવિત્ ।
દ્વિવિધં માયયા કૃત્વા ખેલતિ સ્વેચ્છયા પ્રભુઃ ॥ ૨૪॥

તસ્માત્ષોડશસઙ્ખ્યાસુ યોજનાનાં ચ કોટિષુ ।
દૂરે શઙ્કરલોકશ્ચ કૈલાસઃ પરમાદ્ભુતઃ ॥ ૨૫॥

(Page ખં. ૨ અ. ૧૫ પાન 33)
નિરાધારે સદા લોકે મોહહીને સુખપ્રદે ।
નિષ્કામાઃ શિવભક્તાશ્ચ તત્ર ગચ્છન્તિ માનવાઃ ॥ ૨૬॥

જ્યોતિર્મયસ્વરૂપે ચ સદા કલ્યાણદાયકે ।
લોકે તત્ર સ્વયં શમ્ભુર્વસતિ સ્વેચ્છયા મુને ॥ ૨૭॥

અયુતં યોજનાનાં ચ તસ્ય વિસ્તાર એવ ચ ।
તત્ર યોગેન યોગજ્ઞઃ શઙ્કરઃ ક્રીડતિ પ્રભુઃ ॥ ૨૮॥

વામાઙ્ગં પ્રકૃત્યાકારં દક્ષિણાઙ્ગં પ્રજાપતે ।
પુરુષાકારમેતસ્ય શઙ્કરસ્ય મહાત્મનઃ ॥ ૨૯॥

સંયોગે ચ તયોર્દક્ષ આનન્દઃ પરિકીર્તિતઃ ।
નારાયણમયી શક્તિરર્ધનારીનરઃ શિવઃ ॥ ૩૦॥

સા શક્તિસ્તસ્ય દેવસ્ય ત્રિધા રૂપધરા બભૌ ।
કૃતા ભિન્ના શિવેનાપિ જગદાનન્દદાયિની ॥ ૩૧॥

તયા વ્યક્તો મહાદેવો મોહહીનઃ સ્વભાવતઃ ।
ક્રીડત્યનારતં દક્ષ માયાધારઃ સ્વલોકગઃ ॥ ૩૨॥

તસ્યાઃ પરં પૃથિવ્યાસ્તુ બ્રહ્મ સ્વાનન્દસંજ્ઞિતમ્ ।
તત્પદાન્ન પરં કિઞ્ચિદ્વેદાદૌ સુપ્રતિષ્ઠિતમ્ ॥ ૩૩॥

સ્વસંવેદ્યં હિ યદ્બ્રહ્મ ચતુર્ધા તદ્બભૌ સ્વયમ્ ।
ચતુર્ણાં તત્ર સંયોગસ્તન્મયઃ કથિતો બુધૈઃ ॥ ૩૪॥

અવ્યક્તં શિવસંજ્ઞં ચ બ્રહ્મ નિર્મોહરૂપકમ્ ।
તસ્માત્ સમં તથા બ્રહ્મ વૈષ્ણવં પરિકીર્તિતમ્ ॥ ૩૫॥

તસ્માદાત્મસ્વરૂપં યત્ સૂર્યાકારં ચ તત્સ્મૃતમ્ ।
તસ્માદસન્મયં બ્રહ્મ શક્તિરૂપેણ સંસ્થિતમ્ ॥ ૩૬॥

તેષામભેદસમ્પ્રાપ્તિઃ સ્વાનન્દઃ પરિકીર્તિતઃ ।
એવં તત્ત્વેષુ સર્વેષુ સ્વસ્વસ્વાનન્દ ઉચ્યતે ॥ ૩૭॥

બ્રહ્મ નાનાવિધં પ્રોક્તમાકાશાદિવિભેદતઃ ।
તત્ર ક્રમાર્થં સ્વાનન્દઃ સ્વમહિમ્નિ સ્થિતોઽભવત્ ॥ ૩૮॥

અન્તે પૂર્ણત્વમાપન્નઃ સાક્ષાદ્ગણપતેઃ સ્મૃતઃ ।
સ્વાનન્દઃ સર્વસંયોગે સમાધિઃ પૂર્વ ઉચ્યતે ॥ ૩૯॥

સ્થાને સ્થાને નિજાનન્દે ગણેશઃ સંસ્થિતઃ સ્વયમ્ ।
કલાંશેન વિહારાર્થં સર્વેષાં સર્વસિદ્ધયે ॥ ૪૦॥

એવમૂર્ધ્વસ્થલોકા યે કથિતાસ્તે પ્રજાપતે ।
અતિસઙ્ક્ષેપભાવેન શ્રવણાત્ સર્વકામદાઃ ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ઊર્ધ્વસ્થલોકવર્ણનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૨.૧૪

## ૨.૧૫ સપ્તપાતાલવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
અતલં વિતલં ચૈવ સુતલં ચ તલાતલમ્ ।
મહાતલં રસાતલં પાતાલં સપ્તમં સ્મૃતમ્ ॥ ૧॥

અતલં શ્યામવર્ણં તદધોભૂમેઃ સુસંસ્થિતમ્ ।
અયુતે યોજનાનાં વૈ વિસ્તારો લક્ષયોજનઃ ॥ ૨॥

મયપુત્રેણ સંયુક્તં તથા નમુચિપૂર્વકૈઃ ।
તથાન્યૈર્વિવિધૈર્નાગૈરતલં શોભિતં પ્રભો ॥ ૩॥

વિતલં શ્વેતવર્ણં તદધસ્તસ્માત્તથા સ્મૃતમ્ ।
અયુતે યોજનાનાં તદ્વિવરં ચૈવ સંસ્થિતમ્ ॥ ૪॥

તત્ર નાગાસુરાશ્ચૈવ વસન્તિ સુખભોગિનઃ ।
કમ્બલઃ શઙ્કુકર્ણશ્ચ હયગ્રીવશ્ચ જુમ્ભકઃ ॥ ૫॥

(Page  ખં. ૨ અ. ૧૫ પાન ૩૪)
સુતલં પીતવર્ણં તદધસ્તદ્વત્પ્રતિષ્ઠિતમ્ ।
તત્રૈવ વૈનતેયાદિપક્ષિણો દૈત્યપો બલિઃ ॥ ૬॥

કાલનેમ્યાદયશ્ચાન્યે નાનાદૈત્યાઃ સ્થિતાઃ સુખમ્ ।
નાગાશ્ચ ભયહીનાસ્તે સંવસન્તિ વિહારિણઃ ॥ ૭॥

તલાતલં તથા જ્ઞેયં શાર્કરં તત્ર વાસિનઃ ।
મયાસુરાદયશ્ચૈવ બાણાન્ધકમુખાઃ પરે ॥ ૮॥

વસન્તિ સુખભાવેનાન્યે નાગા વિગતજ્વરાઃ ।
કાલકેયા મહાદેહા નિવાતકવચાસ્તથા ॥ ૯॥

મહાતલં કૃષ્ણવર્ણં તત્ર તક્ષકપન્નગઃ ।
અન્યે ચ બહવો નાગા વસન્તિ સુખભોગિનઃ ॥ ૧૦॥

હિરણ્યપુરધિષ્ણ્યાશ્ચ દૈત્યા અન્યે સહસ્રશઃ ।
દેવાનાં ભયમુત્સૃજ્ય નિવસન્તિ પ્રજાપતે ॥ ૧૧॥

રસાતલં શૈલમયમધસ્તદ્વત્ સ્થિતં મહત્ ।
વાસુકિપ્રમુખૈર્નાગૈર્દૈત્યૈર્નાનાવિધૈસ્તથા ॥ ૧૨॥

વિવરે સર્વશોભાઢ્યે નાનાસૌખ્યપ્રદે પરે ।
તત્ર તેજસ્વિનસ્તીક્ષ્ણવિષોગ્રાઃ પ્રવસન્તિ વૈ ॥ ૧૩॥

પાતાલં નીલવર્ણં તદધસ્તસ્માત્પ્રતિષ્ઠિતમ્ ।
તત્ર સ્થાનં ચ શેષેણ કાર્યાર્થે ચ કૃતં કિલ ॥ ૧૪॥

તત્ર દૈત્યાઃ સુરા નાગાસ્તં સદા પર્યુપાસતે ।
ભક્તિયુક્તા વિવેકેન નાગરાજં મહૌકસમ્ ॥ ૧૫॥

પાતાલવિવરેષ્વત્ર ગૃહા નાનાવિધાઃ કૃતાઃ ।
વનાનિ ચ તથા ગ્રામા નગરાણિ પ્રજાપતે ॥ ૧૬॥

વિચિત્રભોગયુક્તાશ્ચ વૃક્ષા નાનાવિધાઃ ખગાઃ ।
મન્દિરાણિ પ્રભાવન્તિ સોત્પલાનિ સરાંસિ ચ ॥ ૧૭॥

તત્ર સ્વર્ગસમં દક્ષ ભોગં કુર્વન્તિ જન્તવઃ ।
હૃષ્ટપુષ્ટજનાઃ સર્વે નિયુતાબ્દોપજીવિનઃ ॥ ૧૮॥

અપારાયુઃ સમાયુક્તા મહાતેજસ એવ તે ।
દેવાદીનાં સુદુર્ધર્ષા વસન્તિ ચ્છન્દચારિણઃ ॥ ૧૯॥

તસ્માદધઃ સહસ્રાણિ યોજનાનિ પ્રજાપતે ।
ત્રિંશત્તત્ર સ્વયં શેષઃ સદા તિષ્ઠતિ નાગપઃ ॥ ૨૦॥

ગણેશભક્તિસંયુક્તો ગણેશાંશસમુદ્ભવઃ ।
વિષ્ણોઃ કલાવતારશ્ચ કાલરુદ્રસ્તથા સ્મૃતઃ ॥ ૨૧॥

સહસ્રાનન એકોઽસૌ મહાભાગો મહાબલઃ ।
યસ્ય વિષભવા જ્વાલા દહેત્તુ સકલં જગત્ ॥ ૨૨॥

મૃત્યુવર્જિત એકોઽસૌ તેનાનન્તઃ પ્રકીર્તિતઃ ।
બ્રહ્મણો દિવસાન્તે વૈ લયં કૃત્વા સ્વયં સ્થિતઃ ॥ ૨૩॥

અભજન્નાગરાજાસ્તં વાસુકિપ્રમુખાઃ સદા ।
અસુરાશ્ચૈવ પ્રહ્લાદમુખ્યાઃ સેવાપરાયણાઃ ॥ ૨૪॥

ઉપાસતે વિલીનાસ્તં તથાન્યા નાગયોષિતઃ ।
નાનાકામપ્રસિદ્ધ્યર્થમનન્તં ભક્તિતત્પરાઃ ॥ ૨૫॥

તસ્માદધઃ કચ્છપસ્ય વિષ્ણોશ્ચૈવાવતારિણઃ ।
સ્થાનં સહસ્ર એકસ્મિન્ યોજનાનાં સ્થિતં પ્રભો ॥ ૨૬॥

તત્ર તં વરુણાદ્યાશ્ચ સેવન્તે ભાવતત્પરાઃ ।
સાક્ષાત્ કૂર્મસ્વરૂપસ્થં નારાયણમનામયમ્ ॥ ૨૭॥

યોજનાનાં તતોઽધસ્તાત્ સહસ્રે સંસ્થિતઃ સ્વયમ્ ।
વરાહરૂપધારી ચ વિષ્ણુઃ પરપુરઞ્જયઃ ॥ ૨૮॥

તં ધરિત્રીમુખાઃ સર્વે સેવન્તે ભક્તિતત્પરાઃ ।
મહાદેવં કરાલાસ્યં સ્વભક્તેભ્યોઽભયપ્રદમ્ ॥ ૨૯॥

શેષાધારમિદં સર્વં કૂર્માધારઃ સ વૈ સ્મૃતઃ ।
કૂર્મો વરાહરૂપસ્યાધારેણ સમવસ્થિતઃ ॥ ૩૦॥

(Page ખં. ૨ અ. ૧૬ પાન ૩૫)
વરાહશ્ચ નિરાધારો ગણેશં હૃદિ સંસ્મરન્ ।
સ્થિતસ્તેન પ્રભાવેણ સર્વાધારઃ સ વૈ સ્મૃતઃ ॥ ૩૧॥

તસ્માદધો રૌરવાદ્યા નરકાશ્ચ સમાશ્રિતાઃ ।
યાતનાકારિણઃ સર્વે પાપિનાં શુદ્ધિકારકાઃ ॥ ૩૨॥

રૌરવૈશ્ચૈવ તામિસ્રો મહારૌરવસંજ્ઞિતઃ ।
અન્ધતામિસ્રસંજ્ઞશ્ચ તથા સૂચીમુખોઽપરઃ ॥ ૩૩॥

લોહદણ્ડસ્તપ્તવાલુકસ્તથા ખડ્ગપત્રકઃ ।
લાલાસ્યઃ કૃમિભક્ષ્યશ્ચ ઇત્યાદ્યા બહવઃ સ્મૃતાઃ ॥ ૩૪॥

નરકેષુ પ્રપચ્યન્તે પાપકારિણ એવ યે ।
એતાવાન્ બ્રહ્મગોલસ્તે સઙ્ક્ષેપેણ નિરૂપિતઃ ॥ ૩૫॥

વિસ્તરાન્નૈવ શક્યશ્ચ ગદિતું વૈ પ્રજાપતે ।
શાપમોહસ્ય વેગેન તવ ભ્રાન્તિઃ સમાગતા ॥ ૩૬॥

ગણેશારાધનેનાદ્ય ભ્રાન્તિનાશો ભવિષ્યતિ ।
તદા ત્વં તત્ત્વતઃ સર્વં જ્ઞાસ્યસ્યત્ર ન સંશયઃ ॥ ૩૭॥

એવં સર્વેષુ સામાન્યં બ્રહ્માણ્ડેષુ બભૌ જગત્ ।
અષ્ટાવરણયુક્તેષુ ગુણેશાધારકેષુ વૈ ॥ ૩૮॥

ઇદં ગણપતે રૂપં બ્રહ્માણ્ડાત્મકમાસ્થિતમ્ ।
કથિતં તે સમાસેન સર્વસિદ્ધિપ્રદં મયા ॥ ૩૯॥

યઃ શ‍ૃણોતિ નરો ભક્ત્યા પઠેદ્વૈ તસ્ય સર્વદમ્ ।
ભુક્તિમુક્તિકરં ભાવિ પાપકઞ્ચુકનાશનમ્ ॥ ૪૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે સપ્તપાતાલવર્ણનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૨.૧૫

## ૨.૧૬ ઋષભચરિત્રવર્ણનં નામ ષોડશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પ્રિયવ્રતાત્મજશ્ચૈવાગ્નીધ્રસ્તસ્યાભવત્સુતઃ ।
નાભિસ્તસ્ય ચ યજ્ઞાદ્વૈ સમુત્પન્નઃ સુતઃ પરઃ ॥ ૧॥

યજ્ઞરૂપઃ સ્વયં વિષ્ણુઃ કલારૂપેણ દેહભૃત્ ।
પુત્રભાવસમાયુક્તઃ સ્થિતસ્તસ્ય ચ સદ્મનિ ॥ ૨॥

તસ્ય પુત્રશતં જજ્ઞે ભરતાગ્રં પ્રજાપતે ।
એકાશીતિશ્ચ પુત્રા વૈ બ્રાહ્મણાસ્તપસાઽભવન્ ॥ ૩॥

નવયોગિન એવાન્યેઽભવન્ સર્વત્ર સમ્મતાઃ ।
ગાણપત્યા મહાભાગાઃ સર્વદેહવિવર્જિતાઃ ॥ ૪॥

કવિર્હરિશ્ચાન્તરિક્ષઃ પ્રબુદ્ધઃ પિપ્પલાયનઃ ।
આવિર્હોત્રોઽથ દ્રુમિલશ્ચમસઃ કરભાજનઃ ॥ ૫॥

સદા યોગધરા મુખ્યા ઊર્ધ્વરેતસ એવ ચ ।
સર્વગાઃ સર્વસમ્માન્યા ભ્રમન્તિ ભુવનેષુ ચ ॥ ૬॥

નવ તત્ર ચ રાજાનો જમ્બુદ્વીપે પ્રજાપતે ।
ખણ્ડેષુ તેષુ મુખ્યો વૈ ભરતો જ્યેષ્ઠપુત્રકઃ ॥ ૭॥

સભ્રાતૃણાં નવાનાં વૈ સંરાટ્ ભાવેન સંસ્થિતઃ ।
એવં વિભજ્ય રાજ્યં સ્વમૃષભશ્ચ વનં યયૌ ॥ ૮॥

તત્ર નાના તપઃ કૃત્વા ક્રમેણ સ બભૂવ ચ ।
અવધૂતો મહાભાગો યોગમભ્યસ્ય યોગવિત્ ॥ ૯॥

નાનાયોગવિભેદેન નાનાભૂમિં વિશોધયન્ ।
જડોન્મત્તપિશાચાદિં તતઃ સહજસંસ્થિતઃ ॥ ૧૦॥

સહજં શાઙ્કરં બ્રહ્મ મોહહીનં ચતુર્થકમ્ ।
સ્વાધીનં નેતિ રૂપં યદવ્યક્તં તેન સંશ્રિતમ્ ॥ ૧૧॥

તેનાસૌ શામ્ભવો જાતઃ શિવમાર્ગપ્રકાશકઃ ।
(Page ખં. ૨ અ. ૧૬ પાન ૩૬)
યત્રતત્રાચરદ્યોગી જનાનાં બોધયન્ શિવમ્ ॥ ૧૨॥

તતો યોગેન તત્રૈવ સ્વાધીનબ્રહ્મદૂષણમ્ ।
દૃષ્ટ્વા શાન્તિં પરિત્યજ્ય વિસ્મિતઃ પ્રબભૂવ સઃ ॥ ૧૩॥

ન બ્રહ્મણિ પરાધીનસ્વાધીનત્વં કદાચન ।
શિવઃ સ્વાધીનરૂપોઽયં ન યોગીન્દ્રસ્તતો ભવેત્ ॥ ૧૪॥

એવં વિચાર્ય વિક્ષેપાચ્છઙ્કરાલયમાયયૌ ।
તં પ્રણમ્ય સ્થિતો યોગી શિવસમ્માનિતો ભૃશમ્ ॥ ૧૫॥

તત્ર સ્થિતા મહાભાગા યોગિનઃ શિવશિષ્યકાઃ ।
ગાણપત્યાઃ સ તાન્ દૃષ્ટ્વા વિસ્મિતો માનસેઽભવત્ ॥ ૧૬॥

તતોઽવસરમાસાદ્ય શિવં નત્વા કૃતાઞ્જલિઃ ।
જગાદ તં સ યોગીન્દ્રો ભક્તિયુક્તેન ચેતસા ॥ ૧૭॥

ઋષભ ઉવાચ ।
નમસ્તે શઙ્કરાયૈવ નમસ્તે યોગરૂપિણે ।
નમસ્તે જગદાધાર બ્રહ્માધિપતયે નમઃ ॥ ૧૮॥

શાન્તિયોગં વદ સ્વામિન્ પૂર્ણશાન્તિપ્રદાયકમ્ ।
દાસોઽહં તેઽધુના શિષ્યો મહ્યં દેવ દયાનિધે ॥ ૧૯॥

સહજાન્ન પરં બ્રહ્મ મયા જ્ઞાતં વિવેકતઃ ।
તત્ર સ્વાધીનતા દૃષ્ટા તયા શાન્તિર્ગતા ચ મે ॥ ૨૦॥

મુદ્ગલ ઉવાચ ।
ઋષભસ્ય વચઃ શ્રુત્વા શઙ્કરો હર્ષનિર્ભરઃ ।

જગાદ તં મહાભક્તં પૂર્ણપાશુપતં વચઃ ॥ ૨૧॥

શિવ ઉવાચ ।
ત્વયા પૃષ્ટં મહાયોગિંસ્તારકં યોગિનાં મતમ્ ।
કથયામિ મહાપ્રીત્યા શ‍ૃણુષ્વૈકાગ્રમાનસઃ ॥ ૨૨॥

શાન્તિયોગાત્મકઃ સાક્ષાદ્વેદેષુ કથિતઃ પુરા ।
ગણેશો યોગરૂપાખ્યો યોગિભિઃ સેવિતઃ સદા ॥ ૨૩॥

તસ્માત્ સર્વં સમુદ્ભૂતં તદાધારેણ સંસ્થિતમ્ ।
અન્તે ચેદં તદાકારં યોગેન ભવતિ પ્રભો ॥ ૨૪॥

સામવેદે પ્રકથિતં શ‍ૃણુ વેદરહસ્યકમ્ ।
યેન ત્વં શાન્તિસંયુક્તો ભવિષ્યસિ ન સંશયઃ ॥ ૨૫॥

મનોવાણીમયં સર્વં દૃશ્યાદૃશ્યસ્વરૂપકમ્ ।
ગકારાત્મકમેતત્તુ તત્ર બ્રહ્મ ગકારકઃ ॥ ૨૬॥

મનોવાણીવિહીનં ચ સયોગાયોગસંસ્થિતમ્ ।
ણકારાત્મકમેતત્તુ ણકારસ્તત્ર સંસ્થિતઃ ॥ ૨૭॥

વિવિધાનિ ગકારાચ્ચ પ્રસૂતાનિ મહામતે ।
બ્રહ્માણિ તાનિ કથ્યન્તે તત્ત્વરૂપાણિ યોગિભિઃ ॥ ૨૮॥

બ્રહ્માણિ તુ ણકારાચ્ચ સમ્પ્રસૂતાનિ યોગિભિઃ ।
નિરોધાત્મકરૂપાણિ કથિતાનિ સમન્તતઃ ॥ ૨૯॥

ગકારશ્ચ ણકારશ્ચાન્વયે ગણપતેઃ સ્થિતૌ ।
તતો જાનીહિ ભો યોગિન્ બ્રહ્માકારૌ શ્રુતેર્મુખાત્ ॥ ૩૦॥

તયોઃ સ્વામી ગણેશાનો યોગરૂપેણ સંસ્થિતઃ ।
તં ભજસ્વ વિધાનેન શાન્તિમાર્ગેણ પુત્રક ॥ ૩૧॥

મનોવાણીમયં સર્વં ગણેશાકારભાવિતમ્ ।
મનોવાણીવિહીનં ચ તદાકારં પ્રભાવય ॥ ૩૨॥

મનોવાણીમયં સર્વં માયારૂપં પ્રકથ્યતે ।
મનોવાણીવિહીનં યત્તદેવ તાદૃશં મતમ્ ॥ ૩૩॥

ચિત્તસ્ય પઞ્ચ ભૂમીનાં પ્રકાશકૃદયં સ્મૃતઃ ।
તેન ચિન્તામણિર્નામ જાતોઽસૌ ગણનાયકઃ ॥ ૩૪॥

તં ભજસ્વ મહાયોગિન્ યોગાકારેણ સંસ્થિતઃ ।
ભૂમીનાં ત્યાગમાર્ગેણ શાન્તિં ચિત્તસ્ય ચાપ્સ્યસિ ॥ ૩૫॥

ગણેશસ્તુ ગણેશોઽયં સંયોગાયોગવર્જિતઃ ।
માયયા ભ્રાન્તિરુત્પન્ના તાં ત્યક્ત્વા સુખમાપ્સ્યસિ ॥ ૩૬॥

ઇત્યુક્ત્વા વિરરામાથ શિવઃ શિવકરઃ સતામ્ ।
(Page ખં. ૨ અ. ૧૬ પાન ૩૭)
ઋષભોઽપિ પ્રસન્નાત્મા તં પ્રણમ્ય યયૌ વનમ્ ॥ ૩૭॥

કથિતં શઙ્કરેણૈવમભ્યસ્યન્ યોગમુત્તમમ્ ।
ક્રમેણ પૂર્વયોગી સ જાતો શાન્તિસ્વરૂપધૃક્ ॥ ૩૮॥

તથાપિ ગણપં દક્ષ ન મુમોચ ક્ષણં મુનિઃ ।
તેન તસ્ય સમીપેઽસૌ ગણેશાનઃ સમાયયૌ ॥ ૩૯॥

આગતં ગણપં દૃષ્ટ્વા ભક્તિભાવેન યન્ત્રિતમ્ ।
પ્રણનામ સ સાષ્ટાઙ્ગં હર્ષગદ્ગદભાષણઃ ॥ ૪૦॥

સરોમાઞ્ચશરીરશ્ચ સાશ્રુનેત્રો મહાયશાઃ ।
તુષ્ટાવ તં ગણાધીશં પ્રાઞ્જલિર્હૃષ્ટમાનસઃ ॥ ૪૧॥

ઋષભ ઉવાચ ।
નમસ્તે બ્રહ્મરૂપાય ગણેશ કરુણાનિધે ।
ભેદાભેદાદિહીનાય ગણાનાં પતયે નમઃ ॥ ૪૨॥

નિરાકારાય નિત્યાય જગદાકારમૂર્તયે ।
અનન્તાય પરેશાય પરાત્પરતરાય તે ॥ ૪૩॥

આદિમધ્યાન્તહીનાય ગુણાકારાય તે નમઃ ।
ગુણેશાય જગત્સ્રષ્ટ્રે પાલકાય હરાય ચ ॥ ૪૪॥

નમો નાનાવતારાય ભક્તપાલનહેતવે ।
સુરાસુરમયાયૈવ સુરાસુરસુપૂજિત ॥ ૪૫॥

યોગાય યોગદાત્રે ચ યોગાકારાય તે નમઃ ।
યોગાનાં પતયે તુભ્યં બ્રહ્મણાં પતયે નમઃ ॥ ૪૬॥

સર્વાદયે ગણાધ્યક્ષ સર્વપૂજ્યાય ઢુણ્ઢયે ।

સર્વાન્તે હ્યવશિષ્ટાય વિઘ્નેશાય નમો નમઃ ॥ ૪૭॥

હેરમ્બાય નિજાનન્દવાસિને સિદ્ધસેવિત ।
સિદ્ધિબુદ્ધિપતે તુભ્યં નાના ખેલકરાય તે ॥ ૪૮॥

ધર્માર્થકામમોક્ષાણાં દાયકાય નમો નમઃ ।
બ્રહ્મીભૂતકરાયૈવ બ્રહ્મભૂતમયાય ચ ॥ ૪૯॥

કિં સ્તૌમિ ત્વાં ગણાધીશ યોગશાન્તિમયં પ્રભો ।
યં સ્તોતું ન સમર્થાશ્ચ વેદાદ્યાઃ શિવમુખ્યકાઃ ॥ ૫૦॥

તથાપિ ચ યથાબુદ્ધિજ્ઞાનં ત્વં સંસ્તુતો મયા ।
ભક્તિં દેહિ ત્વદીયાં મે દૃઢામવ્યભિચારિણીમ્ ॥ ૫૧॥

મુદ્ગલ ઉવાચ ।
ઇત્યુક્ત્વા નિપપાતોર્વ્યાં પદં ધૃત્વા મહાયશાઃ ।
ગણેશસ્ય ચ તેનાપિ સમુત્થાપિત આદરાત્ ॥ ૫૨॥

જગાદ ગણનાથઃ સ ઋષભં ભક્તમુત્તમમ્ ।
શિવશિષ્યં શિવપ્રજ્ઞં સાક્ષાદ્વિષ્ણું સનાતનમ્ ॥ ૫૩॥

ગણેશ ઉવાચ ।
મદીયા ભક્તિરત્યન્તં ભવિષ્યત્યચલાનઘ ।
સ્તોત્રં ત્વયા કૃતં મે તુ શાન્તિદં પ્રભવિષ્યતિ ॥ ૫૪॥

યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠતઃ ।
શ્રવણાન્નાત્ર સન્દેહો ભાવપૂર્ણં મતં મમ ॥ ૫૫॥

ઇત્યુક્ત્વાન્તર્દધે દેવો ગણેશો ગણવલ્લભઃ ।
ઋષભશ્ચ સદા શાન્તો યોગી ગાણેશતાં ગતઃ ॥ ૫૬॥

ઇદં ચરિત્રં મુખ્યં વૈ યઃ શ◌ૃણોતિ નરોત્તમઃ ।
ઋષભસ્ય મહાપુણ્યં પઠેદ્વા તસ્ય સર્વદમ્ ॥ ૫૭॥

ભવિષ્યતિ ન સન્દેહો બ્રહ્મભૂયપ્રદાયકમ્ ।
શાન્તિદં શાન્તચિત્તેભ્યઃ કથિતં ભક્તિસંયુતમ્ ॥ ૫૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ઋષભચરિત્રવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૨.૧૬
(Page ખં. ૨ અ. ૧૭ પાન ૩૮)

## ૨.૧૭ પુલહોપદેશવર્ણનં નામ સપ્તદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ઋષભેણ કૃતા ચર્યા નાનાયોગપ્રકાશિની ।
આદૌ તાં ભૂમિપો દૃષ્ટ્વા જગૃહેઽર્હદ્ગૃહે સ્થિતઃ ॥ ૧॥

દુર્બુદ્ધિઃ સ તુ તં ભ્રષ્ટઃ કર્મમાર્ગં વિમુચ્ય વૈ ।
પશુવદ્ધર્મહીનાંશ્ચ કારયામાસ માનવાન્ ॥ ૨॥

જૈનમાગઃ સમુત્પન્નસ્તદાદિશ્ચ પ્રજાપતે ।
ભરતેન સ સઞ્છન્નો કર્મમાર્ગાનુસારિણા ॥ ૩॥

સ એવ કલિકાલે વૈ ભવિષ્યતિ ગૃહે ગૃહે ।
નરાસ્તં સઙ્ગ્રહીષ્યન્તિ કલિદોષેણ સંયુતાઃ ॥ ૪॥

ઋષભેણ ગૃહં ત્યક્ત્વા ધૃતઃ સંન્યાસિના મહાન્ ।
ગૃહસ્થૈઃ સન્ધૃતો માર્ગો નરકપ્રદ ઉચ્યતે ॥ ૫॥

ઋષભસ્યાગ્રજઃ પુત્રો ભરતો ધર્મતત્પરઃ ।
રાજ્યં ચકાર ધર્મેણ રઞ્જયન્ સકલાઃ પ્રજાઃ ॥ ૬॥

પુત્રે રાજ્યં સમર્પ્યાઽસૌ વનં યાતો મહાયશાઃ ।
તત્ર દેહં ક્રમેણૈવ તપસા શોષયન્ સ્થિતઃ ॥ ૭॥

શાલિગ્રામાશ્રમે તિષ્ઠન્વિષ્ણુધ્યાનપરાયણઃ ।
તતાપ તપ ઉગ્રં સ રાજા પરમધર્મવિત્ ॥ ૮॥

એકદા સ નદીતીરે સંસ્થિતસ્તર્પયન્ પિતૄન્ ।
અકસ્માત્સિંહસન્નાદો બભૂવ ભયદાયકઃ ॥ ૯॥

તં શ્રુત્વા હરિણી તત્રાન્તર્વત્ની સહસા સ્વનમ્ ।
ઉત્પપાત નદીં તાં વૈ ભયેન ચ પલાયત ॥ ૧૦॥

ઉત્પતન્ત્યા નદીતોયે ગર્ભસ્તસ્યાઃ પપાત હ ।
સાઽપિ દૂરે યયૌ દક્ષ મૃતા દુઃખેન તત્ક્ષણાત્ ॥ ૧૧॥

ભરતેન મૃગો બાલો જલસ્થઃ સન્ધૃતોઽભવત્ ।
કરુણાયુતચિત્તેન પાલિતશ્ચ સ યત્નતઃ ॥ ૧૨॥

તતો મૃગશિશૌ તસ્ય પ્રીતિર્જાતા મહાત્મનઃ ।
લાલયામાસ ભાવેન ખેલયામાસ ભૂમિપઃ ॥ ૧૩॥

ક્રમેણ પ્રગતં સર્વં કર્મ તસ્ય તપોમયમ્ ।
મૃગે ચાસક્તચિત્તસ્ય સઙ્ગદોષમપશ્યતઃ ॥ ૧૪॥

એકસ્મિન્ દિવસે સોઽપિ મૃગો મૃગસમન્વિતઃ ।
યયૌ વનાન્તરે કુત્ર ન જ્ઞાતઃ સાધુનાઽમુના ॥ ૧૫॥

ભરતસ્તં મૃગં તત્ર ન દદર્શ યદા પ્રભો ।
તદા દુઃખસમાયુક્તો બભ્રામ સ વને વને ॥ ૧૬॥

ન દદર્શ મૃગં કુત્ર વિલલાપ મહીપતિઃ ।
નિત્યં શોકસમાયુક્તઃ કાલેન સ મમાર ચ ॥ ૧૭॥

મરણે સ મૃગસ્તેન સન્દૃષ્ટઃ સ્વસમીપગઃ ।
બભૂવ મૃગયોનૌ સ સઙ્ગદોષપ્રભાવતઃ ॥ ૧૮॥

તત્ર પૂર્વતપોભિશ્ચ પૂર્વજાતિસ્મરોઽભવત્ ।
જ્ઞાનયુક્તઃ સ્વયં સઙ્ગાત્સ ભીતો વિચચાર હ ॥ ૧૯॥

મૃગસઙ્ગં પરિત્યજ્ય યયૌ પૂર્વાશ્રમે તતઃ ।
તત્રાહિંસાસમાયુક્તો દ્વન્દ્વભાવપરાઙ્મુખઃ ॥ ૨૦॥

શુષ્કં તૃણાદિકં ભક્ષન્ સોઽસ્મરદ્વિષ્ણુમવ્યયમ્ ।
તીર્થસ્નાનં તદા કુર્વન્ સાધુદર્શનલાલસઃ ॥ ૨૧॥

એકદા વનમધ્યે સ મૃગો બભ્રામ લીલયા ।
અપશ્યત્પૂર્વપુણ્યેન પુલહાશ્રમમુત્તમમ્ ॥ ૨૨॥

મુનીશ્વરાસ્તત્ર કેચિદવસંસ્તત્પરાયણાઃ ।
મહાભાગાસ્તપોયુક્તા ગણેશભજને રતાઃ ॥ ૨૩॥

તત્રાઽસૌ મૃગજાતિસ્થો ભરતો મુનિસન્નિધૌ ।
વાસં ચકાર સંહૃષ્ટઃ સાધુસઙ્ગપરાયણઃ ॥ ૨૪॥

એકદા બ્રહ્મદેવોઽથ જગામ પુલહાશ્રમમ્ ।
તં દૃષ્ટ્વા પુલહાદ્યાસ્તે પ્રણેમુસ્તં પિતામહમ્ ॥ ૨૫॥

(Page ખં. ૨ અ. ૧૭ પાન ૩૯)

તં સમ્પૂજ્ય મહાભક્ત્યા પુલહઃ સર્વસંયુતઃ ।
તોષયિત્વા સ્વયં દેવં પાદસંવાહને સ્થિતઃ ॥ ૨૬॥

પરિપપ્રચ્છ તં સ્તુત્વા પુલહો ભાવસંયુતઃ ।
આદિદેવં મહાભાગં ગાણપત્યં સ્વભાવતઃ ॥ ૨૭॥

પુલહ ઉવાચ ।
તાત દુઃખયુતાઃ સર્વે જન્તવઃ કેન ભોગિનઃ ।
મોક્ષિણો બ્રહ્મભૂતાશ્ચ જાયન્તે તદ્વદસ્વ મે ॥ ૨૮॥

મુદ્ગલ ઉવાચ ।
પુલહસ્ય વચઃ શ્રુત્વા પ્રભુર્ધાતા તમબ્રવીત્ ।
પુત્રં વિનયસંયુક્તં કૃતપ્રાઞ્જલિમાસ્થિતમ્ ॥ ૨૯॥

બ્રહ્મોવાચ ।
શ‍ૃણુ પુત્ર પ્રવક્ષ્યામિ યત્પૃષ્ટં મે ત્વયા પરમ્ ।
તત્સર્વં સર્વપાપઘ્નં શાન્તિમાર્ગપ્રકાશકમ્ ॥ ૩૦॥

વિઘ્નરાજમનાદૃત્ય નરા દુઃખસમન્વિતાઃ ।
જાયન્તે સર્વલોકેષુ વિઘ્નયુક્તા ભયાતુરાઃ ॥ ૩૧॥

યદ્ યદ્ દુઃખકરં તત્તદ્વિઘ્નરૂપં ન સંશયઃ ।
નરકાદિ મહાઘોરં વિકર્મફલદં મતમ્ ॥ ૩૨॥

કર્મયુક્તં ચ સર્વં તત્સ્વર્ગભોગપ્રદં મતમ્ ।
તદેવ દુઃખરૂપં ત્વં પુત્ર જાનીહિ નિશ્ચિતમ્ ॥ ૩૩॥

સ્વર્ગેષુ દ્વન્દ્વભાવશ્ચ વિદ્યતે નાત્ર સંશયઃ ।
સ્ત્રીપુંયુક્તં તથા વિઘ્નં મોહદં પશ્ય તત્ સ્થિતમ્ ॥ ૩૪॥

દૈત્યાદિભ્યો ભયૈર્યુક્તા દેવાસ્તત્ર વસન્તિ તે ।
ભયહીનાશ્ચ તાન્ હત્વા લયે મૃત્યુભયપ્રદમ્ ॥ ૩૫॥

ઉત્પત્તિનાશસંયુક્તં બ્રહ્માણ્ડં સકલં મતમ્ ।
ત્રિગુણાદિ વ્યથાયુક્તં વિઘ્નેન ગ્રસિતં સ્મૃતમ્ ॥ ૩૬॥

અકર્મણા નરો મોક્ષં લભતે નાત્ર સંશયઃ ।
સ એવ વિઘ્નસંયુક્તો મોક્ષશ્ચ શ‍ૃણુ તં સુત ॥ ૩૭॥

દેહી દેહૈશ્ચતુર્ભિશ્ચ મોહિતો બન્ધનં ગતઃ ।

સ એવ સાધનં કૃત્વા બન્ધહીનઃ પ્રજાયતે ॥ ૩૮॥

મોહેન યુક્તો હીનોઽયં દેહી સર્વત્ર સમ્મતઃ ।
તદેવ વિઘ્નરૂપં ચ તત્ર પ્રાપ્તં મહામતે ॥ ૩૯॥

દેહદેહિમયે યોગે બ્રહ્મ તત્કલ્પનાત્મકમ્ ।
વિકલ્પેન દ્વિધાભૂતં સ્વત ઉત્થાનસંજ્ઞકમ્ ॥ ૪૦॥

નિર્વિકલ્પેન યોગેન સ્વમહિમ્નિ સ્થિતં ભવેત્ ।
તદેવ વિઘ્નસંયુક્તં વિકલ્પયુતહીનતઃ ॥ ૪૧॥

સાઙ્ખ્યં બ્રહ્માત્મનિષ્ઠં યત્તત્ર બાધો ન વિદ્યતે ।
અસ્વાત્મનિષ્ઠમન્યચ્ચેત્તદા સ્વાત્મમયં ભવેત્ ॥ ૪૨॥

સ્વાત્મનિષ્ઠં ધૃતં યેન તસ્માદસ્વાત્મનિષ્ઠકમ્ ।
સમુત્પન્નં મહાભાગ ન કૃતં ત્વપિ પુત્રક ॥ ૪૩॥

તદેવ વિઘ્નરૂપં ચાપ્યપરોત્થાનભાવતઃ ।
સાઙ્ખ્યં બ્રહ્મ ન સન્દેહો બીજમુત્થાનધારકમ્ ॥ ૪૪॥

સબીજં તદ્વિનિર્બીજં તદેવ ભવતિ સ્વયમ્ ।
અતો યોગિભિરત્યન્તં માનિતં ન કદાચન ॥ ૪૫॥

સ્વાનન્દં બ્રહ્મ યત્પ્રોક્તં સમાધે રૂપધારકમ્ ।
તત્ર સ્વકીયસંયોગસ્તદાકારેણ જાયતે ॥ ૪૬॥

સર્વાભેદસ્વરૂપેણ સંયોગાત્મક ઉચ્યતે ।
સ્વસંવેદ્યાત્પરં નાસ્તિ સંયોગાભેદદાયકમ્ ॥ ૪૭॥

તદેવ યોગિભિસ્તસ્માત્કથિતં વિઘ્નસંયુતમ્ ।
તસ્માજ્જાતમિદં તત્ર યોગેનાભેદતાં ગતમ્ ॥ ૪૮॥

અન્વયાત્મકદોષેણ વિઘ્નરૂપં પ્રકાશિતમ્ ।
અતો ન માન્યતાં પ્રાપ્તં શાન્તિમાર્ગેષુ સર્વદા ॥ ૪૯॥

તતો યોગસ્વરૂપં યત્સદા ભિન્નં પ્રકીર્તિતમ્ ।
ન તસ્ય કસ્યચિદ્યોગસ્તત્ર કુત્રાપિ નો ભવેત્ ॥ ૫૦॥

બ્રહ્મભિન્નમયોગાખ્યમતો વિઘ્નસમાકુલમ્ ।
વ્યતિરેકાત્મકો દોષો હ્યશાન્તિકર ઉચ્યતે ॥ ૫૧॥

(Page ખં. ૨ અ. ૧૮ પાન ૪૦)
સંયોગિત્વમયોગત્વં ત્યક્ત્વા શાન્તિમવાપ્સ્યસિ ।
તત્ર વિઘ્નવિહીનત્વં પ્રાપ્તં પુત્ર ન સંશયઃ ॥ ૫૨॥

ચિત્તભૂમિસ્વરૂપં યત્ પઞ્ચધા ત્યજ વિપ્રપ ।
યોગાભેદસ્વરૂપસ્ત્વં ભવિષ્યસિ ન સંશયઃ ॥ ૫૩॥

પઞ્ચધા ચિત્તરૂપા વૈ બુદ્ધિર્માયા પ્રકીર્તિતા ।
પઞ્ચધૈશ્વર્યમોહેષુ મોહદા સિદ્ધિરુચ્યતે ॥ ૫૪॥

તત્ર બિમ્બં ગણેશસ્ય પતિતં યોગરૂપતઃ ।
દ્વૈધં માયાયુતં પ્રોક્તં બિમ્બભાવં ત્યજ પ્રભો ॥ ૫૫॥

આદૌ પુરા મયા પુત્ર કથિતં કુલદૈવતમ્ ।
ગણેશરૂપમસ્માકં ત્વયારાધિતમાદરાત્ ॥ ૫૬॥

તેન ત્વં પાત્રભૂતશ્ચ યોગશાન્તેર્મહામુને ।
અધુના કથિતં પુત્ર પૂર્ણશાન્તિસ્વરૂપકમ્ ॥ ૫૭॥

શાન્તિયોગેન નિત્યં ત્વં તં ભજસ્વ વિધાનતઃ ।
ભવિતાઽસિ ગણેશાનસ્તદા વૈ નાત્ર સંશયઃ ॥ ૫૮॥

એવમુક્ત્વા સ્વયં બ્રહ્માંઽતર્દધે સ પ્રજાપતે ।
પુલહસ્તત્ર યોગં ત્વસાધયત્તપસિ સ્થિતઃ ॥ ૫૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પુલહોપદેશવર્ણનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૨.૧૭

## ૨.૧૮ ભરતમૃગદેહત્યાગો નામાષ્ટાદશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ક્રમેણ યોગશાન્તિં ચ પ્રાપ્તોઽસૌ પુલહઃ સ્વયમ્ ।
નિત્યં ગણેશમૂર્તિં પ્રાપૂજયત્ ભક્તિસંયુતઃ ॥ ૧॥

ધ્યાનનિષ્ઠઃ સદા યોગી તમેવાચિન્તયત્ પ્રભુમ્ ।
તતઃ કિયતિ કાલે તં ગણેશાનો યયૌ મુનિમ્ ॥ ૨॥

ન બુબોધ સ તં વિપ્રો ધ્યાનનિષ્ઠતયા યદા ।

તદા હૃદિ સ્થિતો ઢુણ્ઢિર્ગણેશેન પ્રલોપિતઃ ॥ ૩॥

અન્તર્હિતં હૃદિસ્થં તં ગણેશં ન દદર્શ હ ।
તદા ભ્રાન્ત ઇવાપશ્યદ્દદર્શ ગણપં બહિઃ ॥ ૪॥

ઉત્થાય સહસા વિપ્રસ્તં નનામ કૃતાઞ્જલિઃ ।
વિધિવત્ પૂજયામાસ વિનાયકમનામયમ્ ॥ ૫॥

પૂજયિત્વા નમસ્કૃત્ય તં તુષ્ટાવ કૃતાઞ્જલિઃ ।
સરોમાઞ્ચશરીરઃ સન્ હર્ષગદ્ગદયા ગિરા ॥ ૬॥

પુલહ ઉવાચ ।
નમસ્તે વિઘ્નરાજાય ભક્તાનાં વિઘ્નહારિણે ।
વિઘ્નદાત્રે હ્યભક્તાનાં ગણેશાય નમો નમઃ ॥ ૭॥

બ્રહ્મણે બ્રહ્મરૂપાય નિરાકારાય તે નમઃ ।
સાક્ષિણે સર્વસંસ્થાયાનાદિસિદ્ધાય તે નમઃ ॥ ૮॥

અનામયાય દેવાયાઽપ્રતર્ક્યાય મહૌજસે ।
વક્રતુણ્ડાય વૈ તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૯॥

સ્વાનન્દવાસિને તુભ્યં ભક્તસંરક્ષકાય ચ ।
યોગાનાં પતયે ચૈવ યોગદાયિન્નમો નમઃ ॥ ૧૦॥

શાન્તાય શાન્તરૂપાય શાન્તીનાં પતયે નમઃ ।
ભક્તેભ્યઃ શાન્તિદાત્રે ચ યોગશાન્તાય તે નમઃ ॥ ૧૧॥

નાનાવતારરૂપાય જગદાધારમૂર્તયે ।
સુરાસુરાણામીશાય સર્વગાય નમો નમઃ ॥ ૧૨॥

સર્વવન્દ્યાય વૈ તુભ્યં સર્વાદૌ સંસ્થિતાય ચ ।
(Page ખં. ૨ અ. ૧૮ પાન ૪૧)
સર્વાન્ત એકરૂપાય મધ્યે નાનાસ્વરૂપિણે ॥ ૧૩॥

આદિમધ્યાન્તહીનાય સૃષ્ટિસ્થિત્યન્તકારિણે ।
અનન્તોદરસંસ્થાય લમ્બોદર નમોઽસ્તુ તે ॥ ૧૪॥

ગજવક્ત્રાય વૈ તુભ્યં ગજાકારાય તે નમઃ ।
ગજકર્ણાય પૂર્ણાય ગજાનન નમોઽસ્તુ તે ॥ ૧૫॥

મૂષકધ્વજરૂપાય મૂષકારૂઢરૂપિણે ।

પાશાङ્કુશધરાયૈવ સ્તુતાય ચ વિભૂતિભિઃ ॥ ૧૬॥

ચતુર્ભુજધરાયૈવ ચતુર્વર્ગમયાય ચ ।
બ્રહ્મભૂતસ્વરૂપાય દેહધારિન્નમો નમઃ ॥ ૧૭॥

યં વેદવાદિનઃ સ્તોતું વેદાઃ સાઙ્ગાશ્ચ યોગિનઃ ।
શિવવિષ્ણુમુખા દેવા ન સમર્થા ભવન્તિ વૈ ॥ ૧૮॥

તં કથં સ્તૌમિ દેવેશં યોગરૂપમયં પ્રભુમ્ ।
અતો વૈ પ્રણમામિ ત્વાં પ્રસન્નો ભવ સર્વદા ॥ ૧૯॥

વરં મે દેહિ યોગાત્મન્ તેન તુષ્ટો ભવામ્યહમ્ ।
તવ ભક્તિં દૃઢાં ઢુણ્ઢે વ્યભિચારવિવર્જિતામ્ ॥ ૨૦॥

એવમુક્ત્વા મુનિસ્તત્ર નનર્ત પ્રેમવિહ્વલઃ ।
તં ભક્તિરસસંયુક્તમુવાચ ગણનાયકઃ ॥ ૨૧॥

ગણેશ ઉવાચ ।
મદીયા સુદૃઢા ભક્તિર્વ્યભિચારવિવર્જિતા ।
ભવિષ્યતિ મહાયોગિન્ તવ ચાનન્દદાયિકા ॥ ૨૨॥

યદા મે સ્મરણં ત્વં વૈ કરિષ્યસિ મહામતે ।
તદા માં દ્રક્ષ્યસિ બ્રહ્મન્ સંસ્થિતં તવ સન્નિધૌ ॥ ૨૩॥

ભવત્કૃતં મદીયં યત્સ્તોત્રં ભક્તિપ્રદં ભવેત્ ।
ભુક્તિમુક્તિપ્રદં પ્રોક્તં શાન્તિયોગપ્રદાયકમ્ ॥ ૨૪॥

યઃ પઠિષ્યતિ વૈ મર્ત્યઃ શ‍ૃણુયાત્સર્વસૌખ્યભાક્ ।
ભવિષ્યતિ ન સન્દેહો યથા ત્વં સ તથા ભવેત ॥ ૨૫॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા ગણાધીશસ્તત્રૈવાન્તર્દધે પ્રભુઃ ।
પુલહસ્તત્ર સન્તસ્થાવભજત્તં ગણાધિપમ્ ॥ ૨૬॥

મૃગરૂપધરસ્તત્ર ભરતઃ પૃથિવીપતિઃ ।
સંસ્થિતસ્તત્ર શુશ્રાવ પૂર્ણં જ્ઞાનં વિધાનતઃ ॥ ૨૭॥

બ્રહ્મણા કથિતં યચ્ચ પુલહાય સુધીમતે ।
તદેવ તેન ભૂપેન ધૃતં સ્વહૃદિ સર્વદા ॥ ૨૮॥

મનસિ ધ્યાનસંયુક્તો બભૂવ મૃગદેહજઃ ।

ગણેશસ્ય સદા હૃષ્ટસ્તત્ર વાસં ચકાર સઃ ॥ ૨૯॥

તતસ્તેન ચ સઙ્ગીતં તચ્છૃણુષ્વ પ્રજાપતે ।
અહો વિઘ્નો મહાઘોરો મયા પ્રાપ્તઃ સુદુર્જયઃ ॥ ૩૦॥

રાજ્યં ત્યક્ત્વા વને નિત્યં સંસ્થિતોઽહં હરિં સ્મરન્ ।
તત્રાપિ મૃગસઙ્ગેન સઞ્જાતો મૃગરૂપધૃક્ ॥ ૩૧॥

વિષ્ણુમુખ્યામરેશાના વિઘ્નયુક્તા ન સંશયઃ ।
તત્ર કોઽહં મનુષ્યો વૈ જયન્ વૈ વિનમુલ્બણમ્ ॥ ૩૨॥

વિઘ્નરાજપ્રસાદેન વિઘ્નં નિઘ્નન્તિ દુર્જયમ્ ।
શિવવિષ્ણ્વાદયઃ સર્વે જન્તવશ્ચ તથા પરે ॥ ૩૩॥

ધન્યા ભક્તિર્મત્કૃતા યા વૈષ્ણવી પરમાદ્ભુતા ।
યયા સંસ્કારસંયુક્તં સમ્પ્રાપ્તં જ્ઞાનમુત્તમમ્ ॥ ૩૪॥

ગાણપત્યો મહાયોગી દૃષ્ટો વૈ પુલહો મયા ।
અહો ભાગ્યમહો ભાગ્યં મદીયં પરમં મતમ્ ॥ ૩૫॥

યેનાહં ગાણપત્યાનાં સઙ્ગે તિષ્ઠામિ નિત્યશઃ ।
વિઘ્નહીનઃ સ્વભાવેન ભજામિ ગણનાયકમ્ ॥ ૩૬॥

એવં ગણેશભક્ત્યા વૈ સંયુતો મૃગસત્તમઃ ।
કાલેન ગણપં ધ્યાત્વા દેહત્યાગં ચકાર હ ॥ ૩૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ભરતમૃગદેહત્યાગો નામાષ્ટાદશોઽધ્યાયઃ ॥ ૨.૧૮

## ૨.૧૯ ચૌરવધો નામૈકોનવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
આઙ્ગિરસકુલે વિપ્રો બભૂવ મુનિસત્તમઃ ।
તતઃ પુત્રોઽભવત્તસ્ય ભરતો નૃપસત્તમઃ ॥ ૧॥

તત્રાપિ સઙ્ગભીતોઽસૌ જ્ઞાનયુક્તો મહામુનિઃ ।
ગણેશં મનસા ધ્યાયન્ સંસ્થિતો મુનિસન્નિધૌ ॥ ૨॥

તત્ર વેદાદિષુ પ્રોક્તં ગણેશસ્ય મહાત્મનઃ ।

સ્તવનં સંશ્રુતં જ્ઞાનં તેન પૂર્વં દૃઢં કૃતમ્ ॥ ૩॥

જડવત્સઙ્ગસમ્ભીતો બભૂવ બ્રાહ્મણોત્તમઃ ।
ચાતુર્યં સકલં તેન ગોપિતં સર્વસન્નિધૌ ॥ ૪॥

વિવાહાદિભયાત્ સર્વં જડત્વં સમ્પ્રકાશિતમ્ ।
મૂર્ખવચ્ચેષ્ટયા તત્ર બાલભાવેન તિષ્ઠતા ॥ ૫॥

તસ્યોપવીતદાનં સ ચકારાઙ્ગિરસો મુનિઃ ।
પશ્ચાત્ સન્ધ્યાદિકં કર્મ શૌચાચારમશિક્ષયત્ ॥ ૬॥

પિત્રા કથિતમત્યન્તં ન જગ્રાહ મહામતિઃ ।
અન્યથા સ ચકારાપિ તાડિતો યદિ યોગિપઃ ॥ ૭॥

હસ્તં ધૃત્વા પિતા તસ્ય કારયામાસ વૈદિકમ્ ।
સર્વમાચમનાદ્યં ચ તથા તેન કૃતં કિલ ॥ ૮॥

પુનઃ પિત્રા ચ સમ્પૃષ્ટં ન સસ્માર તદા સ્વયમ્ ।
જડવત્સર્વ આચારસ્ત્યક્તસ્તેન મહાત્મના ॥ ૯॥

તતસ્તસ્ય કૃતં નામ સર્વૈર્લોકૈઃ પ્રજાપતે ।
જડ ઇત્યેવ સતતં કથ્યતે યત્ર તત્ર તૈઃ ॥ ૧૦॥

તત્રાદરાપમાનાદિ તિરસ્કારાદિકં મહત્ ।
સમ્બભૂવ ચ તેનાપિ જડવત્ત્યક્તમેવ ચ ॥ ૧૧॥

લોકાઃ સર્વેઽવદંસ્તત્ર જ્ઞાનમસ્ય ન નિશ્ચિતમ્ ।
નિન્દાસ્તુત્યાદિકં સર્વં મહામૂર્ખેણ સહ્યતે ॥ ૧૨॥

જડત્વાદિકદોષેણ વિવાહાદિકમસ્ય ચ ।
ન કૃતં જનકેનૈવ તેનાનન્દમવાપ સઃ ॥ ૧૩॥

તતઃ કાલેન નિધનં ગતસ્તસ્ય પિતા મુનિઃ ।
માતા સતી ગુણયુતા સહગા સમ્બભૂવ હ ॥ ૧૪॥

માતુઃ સપત્નીજાતાશ્ચ ભ્રાતરો નવ ચાઽભવન્ ।
તેષામધીનતાં યાતો દ્વિજોઽસૌ શાન્તિયોગધૃક્ ॥ ૧૫॥

ભ્રાતૃપત્ન્યો મદોત્સિક્તાશ્ચક્રુઃ સ્નેહં ન ચાલ્પકમ્ ।
ઉચ્છિષ્ટં કુત્સિતં ચાન્નં જ્વલિતં તદ્દુસ્તુષમ્ ॥ ૧૬॥

વસ્ત્રાદ્યૈર્ભ્રાતરઃ સર્વે ભાષણૈઃ સત્કૃતં ન તમ્ ।
ચક્રુઃ સ્નેહં પરિત્યજ્ય કુલપાંસું વદન્તિ તે ॥ ૧૭॥

તથાપ્યમૃતવત્સર્વં કુત્સિતં ક્લિન્નદગ્ધકમ્ ।
અન્નં બભક્ષ યોગીશશ્ચીરવસ્ત્રૈઃ સમાવૃતઃ ॥ ૧૮॥

તદપિ ભાતૃજાયાસ્તા અન્નં તસ્મૈ ચ નો દદુઃ ।
દ્વિત્રિવાસરમધ્યે સ એકભુક્ ચાઽભવન્મુનિઃ ॥ ૧૯॥

ક્ષુધયા પીડિતો યોગી ગાણપત્યઃ પ્રજાપતે ।
ભ્રમન્નન્નાર્થમત્યન્તં ગેહે ગેહે વિચક્ષણઃ ॥ ૨૦॥

તત્ર લોકૈઃ સ્વકાર્યાર્થે ગૃહીતો યત્ર તત્ર સઃ ।
ચકાર સકલં કાર્યં તેષામન્નાર્થમાદરાત્ ॥ ૨૧॥

તતસ્તે હર્ષિતાઃ સર્વે વસ્ત્રાન્નાદિકમાદરાત્ ।
દદુઃ સોઽપિ પ્રસન્નાત્મા કર્મકારોઽભવત્ સ્વયમ્ ॥ ૨૨॥

તતસ્તૈર્ભ્રાતૃભિર્દૃષ્ટં તમાનીય સ્વકે ગૃહે ।
સ્વકર્મકારિણં ચક્રુર્ભ્રાતરો હર્ષસંયુતાઃ ॥ ૨૩॥

તદપિ ભ્રાતૃજાયાસ્તા કુત્સિતાન્નં દદુસ્તુષમ્ ।
સુધાસમં બભક્ષાન્નં સોઽપિ ભાવં પ્રદર્શયન્ ॥ ૨૪॥

કદાચિત્પક્વશાલીનં ક્ષેત્રેષુ સ્થાપિતો મુનિઃ ।
ભ્રાતૃભી રક્ષણાર્થં સ રાત્રૌ વૈ દિવસે પ્રભો ॥ ૨૫॥

તત્રાઽયં સંસ્થિતો વિદ્વાંસ્તત્તથૈવ ચકાર ચ ।
(Page  ખં. ૨ અ. ૨૦ પાન ૪૩)
અન્નાર્થં દેહભાવજ્ઞઃ સુખદુઃખાદિકે સમઃ ॥ ૨૬॥

તત્ર ચિત્રમભૂદ્યત્તુ તત્ શ◌ૃણુષ્વ પ્રજાપતે ।
ચૌરાણાં સ્વામિના દેવી ભદ્રકાલીતિ સંસ્તુતા ॥ ૨૭॥

લભેદ્યદિ મમ દ્રવ્યં વિપુલં ચ જગન્મયિ ।
તદા પુરુષરૂપં તે દાસ્યામિ પશુમુત્તમમ્ ॥ ૨૮॥

દ્રવ્યં તસ્ય તથા પ્રાપ્તં તેન સમ્પ્રેષિતાઃ સ્વકાઃ ।
ચૌરા રાત્રૌ શ્રમૈર્યુક્તાસ્તત્રાજગ્મુર્યદૃચ્છયા ॥ ૨૯॥

તં ગૃહીત્વા બલાત્સર્વે જગ્મુઃ સ્થાનં સ્વકં ખલાઃ ।

યોગિના દેહપ્રારબ્ધં તદા જ્ઞાતં ચ તાદૃશમ્ ॥ ૩૦॥

તત્ર ચૌરાધિપેનૈવ સત્કૃતઃ પૂજનાદિભિઃ ।
ભોજનં સ ચકારાપિ સ્વાદુ વિપેન્દ્રસત્તમઃ ॥ ૩૧॥

તં પુરસ્કૃત્ય વાદિત્રૈર્નિનદદ્ભિર્યયૌ ખલઃ ।
દેવીસન્નિધિમાનન્દાત્ પૂજિતં પરમાદરાત્ ॥ ૩૨॥

પૂજયિત્વા મહાકાલી તતસ્તં મુનિપુઙ્ગવમ્ ।
પુરસ્કૃત્યાસિના હન્તું નગ્નં ખડ્ગં ચકાર સઃ ॥ ૩૩॥

મરણં દેહભાવસ્ય દૃષ્ટ્વાઽસૌ યોગિસત્તમઃ ।
ન કિઞ્ચિત્ ક્ષુબ્ધવાંસ્તત્ર સસ્માર ગણપં હૃદિ ॥ ૩૪॥

અદ્યૈવ પતિતો દેહોઽથવાઽસ્તુ ચિરજીવિકઃ ।
તત્ર કિં કારણં મે વૈ ગજાનન નમોઽસ્તુ તે ॥ ૩૫॥

એતસ્મિન્નન્તરે તત્ર દેવી કોપસમન્વિતા ।
ગાણપત્યા મહાકાલી નિઃસૃતા મૂર્તિમધ્યતઃ ॥ ૩૬॥

ખડ્ગં ચૌરાધિપસ્યાઽપિ હસ્તાજ્જગ્રાહ લીલયા ।
તેન તસ્ય શિરશ્છિત્વા પપૌ રુધિરમુત્તમમ્ ॥ ૩૭॥

અન્યે સમાગતાશ્ચૌરાસ્તેઽપિ ખડ્ગેન નાશિતાઃ ।
ચિક્રીડ સ્વગણૈર્દેવી ગણેશસ્તવતત્પરા ॥ ૩૮॥

તાં પ્રણમ્ય યયૌ દક્ષ બભ્રામ પરિતસ્તુ સઃ ।
સ્વેચ્છાચારી મહાયોગી ભિક્ષાશી ગણપં સ્મરન્ ॥ ૩૯॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ચૌરવધો નામૈકોનવિંશોઽધ્યાયઃ ॥ ૨.૧૯

## ૨.૨૦ જડભરતરહૂગણમિલનો નામ વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
સિન્ધુદેશાધિપો રાજા રહૂગણ ઇતિ સ્મૃતઃ ।
પૂર્વસંસ્કારયોગેન હ્યન્તર્નિષ્ઠો બભૂવ હ ॥ ૧॥

રાજા શાન્ત્યર્થમત્યન્તં યત્નવાન પ્રાપ તાં ન સઃ ।

યયૌ ગઙ્ગાસમીપસ્થં કપિલાશ્રમમાદરાત્ ॥ ૨॥

ગૌતમ્યા દક્ષિણે કૂલે શ્રુતવાન્ દ્વિજપુઙ્ગવાત્ ।
નિર્જગામ પુરાદ્રાજા શિબિકાયાં સમાસ્થિતઃ ॥ ૩॥

ગચ્છન્માર્ગે ત્વરાયુક્તઃ શ્રાન્તવાહો મહીપતિઃ ।
ધૃત્વાઽન્યાન્યોજયામાસુર્વાહાર્થં સ્વજનાસ્તદા ॥ ૪॥

તત્ર દૈવપ્રસઙ્ગેન સમાલબ્ધં મહામુનિમ્ ।
આઙ્ગિરસવરં તં તે ચક્રુવાર્હકમઞ્જસા ॥ ૫॥

જ્ઞાત્વા દેહં મહાયોગી પ્રારબ્ધાધીનમાદરાત્ ।
વાહકો નૃપતેર્દક્ષ બભૂવ વિગતજ્વરઃ ॥ ૬॥

અહિંસાપરમો યોગી માર્ગે જન્તુમવેક્ષ્ય સઃ ।
સ્વપાદક્ષેપણં તત્ર ચકાર પ્રાણિવર્જિતે ॥ ૭॥

તેન સર્વે બભૂવુશ્ચ વાહકા મન્દગામિનઃ ।
દોલાયિતા ચ શિબિસ્કા તયા રાજા સુદુઃખિતઃ ॥ ૮॥

(Page ખં. ૨ અ. ૨૦ પાન ૪૪)
તતઃ ક્રોધસમાવિષ્ટો રહૂગણ ઉવાચ તાન્ ।
સમ્યક્ ચ શિબિકાં વાહા વહધ્વં સુપ્રયત્નતઃ ॥ ૯॥

તતો ભીતાશ્ચ તે સર્વ તમૂચુરધુના નૃપ ।
આનીતઃ સુદુરાત્માયં યથા ચલતિ મદ્યપઃ ॥ ૧૦॥

તતો રાજા મહાત્માનમુવાચ શઠ કિં ત્વયા ।
ઉન્મત્તવદ્ગતિર્દુષ્ટા ક્રિયતે મમ સન્નિધૌ ॥ ૧૧॥

તતો ભાવિબલેનાસાવાઙ્ગિરસ ઉવાચ હ ।
જ્ઞાત્વા તં યોગમિચ્છન્તં પાત્રભૂતમનાદરાત્ ॥ ૧૨॥

જડભરત ઉવાચ ।
માયામયમિદં સર્વં ભ્રાન્તિરૂપમસત્યકમ્ ।
તત્ર રાજજનાનાં વૈ જનઃ કુત્ર પ્રદૃશ્યતે ॥ ૧૩॥

વયં દ્વન્દ્વં પ્રેષયિત્વા સમભાવેન સંસ્થિતાઃ ।
શિક્ષાકર્તા ન ભવિતાઽસ્માકં રાજા મહાબલઃ ॥ ૧૪॥

તેન કિં યોગમાર્ગં વૈ ત્યક્ત્વા તિષ્ઠેમ સામ્પ્રતમ્ ।

તદધીના ભવામઃ કિમજ્ઞાનેન વદત્યયમ્ ॥ ૧૫॥

ઇત્યુક્ત્વા મૌનમાસ્થાય શિબિકાં પૂર્વવદ્વહન્ ।
આઙ્ગિરસો મહાયોગી ચચાલ ગણપં ભજન્ ॥ ૧૬॥

રાજા શ્રુતં મહાવાક્યં યોગગ્રન્થિતમુત્તમમ્ ।
ભયભીતશ્ચ તેનાસાવુત્પપાત મહીતલે ॥ ૧૭॥

દૃષ્ટ્વા તં મલિનં વિપ્રં યજ્ઞોપવીતસંયુતમ્ ।
બિભ્રાણં ચીરવસનં બ્રહ્મતેજઃ સનાતનમ્ ॥ ૧૮॥

પ્રણનામ સ સાષ્ટાઙ્ગં કૃતાઞ્જલિપુરઃ સ્થિતઃ ।
જગાદ ભયભીતો વૈ રહૂગણઃ સ ધર્મવિત્ ॥ ૧૯॥

રહૂગણ ઉવાચ ।
ક્ષમાપરાધમતુલં મમ બ્રહ્મન્ દયાનિધે ।
અજ્ઞાનેન કૃતં કર્મ કિં વિપ્રોઽસિ વદસ્વ મામ્ ॥ ૨૦॥

અવધૂતા મહાત્માનશ્ચરન્તિ યત્ર કુત્ર વૈ ।
તથા ત્વમપિ મે ભાસિ યજ્ઞોપવીતધારક ॥ ૨૧॥

કપિલઃ કિં નારદશ્ચાઙ્ગિરા પુલહકઃ ક્રતુઃ ।
દત્તો વા યાજ્ઞવલ્ક્યશ્ચ વદ માં કરુણાનિધે ॥ ૨૨॥

અહં બિભેમિ વિપેન્દ્ર બ્રાહ્મણાનામધર્ષણાત્ ।
ન બ્રાહ્મણસમં કિઞ્ચિદ્દૈવતં સચરાચરે ॥ ૨૩॥

સાક્ષાત્ પરમેશ્વરસ્યાઽપિ તનવો બ્રાહ્મણા મતાઃ ।
કર્માધારાશ્ચ જ્ઞાનાનામાધારા બ્રહ્મધારકાઃ ॥ ૨૪॥

બ્રાહ્મણસ્ય મુખેનૈવ યચ્છ્રુતં તત્સમાગતમ્ ।
દેવસ્થાનેષુ દેવાનામુદરે નાત્ર સંશયઃ ॥ ૨૫॥

બ્રાહ્મણેભ્યશ્ચ યદ્દત્તં તદક્ષયપદપ્રદમ્ ।
ઉદ્ધારાય જનાનાં વૈ બ્રાહ્મણાઃ સમ્મતાઃ કિલ ॥ ૨૬॥

મન્ત્રાધીના દેવગણા મન્ત્રા વિપ્રાધીના મતાઃ ।
દેવાનાં જીવનં સર્વં દ્વિજાધીનં ચ તેન વૈ ॥ ૨૭॥

મન્ત્રહીનં ચ યત્કર્મ નિષ્ફલં જાયતે કિલ ।
કર્માધીનં જગત્ સર્વમતો બ્રાહ્મણમૂલકમ્ ॥ ૨૮॥

કર્મનિષ્ઠાસ્તપોનિષ્ઠા જ્ઞાનનિષ્ઠા દ્વિજોત્તમાઃ ।
યોગિનશ્ચ ભવન્તીહ તારકા જગતિ સ્થિતાઃ ॥ ૨૯॥

સર્વેષાં ગુરવો વિપ્રા જ્ઞાનદાસ્તેન સમ્મતાઃ ।
સાક્ષાદ્ બ્રહ્મસ્વરૂપા વૈ બ્રાહ્મણા નાત્ર સંશયઃ ॥ ૩૦॥

તેષાં હેલનમાત્રેણ પતન્તિ શિવમુખ્યકાઃ ।
સેવનેન ચ તેષાં વૈ સર્વં સ લભતે જનઃ ॥ ૩૧॥

બ્રાહ્મણાનાં ચ શાપેન વિષ્ણુમુખ્યા સુરેશ્વરાઃ ।
પતિતા હ્યવતારેષુ પુનઃ સંસ્થાપિતા દ્વિજૈઃ ॥ ૩૨॥

અતો બિભેમિ વિપ્રેશ વદ કસ્ત્વં મહામતે ।
વિષ્ણુશિવાદિદેવેભ્યસ્તથાઽહં ન બિભેમિ વૈ ॥ ૩૩॥

એવમુક્ત્વા પુનઃ પાદૌ ગૃહ્ય તં પ્રણનામ સઃ ।
(Page ખં. ૨ અ. ૨૧ પાન ૪૫)
પાદપદ્મે શિરઃ સ્થાપ્ય રુરોદ ભયવિહ્વલઃ ॥ ૩૪॥

તતોઽસૌ કરુણાવિષ્ટો જડભરતસ્તમબ્રવીત્ ।
ઉત્થાપ્ય નૃપશાર્દૂલં પ્રશ્રયાઽવનતં વચઃ ॥ ૩૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે જડભરતરહૂગણમિલનો નામ વિંશતિતમોઽધ્યાયઃ ॥ ૨.૨૦

## ૨.૨૧ રહૂગણસિદ્ધિપ્રાપ્તિવર્ણનં નામૈકવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

જડભરત ઉવાચ ।
આહ માઙ્ગિરસો નામ જડભરતઃ પ્રકથ્યતે ।
સ્વાયમ્ભુવશ્ચ ભરતોઽધુના જડશ્ચ તેન વૈ ॥ ૧॥

મા ચિન્તાં કુરુ રાજર્ષે હ્યજ્ઞાનેન ત્વયા કૃતમ્ ।
હેલનં મમ દેહસ્ય પાપદં ન ભવિષ્યતિ ॥ ૨॥

ગચ્છ રાજન્યથેચ્છ ત્વં મત્તો વૈ ન ભયં તવ ।
ગમિષ્યામિ સ્વતન્ત્રોઽહં પ્રારબ્ધેન નિયન્ત્રિતઃ ॥ ૩॥

મુદ્ગલ ઉવાચ ।
તસ્ય યોગીન્દ્રમુખ્યસ્ય શ્રુત્વા વચનમુત્તમમ્ ।
રહૂગણ ઉવાચાથ તં પ્રણમ્ય મહાયશાઃ ॥ ૪॥

રહૂગણ ઉવાચ ।
ધન્યં કુલં મદીયં વૈ પિતરૌ જ્ઞાનમાશ્રમઃ ।
તપો વિદ્યા યશો દાનં તવાઙ્ઘ્રિયુગદર્શનાત્ ॥ ૫॥

અહં સિન્ધુમહીપાલો રહૂગણ ઇતિ સ્મૃતઃ ।
રાજ્યાદિવિષયં ત્યક્ત્વા નિઃસૃતો મુનિસત્તમ ॥ ૬॥

શાન્ત્યર્થં કપિલં યામિ ગૌતમીતીરવાસિનમ્ ।
ત્વં સાક્ષાદ્ બ્રહ્મરૂપશ્ચ દૈવેન દર્શનં ગતઃ ॥ ૭॥

માં શિષ્યં તારય મુને યોગબોધેન સત્તમ ।
સાક્ષાત્ શાન્તિં વદ વિભો યયા શાન્તો ભવામ્યહમ્ ॥ ૮॥

તસ્ય તદ્વચનં શ્રુત્વા કૃપયા પરયા યુતઃ ।
જગાદ તં નૃપેન્દ્રં સ આઙ્ગિરસો મહાદ્યુતિઃ ॥ ૯॥

શ ૃણુ રાજન્ ત્વયા પૃષ્ટં વેદગુહ્યં ચ દુર્ગમમ્ ।
કથયામિ તથાપિ ત્વાં યોગશાન્તિકરં પરમ્ ॥ ૧૦॥

દેહશ્ચતુર્વિધઃ પ્રોક્તસ્તત્ર દેહી ચતુર્વિધઃ ।
ભ્રાન્ત્યા ભિન્નત્વમાશ્રિત્યૈકોઽપિ ભાતિ તદાત્મકઃ ॥ ૧૧॥

દેહાનાં બ્રહ્મ યત્પ્રોક્તં બિન્દુમાત્રં ચ દૃશ્યતે ।
દેહીનાં બ્રહ્મરૂપં વૈ સોઽહં માત્રાત્મકં કિલ ॥ ૧૨॥

તયોઃ સંયોગ એવાઽસૌ બોધાત્મક ઉદાહૃતઃ ।
સ્વતોત્થાનમિદં બ્રહ્મ વિકલ્પાદ્વિવિધં મતમ્ ॥ ૧૩॥

બોધનાશે મહીપાલ ઉત્થાનં જાયતે ન ચ ।
સાઙ્ખ્યરૂપં હિ તદ્બ્રહ્મ કેવલં સ્વસુખે રતમ્ ॥ ૧૪॥

યત્ર પરસુખં નાસ્તિ તત્ર વૈ સ્વસુખં કથમ્ ।
તતઃ પરત ઉત્થાનયુક્તં બ્રહ્મ પ્રકીર્તિતમ્ ॥ ૧૫॥

તત્રોત્થાનસ્ય બીજં યત્સ્થિતં ભિન્નાત્મકં પરમ્ ।
સ્વસૌખ્યનિષ્ઠરૂપં હિ બોધહીનપ્રભાવતઃ ॥ ૧૬॥

સ્વતઃ પરત ઉત્થાનહીનં સ્વાનન્દવાચકમ્ ।
સંયોગાભેદરૂપં વૈ જાનીહિ નૃપસત્તમ ॥ ૧૭॥

સ્વાનન્દ પઞ્ચભેદં ચ સ્વયં સર્વત્ર સંસ્થિતમ્ ।
સત્યાસત્યસમં ચેતિ નેતિરૂપં ચતુર્થકમ્ ॥ ૧૮॥

સ્વતઃ પરત ઉત્થાનમેતન્નામ પ્રકીર્તિતમ્ ।
તયોરનુભવો યઃ સ્યાત્તસ્ય રૂપં તદેવ ચ ॥ ૧૯॥

(Page ખં. ૨ અ. ૨૨ પાન ૪૬)
તાભ્યાં નાનાવિધં બ્રહ્માન્નાદિ વેદે પ્રકીર્તિતમ્ ।
જગન્નાનાવિધં તદ્વજ્જાનીહિ નૃપસત્તમ ॥ ૨૦॥

નામરૂપમયં સર્વમસત્યં પરિકીર્તિતમ્ ।
શાક્તં બ્રહ્મ સમાખ્યાતં વેદે વૈ વેદવાદિભિઃ ॥ ૨૧॥

નામરૂપાત્મકં યત્તત્સદા ખણ્ડમયં સ્મૃતમ્ ।
અમૃતં સૌરમાત્મા તદ્બ્રહ્મ સર્વપ્રકાશકમ્ ॥ ૨૨॥

તયોરભેદકર્તાઽસૌ વિષ્ણુરાનન્દસંજ્ઞિતઃ ।
દ્વયોઃ સમં ચ તદ્બ્રહ્મ ભાવાભાવમયં પરમ્ ॥ ૨૩॥

ત્રિભિર્હીનં તુરીયં યન્નેતિ કર્તા શિવઃ સ્મૃતઃ ।
અવ્યક્તં મોહહીનં યત્ સ્વાધીનં બ્રહ્મ તન્મતમ્ ॥ ૨૪॥

ચતુર્ણાં ચૈવ સંયોગો યત્રાભેદમયઃ સ્મૃતઃ ।
સ એવ સ્વસ્વરૂપાખ્યો માયાયુક્તો વિનાયકઃ ॥ ૨૫॥

સંયોગનાશકારી ચાયોગઃ સર્વત્ર સમન્તઃ ।
નિર્માયિકો ગણેશઃ સ કથિતો યોગિભિર્નૃપ ॥ ૨૬॥

અયોગે યોગિનાં રાજન્નિવૃત્તિરુપજાયતે ।
સ્વકીયભેદહીનત્વાત્તદ્બ્રહ્માયોગસંજ્ઞકમ્ ॥ ૨૭॥

અત એવ સ્વનાશાખ્યનિવૃત્યા તચ્ચ લભ્યતે ।
માયયા સર્વસંયોગે તદ્ધીનં બ્રહ્મ તત્ સ્મૃતમ્ ॥ ૨૮॥

અયોગશ્ચૈવ સંયોગો યોગે તૌ ન પ્રપશ્યતિ ।
તદેવ ગણનાથો હિ યોગશાન્તિમયઃ સ્મૃતઃ ॥ ૨૯॥

માયાયુક્તશ્ચ માયાવી માયાહીનશ્ચ કેવલઃ ।

તદેવ ભ્રાન્તિમાત્રં યત્ત્યક્તવ્યં યોગિભિઃ સદા ॥ ૩૦॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં તદૈશ્વર્યં મહામતે ।
મોહદં દ્વિવિધં ત્યક્ત્વા શાન્તિરૂપો ભવિષ્યસિ ॥ ૩૧॥

એવમુક્ત્વા મહાયોગી વિરરામ પ્રજાપતે ।
સોઽપિ તં પ્રણનામાથ રાજ્યં ત્યક્ત્વા વનં યયૌ ॥ ૩૨॥

એવં રહૂગણો રાજા સાધયિત્વા વિધાનતઃ ।
શાન્તિં પ્રાપ્તો મહાતેજા ગાણપત્યો બભૂવ હ ॥ ૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે રહૂગણસિદ્ધિપ્રાપ્તિવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૨.૨૧

## ૨.૨૨ જડભરતચરિતં નામ દ્વાવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તત આઙ્ગિરસો યોગી વિચચાર મહીતલે ।
મયૂરેશસ્ય સ ક્ષેત્રં આયયૌ દૈવયોગતઃ ॥ ૧॥

તત્ર પૂર્વાવતારં ચ ગણેશસ્ય મહાત્મનઃ ।
દૃષ્ટ્વા જ્ઞાત્વા સ્થિતસ્તં સ ધ્યાયન્નેકત્ર મૂઢવત્ ॥ ૨॥

વર્ષમાત્રે ગતે તસ્ય દર્શનાર્થં યયૌ સ્વયમ્ ।
ગણેશો મૂષકારૂઢઃ સિદ્ધિબુદ્ધિસમન્વિતઃ ॥ ૩॥

તં દૃષ્ટ્વા પ્રણનામાદૌ તુષ્ટાવ પ્રાઞ્જલિઃ પ્રભુમ્ ।
રોમાઞ્ચી સાશ્રુનેત્રઃ સ ભક્તિભાવનિમજ્જિતઃ ॥ ૪॥

જડભરત ઉવાચ ।
નમઃ શાન્તિસ્વરૂપાય શાન્તિદાય કૃપાલવે ।
વિઘ્નેશાય નમસ્તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૫॥

સિદ્ધેઃ પતે ચ તદ્દાત્રે ભક્તાનાં ભયભઞ્જન ।
ભક્તિપ્રિયાય વૈ તુભ્યં ભક્તભક્તાય તે નમઃ ॥ ૬॥

(Page ખં. ૨ અ. ૨૨ પાન ૪૭)
બુદ્ધેઃ પતે ધિયો દાત્રે સર્વવિદ્યાકલાત્મને ।

જ્ઞાનરૂપપ્રકાશાય ગણેશાય નમો નમઃ ॥ ૭॥

મૂષકારૂઢ વૈ તુભ્યં ચતુર્બાહુધરાય ચ ।
સ્વાનન્દવાસિને દેવ વક્રતુણ્ડાય તે નમઃ ॥ ૮॥

નાનાવિહારયુક્તાયાનન્તરૂપાય તે નમઃ ।
અમેયાય સદાયોગશાન્તિસ્થાય નમો નમઃ ॥ ૯॥

ધન્યોઽહં કૃતકૃત્યોઽહં યેન દૃષ્ટો ગજાનનઃ ।
વેદાદૌ ગોચરોઽયં ન કૃપયા સહસાઽઽગતઃ ॥ ૧૦॥

મયા કિં તે કૃતં દેવ દર્શનાર્થં કિમાગતઃ ।
ભક્ત્યા સમં ન કિઞ્ચિત્તે પ્રિયં જ્ઞાતં મયાધુના ॥ ૧૧॥

ભક્ત્યા ત્વાં હૃદિ સન્ધ્યાયન્ સંસ્થિતો જડવત્પ્રભો ।
ત્વમેવ મોહિતો ભક્ત્યા મમ સન્નિધિગઃ કૃતઃ ॥ ૧૨॥

અહો ભક્તિસમં કિઞ્ચિન્નૈવ દૃષ્ટં ન ચ શ્રુતમ્ ।
યયા ત્વં શાન્તિયોગસ્થો મોહિતઃ સહસાઽઽગતઃ ॥ ૧૩॥

ત્વદીયાંશસમુત્પન્નં સકલં બ્રહ્મનાયક ।
કિં દદામિ ગણેશાન યેન તુષ્ટો ભવિષ્યસિ ॥ ૧૪॥

અતસ્ત્વાં નમનં કુર્વે દેહોઽયં તે નિવેદિતઃ ।
વરં દેહિ મહાબાહો યેન તૃપ્તો ભવામ્યહમ્ ॥ ૧૫॥

ભક્તિં દૃઢાં ત્વચ્ચરણે વ્યભિચારવિવર્જિતામ્ ।
દેહિ નાથ દયાસિન્ધો નાન્યદ્ યાચે કદાચન ॥ ૧૬॥

એવમુક્ત્વા ગણાધ્યક્ષં નનામ સ પુનઃ પુનઃ ।
પ્રેમ્ણા નનર્ત યોગીન્દ્રસ્તમુવાચ ગણાધિપઃ ॥ ૧૭॥

ગણેશ ઉવાચ ।
ભવિતા સુદૃઢા ભક્તિર્મમ તે મુનિસત્તમ ।
વ્યભિચારવિહીના તે ન ચાઙ્ગિરસ સંશયઃ ॥ ૧૮॥

ત્વયા કૃતમિદં સ્તોત્રં મદીયં યોગશાન્તિદમ્ ।
ભવિષ્યતિ મહાભાગ મમ પ્રીતિકરં પરમ્ ॥ ૧૯॥

યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રપાઠકઃ ।
શ‌ૃણુયાત્તસ્ય તદ્વચ્ચ ભવિષ્યતિ ન સંશયઃ ॥ ૨૦॥

એવમુક્ત્વાન્તર્દધેઽસૌ ગણનાથઃ પ્રજાપતે ।
સ મુનિર્ભક્તિસંયુક્તોઽભવત્તત્રૈવ સંસ્થિતઃ ॥ ૨૧॥

અન્તે ગણેશરૂપોઽસૌ જાતો યોગીન્દ્રસત્તમઃ ।
ગુહા તત્ર પ્રસિદ્ધા વૈ વર્તતેઽથ મહામુનેઃ ॥ ૨૨॥

ગણેશોત્તરભાગે ચ સમ્મુખે ક્રોશદૂરકમ્ ।
સ્થાનમાઙ્ગિરસસ્યાઽપિ ભરતસ્ય જડાત્મનઃ ॥ ૨૩॥

કુર્વન્તિ દર્શનં તસ્ય તત્ર યે માનવાદયઃ ।
તેષાં મુક્તિર્ભવેદ્દક્ષ શાશ્વતી નાત્ર સંશયઃ ॥ ૨૪॥

ચરિતં ભરતસ્યેદં કથિતં પરમાદ્ભુતમ્ ।
શ ૃણુયાદ્યો નરો ભક્ત્યા પઠેદ્વા ભુક્તિમુક્તિદમ્ ॥ ૨૫॥

એવમાદ્યાશ્ચ રાજાનઃ પ્રિયવ્રતકુલેઽભવન્ ।
ઉત્પન્નાઃ સર્વધર્મજ્ઞા નાનાદેવપરાયણાઃ ॥ ૨૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે જડભરતચરિતં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૨.૨૨
(Page ખં. ૨ અ. ૨૩ પાન ૪૮)

## ૨.૨૩ ધ્રુવચરિત્રં નામ ત્રયોવિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
સ્વાયમ્ભુવમનોઃ પુત્ર ઉત્તાનપાદસંજ્ઞિતઃ ।
સ રાજ્યં મધ્યદેશસ્ય ચક્રે વૈ ધર્મસંયુતઃ ॥ ૧॥

તસ્ય ભાર્યે પ્રવિખ્યાતે સુનીતિઃ સુરુચિસ્તથા ।
સુનીત્યાં ચ ધ્રુવો જજ્ઞે સુરુચ્યામુત્તમસ્તતઃ ॥ ૨॥

સુરુચ્યા સ્વવશં નીતો તયા રાજા વિમોહિતઃ ।
સુનીતિં મન્યતે ન સ્મ મનસાઽપિ પ્રજાપતે ॥ ૩॥

એકદા ધ્રુવપુત્રશ્ચાયયૌ રાજ્ઞઃ સમીપકમ્ ।
આરોઢુમિચ્છન્નુત્સઙ્ગે સંસ્થિતસ્તસ્ય સન્નિધૌ ॥ ૪॥

તત્રાવમાનિતસ્તેન સુરુચ્યા દુષ્ટભાવતઃ ।
તતો ધ્રુવો વનં દક્ષ જગામ ક્રોધસંયુતઃ ॥ ૫॥

માર્ગે વૈ ગચ્છતસ્તસ્ય નારદો દૃષ્ટિમાગતઃ ।
તં નનામ મહાબુદ્ધિર્બાલોઽયં ધર્મધારકઃ ॥ ૬॥

વૃત્તાન્તમખિલં જ્ઞાત્વા નારદેન મહાત્મના ।
ઉપદિષ્ટો મહામન્ત્રો વિષ્ણોશ્ચ દ્વાદશાક્ષરઃ ॥ ૭॥

નારદં સ પ્રણમ્યાઽઽદૌ મથુરાયાં યયૌ તતઃ ।
તપશ્ચકાર તત્રાઽસૌ ધ્યાયન્વિષ્ણું સનાતનમ્ ॥ ૮॥

સહસ્રવર્ષમત્યન્તં તતાપ પરમં તપઃ ।
પ્રસન્નો ભગવાંસ્તત્ર તં યયૌ ભક્તિભાવતઃ ॥ ૯॥

દદૌ રાજ્યમખણ્ડં વૈ પૃથિવ્યાઃ પરમાદ્ભુતમ્ ।
અન્તે સ્વર્ગસ્ય રાજ્યં ચ પદં વિષ્ણોર્ધ્રુવાત્મકમ્ ॥ ૧૦॥

તતઃ સ્વગૃહમાગત્ય નનામ પિતરૌ ધ્રુવઃ ।
તં રાજા માનયામાસ બહુલં તેજસા યુતમ્ ॥ ૧૧॥

કાલેન તં ધ્રુવં રાજા ચકાર સ નરાધિપઃ ।
વનં યયૌ મહાતેજાસ્તતાપ પરમં તપઃ ॥ ૧૨॥

તત્રાગત્ય ચ ગાણેશો નારદસ્તમુવાચ સઃ ।
ભેદાભેદાદિહીનં ત્વં ગણેશં ભજ પાર્થિવ ॥ ૧૩॥

શિવવિષ્ણ્વાદયો દેવા યોગિનઃ સનકાદયઃ ।
વસિષ્ઠાદ્યા ઋષિગણા ભજન્તે તં ન સંશયઃ ॥ ૧૪॥

ન ગણેશં વિના શાન્તિર્લભ્યતે નાત્ર સંશયઃ ।
સ્વાયમ્ભુવાદિભૂપાલૈઃ સેવિતો ગણનાયકઃ ॥ ૧૫॥

એવમુક્ત્વા ગણેશસ્ય દદૌ મન્ત્રં ષડક્ષરમ્ ।
રાજા મન્ત્રપ્રભાવેણ ગાણપત્યો બભૂવ હ ॥ ૧૬॥

મરણે ગણનાથં વૈ સસ્માર સ નૃપોત્તમઃ ।
સાયુજ્યં ગણનાથસ્ય પ્રાપ્તં તસ્ય મહાત્મનઃ ॥ ૧૭॥

ધ્રુવો રાજ્યં ચકારાથ ધર્મયુક્તો મહીપતિઃ ।
જગામ સહસા તત્ર નારદઃ કરુણાનિધિઃ ॥ ૧૮॥

તં દૃષ્ટ્વા પ્રણનામાઽસૌ પૂજયામાસ ભક્તિતઃ ।
સ્વગુરું પૂર્ણભાવેન કૃતાઞ્જલિપુટઃ સ્થિતઃ ॥ ૧૯॥

તમુવાચ મહાયોગી નારદો દિવ્યદર્શનઃ ।
સ્વશિષ્યં ભક્તિસંયુક્તં દયયા ચ દયાનિધિઃ ॥ ૨૦॥

નારદ ઉવાચ ।
શ ृણુ ધ્રુવ વચો રમ્યં વિકુણ્ઠાદાગતોઽધુના ।
વિષ્ણુના પ્રેષિતોઽહં વૈ તવ હેતોર્મહામતે ॥ ૨૧॥

મયૂરેશસ્ય યત્ક્ષેત્રં ભુવિ બ્રહ્મમયં પરમ્ ।
તત્ર ગત્વા મહાયાત્રાં કુરુ ત્વં વિધિવત્સુત ॥ ૨૨॥

તેનાક્ષયપદં તે વૈ ભવિષ્યતિ મદીયકમ્ ।
અન્યથા વિઘ્નસંયુક્તઃ પતિષ્યસિ ન સંશયઃ ॥ ૨૩॥

અન્યચ્ચ કથિતં તેન વિષ્ણુના કરુણાવતા ।
એકાક્ષરં ગણેશસ્ય મહામન્ત્રં જપેતિ વૈ ॥ ૨૪॥

તેન મન્ત્રપ્રભાવેણ લયે બ્રહ્મદિનાત્યયે ।
લયં ધ્રુવપદં ગચ્છેત્તદા ત્વં શાન્તિમેષ્યસિ ॥ ૨૫॥

બ્રહ્મણિ બ્રહ્મભૂતશ્ચ ભવિષ્યસિ ન સંશયઃ ।
અન્યથા યોગશાન્તિં ત્વં ન પ્રાપ્સ્યસિ કદાચન ॥ ૨૬॥

(Page  ખં. ૨ અ. ૨૪ પાન ૪૯)
તતસ્તં નારદો યોગી દદૌ મન્ત્રં વિધાનતઃ ।
એકાક્ષરં ગણેશસ્ય રાજા સિદ્ધો બભૂવ સઃ ॥ ૨૭॥

મયૂરેશસ્ય વૈ ક્ષેત્રે ધ્રુવઃ સદ્યઃ સમાગતઃ ।
ચકાર વિધિવદ્યાત્રાં દ્વારાણાં ચિહ્નસંયુતામ્ ॥ ૨૮॥

ગણેશં સ્થાપયામાસ બ્રાહ્મણૈર્મન્ત્રકોવિદૈઃ ।
અર્ધક્રોશે ગણેશાત્ નાપૂર્વદ્વારસમીપગમ્ ॥ ૨૯॥

દેવાલયં ચકારાઽસૌ મહામૌલ્યં સુવિસ્તૃતમ્ ।
સુવર્ણશિખરં રમ્યં પૂજિતં વૈ સુભક્તિતઃ ॥ ૩૦॥

નામ તસ્યાઽકરોદ્રાજા તદા ધ્રુવવિનાયકઃ ।

વર્ષમાસં નિવાસં ચ ધ્રુવસ્તત્ર ચકાર હ ॥ ૩૧॥

પશ્ચાત્ સ્વનગરે ગત્વા રાજ્યં ચક્રે મહાબલઃ ।
જગામ સ્વર્ગમન્તે સ ધ્રુવાખ્યં જ્યોતિષાં ધરમ્ ॥ ૩૨॥

તસ્મિન્ ગણપતિં ધ્યાયન્ સંસ્થિતોઽસૌ મહાયશાઃ ।
ધ્રુવસ્થાનસ્ય નાશેંઽતે ગતઃ સ્વાનન્દમઞ્જસા ॥ ૩૩॥

ધ્રુવં વિનાયકં દૃષ્ટ્વા ભુક્તિં મુક્તિં સુનિશ્ચલામ્ ।
લભતે માનવસ્તત્ર શ્રુત્વા ધ્રૌવ્યમિદં તથા ॥ ૩૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ધ્રુવચરિત્રં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૨.૨૩

## ૨.૨૪ પૃથુયશોવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ધ્રુવસ્યાન્વયસમ્ભૂતોંઽગસ્તેજસ્વી મહીપતિઃ ।
ધર્માત્મા સર્વમાન્યશ્ચ પિતૃવત્ પાલકોઽભવત્ ॥ ૧॥

મૃત્યુકન્યાઽભવદ્ભાર્યા રાજ્ઞસ્તસ્ય મહાત્મનઃ ।
તસ્યાં તસ્માત્ સમુત્પન્નઃ પુત્રો વેનઃસુદારુણઃ ॥ ૨॥

તં પિતા શિક્ષયન્ શ્રાન્તો ન સાધુરભવત્ સુતઃ ।
રાજ્યં ત્યક્ત્વા વનં રાજા દુઃખયુક્તો જગામ હ ॥ ૩॥

તતો રાજવિહીને ચ દેશે ચોરાઃ પ્રબભ્રમુઃ ।
તૈર્લુણ્ઠિતં જનાનાં સ્મ સર્વસ્વં યત્ર તત્ર હિ ॥ ૪॥

પ્રજાઃ સર્વા ભયોદ્વિગ્ના બ્રાહ્મણાન્ શરણં યયુઃ ।
બ્રાહ્મણૈ રાજ્ય આસિક્તઃ સ વેનઃ પૈતૃકે તતઃ ॥ ૫॥

સ રાજ્યં પ્રાપ્ય દુર્ધર્ષશ્ચોરાન્ હત્વા સમન્તતઃ ।
રાજ્યં ચકાર દેશેષુ કમ્પયન્ વસુધાતલમ્ ॥ ૬॥

નયમાર્ગં પરિત્યજ્ય યથેચ્છાચારકોઽભવત્ ।
તેન વર્ણાશ્રમાચારસંયુતા દુઃખિતાઃ કૃતાઃ ॥ ૭॥

પુનસ્તે તાપસાંસ્તાન્વૈ શરણં જગ્મુરાદરાત્ ।

તાપસૈર્વારિતો વેનસ્તાનુવાચ દ્વિજોત્તમાન્ ॥ ૮॥

વેન ઉવાચ ।
અહં પૂજ્યશ્ચ સર્વેષાં પાલકો નાત્ર સંશયઃ ।
માં ભજધ્વં મુનીન્દ્રા વૈ યોગક્ષેમકરં સદા ॥ ૯॥

તસ્ય તદ્વચનં શ્રુત્વા કુપિતા બ્રાહ્મણાસ્તતઃ ।
શાપેન મારયામાસુસ્તં નૃપં નયવર્જિતમ્ ॥ ૧૦॥

તસ્યાઙ્ગં વામમેવાદૌ મમન્થુર્નૃપહેતવે ।
તસ્માત્ ક્રૂરઃ સમુત્પન્નસ્ત્યસ્ય પાપમયો નરઃ ॥ ૧૧॥

હ્રસ્વકાયઃ શ્યામવર્ણઃ શ્મશ્રુલઃ પિઙ્ગલોચનઃ ।
તં દૃષ્ટ્વા બ્રાહ્મણાઃ પ્રોચુર્નિષીદેતિ પ્રજાપતે ॥ ૧૨॥

તતો નિષાદનામાઽસૌ જાતસ્તસ્મૈ વનાન્તરે ।
(Page ખં. ૨ અ. ૨૪ પાન ૫૦)
સ્થાનં દદુર્દ્વિજશ્રેષ્ઠા નિષાદાસ્તત્ સમુદ્ભવાઃ ॥ ૧૩॥

પુનશ્ચ દક્ષિણાઙ્ગં તે મમન્થુર્દ્વિજસત્તમાઃ ।
વેનસ્ય દમ્પતી તસ્માત્ સમુદ્ભૂતૌ મહૌજસૌ ॥ ૧૪॥

વિષ્ણોઃ કલાયુતૌ સાક્ષાદ્બ્રાહ્મણાન્નેમતુઃ પુરા ।
બ્રાહ્મણૈર્નૃપવર્યઃ સ સંસિક્તો રાજ્યકર્મણિ ॥ ૧૫॥

પૃથુનામા મહીપાલો વિખ્યાતોઽભૂચ્ચ મણ્ડલે ।
સ્વધર્મનિરતઃ સાક્ષાત્ ક્ષાત્રધર્મપ્રવર્તકઃ ॥ ૧૬॥

તેન સંવર્ધિતા લોકા વર્ણાશ્રમયુતા વિધે ।
પુરે મુમુદિરે દેશે યત્ર તત્ર સુસત્કૃતાઃ ॥ ૧૭॥

ગતે કિયતિ કાલે વૈ લોકા અન્નવિવર્જિતાઃ ।
ક્ષુધયા પીડિતાઃ સર્વે તં નૃપં શરણં યયુઃ ॥ ૧૮॥

વેનસ્યાધર્મભાવેન ભૂમ્યા સર્વં સમાહૃતમ્ ।
પુનર્દાતુમશક્તા વૈ ધર્મરૂપે નરાધિપે ॥ ૧૯॥

લોકાનાં દુઃખમાકર્ણ્ય કુપિતોઽસૌ નરાધિપઃ ।
વિચાર્ય ધનુરાદાય શરં શ્રેષ્ઠં યુયોજ ચ ॥ ૨૦॥

ભૂમિં હન્તું મનશ્ચક્રે હ્યાકર્ણાકર્ષિતં ધનુઃ ।

યાવદ્બાણં સ ચિક્ષેપ તાવદ્ભીતા વસુન્ધરા ॥ ૨૧॥

ગોરૂપેણ ભયોદ્વિગ્ના યત્ર તત્ર પલાયત ।
આત્તબાણો નૃપઃ પશ્ચાદ્યયૌ યમ ઇવાપરઃ ॥ ૨૨॥

શરણં નાઽપતદ્ભૂમિસ્તમેવ શરણં યયૌ ।
ઉવાચ પ્રાઞ્જલિર્ભૂત્વા નૃપં કમ્પસમન્વિતા ॥ ૨૩॥

સ્ત્રિયં માં ગાં કથં હંસિ ભૂમિપાલ વસુન્ધરામ્ ।
શરણાગતરૂપાં તે રક્ષ ક્ષત્રકુલોદ્ભવ ॥ ૨૪॥

ભૂમેર્વચનમાકર્ણ્ય તાં જગાદ નૃપોત્તમઃ ।
શૃણુ ત્વાં મારયિષ્યામિ મચ્છાસનપરાઙ્મુખીમ્ ॥ ૨૫॥

જીવિતું ચેચ્છસિ પ્રાજ્ઞે તદાન્નં વિવિધં ધરે ।
કુરુ પ્રકટરૂપં ત્વં સર્વકાલં ન સંશયઃ ॥ ૨૬॥

તતસ્તં વિનયં કૃત્વા સા જગાદ વસુન્ધરા ।
મયા ગ્રસ્તા સમગ્રા યા ઓષધ્યશ્ચ નૃપાત્મજ ॥ ૨૭॥

ભક્ષિતાસ્તાઃ પુનર્દાતું કથં શક્તા ભવામિ ભોઃ ।
અતસ્ત્વં માં સમામાદૌ કુરુ પાર્થિવસત્તમ ॥ ૨૮॥

ગોરૂપાહં સ્થિતા ભૂપ વત્સં કૃત્વા સ્વભાવજમ્ ।
સકલા દુગ્ધરૂપેણૌષધીસ્તે પ્રદદામ્યહમ્ ॥ ૨૯॥

દોહકઃ કલ્પ્યતાં શીઘ્રં તદા સર્વં શુભં ભવેત્ ।
અન્યથા માં મહીપાલ હનિષ્યસિ વૃથા કથમ્ ॥ ૩૦॥

તસ્યા વચનમાકર્ણ્ય ધનુષ્કોટ્યા નૃપોત્તમઃ ।
પર્વતાંશ્ચૂર્ણયામાસ સમાં ભૂમિં ચકાર હ ॥ ૩૧॥

પુરગ્રામાદિકાનાં તુ રચના રચિતા તતઃ ।
તેનૈવ પૃથુના દક્ષ યથાયોગ્યં ધરાતલે ॥ ૩૨॥

તદાદિર્નગરાદ્યાનાં રચના સમ્પ્રવર્તિતા ।
પુત્રીત્વે સ ધરાં ચક્રે પૃથ્વી નામ્ની તતોઽભવત્ ॥ ૩૩॥

મનું વત્સં તતઃ કૃત્વા દોહકશ્ચાઽભવત્સ્વયમ્ ।
ષડ્રસાન્નમયં દુગ્ધં દુદોહ નૃપસત્તમઃ ॥ ૩૪॥

તતઃ સર્વે ત્રિલોકસ્થા દુદુહુસ્તાં વસુન્ધરામ્ ।
સ્વસ્વાન્નમયદુગ્ધં તે જગૃહુઃ પરમાદૃતાઃ ॥ ૩૫॥

બ્રહ્માણં વેદરૂપં સુવત્સં કૃત્વા બૃહસ્પતિઃ ।
દોહકો દુગ્ધમાદાય સંસ્થિતો વિગતજ્વરઃ ॥ ૩૬॥

રુદ્રં વત્સં તતઃ કૃત્વા દોહકઃ પિશિતાત્મકમ્ ।
કાલાગ્નિરુદ્રસંજ્ઞશ્ચ દુદોહ હરજીવનમ્ ॥ ૩૭॥

વિષ્ણું વત્સં સમાદાય યજમાનશ્ચ દોહકઃ ।
યજ્ઞાધારમયં દુગ્ધં દુદોહ ખલુ કર્મજમ્ ॥ ૩૮॥

(Page ખં. ૨ અ. ૨૫ પાન ૫૧)
સૂર્યં વત્સં ચકારાપિ દોહકો ધ્રુવ આદરાત્ ।
જ્યોતિષાં જીવનં દુગ્ધં દુદોહ સકલં તતઃ ॥ ૩૯॥

શેષં વત્સં ચ સઙ્ગૃહ્ય દુદોહાઽપિ ચ વાસુકિઃ ।
સર્પાણામન્નરૂપં વૈ દુગ્ધં દુગ્ધપ્રિયસ્તતઃ ॥ ૪૦॥

શિવં વત્સં પ્રકલ્પ્યૈવ દોહકો નન્દિકેશ્વરઃ ।
વિદ્યાત્મકં મહદ્ દુગ્ધં દુદોહ ગતમત્સરઃ ॥ ૪૧॥

એવં સર્વે ચ દુદુહુર્ભૂમિં ગાં પૃથુભાવિતામ્ ।
ચરાચરમયા જીવા ઈશ્વરાશ્ચ પ્રજાપતે ॥ ૪૨॥

પૃથુસ્તાં પૂજયામાસ ધરણીં ધરણીપ્રિયઃ ।
પુત્રીત્વે પાલિતા હર્ષાત્સા સ્થિતા મુદિતા તથા ॥ ૪૩॥

એવં દુગ્ધ્વા ધરિત્રીં સ પૃથુઃ પૃથુપરાક્રમઃ ।
રાજ્યં ચકાર નીતિજ્ઞઃ પૃથિવ્યામેકરાટ્ સ્વયમ્ ॥ ૪૪॥

તતો યજ્ઞાંશ્ચકારાઽસૌ શતસઙ્ખ્યાન્ મહાબલઃ ।
અશ્વમેધાભિધાન્ રાજા ભૂરિદક્ષિણસંયુતાન્ ॥ ૪૫॥

તસ્ય યજ્ઞે સ્વયં બ્રહ્મા વિષ્ણુઃ શઙ્કર એવ ચ ।
ઇન્દ્રાદ્યા આયયુઃ સર્વે ગન્ધર્વાદ્યા મહામતે ॥ ૪૬॥

ઋષયઃ કશ્યપાદ્યાશ્ચ શેષાદ્યા નાગમુખ્યકાઃ ।
જના નાનાવિધા જગ્મુઃ સસ્ત્રીકાશ્ચ વિશેષતઃ ॥ ૪૭॥

અન્ત્યે યજ્ઞે સમારબ્ધે શક્રશ્ચિન્તાતુરો ભૃશમ્ ।

જટાચીરધરો ભૂત્વા તસ્યાશ્વં સહસાઽઽહરત્ ॥ ૪૮॥

તસ્ય પુત્રેણ સન્દૃષ્ટસ્તપસ્વીતિ ચ મોચિતઃ ।
હયં ત્યક્ત્વા ભયોદ્વિગ્નોન્તર્ધાનં તુ ચકાર સઃ ॥ ૪૯॥

પુનરસ્થિધરો ભૂત્વા ભસ્મના લેપકારકઃ ।
જહારાશ્વં તથા રાજપુત્રેણ ન સ તાડિતઃ ॥ ૫૦॥

એવં ષડ્વારમશ્વં સ સઞ્જહાર પુરન્દરઃ ।
તતસ્તં હન્તુમુદ્યુક્તઃ પૃથુઃ પૃથુપરાક્રમઃ ॥ ૫૧॥

તં બ્રહ્મા સાન્ત્વયામાસ મહેન્દ્રં ન જઘાન હ ।
એકોનશતયજ્ઞાન્ સ ચક્રે વૈ તેજસા યુતઃ ॥ ૫૨॥

બ્રહ્મણા નોદિતઃ સાક્ષાદિન્દ્રસ્તં પ્રણનામ હ ।
પૃથુર્વૈરં સમુત્સૃજ્ય દેવેન્દ્રં તં પ્રસસ્વજે ॥ ૫૩॥

સકલાઃ પૂજિતાસ્તેન દેવાદ્યાઃ સ્વસ્થલં યયુઃ ।
સોઽપિ રાજ્યં સ્વધર્મસ્થશ્ચક્રે વૈ પાલયન્ પ્રજાઃ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પૃથુયશોવર્ણનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૨.૨૪

## ૨.૨૫ પૃથુચરિત્રં નામ પઞ્ચવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
જનાનાં ધર્મમાર્ગં સો શિક્ષયન્નૃપસત્તમઃ ।
વિષ્ણુરૂપઃ સ્વયં સાક્ષાદ્વિષ્ણુતુલ્યપરાક્રમઃ ॥ ૧॥

સંસ્થિતઃ સ્વપુરે રાજા લોકાન્ સંરઞ્જયન્ પ્રભો ।
તત્રાઽઽજગ્મુશ્ચ યોગીન્દ્રાઃ સનકાદ્યા વિધેઃ સુતાઃ ॥ ૨॥

ચત્વારઃ સૂર્યસઙ્કાશાઃ સદા બાલવયોન્વિતાઃ ।
પૂર્વેષાં પૂર્વજા માન્યા ગતભ્રાન્તય એવ તે ॥ ૩॥

તાન્ દૃષ્ટ્વા સહસોત્થાય સમ્ભ્રમેણ નરોત્તમઃ ।
નનામ દણ્ડવદ્ભૂમૌ શિરઃ સંસ્થાપ્ય પાદયોઃ ॥ ૪॥

ઉત્થાય તાન્ મહાભક્ત્યા પાદ્યાર્ઘ્યૈર્વિષ્ટરાદિભિઃ ।

અપૂજયત્સ વિધિવત્ હર્ષિતોઽત્યન્તભાવતઃ ॥ ૫॥

(Page ખં. ૨ અ. ૨૫ પાન ૫૨)
પાદસંવાહનં તેષાં ચકાર સ્વયમાદરાત્ ।
ઉવાચ મધુરં વાક્યં પૃથુર્વાક્યવિશારદઃ ॥ ૬॥

પૃથુરુવાચ ।
ધન્યેયં ધરણી ત્વદ્ય ધન્યં નગરમુત્તમમ્ ।
મન્દિરં સત્કૃતં સર્વં ભવતામાગમેન મે ॥ ૭॥

ધન્યો વંશો કુલં ધન્યં પિતરૌ જ્ઞાનમાશ્રમઃ ।
તપો વિદ્યાદિકં મે ચ ભવતાં પાદદર્શનાત્ ॥ ૮॥

સનાથોઽહં કૃતોઽનાથો ભવદ્ભિર્નાત્ર સંશયઃ ।
અનુગ્રહઃ કૃતોઽત્યન્તં વિશેષેણ દયાલુભિઃ ॥ ૯॥

પૂર્વજન્માર્જિતં મે કિં ફલિતં પુણ્યમુત્તમમ્ ।
અન્યથા દર્શનં ન સ્યાદ્ભવતાં બ્રહ્મરૂપિણામ્ ॥ ૧૦॥

નિઃસ્પૃહા યોગનિષ્ઠા યે સર્વજ્ઞાઃ સ્વપરાયણમ્ ।
દૃષ્ટ્વા કુર્વન્તિ કાર્યાર્થમાજ્ઞાં તસ્ય હિતાય ચ ॥ ૧૧॥

અત આજ્ઞાં મહાભાગા મમ કુર્વન્તુ સામ્પ્રતમ્ ।
તયાઽહં કૃતકૃત્યશ્ચ ભવામિ ન ચ સંશયઃ ॥ ૧૨॥

મુદ્ગલ ઉવાચ ।
પૃથોર્વચનમાકર્ણ્ય સનકાદ્યાસ્તમબ્રુવન્ ।
તૃપ્તા ભાવેન તસ્યાથ યોગીન્દ્રા યોગભાવિતાઃ ॥ ૧૩॥

સનકાદ્યા ઊચુઃ ।
ધન્યોઽસિ નૃપવર્ય ત્વં પૃથો પૃથુપરાક્રમ ।
વિનયં તેઽદ્ય દૃષ્ટ્વા વૈ સન્તુષ્ટા વયમાદરાત્ ॥ ૧૪॥

ન કાર્યલિપ્સયા યુક્તા વયં નગ્ના મહામતે ।
દર્શનાર્થં ચ તે યાતાઃ સાધો સ્વર્ગે શ્રુતં યશઃ ॥ ૧૫॥

આજ્ઞાં દેહિ ગમિષ્યામિ બ્રહ્મલોકં સનાતનમ્ ।
કીર્તિઃ શ્રુતા તથા દૃષ્ટ્વા તૃપ્તા હર્ષસમન્વિતાઃ ॥ ૧૬॥

તેષાં તદ્વચનં શ્રુત્વા પૃથુસ્તાન્ વિનયાન્વિતઃ ।

જગાદ ભક્તિસંયુક્તો યોગીન્દ્રાન્નૃપસત્તમઃ ॥ ૧૭॥

પૃથુરુવાચ ।
ભુક્તં રાજ્યં મહાભાગા નાનાભોગસમન્વિતમ્ ।
અધુના શાન્તિસિધ્યર્થં યોગં બ્રૂત તપોધનાઃ ॥ ૧૮॥

પૃથોર્વચનમત્યન્તં શ્રુતં યોગિભિરાદરાત્ ।
પાત્રં દૃષ્ટ્વા મહાભાગા ઊચુસ્તં બ્રહ્મ શાશ્વતમ્ ॥ ૧૯॥

સનકાદ્યા ઊચુઃ ।
ધન્યોઽસિ નૃપશાર્દૂલ બુદ્ધિસ્તે પરમાદ્ભુતા ।
નિર્વેદં રાજ્યભોગેભ્યઃ સમ્પ્રાપ્તા પૃથુલશ્રવઃ ॥ ૨૦॥

યોગશાન્તિમયં પૂર્ણં ગાણેશં વિદ્ધિ ભૂમિપ ।
તં ભજસ્વ મહાભક્ત્યા તયા શાન્તિં ગમિષ્યસિ ॥ ૨૧॥

એકદા સ્મ વયં સર્વે સઙ્ગતાઃ શઙ્કરાલયમ્ ।
વટમૂલે સમાસીનમદ્રાક્ષ્મ ધ્યાનસંસ્થિતમ્ ॥ ૨૨॥

તં પ્રણમ્ય સ્થિતાઃ સર્વે વયં વિનયસંયુતાઃ ।
સ્તોત્રૈસ્તં બોધયન્તશ્ચ તતઃ શર્વો બુબોધ વૈ ॥ ૨૩॥

ત્યક્ત્વા ધ્યાનં ગણેશાય નમ ઇત્યવદત્તતઃ ।
શ્રુત્વા ભ્રાન્તા વયં તં સ્મ પૃચ્છામઃ સંશયાન્વિતાઃ ॥ ૨૪॥

કોઽસૌ ગણાધિપઃ સ્વામિન્ કથં નમસિ તં પ્રભો ।
શિવઃ સહજરૂપસ્ત્વં સ્વાધીનઃ સતતં મતઃ ॥ ૨૫॥

અસ્માકં વચનં શ્રુત્વા શિવો હર્ષસમન્વિતઃ ।
જગાદ જ્ઞાનમાદ્યં યદ્ગાણપત્યં સુશાન્તિદમ્ ॥ ૨૬॥

શિવ ઉવાચ ।
બ્રહ્મ યત્કથ્યતે વેદૈઃ કથં તત્ર પ્રવર્તતે ।
સ્વાધીનં સહજં વિપ્રાઃ પરાધીનં ત્રિધા ભવેત્ ॥ ૨૭॥

કર્મયોગાદિભેદેન વેદે વૈ વેદવાદિભિઃ ।
નાનાવિધં વર્ણિતં યદ્બ્રહ્મ તન્માયયાન્વિતમ્ ॥ ૨૮॥

કર્મણાં સકલાનાં સંયોગો બ્રહ્મણિ જાયતે ।
તેન કર્માત્મકં બ્રહ્મ તદ્વદ્ જ્ઞાનાત્મકં મતમ્ ॥ ૨૯॥

સમૂહવાચી શબ્દશ્ચ ગણ ઇત્યભિધીયતે ।
બાહ્યાન્તરાદિભેદાનાં સંયોગે તુ સમૂહકઃ ॥ ૩૦॥

(Page ખં. ૨ અ. ૨૫ પાન ૫૩)
અન્નપ્રાણાદિકા શબ્દા બ્રહ્મણો વાચકા મતાઃ ।
તે સર્વે ગણરૂપાશ્ચ તેષાં સ્વામી ગણેશ્વરઃ ॥ ૩૧॥

સંયોગાયોગકાદ્યા યે નાના યોગા મતા બુધૈઃ ।
યોગાનાં યોગરૂપોઽયં ગણેશો નાત્ર સંશયઃ ॥ ૩૨॥

ગણો યોગાત્મકઃ પ્રોક્તસ્તસ્માત્તસ્ય ગણા વયમ્ ।
યોગરૂપા વિશેષેણ નમામો ભક્તિસંયુતાઃ ॥ ૩૩॥

માયા વિઘ્નાત્મિકા પ્રોક્તા ભ્રાન્તિદા બિમ્બભાવતઃ ।
તાં જયન્તિ જના ઈશા વિઘ્નરાજસ્ય સેવયા ॥ ૩૪॥

બ્રહ્મભૂતાસ્તે ભવન્તિ યોગીન્દ્રા ગાણપાઃ સ્મૃતાઃ ।
અહં ગણેશરૂપો વૈ ભિન્નં માયામયં મતમ્ ॥ ૩૫॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં સા બુદ્ધિર્વિવિધાત્મિકા ।
તત્રૈશ્વર્યં ચ યત્પ્રોક્તં સિદ્ધિઃ સા પરમાદ્ભુતા ॥ ૩૬॥

તત્ર યદ્બિમ્બભાવેન ગણેશઃ પ્રતિતિષ્ઠતિ ।
માયાભ્યાં મોહિતોઽત્યન્તં સર્વત્રાઽસૌ વિરાજતે ॥ ૩૭॥

બિમ્બિભાવં પરિત્યજ્ય ગણેશસ્યૈવ સેવયા ।
પઞ્ચધા ચિત્તમુત્સૃજ્ય સ્વયં ચિન્તામણિર્ભવેત્ ॥ ૩૮॥

ગણેશોઽહં યદા વિપ્રાસ્તદા કુત્ર પ્રવર્તતે ।
સંયોગશ્ચ તથા યોગઃ શાન્તિયોગં લભે તતઃ ॥ ૩૯॥

ન ભિન્નોઽહં કદા તસ્માદ્ગણેશાન્નાત્ર સંશયઃ ।
યોગીન્દ્રઃ શાન્તિયોગેન બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૪૦॥

એતદેવ મદીયં યત્ ગુહ્યં ધ્યાનં પ્રકીર્તિતમ્ ।
અતો ગણેશદાસોઽહં તં નમામિ સદા દ્વિજાઃ ॥ ૪૧॥

એવમુક્ત્વા મહાયોગી વિરરામ સ શઙ્કરઃ ।
ઉચ્છિન્નસંશયા જાતાઃ સનકાદ્યા વયં નૃપ ॥ ૪૨॥

વિચરામો મહીમેતાં સ્વર્ગેષુ વિવરેષુ ચ ।

યોગમાર્ગેણ યોગીશા ગાણપત્યાઃ સ્વભાવતઃ ॥ ૪૩॥

ગણેશદર્શને જાતલાલસા વયમાદરાત્ ।
તસ્મિન્ કાલે ગણાધીશઃ કશ્યપસ્યાત્મજોઽભવત્ ॥ ૪૪॥

કાશીરાજો મહાભક્તો ગાણપત્યપરાયણઃ ।
તસ્ય ગેહે ગતો દેવઃ સ્વસ્ય વૈ કાર્યસાધનાત્ ॥ ૪૫॥

દર્શનાર્થં વયં તત્ર ગતાઃ કાશ્યાં મહામતે ।
પ્રપશ્યામો ગણેશં સ્મ બ્રહ્મચારિસ્વરૂપિણમ્ ॥ ૪૬॥

તં પ્રણમ્ય વયં રાજન્ સ્થિતા ભક્ત્યા સમન્વિતાઃ ।
બાલરૂપધરં દેવં સ્મ સ્તુમો બાલયૂથગમ્ ॥ ૪૭॥

સનકાદય ઊચુઃ ।
નમો વિનાયકાયૈવ કશ્યપપ્રિયસૂનવે ।
અદિતેર્જઠરોત્પન્નબ્રહ્મચારિન્નમોઽસ્તુ તે ॥ ૪૮॥

ગણેશાય સદા માયાધાર ચૈતદ્વિવર્જિત ।
ભક્ત્યધીનાય વૈ તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૪૯॥

ત્વં બ્રહ્મ શાશ્વતં દેવ બ્રહ્મણાં પતિરોજસા ।
યોગાયોગાદિભેદેન ક્રીડસે નાત્ર સંશયઃ ॥ ૫૦॥

આદિમધ્યાન્તરૂપસ્ત્વં પ્રકૃતિઃ પુરુષસ્તથા ।
નાદાનાદૌ ચ સૂક્ષ્મસ્ત્વં સ્થૂલરૂપો ભવાન્ પ્રભો ॥ ૫૧॥

સુરાસુરમયઃ સાક્ષાન્નરનાગસ્વરૂપધૃક્ ।
જલસ્થલાદિભેદેન શોભસે ત્વં ગજાનન ॥ ૫૨॥

સર્વેભ્યો વર્જિતસ્ત્વં વૈ માયાહીનસ્વરૂપધૃક્ ।
માયામાયિકરૂપં ત્વાં કો જાનાતિ ગતિં પરામ્ ॥ ૫૩॥

કથં સ્તુમો ગણાધીશં યોગાકારમયં સદા ।
વેદા ન શમ્ભુમુખ્યાશ્ચ શક્તાઃ સ્તોતું કદાચન ॥ ૫૪॥

વયં ધન્યા વયં ધન્યા યેન પ્રત્યક્ષતાં ગતઃ ।
અસ્માકં યોગિનાં ઢુણ્ઢે કુલદેવસ્ત્વમઞ્જસા ॥ ૫૫॥

(Page ખં. ૨ અ. ૨૬ પાન ૫૪)
ઇત્યુક્ત્વા મૌનમાસ્થાય નમામો દણ્ડવત્ સ્મ તમ્ ।

ઉવાચ નો ગણાધીશો ભક્તિભાવનિયન્ત્રિતઃ ॥ ૫૬॥

વિનાયક ઉવાચ ।
ભવદ્ભિર્યત્કૃતં સ્તોત્રં મદીયં યોગશાન્તિદમ્ ।
ભવિષ્યતિ મહાભાગાઃ પઠતે શ‍ૃણ્વતે સદા ॥ ૫૭॥

યં યમિચ્છતિ તં તં વૈ દાસ્યામિ સ્તોત્રભાવિતઃ ।
ભવન્તો ગાણપત્યાશ્ચ ભવિષ્યથ યથા શિવઃ ॥ ૫૮॥

એવમુક્ત્વા સ્વયં બાલશ્ચિક્રીડ પ્રાકૃતો યથા ।
બાલકૈઃ સહ યોગાત્મા કાશ્યપઃ પૂર્વવન્નૃપ ॥ ૫૯॥

વયં કાશીપતે રાજન્ દર્શનાર્થં ગતાસ્તતઃ ।
તેનાઽપિ માનિતાઃ સમ્યક્ ભુક્ત્વા યાતાઃ પદે પુનઃ ॥ ૬૦॥

એતત્તે કથિતં સર્વં યોગશાન્તિમયં મહત્ ।
જ્ઞાનપૂર્ણં ગણેશાખ્યં તં ભજસ્વ નરાધિપ ॥ ૬૧॥

મુદ્ગલ ઉવાચ ।
એવમુક્ત્વા વિધેર્લોકે યયુસ્તે સનકાદયઃ ।
પૃથુઃ પુત્રેષુ રાજ્યં સ્વં વિભજ્ય ચ વનં યયૌ ॥ ૬૨॥

તત્ર યોગક્રમણૈવ ગાણપત્યો બભૂવ હ ।
પત્ન્યા સહ વિનીતાત્મા ગણેશેંઽતે લયં યયૌ ॥ ૬૩॥

એતત્ પૃથુલકીર્તેશ્ચ ચરિતં કથિતં પૃથોઃ ।
શ‍ૃણુયાદ્યઃ પઠેદ્વાપિ સર્વદં તસ્ય તદ્ ભવેત્ ॥ ૬૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પૃથુચરિત્રં નામ પઞ્ચવિંશતિતમોઽધ્યાયઃ ॥ ૨.૨૫

## ૨.૨૬ પ્રાચીનબર્હિષશ્ચરિતં નામ ષડ્વિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તદન્વયે ચ સમ્ભૂતો બર્હિષો નામ પાર્થિવઃ ।
ધર્માત્મા શસ્ત્રધારી સ પ્રજાનાં પાલને રતઃ ॥ ૧॥

સ યજ્ઞાન્વિવિધાન્ ચક્રે કર્મમાર્ગપરાયણઃ ।

પ્રાચીનાગ્રકુશૈઃ સર્વાન્ છાદયામાસ મેદિનીમ્ ॥ ૨॥

મૃગયાર્થં વનં યાતઃ સમુદ્રતનયાં તદા ।
ઉપયેમે સ ભૂપાલસ્તસ્યાં પુત્રા દશાઽભવન્ ॥ ૩॥

સર્વે સમાનવર્ણાસ્તે સમાચારાઃ પ્રજાપતે ।
સમાનમાનસાસ્તેન નામ્નાઽઽખ્યાતાઃ પ્રચેતસઃ ॥ ૪॥

પ્રજાર્થં તે સમુદ્રસ્ય સમીપે તપસિ સ્થિતાઃ ।
સરો નારાયણાખ્યં ચ તત્ર વિષ્ણુમપૂજયન્ ॥ ૫॥

પ્રાચીનબર્હિરાજર્ષિં સ્વગૃહે કર્મકારકમ્ ।
સ્થિતં જ્ઞાત્વા સમાયાતો નારદઃ કરુણાનિધિઃ ॥ ૬॥

તં રાજાઽપૂજયત્ ભક્ત્યા કૃતાઞ્જલિપુટઃ સ્થિતઃ ।
તમુવાચ મુનિશ્રેષ્ઠો રાજાનં જ્ઞાનદાયકઃ ॥ ૭॥

નારદ ઉવાચ ।
કિં રાજન્ કર્મણા તે વૈ ભવિષ્યતિ વદ પ્રભો ।
બન્ધદં કર્મ વેદેષુ પ્રોક્તં તન્નાત્ર સંશયઃ ॥ ૮॥

યજ્ઞૈર્નાનાવિધૈઃ સર્વં કૃતં કર્મ ત્વયા મહત્ ।
ઘોરં હિંસાત્મકં નિત્યં નાનાપશુવધાશ્રયમ્ ॥ ૯॥

પ્રહતાઃ પશવઃ સર્વે ત્વાં પ્રતીક્ષન્ત ઓજસા ।
વધાર્થં તવ ચાત્યન્તં ક્રોધયુક્તા ન સંશયઃ ॥ ૧૦॥

અધુના વૃધ્દરૂપસ્ત્વં ત્યક્ત્વા કર્મ મહીપતે ।
કર્માઙ્કુરાગ્નિરૂપં વૈ જ્ઞાનમાર્ગં સમાશ્રય ॥ ૧૧॥

(Page ખં. ૨ અ. ૨૬ પાન ૫૫)
મુદ્ગલ ઉવાચ ।
નારદસ્ય વચઃ શ્રુત્વા વિસ્મિતઃ સ નૃપોઽબ્રવીત્ ।
તં પુનસ્તસ્ય ભાવજ્ઞો વિનયેન સમન્વિતઃ ॥ ૧૨॥

પ્રાચીનબર્હિરુવાચ ।
અહં કર્મપરં ભાવં જાનામિ મુનિસત્તમ ।
કર્મણા લભતે જન્તુર્જાનામિ ન ચ સંશયઃ ॥ ૧૩॥

વદ જ્ઞાનં વિભો કિં તત્ કર્મ મૂલનિકૃન્તનમ્ ।

દયયા ચ દયાસિન્ધો માં તારય ભવાર્ણવાત્ ॥ ૧૪॥

તસ્ય તદ્વચનં શ્રુત્વા જ્ઞાત્વા કર્મપરાયણમ્ ।
કર્મણા શુદ્ધરૂપં તમુવાચ મુનિસત્તમઃ ॥ ૧૫॥

નારદ ઉવાચ ।
જ્ઞાનં યોગમયં વિદ્ધિ યોગોઽભેદાત્મકઃ સ્મૃતઃ ।
બ્રહ્મણિ બ્રહ્મભૂતશ્ચ યોગી યોગેન જાયતે ॥ ૧૬॥

દેહેઽસ્મિન્ પશ્ય રાજેન્દ્ર બિમ્બં ગણપતેઃ સ્મૃતમ્ ।
મોહયુક્તં તદાકારં જીવરૂપં હૃદિ સ્થિતમ્ ॥ ૧૭॥

પઞ્ચધા ચિત્તવૃત્તિશ્ચ વર્તતે નૃપસત્તમ ।
ક્ષિપ્તા મૂઢા ચ વિક્ષિપ્તૈકાગ્રાઽપિ ચ નિરોધિકા ॥ ૧૮॥

યત્ર ક્ષિપ્તં નરેણૈવ ચિત્તં તજ્જ્ઞાયતે હૃદા ।
તદેવ ક્ષિપ્તરૂપં ત્વં ચિત્તં જાનીહિ પાર્થિવ ॥ ૧૯॥

ક્ષિપ્તં ચિત્તં નરેણૈતન્ મૂઢવત્તન્ન બુધ્યતિ ।
અન્યથા ચ ભવેજ્જ્ઞાનં મૂઢરૂપં ચ તત્સ્મૃતમ્ ॥ ૨૦॥

મુમુક્ષૂણાં ભવેચ્ચિત્તં વિક્ષિપ્તં બ્રહ્મલાલસમ્ ।
ન સંસારસુખે મગ્નં તન્ન બ્રહ્મણિ સઙ્ગતમ્ ॥ ૨૧॥

એકાગ્રં સર્વભાવેષુ હ્યાત્માકારેણ સંસ્થિતમ્ ।
અન્તર્જ્ઞાનેન તદ્રૂપં પશ્યેદ્વૈ યોગસેવયા ॥ ૨૨॥

નિરોધં દેહદેહિભ્યો હીનં નિર્વૃતિદાયકમ્ ।
સંયોગાયોગરૂપાન્તં લભતે યોગસેવયા ॥ ૨૩॥

પઞ્ચધા કથિતં ભૂપ ચિત્તં સા બુદ્ધિરુત્તમા ।
જાનીહિ હૃદયે સ્થિત્વા ગણપેન ચ ખેલતિ ॥ ૨૪॥

પઞ્ચધા ચિત્તવૃત્તિર્યા તત્ર મોહઃ પ્રકીર્તિતઃ ।
સ્વસ્વસ્થાનકરૂપસ્થૈશ્વર્યરૂપો મહીપતે ॥ ૨૫॥

ઐશ્વર્યભ્રાન્તિરૂપા સા સિદ્ધિઃ સર્વત્ર વર્તતે ।
ધર્માર્થકામમોક્ષાણાં બ્રહ્મણઃ પઞ્ચધા સ્મૃતા ॥ ૨૬॥

ભ્રામયન્તીહ ભૂતાનિ ગણપેન ચ ખેલતિ ।
મયા સા કથિતા માયા નૃપ નાસ્ત્યત્ર સંશયઃ ॥ ૨૭॥

જ્ઞાનરૂપા સ્વયં બુદ્ધિરૈશ્વર્યાત્ સિદ્ધિરુચ્યતે ।
તયોર્બિંબં ગણેશસ્ય ભ્રમાઢ્યં જીવસંજ્ઞિતમ્ ॥ ૨૮॥

માયામયં સદા જાતં માયા સૌખ્યે પ્રલાલસમ્ ।
બન્ધયુક્તં મહીપાલ હૃદિ પશ્ય પ્રકાશકમ્ ॥ ૨૯॥

પઞ્ચધા ચિત્તવૃત્તિશ્ચ તેન સર્વા પ્રકાશિતા ।
ચિન્તામણિરિતિ ખ્યાતિં ગણેશસ્ય વદન્ત્યતઃ ॥ ૩૦॥

દેહશ્ચતુર્વિધઃ પ્રોક્તઃ સ્થૂલઃ સૂક્ષ્મઃ સમાત્મકઃ ।
નાદરૂપશ્ચતુર્થો વૈ બિન્દુસ્તેષાં પરા ગતિઃ ॥ ૩૧॥

દેહેષુ દેહભોગસ્થો દેહી ભ્રાન્ત્યા ચતુર્વિધઃ ।
એકોઽપિ બ્રહ્મ તેષાં વૈ સોઽહં વિદ્ધિ નરાધિપ ॥ ૩૨॥

તદ્યોગે સ્વત ઉત્થાનં બ્રહ્મ વેદે પ્રતિષ્ઠિતમ્ ।
સત્યં પરત ઉત્થાનરૂપં સૌખ્યમયં પરમ્ ॥ ૩૩॥

તયોર્યોગે સ્વસંવેદ્યં બ્રહ્મ પઞ્ચવિધં સ્મૃતમ્ ।
સત્યાસત્યસમાકારનેતિભેદાત્મકં પરમ્ ॥ ૩૪॥

સંયોગો બ્રહ્મણાં યત્ર યોગાભેદેન શાશ્વતઃ ।
સમાધિસુખદઃ પ્રોક્તઃ સ્વાનન્દ ઇતિ કથ્યતે ॥ ૩૫॥

અયોગમેતદ્રહિતં બ્રહ્મનિર્વૃતિદાયકમ્ ।
સંયોગાયોગયોર્નાશે યોગઃ શાન્તિપ્રદાયકઃ ॥ ૩૬॥

(Page ખં. ૨ અ. ૨૬ પાન ૫૬)
ગણેશોઽયં મહારાજ સમૂહાનાં પતિઃ સ્મૃતઃ ।
સમૂહા બ્રહ્મરૂપાશ્ચ જ્ઞાતવ્યા જ્ઞાનચક્ષુષા ॥ ૩૭॥

તં ભજસ્વ મહીપાલ હૃદિસ્થં ગણનાયકમ્ ।
બુદ્ધિપ્રકાશકં પૂર્ણં બુદ્ધીશં શાન્તિદાયકમ્ ॥ ૩૮॥

એવમુક્ત્વા મહાયોગી નારદો વિરરામ હ ।
સોઽપિ શ્રુત્વા પ્રણમ્યાદાવુવાચ મુનિપુઙ્ગવમ્ ॥ ૩૯॥

પ્રાચીનબર્હિરુવાચ ।
ભો ભો યોગિન્ દયાસિન્ધો તારિતોઽહં ત્વયાધુના ।

મત્સમીપસ્થિતા વિપ્રા ન જાનન્તિ ત્વિદં પરમ્ ॥ ૪૦॥

નારદોઽતર્દધે સદ્યઃ પ્રયયૌ ગણપં સ્મરન્ ।
વીણાગાનરતો યોગી સ્વેચ્છાચારી સદાસુખી ॥ ૪૧॥

પ્રાચીનબર્હિરાજર્ષિસ્ત્યક્ત્વાઽમાત્યેષુ સત્વરમ્ ।
રાજ્યં વનં યયૌ સોઽપિ ગણેશધ્યાનતત્પરઃ ॥ ૪૨॥

નારદેન યથા તસ્ય કથિતં જ્ઞાનમુત્તમમ્ ।
યથાયોગં ક્રમેણાપિ યોગી ગાણેશકોઽભવત્ ॥ ૪૩॥

અન્તે લયં યયૌ રાજા ગણેશે બ્રહ્મરૂપિણિ ।
બ્રહ્મભૂતો નૃપશ્રેષ્ઠઃ કથિતોઽસૌ પ્રજાપતે ॥ ૪૪॥

પ્રાચીનબર્હિરાજર્ષેશ્ચરિતં યઃ શ‍ૃણોતિ ચ ।
પઠેદ્વા તસ્ય પાપં હિ નાશયેત્ સર્વદં ભવેત્ ॥ ૪૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પ્રાચીનબર્હિષશ્ચરિતં નામ ષડ્વિંશતિતમોઽધ્યાયઃ ॥ ૨.૨૬

## ૨.૨૭ પ્રચેતસાં ચરિતં નામ સપ્તવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પ્રાચીનબર્હિષઃ પુત્રાસ્તેપુસ્તે તપ ઉત્તમમ્ ।
સહસ્રવર્ષપર્યન્તં તતસ્તુષ્ટો જનાર્દનઃ ॥ ૧॥

આયયૌ તાન્ વરં દાતું ગરુડસ્થશ્ચતુર્ભુજઃ ।
તં દૃષ્ટ્વા તે પ્રણેમુશ્ચાપૂજયંસ્તુષ્ટુવુર્મુદા ॥ ૨॥

પ્રચેતસ ઊચુઃ ।
નમસ્તે કેશવાયૈવ નમસ્તે ભૂતભાવન ।
નિરાકારાય કૃષ્ણાય વિષ્ણવે પ્રભવિષ્ણવે ॥ ૩॥

આદિમધ્યાન્તહીનાય વાસુદેવાય તે નમઃ ।
સર્વાજ્ઞાનવિનાશાય જ્ઞાનદાત્રે કૃપાલવે ॥ ૪॥

લક્ષ્મીપતે નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
ભક્તિપ્રિયાય દેવાય શેષશાયિન્નમોઽસ્તુ તે ॥ ૫॥

ભુક્તિમુક્તિપ્રદાયૈવ વિકુણ્ઠપતયે નમઃ ।
નારાયણાય શાન્તાય સત્ત્વયુક્તાય તે નમઃ ॥ ૬॥

વયં સપિતરો ધન્યા યૈઃ પ્રદૃષ્ટો જનાર્દનઃ ।
વરં દેહિ વિશેષેણ સૃષ્ટિસામર્થ્યદાયકમ્ ॥ ૭॥

એવં સ્તુતઃ પ્રસન્નાત્મા તાનુવાચ સ્વયં હરિઃ ।
સામર્થ્યમતુલં સૃષ્ટૌ ભવિષ્યતિ ચ વઃ સુખમ્ ॥ ૮॥

તપસા સિદ્ધરૂપાશ્ચ ભવન્તો નાત્ર સંશયઃ ।
યદ્યદિચ્છથ તત્તદ્વઃ સફલં પ્રભવિષ્યતિ ॥ ૯॥

ભવત્કૃતમિદં સ્તોત્રં ભુક્તિમુક્તિપ્રદં ભવેત્ ।
પઠતાં શૃણ્વતાં ચૈવ મત્પ્રસાદકરં પરમ્ ॥ ૧૦॥

એવમુક્ત્વાન્તર્દધેઽસૌ વિષ્ણુઃ પરપુરઞ્જયઃ ।
તેઽપિ ત્યક્ત્વાઽઽશ્રમં સદ્યો જગ્મુઃ સ્વગૃહમુત્તમમ્ ॥ ૧૧॥

ગચ્છતાં પથિ તેષાં વૈ માર્ગે વૃક્ષા અનેકશઃ ।
અરાજકે સમુત્પન્ના માર્ગરોધનકારકાઃ ॥ ૧૨॥

(Page ખં. ૨ અ. ૨૭ પાન ૫૭)
તાન્ દૃષ્ટ્વા ક્રોધયુક્તાસ્તે સસૃજુર્વહ્નિમુલ્બણમ્ ।
તેન દગ્ધા વને વૃક્ષાઃ સકલા યત્ર તત્ર ચ ॥ ૧૩॥

તેષુ સ્વલ્પસ્થિતેષ્વેવ ચન્દ્રસ્તત્ર સમાગતઃ ।
પ્રગૃહ્ય વૃક્ષજાં કન્યાં દદૌ તેભ્યો યથાવિધિ ॥ ૧૪॥

ઋષિવીર્યાત્સમુત્પન્નાઽપ્સરઃ સુદ્રુમપાલિતા ।
પ્રગૃહ્ય તાં શાન્તિમાપ્તા અગ્નિં ચક્રુઃ સુશાન્તિદમ્ ॥ ૧૫॥

સ્વરાજ્યં પ્રાપ્ય તે સર્વે પાલયામાસુરાદરાત્ ।
પ્રજાઃ પુત્રાનિવાધ્યક્ષા યન્ત્રિતાસ્તે પ્રચેતસઃ ॥ ૧૬॥

મારિષાયાં પ્રચેતોભ્યો દક્ષ ત્વં ત્વભવસ્તદા ।
રુદ્રશાપેન સર્વજ્ઞાસ્તથા વૈ તેજસા યુતઃ ॥ ૧૭॥

ગણેશવરદાનેન બ્રહ્મપુત્ર ત્વમઞ્જસા ।
ન ગમિષ્યતિ તે દક્ષ પ્રજાપાલો ભવિષ્યસિ ॥ ૧૮॥

ત્વાં ચ રાજ્યે સમાસ્થાપ્ય વનં ચાયુઃ પ્રચેતસઃ ।

તેપુસ્તત્ર તપો ઘોરં યોગશાન્ત્યર્થમાદરાત્ ॥ ૧૯॥

તત્રાઽપિ નારદો યોગી ગણેશે ગાનતત્પરઃ ।
આયયૌ પરમપ્રીતઃ પ્રચેતસાં હિતં ચરન્ ॥ ૨૦॥

તં દૃષ્ટ્વા હર્ષિતાઃ સર્વે મહૌજસ્કાઃ પ્રચેતસઃ ।
નેમુઃ સમ્પૂજ્ય તં ભક્ત્યા સ્થિતાઃપ્રાઞ્જલયોઽભવન્ ॥ ૨૧॥

તાનુવાચ મુનિશ્રેષ્ઠઃ કિમિચ્છાવઃ પ્રચેતસઃ ।
બ્રૂત તાં પૂરયિષ્યામિ ભવતાં ભાવતોષિતઃ ॥ ૨૨॥

નારદસ્ય વચઃ શ્રુત્વા પ્રોચુસ્તં તે પ્રચેતસઃ ।
વદ ત્વં શાન્તિદં યોગં કૃપયા કરુણાનિધે ॥ ૨૩॥

શ્રુત્વા સ વચનં તેષાં હર્ષેણ મહતાઽઽવૃતઃ ।
ઉવાચ સકલં યોગં યોગશાન્તિપદપ્રદમ્ ॥ ૨૪॥

નારદ ઉવાચ ।
શાન્તિયોગાત્મકં ભૂપા ગણેશં કથયન્તિ વૈ ।
યોગજ્ઞા બ્રહ્મભૂતાશ્ચ તં ભજધ્વં પ્રચેતસઃ ॥ ૨૫॥

અહં ગણેશાભિન્નશ્ચ યોગોઽયં શાન્તિદાયકઃ ।
કથિતો વિષ્ણુના પૂર્વં મહ્યં શાન્તિપ્રદઃ પરઃ ॥ ૨૬॥

તેન શાન્તિં સમાસ્થાય ચરામિ ગણપં સ્મરન્ ।
ગતભ્રાન્તિશ્ચ સર્વત્ર હર્ષયુક્તેન ચેતસા ॥ ૨૭॥

ચિત્તસ્ય પઞ્ચભૂમીનાં ભ્રાન્તિં ત્યક્ત્વા નરઃ સદા ।
યોગરૂપો ન સન્દેહો ભવેદ્વૈ શાન્તિરૂપગઃ ॥ ૨૮॥

સર્વં માયામયં પ્રોક્તં ભ્રાન્તિદં બુદ્ધિલાલિતમ્ ।
ત્યક્ત્વા તદ્ યોગિનઃ શાન્તા ભવેતૈવ પ્રચેતસઃ ॥ ૨૯॥

એવમુક્ત્વા મહાયોગી નારદઃ સ્વેચ્છયા યયૌ ।
હેરમ્બેતિ સ્મરન્ સ્વર્ગે કૈલાસે હર્ષસંયુતઃ ॥ ૩૦॥

તેઽપિ પ્રચેતસઃ સર્વે કથિતં યોગમાદરાત્ ।
ક્રમેણ સાધયિત્વા તં ગાણપા અભવન્ પરાઃ ॥ ૩૧॥

અન્તે ગણેશદેહે તે તદાકારાઃ પ્રજાપતે ।
જાતા બ્રહ્મમયાઃ શાન્તા મહૌજસ્કાઃ પ્રચેતસઃ ॥ ૩૨॥

પ્રચેતસાં ચરિત્રં યઃ પઠેદ્વૈ યઃ શ ृણોતિ વા ।
તસ્ય ભુક્તિશ્ચ મુક્તિર્વૈ ભવિષ્યતિ સુખપ્રદા ॥ ૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પ્રચેતસાં ચરિતં નામ સપ્તવિંશતિતમોઽધ્યાયઃ ॥ ૨.૨૭
(Page ખં. ૨ અ. ૨૮ પાન ૫૮)

## ૨.૨૮ કશ્યપસૃષ્ટિવર્ણનં નામ અષ્ટાવિંશતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
દક્ષઃ પ્રાચેતસો રાજા તતાપ તપ ઉત્તમમ્ ।
શતવર્ષૈર્ગણાધ્યક્ષઃ પ્રસન્નો વરદોઽભવત્ ॥ ૧॥

ગણેશવરદાનેન સ સિદ્ધઃ સસૃજે પ્રજાઃ ।
દેવા યક્ષા મનુષ્યાશ્ચ પિશાચાદ્યાઃ સહસ્રશઃ ॥ ૨॥

નાનાવિધાઃ પ્રજાઃ સૃષ્ટ્વાઽવર્ધન્ત નયદા તદા ।
ધરણ્યાં મૈથુનીં સૃષ્ટિં સસૃજે સ પ્રજાપતિઃ ॥ ૩॥

દશાભવન્ સહસ્રાણાં પુત્રાસ્તસ્માન્ મહૌજસઃ ।
તાનુવાચ સ્વયં દક્ષઃ સૃજધ્વં તપસા યુતાઃ ॥ ૪॥

તથેતિ તં પ્રણમ્યાદૌ ગતાસ્તપસ આદરાત્ ।
તેષાં માર્ગે બ્રહ્મપુત્રો નારદઃ સહસાઽઽગતઃ ॥ ૫॥

ઉવાચ વિધિવત્તાન્ સ યોગમાર્ગં સનાતનમ્ ।
તેન યુક્તાશ્ચ તે સર્વે ન ચક્રુઃ સૃષ્ટિમુત્તમામ્ ॥ ૬॥

કર્મમાર્ગં પરિત્યજ્ય ગાણપત્યાશ્ચ તેઽભવન્ ।
ગતાઃ સ્વેચ્છાચરાઃ સર્વે ભ્રમહીના જિતેન્દ્રિયાઃ ॥ ૭॥

જ્ઞાત્વા નષ્ટાન્ સ્વપુત્રાન્ સ પુનર્દક્ષઃ સસર્જ હ ।
અસિક્ન્યાં ચૈવ પુત્રાણાં સહસ્રં તેજસા યુતમ્ ॥ ૮॥

સ તાનુવાચ પ્રીતાત્મા તપસા સ્મૃષ્ટિમુત્તમામ્ ।
કુરુધ્વં તે પ્રણમ્યાઽઽદૌ તં વનં યયુરાદરાત્ ॥ ૯॥

પુનસ્તાન્નારદસ્તદ્વદ્દદૌ જ્ઞાનં સુનિર્મલમ્ ।
તેઽપિ યોગયુતાઃ સર્વે યયુઃ સ્વેચ્છાવિહારિણઃ ॥ ૧૦॥

જ્ઞાત્વા વૃત્તાન્તમુગ્રં વૈ દક્ષઃ ક્રોધસમન્વિતઃ ।
શશાપ નારદં બ્રહ્મપુત્રં પરમભાવિકમ્ ॥ ૧૧॥

ત્વયા પુત્રા મદીયાશ્ચ નાશિતાઃ કર્મમાર્ગતઃ ।
વર્ણાશ્રમક્રમેણૈવ યુક્તા ભ્રષ્ટાઃ કૃતાઃ ખલુ ॥ ૧૨॥

નારદ ત્વમતો દુષ્ટ પ્રજાહીનો ભવિષ્યસિ ।
દ્વિમુહૂર્તાત્ પરં કાલં ન સ્થાતું શક્યતે ત્વયા ॥ ૧૩॥

યત્ર કુત્ર મહીદેશે સ્વર્ગે પાતાલકે પદે ।
ભ્રમિષ્યસિ મહાદુષ્ટ મચ્છાપાન્નાત્ર સંશયઃ ॥ ૧૪॥

એવં શપ્ત્વા સ્વયં દક્ષો યયૌ બ્રહ્માણમાદરાત્ ।
તં પ્રણમ્ય જગન્નાથમુવાચ વિનયાન્વિતઃ ॥ ૧૫॥

સૃષ્ટિં કરોમિ દેવેશ કેન માર્ગેણ તદ્વદ ।
નારદો દુષ્ટભાવેન મોઘાં સૃષ્ટિં સ મેઽકરોત્ ॥ ૧૬॥

તમુવાચ તતો બ્રહ્મા સૃજ કન્યાઃ સુલોચનાઃ ।
તથેતિ સ યયૌ સ્થાનં સ્વકીયં સ્રષ્ટુમારભત્ ॥ ૧૭॥

ષષ્ટિં દક્ષોઽસૃજત્કન્યા વીરિણ્યાં તેજસાન્વિતઃ ।
ચારુરૂપા મહાભાગા માતરઃ સર્વદેહિનામ્ ॥ ૧૮॥

દદૌ સ દશ ધર્માય કશ્યપાય ત્રયોદશ ।
સપ્તવિંશતિમબ્જાય ચતસ્રોઽરિષ્ટનેમયે ॥ ૧૯॥

દ્વે દદૌ બહુપુત્રાય દ્વે કૃશાશ્વાય ભાવતઃ ।
દ્વે ચાપ્યઙ્ગિરસે તદ્વદ્વક્ષ્યે તાસાં ચ વિસ્તરમ્ ॥ ૨૦॥

મરુત્વતી વસુર્યામી લમ્બા ભાનુરરુન્ધતી ।
સઙ્કલ્પા ચ મુહૂર્તા વૈ સાધ્યા વિશ્વા ચ ભામિની ॥ ૨૧॥

ધર્મપત્ન્યો દશૈતાશ્ચ તાસાં પુત્રાન્નિબોધ ચ ।
વિશ્વેદેવાશ્ચ વિશ્વાયાઃ સાધ્યાસાધ્યાનજીજનત્ ॥ ૨૨॥

મરુત્વત્યાં મરુત્વન્તો વસોસ્તુ વસવઃ સ્મૃતાઃ ।
ભાનોશ્ચ ભાનવઃ સર્વે મુહૂર્તાયા મુહૂર્તકાઃ ॥ ૨૩॥

લમ્બાયા નાદઘોષૌ ચ યામીજો નાગવીથિકઃ ।
પૃથિવ્યાં વિષમં સર્વમરુન્ધત્યામજાયત ॥ ૨૪॥

સઙ્કલ્પાયાસ્તુ સઙ્કલ્પા ધર્મપુત્રા ઇમે સ્મૃતાઃ ।
(Page  ખં. ૨ અ. ૨૮ પાન ૫૯)
તેષાં પુત્રૈશ્ચ પુત્રીભિરખિલં વર્ધિતં જગત્ ॥ ૨૫॥

આપો ધ્રુવોऽથ સોમશ્ચ ધન્યશ્ચૈવાનલોऽનિલઃ ।
પ્રત્યૂષોऽથ પ્રભાસશ્ચ વસવોऽષ્ટૌ પ્રકીર્તિતાઃ ॥ ૨૬॥

અદિતિશ્ચ દિતિઃ કદ્રુરરિષ્ટા સુરસા દનુઃ ।
સુરભિર્વિનતા ચૈવ તામ્રા ક્રોધવશા ત્વિરા ॥ ૨૭॥

મુનિઃ ખશા ચ ધર્મજ્ઞા તાસાં પુત્રાન્નિબોધ વૈ ।
વિવસ્વાનથ ધાતા ચ ભગસ્ત્વષ્ટા તથાંશકઃ ॥ ૨૮॥

વરુણાદ્યાશ્ચ યે દેવા તે સર્વે ચાદિતેઃ સુતાઃ ।
દિતેશ્ચ સકલા દૈત્યાઃ પુત્રાઃ શાસ્ત્રેષુ સમ્મતાઃ ॥ ૨૯॥

તથૈવ ચ દનોઃ પુત્રાસ્તારાદ્યા દાનવાઃ સ્મૃતાઃ ।
તારોऽથ વિપ્રચિત્તિશ્ચ શમ્બરઃ કપિલસ્તથા ॥ ૩૦॥

સ્વર્ભાનુઃ સઙ્કરશ્ચૈવ વૃષપર્વા ચ વીર્યવાન્ ।
પ્રાધાન્યેનાસુરાઃ શ્રેષ્ઠા દાનવાઃ કથિતા મયા ॥ ૩૧॥

સુરસાયાઃ સહસ્રં ચ સર્પાણામભવત્તથા ।
અરિષ્ટા જનયામાસ ગન્ધર્વાણાં સહસ્રકમ્ ॥ ૩૨॥

શેષાદ્યાશ્ચ મહાનાગાઃ કદ્રોઃ પુત્રાઃ પ્રજાપતે ।
તામ્રા ચ જનયામાસ કન્યાષટ્કં સુલોચનમ્ ॥ ૩૩॥

શુકી શ્યેની ચ ભાસી ચ સુગ્રીવા ગ્રન્થિકા શુચિઃ ।
તાસાં પુત્રાદિભિઃ સર્વં પક્ષિવૃન્દં બભૂવ હ ॥ ૩૪॥

સુરભિર્જનયામાસ મહિષીર્ગાઃ પ્રજાપતે ।
ઇરા વૃક્ષલતા વલ્લી તૃણજાતીશ્ચ સર્વશઃ ॥ ૩૫॥

મુનેઃ પુત્રાસ્તથા પ્રોક્તા યક્ષાઃ પુણ્યજનાસ્તથા ।
રક્ષોગણં ક્રોધવશા જનયામાસ દારુણમ્ ॥ ૩૬॥

વિનતાયાશ્ચ પુત્રૌ દ્વાવરુણો ગરુડોઽપરઃ ।
ખશાયાઃ ખેચરાઃ પુત્રાઃ પ્રેતાદ્યાશ્ચ પ્રજાપતે ॥ ૩૭॥

એતે કશ્યપદાયાદા જઙ્ગમસ્થાવરાત્મકાઃ ।
વૈવસ્વતેન્તરે હ્યસ્મિન્ પ્રખ્યાતાઃ કથિતા મયા ॥ ૩૮॥

અરિષ્ટનેમિપુત્રાશ્ચ વેધસો રૂપધારકાઃ ।
બહુપુત્રસ્ય પત્ન્યોસ્તુ ચતસ્રો વિદ્યુતઃ સ્મૃતાઃ ॥ ૩૯॥

તથા ચાઙ્ગિરસઃ પત્ન્યોરૃષયો વૃષસત્કૃતાઃ ।
કૃશાશ્વસ્ય ચ દેવર્ષિર્દેવઃ પ્રહરણઃ સુતઃ ॥ ૪૦॥

એતે યુગસહસ્રાન્તે જાયન્તે પુનરેવ ચ ।
મન્વન્તરેષુ સર્વેષુ તુલ્યકાર્યૈઃ સ્વનામભિઃ ॥ ૪૧॥

પુત્રાન્ બ્રહ્મર્ષિરુત્પાદ્ય કશ્યપસ્તોષવર્જિતઃ ।
તતાપ તપ ઉગ્રં વૈ પુત્રાર્થે પરમાર્થવિત્ ॥ ૪૨॥

તસ્યૈવં તપતઃ પુત્રૌ પ્રાદુર્ભૂતૌ મહૌજસૌ ।
વત્સરશ્ચાસિતો નામ્ના તાવુભૌ બ્રહ્મવાદિનૌ ॥ ૪૩॥

વત્સરાન્નૈધ્રુવો જજ્ઞે રૈભ્યશ્ચ સુમહાયશાઃ ।
રૈભ્યાચ્ચ જજ્ઞિરે રુદ્રાઃ પુત્રા દ્યુતિમતાં વરાઃ ॥ ૪૪॥

ચ્યવનસ્ય સુતા ભાર્યા નૈધ્રુવસ્ય મહાત્મનઃ ।
સુમેધા જનયામાસ પુત્રાન્ વૈ કુણ્ડપાયિનઃ ॥ ૪૫॥

અસિતાચ્ચૈકપર્ણાયાં બ્રહ્મિષ્ઠઃ સમપદ્યત ।
નામ્ના વૈ દેવલઃ પુત્રો યોગાચાર્યશ્ચ સ સ્મૃતઃ ॥ ૪૬॥

શાણ્ડિલ્યઃ પરમો યોગી સર્વતત્ત્વાર્થવિચ્છુચિઃ ।
ઇત્યાદ્યા બહવઃ પુત્રાઃ કશ્યપસ્ય મયોદિતાઃ ॥ ૪૭॥

એતે ચ સ્મરણાજ્જન્તોઃ કામપૂરા ભવન્તિ ચ ।
પઠનાન્નાત્ર સન્દેહો મૂલરૂપાઃ પ્રકીર્તિતાઃ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે કશ્યપસૃષ્ટિવર્ણનં નામ અષ્ટાવિંશતિતમોઽધ્યાયઃ ॥ ૨.૨૮
(Page ખં. ૨ અ. ૨૧ પાન ૬૦)

## ૨.૨૯ વસિષ્ઠતપોવર્ણનં નામ એકોનત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તૃણબિન્દોઃ સુતા શ્રેષ્ઠા નામ્નેલવિલકા સ્મૃતા ।
પુલસ્ત્યાય સ રાજર્ષિર્દદૌ વિનયસંયુતઃ ॥ ૧॥

તસ્યાં જજ્ઞે પુલસ્ત્યાદ્વૈ વિશ્રવા મુનિસત્તમઃ ।
તસ્ય પત્ન્યશ્ચતસ્રસ્તુ સુરૂપા વામલોચનાઃ ॥ ૨॥

પુષ્પોત્કટા તથા રાકા કૈકસી દેવવર્ણિની ।
જ્યેષ્ઠં વૈશ્રવણં તસ્માત્ સુષુવે દેવવર્ણિની ॥ ૩॥

કૈકસ્યજનયત્પુત્રં રાવણં લોકરાવણમ્ ।
કુમ્ભકર્ણં શૂર્પણખાં પુત્રીં તં ચ બિભીષણમ્ ॥ ૪॥

રાવણઃ કુમ્ભકર્ણશ્ચ પ્રતાપી ચ બિભીષણઃ ।
તપસ્તેપુઃ સુવિપુલં સહસ્રદશકાબ્દકમ્ ॥ ૫॥

પ્રસન્નશ્ચ તતો બ્રહ્મા વરદસ્તાન્ સમાયયૌ ।
રાવણો વરયામાસ રાજ્યં નિહતકણ્ટકમ્ ॥ ૬॥

ભૂર્ભુવઃસ્વસ્ત્રયાણાં સ લોકાનાં બલગર્વિતઃ ।
સર્વેભ્યશ્ચામૃતિં તદ્વદ્વિસ્મૃતૌ કપિમાનુષૌ ॥ ૭॥

કુમ્ભકર્ણોઽભવદ્વાણ્યા મોહિતો વરમુત્તમમ્ ।
ષણ્માસનિદ્રયા યુક્તં વવ્રે તં વરદં પ્રભુમ્ ॥ ૮॥

બિભીષણસ્તુ ધર્માત્મા સ્વધર્મરુચિદં વરમ્ ।
વરયામાસ ધાતારં વિષ્ણુભક્તિં સુભાવતઃ ॥ ૯॥

બ્રહ્મા દત્વા વરાંસ્તેભ્યો યયૌ સ્થાનં નિજં તતઃ ।
તે રક્ષઃપ્રવરા જાતાસ્ત્રિષુ લોકેષુ વિશ્રુતાઃ ॥ ૧૦॥

જિત્વા ત્રિભુવનં દક્ષ રાવણઃ ષષ્ટિલક્ષકમ્ ।
વર્ષાણાં માનુષાણાં સ રાજ્યં ચક્રે સહાનુજઃ ॥ ૧૧॥

રામેણ સ હતો દુષ્ટઃ કુમ્ભકર્ણશ્ચ રાવણઃ ।
બિભીષણં તતો રાજ્યે સ્થાપયામાસ રાઘવઃ ॥ ૧૨॥

તપસ્તપ્ત્વા વૈશ્રવણો ગણેશસ્ય મહાત્મનઃ ।
એકાક્ષરવિધાનેન તોષયામાસ વિઘ્નપમ્ ॥ ૧૩॥

દશવર્ષસહસ્રૈસ્તુ પ્રસન્નોઽભૂદ્ગજાનનઃ ।
ભક્તિં સ્વચરણે તસ્મૈ દદૌ શઙ્કરમિત્રતામ્ ॥ ૧૪॥

ઉત્તરાશાપતિં ચક્રે ધનપાલાભિધં તથા ।
તતો દેવેષુ વિખ્યાતઃ કુબેરઃ પ્રબભૂવ હ ॥ ૧૫॥

પુષ્પોત્કટા વિશ્રવસોઽજનયચ્ચ મહોદરમ્ ।
મહાપાર્શ્વં પ્રહસ્તં ચ ખરં કુમ્ભીનસીં સુતામ્ ॥ ૧૬॥

રાકા સઞ્જનયામાસ ત્રિશિરસ્કં ચ દૂષણમ્ ।
વિદ્યુજ્જિહ્વં મહાકાલં વિશ્રવસ્તઃ પ્રજાપતે ॥ ૧૭॥

ઇત્યેતે ક્રૂરકર્માણઃ પૌલસ્ત્યા રાક્ષસા દશ ।
વિખ્યાતાઃ પુરુષશ્રેષ્ઠા રાક્ષસાનાં મહાબલાઃ ॥ ૧૮॥

પુલહસ્ય મૃગાઃ સર્વે પુત્રા વ્યાલાશ્ચ દંષ્ટ્રિણઃ ।
પિશાચા બહવો ભૂતાઃ શૂકરા હસ્તિનસ્તથા ॥ ૧૯॥

અનપત્યઃ ક્રતુશ્ચાત્ર સ્મૃતો વૈવસ્વતાન્તરે ।
મરીચેઃ કશ્યપઃ પુત્રઃ સ જાતો વૈ પ્રજાપતિઃ ॥ ૨૦॥

ભૃગોઃ પુત્રસ્તુ મેધાવી દૈત્યાચાર્યો મહાયશાઃ ।
સ્વાધ્યાયનિરતઃ કાવ્યો બભૂવે ચ પ્રજાપતે ॥ ૨૧॥

શૈવમાર્ગરતો ભૂત્વા સદા શઙ્કરપૂજકઃ ।
કૈલાસં પ્રાપ શાન્ત્યર્થં બોધિતોઽભૂત્ હરેણ ચ ॥ ૨૨॥

શાન્તિયોગસ્ય સિદ્ધ્યર્થં ગણેશમભજત્ કવિઃ ।
ક્રમેણ શાન્તિમાપન્નો ગાણપત્યો બભૂવ સઃ ॥ ૨૩॥

અત્રેઃ પુત્રોઽભવત્ સોમોઽમૃતરૂપમયો મહાન્ ।
અરુન્ધત્યાં વસિષ્ઠાદ્વૈ શક્તિઃ પુત્રો બભૂવ હ ॥ ૨૪॥

તસ્માત્ પરાશરઃ સાક્ષાત્તપોનિધિરજાયત ।
શઙ્કરસ્ય સદા ભક્તિં ચકાર પરમાદરાત્ ॥ ૨૫॥

(Page ખં. ૨ અ. ૨૯ પાન ૬૧)
વસિષ્ઠં યોગશાસ્ત્રજ્ઞં પિતામહમનિન્દિતમ્ ।

સ્વકર્મકુશલં શાન્તમપૃચ્છચ્છાન્તિહેતવે ॥ ૨૬॥

પરાશર ઉવાચ ।
શિવોઽયં મોહહીનશ્ચ નેતિ કર્તાવ્યયઃ સ્મૃતઃ ।
કથં બ્રહ્મણિ નિર્મોહે ભવેન્ મોહો ભ્રમપદઃ ॥ ૨૭॥

મુદ્ગલ ઉવાચ ।
પરાશરવચઃ શ્રુત્વા વસિષ્ઠસ્તમુવાચ હ ।
હર્ષયુક્તઃ સ્વપૌત્રાય શાન્તિયોગં સનાતનમ્ ॥ ૨૮॥

વસિષ્ઠ ઉવાચ ।
શ ृણુ પુત્ર પ્રવક્ષ્યામિ બ્રહ્મણા કથિતં ચ મે ।
યોગં શાન્તિકરં તુભ્યં કથયામિ વિશેષતઃ ॥ ૨૯॥

અહં શાન્ત્યર્થમત્યન્તં ભ્રમિતો ના લભે ચ તામ્ ।
ગતો લોકે પ્રવિખ્યાતે બ્રહ્મણઃ પરમેષ્ઠિનઃ ॥ ૩૦॥

તત્ર સમ્પૂજયન્તં વૈ બ્રહ્માણં દૃષ્ટવાનહમ્ ।
ગણેશમૂર્તિં વૈ પુત્ર સંસ્થિતોઽહં પ્રણમ્ય તામ્ ॥ ૩૧॥

પૂજાવિધિં સમાપ્યાઽસૌ સભાયાં સમુપાગતઃ ।
તત્રાઽહં વિનતો ભૂત્વા હ્યવદં તં મહાદ્યુતિમ્ ॥ ૩૨॥

ત્વત્તઃ સર્વાણિ ભૂતાનિ જાયન્તે નાત્ર સંશયઃ ।
ત્વયિ નાથ પ્રલીયન્તે પરં ત્વત્તો ન વિદ્યતે ॥ ૩૩॥

ત્વયાઽસૌ પૂજિતઃ કસ્માત્ કઃ શ્રેષ્ઠો વદ સામ્પ્રતમ્ ।
બહુવર્ષમહં ભ્રાન્તો નાઽલભે શાન્તિમુત્તમામ્ ॥ ૩૪॥

મદીયવચનં શ્રુત્વા બ્રહ્મા હર્ષસમન્વિતઃ ।
જગાદ માં યથાયોગ્યં પાત્રં દૃષ્ટ્વા પિતામહઃ ॥ ૩૫॥

બ્રહ્મોવાચ ।
શ ृણુ પુત્ર મહાભાગ ગણેશો યોગશાન્તિદઃ ।
અસ્માકં કુલદેવશ્ચ સર્વેષાં સોઽપિ નિશ્ચિતમ્ ॥ ૩૬॥

તસ્માદ્વયં સમુત્પન્નાસ્તેન સંસ્થાપિતાઃ પદે ।
સર્વસિદ્ધિપ્રદાતારં તં ભજામિ નિરન્તરમ્ ॥ ૩૭॥

અન્તે તત્રૈવ લીનાશ્ચ વયં પુત્ર ન સંશયઃ ।

તસ્માદાદૌ ગણેશાનઃ પૂજ્યો માતા પિતા સ્મૃતઃ ॥ ૩૮॥

જ્યેષ્ઠરાજપદં પશ્ય વેદેષુ કથિતં સુત ।
તસ્માજ્જ્યેષ્ઠો ન વેદેષ્વાદિઃ સર્વેભ્યો ગણેશ્વરઃ ॥ ૩૯॥

ય આદિઃ સ ભવેદન્તે કથિતં શાસ્ત્રસમ્મતમ્ ।
અતસ્તત્ર વયં લીના ભવિષ્યામો ન સંશયઃ ॥ ૪૦॥

મધ્યે નાનાવિધઃ સોઽપિ કલાંશેન ગજાનનઃ ।
પ્રક્રીડતિ કલાંશાશ્ચ વયં તસ્ય સ્મૃતાઃ સુત ॥ ૪૧॥

શાન્તિમિચ્છસિ ચેત્પુત્ર તાં વદામિ સમાસતઃ ।
પઞ્ચધા ચિત્તવૃત્તિં ત્વં ત્યક્ત્વા શાન્તો ભવિષ્યસિ ॥ ૪૨॥

ક્ષિપ્તં મૂઢં ચ વિક્ષિપ્તમેકાગ્રં ચ નિરોધકમ્ ।
ચિન્તામણિઃ સમાખ્યાતસ્તેન ચિત્તં પ્રકાશિતમ્ ॥ ૪૩॥

અહં ગણેશરૂપશ્ચેત્ સંયોગાયોગતા ચ મે ।
નાસ્તિ હ્યતો ભિન્નભાવસ્તેન ભ્રાન્તિર્ગતા ભવેત્ ॥ ૪૪॥

જગત્ સુબ્રહ્મ સુપ્રોક્તમૈશ્વર્યમતુલં બુધૈઃ ।
જાનીહિ સિદ્ધિરૂપં ત્વં ભ્રાન્તિદાયકમઞ્જસા ॥ ૪૫॥

જગદ્બ્રહ્મમયાકારા બુદ્ધિઃ શાસ્ત્રેષુ કથ્યતે ।
પઞ્ચધા સા સમાખ્યાતા ચિત્તરૂપા ન સંશયઃ ॥ ૪૬॥

તયોઃ પ્રકાશકં બિમ્બં ગણેશસ્ય મહાત્મનઃ ।
મોહિતં પશ્ય માયાભ્યાં તદાકારં હૃદિ સ્થિતમ્ ॥ ૪૭॥

બિમ્બભાવં ત્યજ ત્વં વૈ તદા શાન્તિં ગમિષ્યસિ ।
ચિત્તમૈશ્વર્યમોહશ્ચ બિમ્બં નૈવ પ્રદૃશ્યતે ॥ ૪૮॥

એવમુક્ત્વા સ્વયં માં સ વિરરામ પિતામહઃ ।
અહં પ્રણમ્ય તં દેવં પ્રાદક્ષિણ્યેન નિર્ગતઃ ॥ ૪૯॥

(Page ખં. ૨ અ. ૩૦ પાન ૬૨)
ગત્વા વનાન્તરં પુત્ર અતપં તપ ઉત્તમમ્ ।
એકાક્ષરેણ મન્ત્રેણ ધ્યાત્વા જપપરાયણઃ ॥ ૫૦॥

ક્રમેણ યોગભૂમીનાં ભ્રાન્તિં ત્યક્ત્વા મહામુને ।
ચિન્તામણિઃ સ્વયં સાક્ષાદભવં શાન્તિયોગધૃક્ ॥ ૫૧॥

તથાऽપિ ગણરાજસ્ય મન્ત્રધ્યાનં મહાત્મનઃ ।
દર્શનાર્થં તપશ્ચોગ્રમકાર્ષં ચ હિતાવહમ્ ॥ ૫૨॥

પૂર્ણે વર્ષશતે વૈ માં યયૌ દેવો ગજાનનઃ ।
પ્રત્યક્ષં મૂષકારૂઢો યોગશાન્તિસ્વરૂપધૃક્ ॥ ૫૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે વસિષ્ઠતપોવર્ણનં નામ એકોનત્રિંશોऽધ્યાયઃ ॥ ૨.૨૯

## ૨.૩૦ પરાશરવરપ્રદાનં નામ ત્રિંશોऽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
આગતં ગણરાજં સ દૃષ્ટ્વા હર્ષસમન્વિતઃ ।
નનામ દણ્ડવદ્ભૂમૌ તં તુષ્ટાવ યથામતિ ॥ ૧॥

વસિષ્ઠ ઉવાચ ।
અદ્યેયં ધરણી ધન્યા પિતરૌ તપ આશ્રમઃ ।
વિદ્યાવ્રતાદિ મે ધન્યં દર્શનાત્તે પદસ્ય ચ ॥ ૨॥

ત્વં કર્તા કારણં ચૈવ કારણાનાં ન સંશયઃ ।
ગમ્યાગમ્યમયઃ પ્રોક્તો વેદે વૈ વેદવાદિભિઃ ॥ ૩॥

સર્વરૂપશ્ચ સર્વૈસ્ત્વં હીનઃ સર્વપ્રકાશકઃ ।
યોગાભેદમયસ્ત્વં ત્વાં કથં સ્તૌમિ ગણાધિપ ॥ ૪॥

તથાऽપિ ભક્તિપાશેન યન્ત્રિતસ્ત્વં ગજાનન ।
અનુગ્રહાર્થમાયાતો નામરૂપધરઃ પ્રભો ॥ ૫॥

ત્વદ્દર્શનજબોધેન સ્તૌમિ ત્વાં બ્રહ્મનાયકમ્ ।
વેદાદિભિઃ સહાદ્યૈશ્ચ સંસ્તુતં યોગિભિઃ પરમ્ ॥ ૬॥

નમસ્તે ગણનાથાય નમસ્તે સર્વસાક્ષિણે ।
સર્વાકારાય વૈ તુભ્યં સ્વસંવેદ્યાય તે નમઃ ॥ ૭॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિપ્રદાય ચ ।
અમેયશક્તયે દેવ દેવ તુભ્યં નમો નમઃ ॥ ૮॥

અસમ્પ્રજ્ઞાતતુણ્ડાય સમ્પ્રજ્ઞાતશરીરિણે ।
તયોર્યોગે ચ યોગાત્મદેહાય તુ નમો નમઃ ॥ ૯॥

શાન્તિયોગપ્રકાશાય શાન્તિયોગમયાય તે ।
યોગિભ્યો યોગદાત્રે ચ યોગેશાય નમો નમઃ ॥ ૧૦॥

વક્રતુણ્ડાય વૈ તુભ્યમેકદન્તધરાય ચ ।
બ્રહ્માકારાત્મકાનાં તે ચિહ્નાનાં ધારિણે નમઃ ॥ ૧૧॥

સ્તુવતસ્તસ્ય હર્ષેણ કણ્ઠરોધઃ સમાભવત્ ।
નનર્ત હૃષ્ટરોમા વૈ દેહભાનવિવર્જિતઃ ॥ ૧૨॥

નિમગ્નં તં ભક્તિરસે વીક્ષ્ય દેવો ગજાનનઃ ।
તમુવાચ મહાભક્તં ભાવજ્ઞો ભાવપૂરકઃ ॥ ૧૩॥

ગણેશ ઉવાચ ।
ત્વયા કૃતમિદં વૈ યત્ સ્તોત્રં ભક્તિરસપ્રદમ્ ।
ધર્માર્થકામમોક્ષાણાં દાયકં પ્રભવિષ્યતિ ॥ ૧૪॥

મદીયા ભક્તિરચલા તવાનઘ ભવિષ્યતિ ।
સ્મૃતમાત્રશ્ચ તે ગેહં યાસ્યામિ મુનિસત્તમ ॥ ૧૫॥

એવમુક્ત્વા ગણાધીશોઽન્તર્દધે મમ પશ્યતઃ ।
સોઽહં તં હૃદયે પશ્યન્ સ્થિતઃ શાન્તિસમન્વિતઃ ॥ ૧૬॥

ગાણપત્યસ્વભાવેન મૂર્તિપૂજાપરાયણઃ ।
વસિષ્ઠોઽહં મહાભાગો યોગિવન્દ્યો બભૂવ હ ॥ ૧૭॥

(Page ખં. ૨ અ. ૩૦ પાન ૬૩)
વસિષ્ઠ ઉવાચ ।
એતત્તે કથિતં વત્સ શાન્તિયોગપ્રદં શુભમ્ ।
જ્ઞાનં તેનૈવ માર્ગેણ ગણેશં ભજ ભક્તિતઃ ॥ ૧૮॥

એવમુક્તઃ પ્રણમ્યાદૌ મુનિં પૌત્રઃ પરાશરઃ ।
વને ગત્વા ચકારાઽસૌ તપઃ પરમદારુણમ્ ॥ ૧૯॥

પિતામહેન યજ્જ્ઞાનં કથિતં યોગદં મહત્ ।
તાદૃશં સાધિતં તેન યોગભૂમિક્રમેણ ચ ॥ ૨૦॥

ત્યક્ત્વા ભૂમિં સ્વયં યોગી ગાણપત્યો બભૂવ હ ।

તસ્ય પુત્રત્વમાપન્નો વ્યાસો વિષ્ણુઃ સ્વયં પ્રભુઃ ॥ ૨૧॥

તથાપિ મુનિના તેન પત્ન્યા વત્સલયા સહ ।
તપસ્તપ્તં મહાઘોરં ગણેશસ્ય મહાત્મનઃ ॥ ૨૨॥

સઙ્કલ્પં પુત્રકામાર્થં ચકાર સ મહામુનિઃ ।
ગણરાજઃ સ્વયં મે વૈ ભવિતા પુત્ર ઉત્તમઃ ॥ ૨૩॥

દશવર્ષસહસ્રૈસ્તં પ્રસન્નો ગણનાયકઃ ।
વરં દાતું સમાયાતો ભક્તિભાવેન તોષિતઃ ॥ ૨૪॥

તં દૃષ્ટ્વા સહસોત્થાય પ્રણમ્ય પ્રકૃતાઞ્જલિઃ ।
તુષ્ટાવ સુસ્થિરો ભૂત્વા પત્ન્યા સાકમુદારધીઃ ॥ ૨૫॥

પરાશર ઉવાચ ।
નમસ્તે ગજવક્ત્રાય નરાકારાય તે નમઃ ।
નરકુઞ્જરરૂપાય ગણેશાય નમો નમઃ ॥ ૨૬॥

નિર્ગુણાય ગુણાધારરૂપિણે પરમાત્મને ।
પરાત્પરાય દેવાયાનાદિસિદ્ધાય તે નમઃ ॥ ૨૭॥

અનન્તાનનધારાયાનન્તપાણ્યઙ્ઘ્રિરૂપિણે ।
અનન્તવિભવાયૈવ ગકારાય ચ તે નમઃ ॥ ૨૮॥

સર્વહીનાય દેવાય માયાભ્યાં વર્જિતાય તે ।
સદા બ્રહ્મમયાયૈવ ણકારાય નમો નમઃ ॥ ૨૯॥

તયોશ્ચ સ્વામિને તુભ્યં ગણેશાય નમો નમઃ ।
સ્વાનન્દવાસિને પૂર્ણભુક્તિમુક્તિપ્રદાય તે ॥ ૩૦॥

કિં સ્તૌમિ દેવદેવેશ વેદવેદાન્તકાદિભિઃ ।
સમ્પાદિતં પરં બ્રહ્મ ત્વામતઃ પ્રણમામ્યહમ્ ॥ ૩૧॥

યદિ તુષ્ટોઽસિ દેવેશ તદા પુત્રો ભવ પ્રભો ।
આવયોર્ગણનાથ ત્વં તદા મે સ્યાત્ સ્થિરં મનઃ ॥ ૩૨॥

અસ્માકં કુલદેવશ્ચ ત્વમેવ ગણનાયક ।
બ્રહ્મભાવેન નિત્યં ત્વાં ભજામસ્તત્ર વિઘ્નપ ॥ ૩૩॥

પુત્રભાવેન દેવેશ ભજેયં સંસૃતૌ ગતઃ ।
સંસારઃ સફલસ્તેન બ્રહ્મરૂપો ભવેચ્ચ મે ॥ ૩૪॥

શ્રુત્વૈવં વચનં તસ્ય પરાશરમુનેરિદમ્ ।
તમુવાચ ગણાધીશો ભક્તં યોગધરં પરમ્ ॥ ૩૫॥

ગણેશ ઉવાચ ।
ત્વયા યત્પ્રાર્થિતં વિપ્ર તત્સર્વં સફલં ભવેત્ ।
તવ પુત્રો ભવિષ્યામિ ગજાસુરવધાય ચ ॥ ૩૬॥

ત્વયા સ્તોત્રં કૃતં યચ્ચ તત્સર્વેપ્સિતદં ભવેત્ ।
ભુક્તિમુક્તિકરં તેષાં પઠતાં શ‍ૃણ્વતાં નૃણામ્ ॥ ૩૭॥

એવમુક્ત્વાન્તર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
પરાશરઃ પ્રસન્નાત્મા સપત્નીકો બભૂવ હ ॥ ૩૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પરાશરવરપ્રદાનં નામ ત્રિંશોઽધ્યાયઃ ॥ ૨.૩૦
(Page ખં. ૨ અ. ૩૧ પાન ૬૪)

## ૨.૩૧ પરાશરસુતોત્પત્તિકથનં નામૈકત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
કોઽસૌ ગજાસુરો નામ્ના દૈત્યઃ પરમદારુણઃ ।
વદ તસ્ય ચરિત્રં મે વધપર્યન્તમુત્તમમ્ ॥ ૧॥

યદર્થે ગણરાજોઽયં મુનિપુત્રોઽભવત્પ્રભો ।
તન્ન મુદ્ગલ સામાન્યં ધન્યં જન્માસુરસ્ય ચ ॥ ૨॥

સૂત ઉવાચ ।
દક્ષસ્ય વચનં રમ્યં શ્રુત્વા યોગીન્દ્રસત્તમઃ ।
જગાદ સકલં તસ્ય ચેષ્ટિતં દૈત્યપસ્ય વૈ ॥ ૩॥

મુદ્ગલ ઉવાચ ।
શ‍ૃણુ દક્ષ પુરાવૃત્તમિતિહાસં વદામિ તમ્ ।
પાપપ્રશમનં પૂર્ણં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૪॥

મહિષાસુરનાશં ચ ચકાર જગદમ્બિકા ।

તસ્ય પુત્રો મહાતેજા ગજાસુર ઇતિ સ્મૃતઃ ॥ ૫॥

પિતુર્વધેન સન્તપ્તો દેવાનાં વધકાઙ્ક્ષયા ।
શુક્રોપદિષ્ટમન્ત્રેણ શઙ્કરારાધને રતઃ ॥ ૬॥

તતાપ સ તપો ઘોરં નિરાહારસમન્વિતઃ ।
પઞ્ચાક્ષરવિધાનેન તોષયામાસ શઙ્કરમ્ ॥ ૭॥

દશવર્ષસહસ્રૈસ્તુ પ્રસન્નોઽભૂચ્છિવઃ સ્વયમ્ ।
આયયૌ તં વરં દાતું ગજાસુરતપોવને ॥ ૮॥

કાષ્ઠવત્સંસ્થિતં દૈત્યં દૃષ્ટ્વા વિસ્મયમાગતઃ ।
જગાદ તં સ્વભક્તં વૈ શઙ્કરઃ કરુણાનિધિઃ ॥ ૯॥

શિવ ઉવાચ ।
વરં વરય મત્તસ્ત્વં ગજાસુર મહામતે ।
તપસા પરિતુષ્ટોઽહં તવ દાસ્યામિ દુર્લભમ્ ॥ ૧૦॥

શઙ્કરસ્ય વચઃ શ્રુત્વા હર્ષયુક્તો મહાસુરઃ ।
ઉપચારૈઃ ષોડશભિઃ પ્રણમ્યાપૂજયચ્છિવમ્ ॥ ૧૧॥

અથર્વશિરસા શમ્ભું તુષ્ટાવાસુરનાયકઃ ।
વરં વવ્રે મહાક્રૂરં તચ્છૃણુષ્વ પ્રજાપતે ॥ ૧૨॥

ગજાસુર ઉવાચ ।
યદિ તુષ્ટોઽસિ દેવેશ વરં દેહિ મહેશ્વર ।
બ્રહ્માણ્ડવાસિનઃ સર્વે તેભ્યો મૃત્યુર્ન મે ભવેત્ ॥ ૧૩॥

રાજ્યં બ્રહ્માણ્ડગોલસ્ય દેહિ સામર્થ્યમુત્તમ્ ।
સર્વાતિગં મહેશાન નાન્યં યાચે પરં વરમ્ ॥ ૧૪॥

તથેતિ તમુવાચાથ શિવોંઽતર્ધાનગોઽભવત્ ।
હર્ષયુક્તો મહાદૈત્યસ્તતો ગેહં સમાયયૌ ॥ ૧૫॥

માત્રા સમ્માનિતઃ સોઽપિ સુહૃદ્ભિશ્ચ ગજાસુરઃ ।
દૈત્યાઃ સમાયયુઃ સર્વે ગૃહે તસ્ય મહાત્મનઃ ॥ ૧૬॥

સ્વયં ગત્વા ગુરું શુક્રમાનયામાસ દૈત્યપઃ ।
તતો મુનિગણૈઃ સાર્ધમભિષેકં ચકાર સઃ ॥ ૧૭॥

દૈત્યાનાં દાનવાં ચ રાજાભૂત્ સ ગજાસુરઃ ।

તૈર્યુક્તઃ પૃથિવીં જિત્વા યયૌ સ્વર્ગં મહાબલઃ ॥ ૧૮॥

દેવાઃ પલાયિતાઃ સર્વે જ્ઞાત્વા ક્રૂરં ગજાસુરમ્ ।
શઙ્કરં તે સમાશ્રિત્ય સ્થિતાઃ સર્વે ભયાતુરાઃ ॥ ૧૯॥

દૈત્યૈઃ સમાવૃતઃ સોઽપિ કૈલાસમગમત્તતઃ ।
શઙ્કરઃ ક્રોધસંયુક્તસ્તં યયૌ દેવસંવૃતઃ ॥ ૨૦॥

યુદ્ધાય શઙ્કરં તેનાગતં જ્ઞાત્વા મહાસુરઃ ।
સ્વયં સૈન્યં પુરસ્કૃત્યાયયૌ રણવિધિત્સયા ॥ ૨૧॥

દેવાનાં દાનવાનાં ચ યુદ્ધં પરમદારુણમ્ ।
સઞ્જાતં ચ તતો દૈત્યાઃ પલાયનપરા યયુઃ ॥ ૨૨॥

તં દૃષ્ટ્વા ક્રોધસંયુક્તો ગજદૈત્યઃ પ્રતાપવાન્ ।
બાણવૃષ્ટિં મહોગ્રાં સ સસર્જ સુરનાશિનીમ્ ॥ ૨૩॥

બાણૈર્નિપતિતાસ્તસ્ય દેવાઃ સર્વે ધરાતલે ।
છિન્નાઙ્ગા મરણપ્રાયાઃ પ્રલયં મેનિરે તદા ॥ ૨૪॥

ઇન્દ્રાદયશ્ચ દિક્પાલાઃ પતિતા બાણપીડિતાઃ ।
ગદયા વિષ્ણુમહનત્ સોઽપિ ભૂતલમાશ્રિતઃ ॥ ૨૫॥

તતઃ ક્રોધસમાયુક્તઃ શઙ્કરઃ શૂલમાદદે ।
તેનાહનન્ મહાદૈત્યં પ્રલયાગ્નિસમેન સઃ ॥ ૨૬॥

(Page ખં. ૨ અ. ૩૧ પાન ૬૫)
ત્રિશૂલેન હતઃ સોઽપિ ન ચચાલ સુરાધિપઃ ।
વરદાનપ્રભાવેણ શસ્ત્રાણિ વ્યર્થતાં યયુઃ ॥ ૨૭॥

સહસાગત્ય દૈત્યેશો ધૃત્વા પાદં પ્રહસ્ય વૈ ।
ભ્રામયિત્વા મહેશાનં ચિક્ષેપ રણમૂર્ધનિ ॥ ૨૮॥

તતો દેવગણાઃ સર્વે પલાયનપરાયણાઃ ।
યયુર્દશ દિશો રક્ષો દૈત્યસન્ત્રાસતાપિતાઃ ॥ ૨૯॥

દૈત્યોઽપિ શિવલોકં તં દૈત્યૈઃ સહ સમાયયૌ ।
સ્થાપયામાસ દેવાનાં પદેષુ શ્રેષ્ઠદાનવાન્ ॥ ૩૦॥

વિકુણ્ઠાદિપદેષ્વેતે સ્થિતાસ્તેન સુમાનિતાઃ ।
સ્વર્ગભોગકરાઃ સર્વે કૃતા દૈત્યાઃ સુરારિણા ॥ ૩૧॥

કૈલાસે સંહરં દૈત્યં સ્થાપયામાસ વીર્યવાન્ ।
સ્વયં સમાગતો દક્ષ પૃથિવ્યાં દૈત્યપૈર્વૃતઃ ॥ ૩૨॥

મહિષાખ્યપુરે દુષ્ટઃ સંસ્થિતો દૈત્યપૈઃ સહ ।
ચકાર સોઽતુલં રાજ્યં ત્રૈલોક્યસ્ય મહાબલઃ ॥ ૩૩॥

ગતે બહુતરે કાલે દેવાઃ સર્વે ભયાતુરાઃ ।
પર્વતાન્તરસઙ્ગુપ્તાઃ સંસ્થિતા અભવન્ દ્વિજૈઃ ॥ ૩૪॥

વિચારમખિલાશ્ચક્રુર્ગજાસુરવધાય તે ।
તત્ર વિષ્ણુર્જગાદેદં વચનં સર્વતોષદમ્ ॥ ૩૫॥

વિષ્ણુરુવાચ ।
બ્રહ્માણ્ડવાસિનો યે વૈ તેભ્યો મૃત્યુર્ન વિદ્યતે ।
દૈત્યસ્ય વરદાનેન તેન સર્વે પરાજિતાઃ ॥ ૩૬॥

સ્વાનન્દલોકગઃ સાક્ષાદ્ગણેશો દેવનાયકઃ ।
બ્રહ્માણ્ડવર્જિતો બ્રહ્મ તસ્માત્તસ્ય મૃતિર્ભવેત્ ॥ ૩૭॥

અતસ્તં દેવદેવેશં તપસા પુષ્કલેન વૈ ।
સર્વ આરાધયામૈવ દેવાઃ સર્ષિગણાઃ પરમ્ ॥ ૩૮॥

સ હત્વા તં મહાદૈત્યં પ્રદાસ્યતિ પદાનિ વઃ ।
હિતં યદિ સુરાઃ કાર્યં વચનં મે સુખપ્રદમ્ ॥ ૩૯॥

વિષ્ણોર્વચનમાકર્ણ્ય દેવા મુનિગણાસ્તથા ।
સાધુસાધ્વિતિ તત્રોચુર્બભુસ્તપસિ સંસ્થિતાઃ ॥ ૪૦॥

કેચિન્ મન્ત્રજપં ચક્રુઃ કેચિન્નામજપં તથા ।
કેચિન્ માનસપૂજાયાં નિરતાશ્ચ બભૂવિરે ॥ ૪૧॥

કેચિદ્ ધ્યાનં ગણેશસ્ય ચક્રુઃ કેચિત્ સ્તુતિં વિભોઃ ।
નિરાહારં તથા કેચિદ્વાયુપત્રાદિભક્ષકાઃ ॥ ૪૨॥

કેચિદ્ધોમં ચ પઞ્ચાગ્નિં ધૂમ્રપાનં તથાઽપરે ।
ઇત્યાદિ તપસા દેવં તોષયામાસુરાદરાત્ ॥ ૪૩॥

શતવર્ષે તુ તેષાં વૈ પ્રાદુર્ભૂતો ગજાનનઃ ।
પુરતસ્તાનુવાચેદં વચનં ભક્તવત્સલઃ ॥ ૪૪॥

ગણેશ ઉવાચ ।
દેવાશ્ચ મુનયઃ સર્વે વરં બ્રૂત હૃદીપ્સિતમ્ ।
દુર્લભં ત્વપિ તદ્દાસ્યે તપસા તોષિતો ભૃશમ્ ॥ ૪૫॥

ગણેશવચનં શ્રુત્વા દૃષ્ટ્વા દેવં પુરઃસ્થિતમ્ ।
પ્રણેમુર્મુનયો દેવા દણ્ડવત્ પૃથિવીતલે ॥ ૪૬॥

પરયાઽપૂજયન્ ભક્ત્યા બ્રહ્મેશં બ્રહ્મભાવિતાઃ ।
તુષ્ટુવુઃ સમ્પ્રહૃષ્ટાશ્ચ સરોમાઞ્ચાઃ પ્રજાપતે ॥ ૪૭॥

દેવર્ષય ઊચુઃ ।
નમો નમો ગણેશાય ગણપાલકમૂર્તયે ।
ગણરૂપેણ સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૪૮॥

મૂષકારૂઢકાયૈવાનાદિરૂપાય તે નમઃ ।
આકારાદિવિહીનાયાકારિરૂપાય તે નમઃ ॥ ૪૯॥

હેરમ્બાય નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
ભક્તવત્સલભાવાય વિઘ્નેશાય નમો નમઃ ॥ ૫૦॥

નમસ્તુભ્યં સિદ્ધિપતે સિદ્ધિદાત્રે ચ ઢુણ્ઢયે ।
બુદ્ધિદાત્રે ધિયઃ પાત્રે સર્વાન્તશ્ચારિણે નમઃ ॥ ૫૧॥

સ્વાનન્દપતયે તુભ્યં સ્વસંવેદ્યાય તે નમઃ ।
યોગરૂપાય શાન્તાય યોગાનાં પતયે નમઃ ॥ ૫૨॥

આદિમધ્યાન્તહીનાય કર્ત્રે હર્ત્રે નમો નમઃ ।
(Page  ખં. ૨ અ. ૩૨ પાન ૬૬)
પાલકાય ત્રિભિર્હીનગુણેશાય નમો નમઃ ॥ ૫૩॥

વક્રતુણ્ડાય દેવાય લમ્બોદરધરાય ચ ।
સર્વેષાં હૃદિ સંસ્થાય વિનાયક નમોઽસ્તુ તે ॥ ૫૪॥

યં સ્તોતું ન સમર્થાશ્ચ વેદાઃ સાઙ્ગાઃ કદાચન ।
વયં તત્ર ચ કે દેવ વેદૈર્જ્ઞાનધરા યતઃ ॥ ૫૫॥

એવં સ્તુત્વા ગણેશાનં પેતુસ્તે તસ્ય પાદયોઃ ।
ધૃત્વા મનસિ તદ્રૂપં ભક્તિભાવેન યન્ત્રિતાઃ ॥ ૫૬॥

પુનરુત્થાય તે સર્વે તમૂચુર્ભયવિહ્વલાઃ ।

કૃતાંઽજલિપુટા દેવં ગણેશં સર્વનાયકમ્ ॥ ૫૭॥

યદિ તુષ્ટોઽસિ દેવેશ જહિ દૈત્યં ગજાસુરમ્ ।
પદભ્રષ્ટા વયં તેન કૃતાઃ કર્મવિવર્જિતાઃ ॥ ૫૮॥

ભક્તિં તે દેહિ વિઘ્નેશ સર્વદુઃખવિનાશિનીમ્ ।
એષ એવ વરોસ્માભિર્વાઞ્છિતો દ્વિરદાનન ॥ ૫૯॥

દેવર્ષીણાં વચઃ શ્રુત્વા ભક્તવત્સલભાવતઃ ।
ઉવાચ તાન્ ગણાધ્યક્ષો હર્ષયન્ વચનં શુભમ્ ॥ ૬૦॥

ગજાસુરવધં દેવા મુનયશ્ચ સુદુષ્કરમ્ ।
તથાપિ ભવતાં વાક્યાત્ કરિષ્યેઽહં ન સંશયઃ ॥ ૬૧॥

મદીયા ભક્તિરચલા ભવિષ્યતિ સુદુર્લભા ।
પરાશરસ્ય પુત્રોઽહં ભવિષ્યામિ વધાય વૈ ॥ ૬૨॥

ભવત્કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
ભુક્તિમુક્તિપ્રદં પૂર્ણં ભવિષ્યતિ ન સંશયઃ ॥ ૬૩॥

પઠતાં શ‍ૃણ્વતાં વિપ્રા દેવાઃ સર્વાર્થસિદ્ધિદમ્ ।
દુઃખઘ્નં સતતં તેષાં ભવિષ્યતિ સુબુદ્ધિદમ્ ॥ ૬૪॥

ઇત્યુક્ત્વાન્તર્દધે દેવો ગણેશઃ સર્વસિદ્ધિદઃ ।
વત્સલોદરગો ભૂત્વા પરાશરસુતોઽભવત્ ॥ ૬૫॥

જાતકર્માદિકં સર્વં ચકાર મુનિસત્તમઃ ।
બ્રાહ્મણૈર્હર્ષિતો ભૂત્વા પત્ન્યા સ્વયમુદારધીઃ ॥ ૬૬॥

સ બાલો વવૃધે તત્ર હર્ષયન્ માતરં નિજામ્ ।
પિતરં ચેષ્ટિતૈઃ સ્વીયૈર્બાલક્રીડનકૈસ્તથા ॥ ૬૭॥

પઞ્ચમે વ્રતબન્ધં ચ ચકાર મુનિસત્તમઃ ।
વેદાનધ્યાપયામાસ સાઙ્ગાંસ્તાન્ ગણપાય ચ ॥ ૬૮॥

વિવાહમકરોત્તસ્ય સિદ્ધિર્બુદ્ધિશ્ચ શાશ્વતે ।
મરીચેશ્ચ સુતે જાતે દત્તે તેન વિધાનતઃ ॥ ૬૯॥

ઇતિ તે કથિતં સર્વં પરાશરસુતસ્ય ચ ।
ચરિતં ગણનાથસ્ય દૈત્યસ્ય શ‍ૃણુ ચેષ્ટિતમ્ ॥ ૭૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પરાશરસુતોત્પત્તિકથનં નામૈકત્રિંશોઽધ્યાયઃ ॥ ૨.૩૧

## ૨.૩૨ ગજાસુરસૈન્યવધો નામ દ્વાત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
એકદા તં સભાયાં વૈ સંસ્થિતં દૈત્યનાયકમ્ ।
આયયૌ સહસા તત્ર નારદો કૌતુકી મુનિઃ ॥ ૧॥

દૈત્યેન માનિતો દક્ષ તમુવાચ મહામુનિઃ ।
શ‍ૃણુ દૈત્યાધિપ પ્રાજ્ઞ હિતં તે વચનં મહત્ ॥ ૨॥

અરણ્યે મુનિભિર્દેવૈર્ગણેશો ભક્તિભાવિતઃ ।
આરાધિતો વધાર્થં તે પરાશરસુતોઽભવત્ ॥ ૩॥

ઇત્યુક્ત્વા પ્રયયૌ તસ્માન્નારદો દિવ્યદર્શનઃ ।
દૈત્યો રોષસમાવિષ્ટો દેવર્ષીણાં વધે રતઃ ॥ ૪॥

આયયૌ યત્ર દેવાશ્ચ મુનયઃ સંસ્થિતાઃ ખલઃ ।
દૈત્યૈઃ સમાવૃતઃ સર્વૈર્મહાબલપરાક્રમૈઃ ॥ ૫॥

(Page ખં. ૨ અ. ૩૨ પાન ૬૭)
ધૃત્વા સ સકલાન્ દેવાન્ ખલઃ સર્ષિગણાંસ્તદા ।
તાન્ હન્તું શસ્ત્રમાદત્તે તાવત્તૈર્વિઘ્નપઃ સ્મૃતઃ ॥ ૬॥

સ્મૃતમાત્રો ગણાધ્યક્ષો બુદ્ધિભેદં ચકાર હ ।
દૈત્યસ્ય તેન દૈત્યેન માનસે ધારિતં મહત્ ॥ ૭॥

મમાધીના ઇમે વિપ્રા દેવાશ્ચૈવ ન સંશયઃ ।
એષાં દણ્ડઃ પ્રકર્તવ્યો યેન સત્વં ગમિષ્યતિ ॥ ૮॥

પશ્ચાત્ક્રિયતિ કાલેઽહં હનિષ્યામિ બલાત્કિલ ।
એવં નિશ્ચિતસઙ્કલ્પસ્તાનુવાચ ગજાસુરઃ ॥ ૯॥

ગજાસુર ઉવાચ ।
દેવા મુનિગણાઃ સર્વે વચઃ શ‍ૃણ્વન્તુ મે હિતમ્ ।
કર્તવ્યં જીવિતું તચ્ચ યદીચ્છથ ચ સત્વરૈઃ ॥ ૧૦॥

કર્ણૌ સમ્પીડ્ય પાણિભ્યામુત્તમાઙ્ગં ધરાતલે ।
નિત્યમાસ્ફાલયધ્વં વૈ મમ પાદસ્ય સન્નિધૌ ॥ ૧૧॥

તદા મુઞ્ચામિ દેવેશાન્નાન્યથા મુનિસત્તમાન્ ।
શિરશ્છેદં ચ સર્વેષાં કરિષ્યામિ ન સંશયઃ ॥ ૧૨॥

ભવદ્ભિઃ પ્રાર્થિતો દેવો ગણેશો દેવવલ્લભઃ ।
પરાશરસુતો જાતઃ કુરુધ્વં તેન સંયુતાઃ ॥ ૧૩॥

એવં તસ્ય વચઃ શ્રુત્વોવાચ તં વિષ્ણુરાદરાત્ ।
ગણેશં મનસા સ્મૃત્વા સામયુક્તં વચઃ શુભમ્ ॥ ૧૪॥

ત્વયા યઃ કથિતો દણ્ડો વયં તં કરવામહૈ ।
સર્વાન્ દેવમુનીન્ મુઞ્ચ ગમિષ્યામો ગજાનનમ્ ॥ ૧૫॥

આનયિત્વા ચ દેવેશં તેન સાર્ધં પ્રયત્નતઃ ।
ત્વત્પાદકમલે નિત્યં કરિષ્યામો યથાતથમ્ ॥ ૧૬॥

ગણેશમાયયા ભ્રાન્તો દૈત્યરાજઃ પ્રતાપવાન્ ।
સકલાન્ મોચયામાસ દેવાનૃષિસમન્વિતાન્ ॥ ૧૭॥

દિવસે પઞ્ચમે પ્રાપ્તે નાગતા મે પ્રસન્નિધૌ ।
તદા સર્વાન્ હનિષ્યામિ ગણેશેન સમન્વિતાન્ ॥ ૧૮॥

તથેત્યુક્ત્વા ગતાઃ સર્વે પરાશરગૃહં પ્રતિ ।
ગજાનનં તત્ર દૃષ્ટ્વા પ્રણેમુર્દણ્ડવત્ ક્ષિતૌ ॥ ૧૯॥

પરાશરો વિસ્મિતોઽસૌ પૂજયામાસ તાન્ સ્વયમ્ ।
સહસા સકલાન્ પ્રાપ્તાન મુનીન્ દેવાન્ વિશેષતઃ ॥ ૨૦॥

પરાશરેણ સંયુક્તાઃ સર્વે તેઽકથયંસ્તદા ।
સ્તુત્વા ચ વિવિધૈઃ સ્તોત્રૈર્ગજાસુરવિચેષ્ટિતમ્ ॥ ૨૧॥

કર્ણૌ સમ્પીડ્ય દેવેશ શિરઃસ્ફાલનમઞ્જસા ।
કથં કુર્મોઽસુરસ્યાગ્રે ચરણાવનતાઃ પ્રભો ॥ ૨૨॥

નીચસ્ય નમનાદ્દેવ મરણં હિ વરં સ્મૃતમ્ ।
તસ્માત્ત્વં જહિ દેવાન્ વા મુનીન્ દૈત્યાન્ ગજાનન ॥ ૨૩॥

મુદ્ગલ ઉવાચ ।
દેવાદીનાં વચઃ શ્રુત્વા સ્મિત્વા તાનબ્રવીત્ પ્રભુઃ ।

ભક્તવત્સલભાવેન યન્ત્રિતઃ સ પ્રજાપતે ॥ ૨૪॥

ગણેશ ઉવાચ ।
ચિન્તા નૈવ પ્રકર્તવ્યા હનિષ્યામ્યસુરં ક્ષણાત્ ।
કુરુધ્વં મે વચો રમ્યં સર્વેષાં સુખદં ભવેત્ ॥ ૨૫॥

દૈત્યેન્દ્રેણ પ્રકથિતો દણ્ડ એવ સ મે પ્રિયઃ ।
મમ પાદસ્ય સામીપ્યે કુરુધ્વં સર્વભાવતઃ ॥ ૨૬॥

તદા દૈત્યં મહાઘોરં હનિષ્યામિ પ્રપશ્યતામ્ ।
ભવતાં નાત્ર સન્દેહઃ ક્ષણાર્ધેન ચ સત્તમાઃ ॥ ૨૭॥

ગણેશસ્ય વચો રમ્યં શ્રુત્વા દેવર્ષિસત્તમાઃ ।
પરસ્પરં મુખાલોકમકુર્વન્ સ્મિતપૂર્વકમ્ ॥ ૨૮॥

તત્ર શમ્ભુરુવાચેદં વચનં હિતકારકમ્ ।
અસ્માકં કુલદેવોઽયં તસ્માત્ કુર્વન્તુ સત્તમાઃ ॥ ૨૯॥

ઇત્યુક્ત્વા શઙ્કરસ્તત્ર પાણિભિઃ શ્રવસિ સ્વયમ્ ।
(Page ખં. ૨ અ. ૩૨ પાન ૬૮)
પીડયિત્વા શિરોભિસ્તચ્ચરણે ધ્વનિમાચરત્ ॥ ૩૦॥

મૃદુર્મધુરરૂપઃ સ શબ્દશ્ચ શિરસાઽભવત્ ।
શ્રુત્વા ગજાનનો હૃષ્ટો બભૂવ પરમં તદા ॥ ૩૧॥

તતો વિષ્ણ્વાદિભિર્દેવૈર્ભૃગ્વાદિપ્રમુખૈસ્તથા ।
મુનિભિશ્ચ કૃતં દક્ષ તતોઽત્યન્તં મુમોદ સઃ ॥ ૩૨॥

ભૂત્વા તુ મૂષકારૂઢો ચતુરાયુધભૂષિતઃ ।
ગજાસુરવધાર્થાય યયૌ ગણપતિઃ સ્વયમ્ ॥ ૩૩॥

મહિષાખ્યે પુરે ગત્વા સિંહનાદં ચકાર સઃ ।
તેન ભ્રાન્તાશ્ચાસુરાસ્તે ગજદૈત્યસ્તથા સ્વયમ્ ॥ ૩૪॥

એતસ્મિન્નન્તરે તત્ર ગુલ્મસ્થા અસુરા યયુઃ ।
છિન્નભિન્નીકૃતાઙ્ગા વૈ શસંસુર્દેવચેષ્ટિતમ્ ॥ ૩૫॥

અસુરા ઊચુઃ ।
ગણેશેન સમાયુક્તા દેવા મુનિગણાઃ પ્રભો ।
આયયુર્યોદ્ધુમત્યન્તં મદયુક્તા ગજાસુર ॥ ૩૬॥

તેષાં વચનમાકર્ણ્ય ગજદૈત્યઃ પ્રતાપવાન્ ।
સર્વાનાજ્ઞાપયામાસ દૈત્યાન્ સજ્જીભવન્ત્વિતિ ॥ ૩૭॥

સ્વયં સુસજ્જિતો ભૂત્વા રથારૂઢશ્ચ નિર્યયૌ ।
અનુ તં દૈત્યસૈન્યેશા દૈત્યાસ્તે નિર્યયુઃ પુરાત્ ॥ ૩૮॥

અપારસેનયા યુક્તં તં દદર્શ ગજાસુરમ્ ।
ગજાનનઃ પ્રસન્નાત્મા કાલસ્ય ભયદાયકઃ ॥ ૩૯॥

તતો ગજાસુરઃ કોપાદ્દૈત્યાનાજ્ઞાપયત્તદા ।
સંહરધ્વં સુરાન્ સર્વાન્ મુનીન્ યક્ષાદિસંયુતાન્ ॥ ૪૦॥

દૈત્યેન્દ્રેણ સમાજ્ઞપ્તા અસુરા જયશાલિનઃ ।
અસ્ત્રૈઃ શસ્ત્રૈશ્ચ તે દેવાન્ પીડયામાસુરોજસા ॥ ૪૧॥

દેવાઃ ક્રોધસમાવિષ્ટા મરણે કૃતનિશ્ચયાઃ ।
દૈત્યાન્ પ્રહરણૈર્જઘ્નુઃ શસ્ત્રૈર્નાનાવિધૈસ્તદા ॥ ૪૨॥

દૈત્યાનાં ચૈવ દેવાનાં યુદ્ધં પરમદારુણમ્ ।
બભૂવ તુમુલં તત્ર પરસ્પરવિનાશનમ્ ॥ ૪૩॥

અસૃઙ્નદી પ્રવૃત્તા ચ મહૌઘા વીરમોહિની ।
ભગ્ના દૈત્યગણાસ્તત્ર પ્રહારપરિપીડિતાઃ ॥ ૪૪॥

ત્યક્ત્વા દૈત્યગણા લજ્જાં પલાયન્ત દિશો દશ ।
તત્ દૃષ્ટ્વા દૈત્યરાજસ્તુ વિસ્મિતોઽભૂત્ પ્રજાપતે ॥ ૪૫॥

તતો દૈત્યાધિપાઃ ક્રૂરાઃ પ્રધાનપ્રમુખા રણમ્ ।
આયયુર્દેવસેનાં તે નિર્જઘ્નુશ્ચ મહાબલાઃ ॥ ૪૬॥

તત ઇન્દ્રાદિભિસ્તે વૈ રણં કૃત્વા સુદારુણમ્ ।
નિહતા મૂર્ચ્છિતાઃ કેચિદ્રણે ભૂમૌ નિપાતિતાઃ ॥ ૪૭॥

હા હા દૈત્યગણાઃ કૃત્વા પલાયન્ત દિશો દશ ।
તત્ દૃષ્ટ્વા દૈત્યરાજઃ સ વિસ્મયં પરમં યયૌ ॥ ૪૮॥

વિપરીતં મયા દૃષ્ટં વહ્નિઃ શીતો યથાઽભવત્ ।
તથા દેવૈર્મદીયેયં સેના સર્વા પરાજિતા ॥ ૪૯॥

એવં મનસિ સન્તપ્તઃ ક્રોધારુણવિલોચનઃ ।
રથારૂઢઃ સ્વયં યોદ્ધુમાયયૌ સ ગજાસુરઃ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ગજાસુરસૈન્યવધો નામ દ્વાત્રિંશોઽધ્યાયઃ ॥ ૨.૩૨
(Page ખં. ૨ અ. ૩૩ પાન ૬૯)

## ૨.૩૩ ગજાસુરવધાખ્યાનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
સમાગતં મહાદૈત્યં દૃષ્ટ્વા દેવા ભયાતુરાઃ ।
ગજાનનં નિજં નાથં યયુર્વૃત્તાન્તમીરિતુમ્ ॥ ૧॥

સ વૃત્તાન્તં દેવમુખાત્ શ્રુત્વા ક્રોધસમન્વિતઃ ।
પરશું પાશમુગ્રં ચ ગદાં ધૃત્વા યયૌ તદા ॥ ૨॥

મૂષકારૂઢમાદ્યં તં પુરુષં દૈત્યનાયકઃ ।
દૃષ્ટ્વા ગજાનનં દીપ્તમુવાચ બલગર્વિતઃ ॥ ૩॥

ગજાસુર ઉવાચ ।
કિમર્થં રણભૂમૌ ત્વમાગતો બ્રાહ્મણાધમ ।
તપઃ કાર્યં ત્વયા નિત્યં કથં ક્ષાત્રં સમાશ્રિતઃ ॥ ૪॥

બ્રહ્માદયો જિતા યેન તેન સાર્ધં ત્વયા દ્વિજ ।
યુદ્ધં કર્તવ્યમત્યન્તં વૃથા મરણમાપ્સ્યસિ ॥ ૫॥

ગચ્છ સ્વમાશ્રમં વિપ્ર ન હન્મિ ત્વાં સમાગતમ્ ।
બાલભાવાત્ કૃતં કર્મ સહેહં નાત્ર સંશયઃ ॥ ૬॥

ઇત્યુક્તવન્તમાલોક્ય શમ્ભુઃ ક્રોધસમન્વિતઃ ।
ઉવાચ તં મહાદૈત્યં વચસ્તદ્ધિતકામ્યયા ॥ ૭॥

શિવ ઉવાચ ।
મૂર્ખોઽસિ દૈત્યરાજ ત્વં નાયં બ્રાહ્મણસત્તમઃ ।
ગણેશોઽયં સદા સેવ્યો યોગિભિઃ પરમાદૃતૈઃ ॥ ૮॥

પરાશરસ્ય પુત્રોઽભૂત્તપસારાધિતઃ સ્વયમ્ ।
વરદાનપ્રભાવેણ ત્વાં હનિષ્યતિ નિશ્ચિતમ્ ॥ ૯॥

ત્યક્ત્વા વૈરં ગણેશં ચ શરણં દૈત્યનાયક ।
એહિ નોચેચ્ચ સર્વસ્વં હિત્વા મૃત્યુમવાપ્સ્યસિ ॥ ૧૦॥

વસ પાતાલભૂમૌ ત્વં ન ગણેશો હનિષ્યતિ ।
એવં શ્રુત્વા વચઃ શમ્ભું જઘાન ગદયાઽસુરઃ ॥ ૧૧॥

મૂર્ચ્છયા પતિતો ભૂમૌ શઙ્કરસ્તત્ર સઙ્ગરે ।
શસ્ત્રાસ્ત્રૈસ્તેન દૈત્યેન મૂર્ચ્છિતાશ્ચ કૃતાઃ સુરાઃ ॥ ૧૨॥

વિષ્ણ્વાદ્યાશ્ચ રણે તત્ર પતિતાઃ પીડિતા ભૃશમ્ ।
દૈત્યાધિપં તતો દૃષ્ટ્વા ગણેશોઽસ્ત્રમુપાદદે ॥ ૧૩॥

પરશું મન્ત્રયામાસ સંહારાસ્ત્રવિધાનતઃ ।
તત્યાજ દૈત્યસેનાયાં મહાસ્ત્રં યમસન્નિભમ્ ॥ ૧૪॥

હતાઃ પરશુના દૈત્યા યત્ર તત્ર સ્થિતા મૃધે ।
પશ્યતો દૈત્યરાજસ્ય પ્રધાનાશ્ચ મૃતાઃ સુતાઃ ॥ ૧૫॥

સંહારાસ્ત્રનિવૃત્ત્યર્થં નાનાયત્નમથાકરોત્ ।
સર્વં તન્નિષ્ફલં જાતં ગજદૈત્યસ્ય સંયુગે ॥ ૧૬॥

એક એવ મહાદૈત્યો વરદાનપ્રભાવતઃ ।
સ સંહારાદુર્વરિતો હતઃ પરશુના ન ચ ॥ ૧૭॥

તતો દૈત્યો યયૌ ક્રોધાત્સમીપે વિઘ્નપસ્ય ચ ।
શસ્ત્રાણિ સહસા ત્યક્ત્વા મલ્લયુદ્ધોદ્યતોઽભવત્ ॥ ૧૮॥

તાદૃશં તં ગણેશાનો દૃષ્ટ્વા ક્રોધસમન્વિતઃ ।
દર્શયામાસ દૈત્યાય રૂપં સ્વાનન્દગં પરમ્ ॥ ૧૯॥

અનન્તાદિત્યસઙ્કાશં ગજવક્ત્રવિરાજિતમ્ ।
જ્યોતિષાં જ્યોતિરાપૂર્ણં યોગરૂપં સુશાન્તિદમ્ ॥ ૨૦॥

તં ધર્તું દૈત્યરાજઃ સ્મ યતતે નિકટસ્થિતમ્ ।
આકાશવન્ન તદ્રૂપં હસ્તગં ચાઽભવત્ પ્રભોઃ ॥ ૨૧॥

આશ્ચર્યં હૃદયે મત્વા દૈત્યેશો વિહ્વલો ભૃશમ્ ।
અહો મયા ધૃતો ઢુણ્ઢિર્હસ્તગો મે ન હસ્તગઃ ॥ ૨૨॥

કિમિદં કૌતુકં પૂર્ણં ગણેશોઽયં સનાતનઃ ।
બ્રહ્માકારો ન સન્દેહો હનિષ્યતિ સ માં ધ્રુવમ્ ॥ ૨૩॥

ધન્યં જન્મ મદીયં વૈ પિતરાવાશ્રમાદિકમ્ ।
ગણેશહસ્તશસ્ત્રેણ મરિષ્યામિ ન સંશયઃ ॥ ૨૪॥

શુકાદ્યા યોગિનો યં વૈ પ્રાપ્તા યોગૈઃ સુદુશ્ચરૈઃ ।
આયાસેન વિના સોઽયં મયા પ્રાપ્તો ગજાનનઃ ॥ ૨૫॥

(Page ખં. ૨ અ. ૩૪ પાન ૭૦)
તં પ્રણમ્ય મહાભક્ત્યા દૈત્યેશો વરકાઙ્ક્ષયા ।
જગાદ ગણનાથં વૈ ભાવભાવિતમાદરાત્ ॥ ૨૬॥

બ્રહ્મ બ્રહ્મેશ જહિ માં દાસં તે ગણનાયક ।
વરં પ્રયચ્છ મે ત્વેનં નમામિ ત્વાં પુનઃ પુનઃ ॥ ૨૭॥

ન સંસારસુખે ચિત્તં મદીયં તે પ્રદર્શનાત્ ।
ત્વયા હતો ભવિષ્યામિ બ્રહ્મભૂતો ન સંશયઃ ॥ ૨૮॥

પ્રાર્થયન્તં મહાદૈત્યમઙ્કુશેન જઘાન તમ્ ।
ગણેશઃ સોઽપિ સાયુજ્યં તસ્ય પ્રાપ્તઃ પ્રજાપતે ॥ ૨૯॥

શઙ્કરાદ્યાઃ સુરાસ્તત્ર મુનયો મોહસંયુતાઃ ।
ન વિદુશ્ચેષ્ટિતં તસ્ય બભ્રુર્ભ્રાન્તા ઇવ સ્થિતાઃ ॥ ૩૦॥

હતં દૈત્યં સમાલોક્ય હર્ષિતાસ્તે તદાઽભવન્ ।
ગણેશોઽપિ સ્વકં રૂપં લીનં કૃત્વા સ્થિતઃ પુરઃ ॥ ૩૧॥

પૂર્વાકારં ચ તં દૃષ્ટ્વા તુષ્ટુવુસ્તે સુરર્ષયઃ ।
સમ્પૂજ્ય ભક્તિભાવેન નેમુશ્ચ નનૃતુઃ પુરઃ ॥ ૩૨॥

દેવર્ષય ઊચુઃ ।
નમસ્તે ગજવક્ત્રાય ગજાનનસુરૂપિણે ।
પરાશરસુતાયૈવ વત્સલાસૂનવે નમઃ ॥ ૩૩॥

વ્યાસભ્રાત્રે શુકસ્યૈવ પિતૃવ્યાય નમો નમઃ ।
અનાદિગણનાથાય સ્વાનન્દાવાસિને નમઃ ॥ ૩૪॥

રજસા સૃષ્ટિકર્ત્રે તે સત્ત્વતઃ પાલકાય વૈ ।
તમસા સર્વસંહર્ત્રે ગણેશાય નમો નમઃ ॥ ૩૫॥

પ્રકૃતેઃ પુરુષસ્યાપિ રૂપિણે પરમાત્મને ।

બોધાકારાય વૈ તુભ્યં કેવલાય નમો નમઃ ॥ ૩૬॥

સ્વસંવેદ્યાય દેવાય યોગાય ગણપાય ચ ।
શાન્તિરૂપાય તુભ્યં વૈ નમસ્તે બ્રહ્મનાયક ॥ ૩૭॥

વિનાયકાય વીરાય ગજદૈત્યસ્ય શત્રવે ।
મુનિમાનસનિષ્ઠાય મુનીનાં પાલકાય ચ ॥ ૩૮॥

દેવરક્ષાકરાયૈવ વિઘ્નેશાય નમો નમઃ ।
વક્રતુણ્ડાય ધીરાય ચૈકદન્તાય તે નમઃ ॥ ૩૯॥

ત્વયાઽયં નિહતો દૈત્યો ગજનામા મહાબલઃ ।
બ્રહ્માણ્ડે મૃત્યુસંહીનો મહાશ્ચર્યં કૃતં વિભો ॥ ૪૦॥

હતે દૈત્યેઽધુના કૃત્સ્નં જગત્ સન્તોષમેષ્યતિ ।
સ્વાહાસ્વધાયુતં પૂર્ણં સ્વધર્મસ્થં ભવિષ્યતિ ॥ ૪૧॥

એવમુક્ત્વા ગણાધીશં સર્વે દેવર્ષયસ્તતઃ ।
પ્રણમ્ય તૂષ્ણીમ્ભાવં તે સમ્પ્રાપ્તા વિગતજ્વરાઃ ॥ ૪૨॥

કર્ણૌ સમ્પીડ્ય ગણપચરણે શિરસો ધ્વનિઃ ।
મધુરઃ પ્રકૃતસ્તૈસ્તુ તેન તુષ્ટો ગજાનનઃ ॥ ૪૩॥

તાનુવાચ મદીયા યે ભક્તાઃ પરમભાવિતાઃ ।
તૈશ્ચ નિત્યં પ્રકર્તવ્યં ભવદ્ભિર્નમનં યથા ॥ ૪૪॥

તેભ્યોઽહં પરમપ્રીતો દાસ્યામિ મનસીપ્સિતમ્ ।
એતાદૃશં પ્રિયં મે ચ નમનં નાત્ર સંશયઃ ॥ ૪૫॥

એવમુક્ત્વા સ તાન્ સર્વાન્ સિદ્ધિબુદ્ધ્યાદિસંયુતઃ ।
અન્તર્દધે તતો દેવા મુનયઃ સ્વસ્થલં યયુઃ ॥ ૪૬॥

પિતા પરાશરસ્તસ્ય માતા વૈ વત્સલા પ્રભોઃ ।
શોકસાગરમગ્નૌ તૌ શ્રુત્વા વાર્તાં નિપેતતુઃ ॥ ૪૭॥

તતઃ કારુણિકો દેવસ્તયોશ્ચિત્તપ્રકાશકઃ ।
યોગશાન્તિમયં જ્ઞાનં બોધયામાસ શાશ્વતમ્ ॥ ૪૮॥

મૂર્તિં મદીયાં વૈ કૃત્વા સંસ્થાપ્ય બ્રાહ્મણૈઃ સહ ।
તસ્યાઃ પૂજા પ્રકર્તવ્યા ભવદ્ભ્યાં નિત્યમાદરાત્ ॥ ૪૯॥

દેહવ્યાપારિતા તત્ર કર્તવ્યા હૃદિ શાન્તિદમ્ ।
(Page  ખં. ૨ અ. ૩૪ પાન ૭૧)
યોગરૂપધરં દૃષ્ટ્વા કાલમાક્રમતં સદા ॥ ૫૦॥

એવમુક્ત્વા હૃદિસ્થોઽસૌ ગણેશોંઽતર્દધે તતઃ ।
કૃતવન્તૌ મહાભાગૌ તથા દક્ષસુયોગિનૌ ॥ ૫૧॥

અચલા સ્થાપિતા મૂર્તિઃ સિદ્ધિદા સાઽભવત્પરા ।
દર્શનાન્ મોક્ષદા દક્ષ સકામાનાં પ્રકામદા ॥ ૫૨॥

એતત્તે કથિતં સર્વં ગજાસુરવધાશ્રિતમ્ ।
ચરિતં ગણનાથસ્ય સર્વપાપહરં શુભમ્ ॥ ૫૩॥

યઃ શ઼ૃણોતિ નરો ભક્ત્યા પઠેદ્વા તુ પ્રજાપતે ।
તસ્મૈ ભુક્તિપ્રદં પૂર્ણં મુક્તિદં પ્રભવિષ્યતિ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ગજાસુરવધાખ્યાનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૩૩

## ૨.૩૪ વ્યાસમાહાત્મ્યં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
પરાશરસ્ય પુત્રોઽભૂત્ વ્યાસઃ સાક્ષાજ્જનાર્દનઃ ।
વેદાદિભાગસિદ્ધ્યર્થં દેવૈઃ સમ્પ્રાર્થિતઃ પુરા ॥ ૧॥

સ એવ જ્ઞાનગર્વેણ ન સસ્માર ગજાનનમ્ ।
નમનં ન પ્રકર્તવ્યં મયા વિષ્ણુસ્વરૂપિણા ॥ ૨॥

તતસ્તસ્ય ગતં જ્ઞાનં સકલં વેદશાસ્ત્રજમ્ ।
પ્રયયૌ દુઃખિતસ્તેન બ્રહ્માણં શરણં પુરા ॥ ૩॥

બ્રહ્મણા બોધિતો વ્યાસઃ પુરાણં શ્રુતવાન્ પ્રભોઃ ।
ગાણેશમાદિભૂતં તત્તેન સ જ્ઞાનવાનઽભૂત્ ॥ ૪॥

તપસ્તપ્ત્વા સુવિપુલં ગાણપત્યો બભૂવ હ ।
શાન્તિયોગધરઃ સાક્ષાદ્વ્યાસો નારાયણઃ સ્વયમ્ ॥ ૫॥

તતો વ્યાસેન વેદાનાં શાખા ભિન્નાઃ કૃતાઃ પરાઃ ।

સૌલભ્યાર્થં નરાણાં વૈ કર્માદિજ્ઞાનસિદ્ધયે ॥ ૬॥

આદૌ વેદં યજુઃસંજ્ઞં તં ચતુર્ધા વિભજ્ય સઃ ।
ચાતુર્હોત્રં ચકારૈવ કર્મ સર્વં પ્રજાપતે ॥ ૭॥

યજુષાધ્વર્યવં ચક્રે ઋગ્ભિર્હોતૃત્વમઞ્જસા ।
ઉદ્ગાતૃત્વં ચકારાઽસૌ સામભિઃ સર્વસમ્મતઃ ॥ ૮॥

બ્રાહ્મમેવાકરોદ્વિપ્રોઽથર્વભિઃ સુસમાહિતઃ ।
એવં ચતુર્વિધં કર્મ કૃત્વા માન્યો બભૂવ હ ॥ ૯॥

મન્ત્રૈર્યુક્તા પુરા તેન સંહિતા વિવિધા કૃતા ।
યજ્ઞાર્થં બ્રાહ્મણં પ્રોક્તં યોગાર્થં યદરણ્યકમ્ ॥ ૧૦॥

પૈલં શિષ્યં મહાબુદ્ધિમૃગ્વેદે ભેદધારકમ્ ।
વૈશમ્પાયનમેવં સ યજુષાં ભેદધારકમ્ ॥ ૧૧॥

જૈમિનિં સામવેદસ્ય પારગં પ્રચકાર હ ।
અથર્વધારકં વિપ્રં સુમન્તું મુનિસત્તમઃ ॥ ૧૨॥

તેન ચાષ્ટૌ કૃતા ભેદા ઋગ્વેદસ્ય મહાત્મના ।
ષડશીતિઃ કૃતા ભેદા યજુર્વેદસ્ય વૈ તથા ॥ ૧૩॥

એકં સહસ્રં શાખાનાં સામવેદસ્ય વૈ કૃતમ્ ।
અથર્વણસ્તથા ભેદા કૃતા નવ વિવેકિના ॥ ૧૪॥

પુરાણમેકરૂપં વૈ શિષ્યાય પ્રદદૌ મુનિઃ ।
રોમહર્ષણસંજ્ઞાય સૂતાય નતરૂપિણે ॥ ૧૫॥

પુરાણસ્ય કૃતા ભેદા અષ્ટાદશ મહાત્મના ।
પુરાણોપપુરાણાખ્યા દ્વિવિધા સંહિતા સ્મૃતા ॥ ૧૬॥

બ્રાહ્મં ચ વૈષ્ણવં પાદ્મં શૈવં ભાગવતં તથા ।
(Page ખં. ૨ અ. ૩૪ પાન ૭૨)
ભવિષ્યં બ્રહ્મવૈવર્તં માર્કણ્ડેયં ચ વામનમ્ ॥ ૧૭॥

આગ્નેયં વાયવં માત્સ્યં વારાહં કૌર્મમેવ ચ ।
લૈઙ્ગં ગારુડકં સ્કાન્દં બ્રહ્માણ્ડં ચ પ્રજાપતે ॥ ૧૮॥

અષ્ટાદશ પુરાણાનિ કથિતાનિ વિશેષતઃ ।
તથૈવોપપુરાણાનિ કથયામિ પ્રજાપતે ॥ ૧૯॥

ગાણેશં નારદીયં ચ નારસિંહં ચ કાપિલમ્ ।
નાન્દિકેયં ચ વારુણ્યં દૌર્વાસસમથામ્બિકમ્ ॥ ૨૦॥

કાલિકેયં ચ મારીચમૌશનસં ચ ભાર્ગવમ્ ।
સાનત્કુમારકં ચૈવ કૌમારં ચ પ્રજાપતે ॥ ૨૧॥

માહેશ્વરં ચ સૌરં વૈ પારાશર્યં ચ મૌદ્ગલમ્ ।
અષ્ટાદશ પુરાણાનિ કથિતાનિ સમાસતઃ ॥ ૨૨॥

ધર્માધર્મવ્યવસ્થાર્થં ચક્રે ભારતમુત્તમમ્ ।
એતત્સર્વં સ જગ્રાહ વ્યાસાત્ સૂતો મહામતિઃ ॥ ૨૩॥

એતાનિ ગાણપત્યાનિ જ્ઞાતવ્યાનિ વિચક્ષણૈઃ ।
અન્યાનિ સેતિહાસાનિ ગણેશસ્તુતિમન્તિ વૈ ॥ ૨૪॥

શ્રુત્વા સુવચનં તસ્ય મોહિતા મુનયઃ પુનઃ ।
ઊચુઃ સૂતં મહાપ્રજ્ઞં સંશયચ્છેદનાય તે ॥ ૨૫॥

શૌનકાદ્યા ઊચુઃ ।
કથં સૂત શિવાદીનાં પુરાણાનિ મહામતે ।
પ્રોક્તાનિ ગાણપત્યાનિ વદ સંશયમુક્તયે ॥ ૨૬॥

તેષાં વચનમાકર્ણ્ય સૂતઃ સર્વાર્થકોવિદઃ ।
જગાદ તાન્ મહાબુદ્ધિઃ સંશયચ્છેદનં વચઃ ॥ ૨૭॥

સૂત ઉવાચ ।
ગણેશસ્ય સ્વરૂપં યત્ પઞ્ચધા વ્યાસભાષિતમ્ ।
જ્ઞાતવ્યં મુનિશાર્દૂલાસ્તેષાં ભેદં વદામ્યહમ્ ॥ ૨૮॥

આદ્યં બ્રાહ્મં પુરાણં યદ્ગાણપત્યં પ્રકીર્તિતમ્ ।
નિર્ગુણો ગણપસ્તત્ર વર્ણિતો બ્રહ્મવાચકઃ ॥ ૨૯॥

હૃદયેષુ જનાનાં વૈ બુદ્ધીનાં યત્ પ્રકાશકૃત્ ।
તદેવ તસ્ય રૂપં તદ્ધ્યાયન્તિ ત્યાગિનઃ પ્રભોઃ ॥ ૩૦॥

આકારાદિ વિહીનં તત્ સાક્ષિભૂતં સદા પરમ્ ।
મનોવાણીવિહીનં ચ જ્ઞાતવ્યં ન્યાસિભિર્મુને ॥ ૩૧॥

તં ધ્યાયન્તિ મહાભાગા યોગિનશ્ચ ચતુર્વિધાઃ ।

સંન્યાસિનો હૃદિસ્થં તે ગણેશં બુદ્ધિચાલકમ્ ॥ ૩૨॥

અન્યદન્ત્યં પુરાણં યદ્બ્રહ્માણ્ડં ગણપસ્ય તત્ ।
તત્રોઙ્કારમયાકારઃ સગુણો વર્ણિતઃ પ્રભુઃ ॥ ૩૩॥

જગદ્વિહારકારી સ પઞ્ચધા પ્રબભૂવ હ ।
પ્રણવઃ પ્રણવાકારો ગજાનન ઉદાહૃતઃ ॥ ૩૪॥

અકારોકારકો ચૈવ મકારો નાદ આબભૌ ।
બિન્દુઃ પઞ્ચ વિભજ્યાત્મા નાનાખેલં કરોતિ સઃ ॥ ૩૫॥

જગદાકારરૂપેણ સ્થિતં વિઘ્નેશમાદરાત્ ।
ધ્યાયન્તિ જગદાત્માનં પ્રણવાકૃતિલક્ષણમ્ ॥ ૩૬॥

સ્મરન્તિ તં દ્વિજા નિત્યં વેદાદૌ કર્મસિદ્ધયે ।
બ્રહ્માણ્ડાકારવિઘ્નેશઃ સગુણઃ પરિકીર્તિતઃ ॥ ૩૭॥

તથૈવોપપુરાણેષુ ગાણેશં ચાદ્યમઞ્જસા ।
પુરાણં તદ્ગણેશસ્ય ભિન્નમૂર્તિધરસ્ય ચ ॥ ૩૮॥

સગુણં જગદાકારં નિર્ગુણં બુદ્ધિચાલકમ્ ।
તયોર્જ્ઞાનપ્રસિદ્ધ્યર્થં મૂર્તિમન્તં સ્તુવન્તિ તે ॥ ૩૯॥

ગજવક્ત્રાદિચિહ્નૈશ્ચ ચિહ્નિતં ગણનાયકમ્ ।
મન્ત્રાદિના ભજન્તે તં ભાવયુક્તા મહર્ષયઃ ॥ ૪૦॥

તસ્યોપાસનમાત્રેણ સગુણં નિર્ગુણં તથા ।
સુલભં પ્રાપ્યતે બ્રહ્મ યોગિભિસ્તાપસોત્તમૈઃ ॥ ૪૧॥

અન્ત્યં મૌદ્ગલમેતચ્ચ પુરાણોપનિષત્પરમ્ ।
તત્ર વિઘ્નેશમાહાત્મ્યં યોગાકારં પ્રકીર્તિતમ્ ॥ ૪૨॥

(Page ખં. ૨ અ. ૩૫ પાન ૭૩)
સગુણં નિર્ગુણં બ્રહ્મ મૂર્તિરૂપધરં મુને ।
ત્રયાણાં યોગરૂપં વૈ મુદ્ગલેન પ્રકાશિતમ્ ॥ ૪૩॥

યોગિનઃ શુકમુખ્યાસ્તં પ્રભજન્તિ યથાતથમ્ ।
યોગેનાભેદસંજ્ઞેન વર્ણાશ્રમવિવર્જિતાઃ ॥ ૪૪॥

તસ્માદાદૌ ગણેશસ્ય પૂજનં સર્વસમ્મતમ્ ।
અન્તે સોઽપિ ન સન્દેહો વેદાન્તેષુ વિશેષતઃ ॥ ૪૫॥

ય આદિઃ પ્રલયાન્તે સ તિષ્ઠેદ્વૈ સર્વસમ્મતમ્ ।
તસ્માદાદ્યન્તભાગેષુ પુરાણેષુ ગણેશ્વરઃ ॥ ૪૬॥

પઞ્ચમં મધ્યરૂપં ચ ગણેશસ્ય મહાત્મનઃ ।
કલાંશેન પ્રસઙ્ખ્યાતં નામરૂપધરં મુને ॥ ૪૭॥

શિવવિષ્ણ્વાદિભેદૈશ્ચ સ ખેલતિ ગજાનનઃ ।
તેષાં મધ્યે પુરાણાનિ વ્યાસેન કથિતાનિ વૈ ॥ ૪૮॥

તસ્માત્ સર્વપુરાણેષુ ગણેશસ્યૈવ વર્ણનમ્ ।
કથિતં નાત્ર સન્દેહો વ્યાસેનામિતબુદ્ધિના ॥ ૪૯॥

ઇદં પઞ્ચવિધં રૂપં ગણેશસ્ય મહાત્મનઃ ।
યો જાનાતિ નરઃ સોઽપિ મોહહીનો ભવિષ્યતિ ॥ ૫૦॥

ચતુર્વિધં ગણેશસ્ય પૂજનં કથિતં સદા ।
સર્વારમ્ભેષુ સિદ્ધીનાં દાયકં ભક્તિકારિણે ॥ ૫૧॥

મૂર્તિપૂજનમેકં ચ દ્વિતીયં પ્રણવાત્મકમ્ ।
તૃતીયં બુદ્ધિદં ચૈવ શાન્તિરૂપં ચતુર્થકમ્ ॥ ૫૨॥

અત આદૌ જનાઃ કેચિદ્ ગ્રન્થેષુ બ્રહ્મરૂપકમ્ ।
સ્મરન્તિ વા પૂજયન્તિ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૫૩॥

કેચિદ્ બુદ્ધિપ્રદં દેવં હૃદિસ્થં સંસ્મરન્તિ વા ।
પૂજયન્તિ દ્વિજેન્દ્રાદ્યાઃ સર્વદા ગણનાયકમ્ ॥ ૫૪॥

કેચિદોઙ્કારરૂપં તં પૂજયન્તિ સ્મરન્તિ વા ।
સર્વાદૌ સર્વસિદ્ધીનાં દાયકં વિઘ્નનાયકમ્ ॥ ૫૫॥

કેચિન્ મૂર્તિધરં દેવં પૂજયન્તિ સ્મરન્તિ વા ।
સર્વાદૌ ગણનાથં ચ જ્ઞાતવ્યં શાસ્ત્રસમ્મતમ્ ॥ ૫૬॥

અત આદૌ તથા મધ્યે સર્વાંઽતે સ ગજાનનઃ ।
શોભતે યોગરૂપેણ શાન્તિદો ભક્તવત્સલઃ ॥ ૫૭॥

બ્રહ્મણા બોધિતો વ્યાસો ગાણપત્યઃ પ્રતાપવાન્ ।
ગણેશપ્રાપ્તિકામાર્થં નાનાભેદં ચકાર સઃ ॥ ૫૮॥

વાસનાચ્છેદનાર્થં ચ જનાનાં યોગસિદ્ધયે ।

શિવાદીનાં પુરાણાનિ ક્રમાર્થં વર્ણિતાનિ વૈ ॥ ૫૯॥

એતદ્વ્યાસસ્ય માહાત્મ્યં કથિતં સકલં તવ ।
યઃ શ‍ૃણોતિ નરો ભક્ત્યા પઠેદ્વૈ તસ્ય સર્વદમ્ ॥ ૬૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે વ્યાસમાહાત્મ્યં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૩૪

## ૨.૩૫ શુકોપાખ્યાનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
વ્યાસસ્યાઽપિ સુતો જજ્ઞે શુકઃ સાક્ષાચ્છિવઃ સ્વયમ્ ।
તપસારાધિતસ્તેન યોગિનાં સ શિરોમણિઃ ॥ ૧॥

શુકો ગર્ભાદ્વિનિઃસૃત્ય સઙ્ગભીત્યાઽપલાયત ।
સઙ્ગેન જ્ઞાનભઙ્ગો વૈ જાયતે વિષયાત્મનામ્ ॥ ૨॥

તં ગચ્છન્તં સમાલોક્ય વ્યાસો વૈ ધાવિતોઽભવત્ ।
બોધયન્ હેતુભિર્વાક્યૈર્નાનાક્રમમયૈઃ સુતમ્ ॥ ૩॥

તિષ્ઠ તિષ્ઠ મહાયોગિન્ શ‍ૃણુ મે પરમં વચઃ ।
પ્રથમં બ્રહ્મચર્યં ચ તતો ગાર્હસ્થ્યમઞ્જસા ॥ ૪॥

તતો વનાશ્રમઃ પ્રોક્તસ્તતઃ સન્યાસ આદરાત્ ।
ક્રમેણ સેવિતા એતે તદા યોગઃ સુસિધ્યતિ ॥ ૫॥

અન્યથા સહસા કૃત્વા યોગભ્રષ્ટો નરો ભવેત્ ।
અથવા ભ્રષ્ટભાવેન નારકી ધર્મનાશતઃ ॥ ૬॥

અતો મનોજયાર્થં ત્વં ક્રમમાર્ગં સમાચર ।
અન્તે યોગીન્દ્રસંસેવ્યો ભવિષ્યસિ ન સંશયઃ ॥ ૭॥

સહસા મા ચર ત્વં વૈ ત્યાગં પરમદુસ્તરમ્ ।
મનશ્ચઞ્ચલભાવેન પતિષ્યસિ ન સંશયઃ ॥ ૮॥

ઇત્યાદ્યૈર્વિવિધૈર્વાક્યૈઃ સુતો વ્યાસેન બોધિતઃ ।
સઙ્ગસ્યૈવ ભયાદ્યોગી ન બુબોધ શુકો મુને ॥ ૯॥

વ્યાસોઽપિ ભાવિ ચ જ્ઞાત્વા યયૌ સ્વસ્યાશ્રમં સ્વયમ્ ।

ગણેશં મનસા ધ્યાત્વા સંસ્થિતશ્ચિન્તયાન્વિતઃ ॥ ૧૦॥

એતસ્મિન્નન્તરે તત્ર બ્રહ્મા સ્વયમુપાગતઃ ।
તં પ્રણમ્ય શુકસ્યાઽપિ વૃત્તાન્તમવદન્મુનિઃ ॥ ૧૧॥

તતસ્તં પ્રત્યુવાચાથ બ્રહ્મા ચિન્તાં તુ મા કુરુ ।
શુકો ન ભવિતા શમ્ભુર્ભ્રષ્ટો વૈ નાત્ર સંશયઃ ॥ ૧૨॥

એવમાશ્વાસ્ય તં વ્યાસં તસ્ય પૂજાં પ્રગૃહ્ય સઃ ।
યયૌ સ્વભવનં બ્રહ્મા વ્યાસો વૈ હર્ષિતોઽભવત્ ॥ ૧૩॥

શુકઃ સ નર્મદાતીરે સંસ્થિતો યોગસેવયા ।
સર્વત્ર બ્રહ્મભાવેનાચિન્તયદ્બ્રહ્મ શાશ્વતમ્ ॥ ૧૪॥

સમ્પ્રજ્ઞાતોઽષ્ટધા તેન સાધિતો વેદમાર્ગતઃ ।
અસમ્પ્રજ્ઞાતયોગેષુ સંસ્થિતો યોગિસત્તમઃ ॥ ૧૫॥

શુકેશ્વરસ્તત્ર સાક્ષાચ્છઙ્કરસ્તિષ્ઠતિ પ્રભુઃ ।
શિવેન હૃદિ સંસ્થેન બોધિતો બાદરાયણિઃ ॥ ૧૬॥

ગુરુણા તેન હીનોઽયં શુકો યોગં સમભ્યસત્ ।
યોગભૂમિક્રમેણૈવાસાધયદ્યોગમુત્તમમ્ ॥ ૧૭॥

સ્વત ઉત્થાનકં બ્રહ્મ સાધયિત્વા વિધાનતઃ ।
પ્રાપ્તં પરત ઉત્થાનં તેન સાઙ્ખ્યં મહાત્મના ॥ ૧૮॥

તત્ર બ્રહ્મણિ સંસક્તો યોગાભેદેન કેવલે ।
બભ્રામ પૃથિવીં સર્વાં વિદેહોઽસૌ મહામુનિઃ ॥ ૧૯॥

બ્રહ્મ સાઙ્ખ્યં નિરાધારં દૃષ્ટ્વા સંશયવાનભૂત્ ।
તદર્થં જનકં સોઽપિ યયૌ હર્ષસમન્વિતમ્ ॥ ૨૦॥

જનકેન તથા સાઙ્ખ્યં વિદેહં કથિતં પરમ્ ।
તતઃ સંશયહીનશ્ચ જાતો વૈયાસકિઃ પ્રભુઃ ॥ ૨૧॥

સાઙ્ખ્યે બોધસ્ય નાશઃ સ્યાત્તત્ દૃષ્ટ્વા વિસ્મિતો મુનિઃ ।
વિચારમકરોચ્ચિત્તે યોગભાવેન ભાવિતઃ ॥ ૨૨॥

બોધેનોત્થાનકં જન્તોર્જાયતે નાત્ર સંશયઃ ।
બોધહીનેન યોગેનોત્થાનં નાસ્ય ભવેત્ કદા ॥ ૨૩॥

બ્રહ્મ યોગમયં પ્રોક્તં તત્રોત્થાનવિહીનતા ।
ઉત્થાનં વિદ્યતે નૈવ બ્રહ્માકારં પ્રવર્તતે ॥ ૨૪॥

સાઙ્ખ્યં બ્રહ્મ વિદેહત્વાન્મતં ચોપાધિવર્જિતમ્ ।
ન મુખ્યં શાન્તિદં પ્રોક્તં યોગીન્દ્રૈર્યોગચિન્તકૈઃ ॥ ૨૫॥

વ્યાસેન વેદશાખાશ્ચ કૃતા ભિન્ના મહાત્મના ।
પુરાણાનિ વિભિન્નાનિ કૃતાનિ સમવેદિના ॥ ૨૬॥

અહં તં શરણં યામિ તાતં શાન્ત્યર્થમાદરાત્ ।
સ એવ સર્વવિત્ સાક્ષાચ્છાન્તિદાતા ભવિષ્યતિ ॥ ૨૭॥

વિચાર્ય મતિમાનેવં શુકો હર્ષસમન્વિતઃ ।
આગત્ય નિકટે તસ્ય તં નનામ કૃતાઞ્જલિઃ ॥ ૨૮॥

તત્ર વ્યાસોઽપિ યોગિભ્યઃ પ્રાવદદ્યોગમુત્તમમ્ ।
તં શ્રુત્વા હર્ષિતો ભૂત્વા શુકો વચ ઉવાચ તમ્ ॥ ૨૯॥

સ્વામિઞ્છૃણુ મદીયં વૈ પ્રશ્નં યોગપ્રસિદ્ધયે ।
શાન્તિયોગસ્ય દાતા કઃ કીદૃશો યોગ ઉત્તમઃ ॥ ૩૦॥

(Page ખં. ૨ અ. ૩૬ પાન ૭૫)
વદ માં કરુણાસિન્ધો યોગિભ્યો યોગદાયક ।
યોગીન્દ્રસ્ત્વં ન સન્દેહો ભ્રાન્ત્યાઽહં ભ્રમિતોઽભવમ્ ॥ ૩૧॥

શુકસ્ય વચનં શ્રુત્વા તં વ્યાસઃ પ્રત્યુવાચ હ ।
શ ૃણુષ્વ ત્વં મહાભાગ યોગં શાન્તિપ્રદાયકમ્ ॥ ૩૨॥

ગણેશઃ શાન્તિરૂપશ્ચ યોગશાન્તિપ્રદાયકઃ ।
તં ભજસ્વ મહાયોગિન્ તેન શાન્તો ભવિષ્યસિ ॥ ૩૩॥

બ્રહ્મણા બોધિતોઽહં તં ભજામિ ગણનાયકમ્ ।
તેન સર્વજ્ઞતાં યાતો યોગીન્દ્રૈઃ સેવિતોઽભવમ્ ॥ ૩૪॥

ગણો ધાતુઃ સમૂહે ચ કથિતો નાત્ર સંશયઃ ।
બાહ્યાન્તરાદિસંયોગે સમૂહો ભવતિ પ્રભો ॥ ૩૫॥

બ્રહ્મરૂપાઃ સમૂહાશ્ચ તેષાં સ્વામી ગણેશ્વરઃ ।
સંયોગાયોગયોગેન પ્રાપ્યતે યોગિભિઃ પરઃ ॥ ૩૬॥

એવમુક્ત્વા ગણેશસ્ય વેદપાદસ્તવં દદૌ ।

રચિતં વિષ્ણુના પૂર્વં શાન્તિયોગપ્રદાયકમ્ ॥ ૩૭॥

યેન વિષ્ણુઃ સુશાન્તોઽભૂદિહલોકે સુખાત્મકઃ ।
જાતઃ પાલકભાવેન ભગવન્નામધારકઃ ॥ ૩૮॥

પ્રગૃહ્ય સાધયામાસ શુકસ્તં પરમાદ્ભુતમ્ ।
ગાણપત્યો બભૂવાથ યોગિવન્દ્યો મહાદ્યુતિઃ ॥ ૩૯॥

નિત્યં ગણેશમાહાત્મ્યં વેદપાદસ્તવં શુકઃ ।
જપતિ સ્નેહભાવેન દિવાનક્તમખણ્ડિતમ્ ॥ ૪૦॥

એતચ્છુકસ્ય માહાત્મ્યં કથિતં તે પ્રજાપતે ।
પઠતે શ‍ૃણ્વતે સર્વસુખદં પ્રભવેત્ પરમ્ ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે શુકોપાખ્યાનં નામ પઞ્ચત્રિંશોઽધ્યાયઃ ॥ ૨.૩૫

## ૨.૩૬ ગૌતમચરિતં નામ ષટ્ત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
ત્રયઃ પુત્રા અઙ્ગિરસો બભૂવુર્બ્રહ્મવાદિનઃ ।
ગાણપત્યા મહાભાગાઃ સર્વજ્ઞાઃ સુખદાયિનઃ ॥ ૧॥

ઉતથ્યઃ પ્રથમઃ પ્રોક્તો દ્વિતીયસ્તુ બૃહસ્પતિઃ ।
સંવર્તશ્ચ તૃતીયોઽભૂદ્યોગશાસ્ત્રપરાયણઃ ॥ ૨॥

શિક્ષિતોઙ્ગિરસા પુત્ર ઉતથ્યઃ સ્વલ્પકાલતઃ ।
બ્રહ્મભૂતોઽભવત્સદ્યો ગાણપત્યો વિશેષવિત્ ॥ ૩॥

બૃહસ્પતિઃ ક્રમેણૈવ યોગભૂમિવિશારદઃ ।
ભૂમીનાં સાધને સક્તોઽભવચ્છૈવઃ સ્વભાવતઃ ॥ ૪॥

તત્ર સ્વાધીનતાં દૃષ્ટ્વા શાન્ત્યર્થં શઙ્કરં યયૌ ।
શિવેન ગણરાજસ્ય મન્ત્રો દત્તઃ ષડક્ષરઃ ॥ ૫॥

શાન્તિયોગસ્ય રૂપં યત્ કથિતં તત્ પ્રવિસ્તરાત્ ।
શિવં નત્વા વનં સોઽપિ યયૌ દક્ષબૃહસ્પતિઃ ॥ ૬॥

સ નિત્યં ગણપં ધ્યાત્વાઽપૂજયત્તં વિધાનતઃ ।

દર્શનાર્થં ગણેશસ્ય લાલસાભૂન્મહામતેઃ ॥ ૭॥

યોગમાર્ગેણ યોગી સ જાતઃ શાન્તિધરઃ સ્વયમ્ ।
ગાણપત્યત્વમાપન્નઃ શિવતુલ્યો બૃહસ્પતિઃ ॥ ૮॥

તુષ્ટસ્તદા ગણેશાનો યયૌ તસ્યાશ્રમં પ્રભુઃ ।
સ્તુતઃ સમ્પૂજિતસ્તેન તુતોષ ગણનાયકઃ ॥ ૯॥

અખણ્ડભક્તિભાવં સ દદૌ તસ્મૈ મહાત્મને ।
અન્તર્ધાય સ્વમાત્માનં ગણેશઃ સ્વાલયં યયૌ ॥ ૧૦॥

પ્રકથ્યતે મહાયોગી તદારભ્ય બૃહસ્પતિઃ ।
(Page ખં. ૨ અ. ૩૬ પાન ૭૬)
બ્રહ્મિષ્ઠાનામયં શ્રેષ્ઠો વિભૂતિપદમાગતઃ ॥ ૧૧॥

સંવર્તઃ પ્રથમં યોગી દ્વેષિતો વૈ વિશેષતઃ ।
યત્ર તત્ર વિભાગાર્થં ગુરુણા ભ્રાતૃભાવતઃ ॥ ૧૨॥

સ સંસારં પરિત્યજ્ય નગ્ન ઉન્મત્તવત્ સ્વયમ્ ।
સહજં બ્રહ્મ કાશીસ્થો ધ્યાયદ્વૈ શાઙ્કરં સદા ॥ ૧૩॥

તતઃ કદાચિદ્રાજેન્દ્રો મરુત્તો યજ્ઞકામ્યયા ।
ઉપાધ્યાયં યયૌ રાજા સ્વર્ગસ્થં તં બૃહસ્પતિઃ ॥ ૧૪॥

તદ્વૃત્તાન્તં સમાદાય દેવેન્દ્રઃ પ્રાબ્રવીદ્ ગુરુમ્ ।
મત્સ્પર્ધિનં મરુત્તં મા યજસ્વ ત્વં બૃહસ્પતે ॥ ૧૫॥

દેવાનાં વા મનુષ્યાણામેકપક્ષધરો ભવ ।
તસ્યૈવ વચસા રાજા ત્યક્તઃ સ ગુરુણા મહાન્ ॥ ૧૬॥

મરુત્તં ક્ષુભિતં જ્ઞાત્વા તં યયૌ નારદો મુનિઃ ।
કાશ્યાં સંવર્તકં રાજન્નાનીય કુરુ સદ્ગુરુમ્ ॥ ૧૭॥

જડોન્મત્તસ્વભાવેન સ તિષ્ઠતિ મુનીશ્વરઃ ।
પ્રાતઃકાલે પ્રણામાર્થં શઙ્કરસ્ય ચ ગચ્છતિ ॥ ૧૮॥

શવં તત્ર સમાગૃહ્ય તિષ્ઠ ત્વં દ્વારિ ભૂમિપમ્ ।
વિમુખશ્ચાત્મહીનં તં દૃષ્ટ્વા ગચ્છતિ વિપ્રપઃ ॥ ૧૯॥

એવમુક્ત્વા ગતો યોગી નારદઃ સોઽપિ હર્ષિતઃ ।
તથા ચકાર ધર્મજ્ઞઃ કાશ્યાં ગત્વા નરાધિપઃ ॥ ૨૦॥

દૃષ્ટ્વા નગ્નં નનામાઽસૌ સ્વગુરું તત્ર ભૂમિપઃ ।
છલિતશ્ચેષ્ટયા દક્ષ ન મુમોચ તથાઽપિ તમ્ ॥ ૨૧॥

સંવર્તસ્તસ્ય વૃત્તાન્તં શ્રુત્વા સ્વયમુપાગતઃ ।
યજ્ઞાર્થં તસ્ય રાજર્ષેરુપાધ્યાયો બભૂવ હ ।
જીવેન તસ્ય વૃત્તાન્તો જ્ઞાતસ્તેનાપિ ભૂમિપઃ ॥ ૨૨॥

છલિતોઽહં ભવિષ્યામિ ગુરુસ્તે ત્યજ મેઽનુજમ્ ॥ ૨૩॥

મરુત્તેન ત્વદીયં વૈ ન ગૃહીતં વચસ્તદા ।
ગુરુણા પ્રેરિતો દેવ ઇન્દ્રો વજ્રં સમાક્ષિપત્ ॥ ૨૪॥

સંવર્તેન ચ તદ્વજ્રં કૃતં મોઘં સમાધિના ।
શરણં તદ્ભયાદિન્દ્રો યયૌ દેવગણૈઃ સ તમ્ ॥ ૨૫॥

તતો દેવગણૈસ્તેન મુનિભિઃ સંસ્કૃતો મખઃ ।
સમાપ્ય યજ્ઞમેતસ્ય સંવર્તઃ સ્વસ્થલં યયૌ ॥ ૨૬॥

સમાધિતત્પરત્વેન જ્ઞાતં તેનાપિ શામ્ભવમ્ ।
સ્વાધીનં તદ્ભવેન્મુખ્યં બ્રહ્મશાન્તિપ્રદં કદા ॥ ૨૭॥

યયાવઙ્ગિરસં પ્રષ્ટું તેન યોગઃ પ્રકાશિતઃ ।
શાન્તિયોગમયઃ સાક્ષાદ્ગણેશઃ પરમાદ્ભુતઃ ॥ ૨૮॥

સંવર્તેન તથા દક્ષ સાધિતો યોગ ઉત્તમઃ ।
શાન્તિરૂપધરો યોગી સંવર્તઃ પ્રબભૂવ હ ॥ ૨૯॥

આગત્ય સંસ્થિતઃ સોઽપિ ક્ષેત્રે સ્વાનન્દરૂપિણિ ।
મયૂરેશં સદા તત્ર સિષેવે ભક્તિતત્પરઃ ॥ ૩૦॥

તેષાં પુત્રા મહાભાગા જાતાઃ સર્વજ્ઞસમ્મતાઃ ।
ક્રમેણાન્તે ચ તે સર્વે ગાણપત્યા બભૂવિરે ॥ ૩૧॥

પ્રોક્તા દીર્ઘતમસ્કાદ્યાસ્તેષાં પુત્રાદિભિસ્તથા ।
ગણેશો મનસા ભક્ત્યાઽખણ્ડભાવેન સન્ધૃતઃ ॥ ૩૨॥

ગૌતમસ્તત્ર મુખ્યશ્ચ શાન્તિમાર્ગપરાયણઃ ।
વિખ્યાતો મુનિવર્ગેષુ સ બભૂવ પ્રજાપતે ॥ ૩૩॥

કદાચિત્ પૃથિવીમધ્યે હ્યનાવૃષ્ટિઃ સુદારુણા ।

બભૂવ દ્વાદશાબ્દાન્ યા તયા સમ્પીડિતં જગત્ ॥ ૩૪॥

પીડાં દૃષ્ટ્વા જનાનાં સ દયાયુક્તો બભૂવ હ ।
ગૌતમં શઙ્કરં દેવં વૃષ્ટિહેતોર્નુનોદ સઃ ॥ ૩૫॥

તતસ્તં શઙ્કરઃ સાક્ષાદવોચદ્ ભક્તમુત્તમમ્ ।
(Page  ખં. ૨ અ. ૩૬ પાન ૭૭)
અનાવૃષ્ટિઃ કૃતા મુખ્યા કાલેન બ્રહ્મરૂપિણા ॥ ૩૬॥

ચાલિતું ન સમર્થસ્તં કોઽપિ બ્રહ્માણ્ડમણ્ડલે ।
અતોભિમાનમુત્સૃજ્ય તિષ્ઠ ત્વં મુનિસત્તમ ॥ ૩૭॥

શિવસ્ય વચનં શ્રુત્વા દુઃખિતસ્તમુવાચ હ ।
ગૌતમો મુનિવર્યશ્ચ વિસ્મિતોઽભૂત્ સ માનસે ॥ ૩૮॥

ગૌતમ ઉવાચ ।
કિમિદં નાથ વદસિ ત્વમીશઃ સર્વસમ્મતઃ ।
કુરુ મે વાઞ્છિતં નોચેદ્દેહત્યાગં કરોમ્યહમ્ ॥ ૩૯॥

ગૌતમસ્યાભિમાનં તં દૃષ્ટ્વા શમ્ભુઃ સુવિસ્મિતઃ ।
ભાવં જ્ઞાત્વા સ્વયં પ્રાહ ગૌતમં મુનિસત્તમમ્ ॥ ૪૦॥

શ ૃણુ ગૌતમ માહાત્મ્યં દેહં ત્યજસિ વૈ વૃથા ।
વિનાયકં ભજસ્વ ત્વં તેન સર્વં ભવિષ્યતિ ॥ ૪૧॥

નાયકેન વિહીનોઽયં સર્વેષાં સ વિશેષતઃ ।
નાયકસ્તેન નામાઽભૂદ્વિનાયક ઇતિ સ્ફુટમ્ ॥ ૪૨॥

વયં તદાજ્ઞયા સર્વે વર્તેમહિ ન સંશયઃ ।
ગમનં વેદમાર્ગેણાસ્માકં સર્વત્ર સમ્મતમ્ ॥ ૪૩॥

ઉત્પથે ગમનં નશ્ચેત્તદા વિઘ્નં કરોતિ સઃ ।
અતસ્ત્વં વિઘ્નરાજં ચ શરણં ગચ્છ ગૌતમ ॥ ૪૪॥

એવમુક્ત્વા મહાદેવો દદૌ તસ્મૈ ષડક્ષરમ્ ।
મન્ત્રરાજં ગણેશસ્ય વિધાનં તસ્ય ચોત્તમમ્ ॥ ૪૫॥

ગૌતમસ્તં પ્રણમ્યાદૌ તપસે વનમાયયૌ ।
સમાધિના મહોગ્રેણ તોષયામાસ વિઘ્નપમ્ ॥ ૪૬॥

એવં વર્ષેણ તં ઢુણ્ઢિર્યયૌ દાતું વરં પ્રભુઃ ।

તં દૃષ્ટ્વા હર્ષિતોઽત્યન્તં નનામ મુનિસત્તમઃ ॥ ૪૭॥

અથર્વશિરસા તેન સંસ્તુતો ગણનાયકઃ ।
પ્રસન્નસ્તમુવાચૈવં વચનં બ્રૂહિ વાઞ્છિતમ્ ॥ ૪૮॥

સ વવ્રે યદિ તુષ્ટોઽસિ ભક્તિં દેહિ દૃઢાં ત્વયિ ।
ગાણપત્યં ચ સમ્પૂર્ણં માં કુરુષ્વ ગજાનન ॥ ૪૯॥

અનાવૃષ્ટિભવં દુઃખં જહિ દેવ વિનાયક ।
એતમેવ વરં યાચે વાઞ્છિતં નાત્ર સંશયઃ ॥ ૫૦॥

તમુવાચ ગણાધ્યક્ષસ્ત્વયોક્તં મુનિસત્તમ ।
તવાશ્રમેઽધુના સર્વં ભવિષ્યતિ ન સંશયઃ ॥ ૫૧॥

સાયઙ્કાલે ચ બીજેભ્યઃ ક્ષિપ્તેભ્યો ભૂમિમણ્ડલે ।
સસ્યાનાં વૈ સમુત્પત્તિઃ પ્રાતઃકાલે ભવિષ્યતિ ॥ ૫૨॥

તૈર્ધાન્યૈર્નિત્યમેવ ત્વં પોષયસ્વ મહામુનીન્ ।
સમાગતાન્ તથાભૂતાન્ સમયે મુનિસત્તમ ॥ ૫૩॥

નિત્યં પ્રમુદિતાઃ સર્વે ભવિષ્યન્તિ તવાશ્રમે ।
સમાગતા નરાઃ સર્વેઽનાવૃષ્ટેર્દુઃખવર્જિતાઃ ॥ ૫૪॥

મદીયા ભક્તિરચલા ભવિષ્યતિ તથા પરા ।
યોગશાન્તિધરઃ પૂર્ણો ભાવી ત્વં મત્પ્રસાદતઃ ॥ ૫૫॥

એવમુક્ત્વા ગણેશાનો ગતઃ સ્વાનન્દકે પુરે ।
ગૌતમો ગાણપત્યશ્ચ તદ્દિનાત્ સમ્બભૂવ હ ॥ ૫૬॥

સ મુનિઃ સ્વાશ્રમે ગત્વા ચકાર ગણપોદિતમ્ ।
અનાવૃષ્ટિભવં દુઃખં જનાનાં સ નિરાકરોત્ ॥ ૫૭॥

તત્રાગતાન્ સ્વયં વિપ્રાન્નાનાદિગ્ભ્યઃ પ્રજાપતે ।
તાન્ સર્વાન્ પોષયામાસ ધાન્યૈર્નિત્યસમુદ્ભવૈઃ ॥ ૫૮॥

ક્રમેણ દ્વાદશાબ્દાસ્તે ગતા વૈ દુસ્તરા મુને ।
તત્ર સર્વત્ર સઞ્જાતા વૃષ્ટિર્વૈ દુઃખહારિણી ॥ ૫૯॥

તતો મુનિગણૈઃ સર્વૈર્વિપરીતં વિચારિતમ્ ।
ગૌતમેન વયં સર્વે પોષિતા નાત્ર સંશયઃ ॥ ૬૦॥

સર્વેષુ ગૌતમો ધન્યસ્તદુત્કર્ષો ભવિષ્યતિ ।
(Page  ખં. ૨ અ. ૩૬ પાન ૭૮)
અત ઉત્કર્ષનાશાર્થં કર્તવ્યં કિં દ્વિજોત્તમાઃ ॥ ૬૧॥

તતસ્તૈર્માયયા ગૌશ્ચ કૃત્વા ગૌતમસન્નિધૌ ।
પ્રેષિતા સા હુતદ્રવ્યં ભક્ષયામાસ વૈ મુનેઃ ॥ ૬૨॥

ગૌતમેન સ્વહસ્તેન તાડિતા મૃદુભાવતઃ ।
સ્પૃષ્ટમાત્રા મમારાઽસૌ પતિતા ગૌર્ધરાતલે ॥ ૬૩॥

તતો હા હા કૃતં સર્વૈર્બ્રાહ્મણૈશ્છદ્મદર્શિભિઃ ।
ગૌતમસ્યાશ્રમે સર્વૈરાપૃચ્છ્ય ગમનં કૃતમ્ ॥ ૬૪॥

ગૌતમેન તપઃ કૃત્વા પ્રાર્થિતા સ્વર્ગવાહિની ।
ત્ર્યમ્બકસ્ય શિરઃસંસ્થા પ્રાદુર્ભૂતા ચ તત્ક્ષણાત્ ॥ ૬૫॥

તત્ર સ્નાનેન સદ્યો વૈ પવિત્રો ગૌતમોઽભવત્ ।
ગોવધાદિમહાપાપં ગચ્છતિ સ્નાનમાત્રતઃ ॥ ૬૬॥

તતઃ કદાચિદ્વિપ્રેશો ગૌતમો ધ્યાનમાશ્રિતઃ ।
વિચારમકરોચ્ચિત્તે જ્ઞાત્વા તેષાં વિચેષ્ટિતમ્ ॥ ૬૭॥

છલનાર્થં દ્વિજૈઃ સર્વૈર્નિર્મિતા ગૌશ્ચ માયયા ।
તતઃ કોપપરીતાઙ્ગઃ શશાપ બ્રાહ્મણાન્ મુનિઃ ॥ ૬૮॥

વેદબાહ્યા ભવિષ્યન્તિ કૃતઘ્ના યે મર્હષયઃ ।
મદીયચ્છલનેનૈવ પાતકેન ન સંશયઃ ॥ ૬૯॥

તતસ્તે શાપયોગેન ભ્રાન્તા જાતા મહર્ષયઃ ।
જ્ઞાત્વાઽકસ્માદ્ દ્વિજાઃ શાપં સમ્ભીતા અભવંસ્તતઃ ॥ ૭૦॥

શઙ્કરં શરણં સર્વે યયુર્દેવં મહર્ષયઃ ।
શઙ્કરઃ સ્મરણં ચક્રે વિષ્ણોશ્ચૈવ સુવિસ્મિતઃ ॥ ૭૧॥

સમાગતં મહાવિષ્ણું પપ્રચ્છ દ્વિજસૌખ્યદમ્ ।
માર્ગં તતો હરિઃ શમ્ભુમુવાચ વચનં હિતમ્ ॥ ૭૨॥

વિષ્ણુરુવાચ ।
વેદબાહ્યદ્વિજાનાં યત્કર્મ સર્વં નિરર્થકમ્ ।
ન ગતિઃ કુત્ર દેહાન્તે તેષાં શમ્ભો ન સંશયઃ ॥ ૭૩॥

અતસ્તેષાં હિતાર્થાય ગ્રન્થાઃ કાર્યાઃ સદાશિવ ।
મોહદાશ્ચ જનાનાં તે ભજતાં નરકપ્રદાઃ ॥ ૭૪॥

તતઃ શિવેન વામં ચ તન્ત્રં તત્ર પ્રકાશિતમ્ ।
વિષ્ણુના બૌદ્ધશાસ્ત્રં વૈ રચિતં મોહદાયકમ્ ॥ ૭૫॥

ઋષિભિશ્ચ તથાન્યાનિ શાસ્ત્રાણિ રચિતાનિ વૈ ।
કાપાલાદીનિ ભો દક્ષ મોહદાનિ વિશેષતઃ ॥ ૭૬॥

ફલાનિ તત્ર દત્તાનિ ભજતાં શમ્ભુનામુના ।
વિષ્ણુના બ્રાહ્મણાનાં ચ કૃતઘ્નાનાં હિતાય વૈ ॥ ૭૭॥

નરા યે તાનિ સેવન્તે નારકાઃ સમ્ભવન્તિ તે ।
ઇહામુત્ર વિહીનાશ્ચ શાસ્ત્રાધારપ્રવર્તિનઃ ॥ ૭૮॥

જનાનાં ભજતાં સર્વે પાપાંશાસ્તે મહર્ષયઃ ।
સ્વલ્પકાલેન નષ્ટાઃ સ્યુઃ કલૌ જન્મધરાસ્તતઃ ॥ ૭૯॥

તત્ર તે પાપકર્માણો ભવિષ્યન્તિ વિશેષતઃ ।
તેષુ માર્ગેષુ સંસક્તાઃ પ્રપતિષ્યન્તિ રૌરવે ॥ ૮૦॥

પુનઃ શુદ્ધા ભવિષ્યન્તિ નરાઃ કૃતયુગે પ્રભો ।
તત્રૈવ યોગમાર્ગેણ ગમિષ્યન્ત્યપુનર્ભવમ્ ॥ ૮૧॥

એવં તેષાં હિતાર્થાય શિવાદ્યૈ રચિતાનિ વૈ ।
શાસ્ત્રાણિ ચતુરૈસ્તાનિ ન સેવ્યાનિ કદાચન ॥ ૮૨॥

વેદાધારયુતં શાસ્ત્રં તદેવ સુખદં પરમ્ ।
તેન હીનં ચ યચ્છાસ્ત્રં મોહકં નરકપ્રદમ્ ॥ ૮૩॥

ન સેવ્યં માનવૈઃ સર્વૈઃ કલિદોષવિવર્જિતૈઃ ।
યુક્તં ગૌતમશાપેન મહાભયકરં મતમ્ ॥ ૮૪॥

કલૌ પાપા વિભૂમાનો ભવિષ્યન્તિ મહર્ષયઃ ।
(Page ખં. ૨ અ. ૩૭ પાન ૭૯)
નરસ્તૈઃ કથિતં શાસ્ત્રં નવામાદિકમાચરેત્ ॥ ૮૫॥

ઇદં ગૌતમમાહાત્મ્યં યઃ શૃણોતિ નરો ભવેત્ ।
પઠેદ્વા મલહીનઃ સન્નિહામુત્ર સુખી પરમ્ ॥ ૮૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

દ્વિતીયે ખણ્ડે એકદન્તચરિતે ગૌતમચરિતં નામ ષટ્ત્રિંશોઽધ્યાયઃ ॥ ૨.૩૬

## ૨.૩૭ નૃસિંહમાહાત્મ્યં નામ સપ્તત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
દિતેઃ પુત્રૌ મહાવીર્યૌ કશ્યપાત્ સમ્બભૂવતુઃ ।
સન્ધ્યાયામૃતુદાનેન દૈત્યૌ પરમદારુણૌ ॥ ૧॥

તાભ્યાં તપ્તં તપો ઘોરં દિવ્યવર્ષસહસ્રકમ્ ।
તયોસ્તપઃપ્રભાવેણ બ્રહ્મા તુ વરદોઽભવત્ ॥ ૨॥

મરણં સર્વભૂતેભ્યો ન ભવેદીપ્સિતં વરમ્ ।
તાભ્યાં દત્ત્વા સ્વયં બ્રહ્મા સ્વસ્થાનમગમત્ પુનઃ ॥ ૩॥

સાયઙ્કાલં ચ શુષ્કાર્દ્રં વિસ્મરન્તૌ મહાસુરૌ ।
તદેવ મરણસ્થાનં તયોર્જાતં પ્રજાપતે ॥ ૪॥

વરપ્રભાવતસ્તાભ્યાં સર્વં ત્રિભુવનં જિતમ્ ।
હિરણ્યકશિપુર્જ્યેષ્ઠશ્ચક્રે વૈ રાજ્યમુત્તમમ્ ॥ ૫॥

કર્મમાર્ગં દ્વિષન્ સર્વં દેવબ્રાહ્મણદુઃખદઃ ।
રાજ્યં ચક્રે સુદુષ્ટાત્મા પરસ્ત્રીમદ્યલાલસઃ ॥ ૬॥

ઉપોષણેન સંયુક્તા દેવા ઇન્દ્રપુરોગમાઃ ।
બ્રહ્માણં તે પુરસ્કૃત્ય શરણ્યં વિષ્ણુમાયયુઃ ॥ ૭॥

તતશ્ચ વિષ્ણુના તત્ર ધૃતં રૂપં ભયપ્રદમ્ ।
નારસિંહં મહોગ્રં વૈ સર્વેભ્યો ભયદાયકમ્ ॥ ૮॥

આયયૌ દૈત્યરાજસ્ય નગરે ક્રોધસંયુતઃ ।
શબ્દૈઃ સભુવનં ઘોરૈર્નાદયામાસ તત્ક્ષણાત્ ॥ ૯॥

ભીતા દૈત્યગણાઃ સર્વે શશંસુસ્તસ્ય ચેષ્ટિતમ્ ।
રાજ્ઞે શ્રુત્વા વચસ્તેષાં હિરણ્યકશિપુઃ સ્વયમ્ ॥ ૧૦॥

દૈત્યૈઃ સમાવૃતો યોદ્ધું યયૌ તેન મહાબલઃ ।
ક્રૂરઃ સમાગતઃ સોઽપિ નૃસિંહાકૃતિધારકઃ ॥ ૧૧॥

મેરુમન્દરસઙ્કાશં વપુર્યસ્ય વિરાજિતમ્ ।

તેજસા વહ્નિસઙ્કાશો યોદ્ધુકામો સુરૈઃ પ્રભો ॥ ૧૨॥

પ્રહ્લાદપ્રમુખૈઃ પુત્રૈઃ સંવૃતો દૈત્યસત્તમઃ ।
નૃસિંહં યોધયામાસ શસ્ત્રાસ્ત્રૈર્મર્મભેદિભિઃ ॥ ૧૩॥

નૃસિંહેન હતા દૈત્યા બહવો રણમણ્ડલે ।
શોણિતૌઘવહા નદ્યઃ સમ્પ્રવૃત્તા દિશો દશ ॥ ૧૪॥

ખડ્ગાદિભિર્મહાસ્ત્રૈશ્ચ નખૈર્યુક્તઃ સ દેવરાટ્ ।
નૃસિંહો યુયુધે તત્ર પ્રલયાગ્નિસમો બભૌ ॥ ૧૫॥

તં દૃષ્ટ્વા પૂર્વસંસ્કારાત્ પ્રહ્લાદસ્ય મહાત્મનઃ ।
વૈષ્ણવં જ્ઞાનમત્યન્તં પ્રાદુર્ભૂતં વિશેષતઃ ॥ ૧૬॥

એતસ્મિન્નન્તરે તત્ર ગદયા તાડિતઃ પ્રભુઃ ।
નૃસિંહો દૈત્યરાજેન પતિતો મૂર્ચ્છયા ભૃશમ્ ॥ ૧૭॥

દ્વિમુહૂર્તાત્ સુસમ્ભૂતઃ સ્વસ્થદેહો મહાબલઃ ।
અશક્તં માનયામાસાત્માનં તેન પલાયત ॥ ૧૮॥

હિરણ્યકશિપુઃ સર્વૈર્વિજયી સ્વગૃહં યયૌ ।
ચકાર વિષ્ણુભક્તિં વૈ પ્રહ્લાદો ભાવસંયુતઃ ॥ ૧૯॥

પિતરં બોધયામાસ વિષ્ણુમાનન્દરૂપિણમ્ ।
શરણં યાહિ સર્વત્ર સમં દૈત્યપતેઽધુના ॥ ૨૦॥

પુત્રસ્ય વચનં શ્રુત્વા ક્રોધાવિષ્ટો મહાસુરઃ ।
મુષ્ટિના તાડયામાસં શત્રુ મે કિં સમાશ્રિતઃ ॥ ૨૧॥

તદાઽપિ દૃઢભાવેન ન ચચાલ સ વૈષ્ણવઃ ।
પ્રહ્લાદશ્ચાધિકાં ભક્તિં ચકાર પ્રેમસંયુતઃ ॥ ૨૨॥

તતો જલે સ્થલે હ્યગ્નૌ હિરણ્યકશિપુઃ સ્વયમ્ ।
વિષૈઃ સોઽપીડયત્પુત્રં નિષ્ફલો વિષ્ણુના કૃતઃ ॥ ૨૩॥

શસ્ત્રૈરસ્ત્રાદિભિઃ પુત્રમારણાય સમુદ્યતઃ ।
પ્રહ્લાદો ન મમારાઽસૌ રક્ષિતો વિષ્ણુના સદા ॥ ૨૪॥

એવં પિતુઃ સુતસ્યાઽપિ દ્વન્દ્વે પ્રાપ્ત પ્રજાપતે ।
કાલે ક્રાન્તે તુ કિઞ્ચિદ્વૈ નૃસિંહચરિતં શ૱ૃણુ ॥ ૨૫॥

વૈકુણ્ઠે સુખમાસીનં નારાયણમનામયમ્ ।
યયૌ તત્ર નૃસિંહસ્તં પ્રણનામ ભયાતુરઃ ॥ ૨૬॥

વૃત્તાન્તં નૃહરેસ્તસ્ય શ્રુત્વા સોઽપિ સુવિસ્મિતઃ ।
કારણં ચિન્તયામાસ વિચારેણ જનાર્દનઃ ॥ ૨૭॥

ગણેશં વૈ વિસ્મૃતવાન્ તતો દૈત્યો ન નિર્જિતઃ ।
અષ્ટાક્ષરં ગણેશસ્ય મન્ત્રં તસ્મૈ દદૌ સ્વયમ્ ॥ ૨૮॥

વને સોઽપિ સમાસીનસ્તતાપ પરમં તપઃ ।
નિરાહારેણ સંયુક્તોઽધ્યાયત્તં ગણપં હૃદિ ॥ ૨૯॥

એકવર્ષે ગતે તત્ર યયૌ વિઘ્નપતિઃ સ્વયમ્ ।
વરેણ ચ્છન્દયામાસ નૃસિંહં ભક્તમુત્તમમ્ ॥ ૩૦॥

પ્રણમ્યાપૂજ્ય વિઘ્નેશં પરમેશં કૃતાઞ્જલિઃ ।
સૂક્તૈર્ગાણેશસંજ્ઞૈસ્તં તુષ્ટાવ નૃહરિઃ સ્વયમ્ ॥ ૩૧॥

યયાચે દેવદેવેશં ભક્તિં તે દેહિ વિઘ્નપ ।
જયં દૈત્યરણે સ્વામિંસ્તથેતિ ગણપોઽબ્રવીત્ ॥ ૩૨॥

અન્તર્ધાનં ગતઃ સદ્યો ગણેશો ભક્તપાલકઃ ।
નૃસિંહો હર્ષસંયુક્તો દૈત્યં હન્તું યયૌ તતઃ ॥ ૩૩॥

એતસ્મિન્નન્તરે દક્ષ હિરણ્યકશિપુઃ સ્વયમ્ ।
પ્રહ્લાદં હન્તુમારેભે સ્વયં ખડ્ગધરોઽભવત્ ॥ ૩૪॥

પ્રહ્લાદેન સ્મૃતો વિષ્ણુઃ પ્રકટોઽભૂત્તદન્તરે ।
નૃસિંહઃ કાલરૂપશ્ચ તલેનાઽતાડયત્ ખલમ્ ॥ ૩૫॥

મૂર્ચ્છિતો દૈત્યરાજસ્તુ લેભે સંજ્ઞાં મહાબલઃ ।
ગદાં ધૃત્વા નૃસિંહં તં યુયુધે સૈનિકૈઃ સહ ॥ ૩૬॥

નૃસિંહાઙ્ગાત્ સમુદ્ભૂતા નૃસિંહા બહવસ્તતઃ ।
સૈન્યં તન્નાશયામાસુર્હિરણ્યકશિપોઃ પરમ્ ॥ ૩૭॥

તતઃ ક્રોધપરીતાઙ્ગઃ સાયઙ્કાલે દિતેઃ સુતમ્ ।
ધૃત્વા નખૈર્મહાદૈત્યં દારયામાસ કેશવઃ ॥ ૩૮॥

ન શુષ્કાર્દ્રમયૈઃ સ્વસ્ય નખૈસ્તેન વિદારિતઃ ।
મમાર દૈત્યરાજોઽપિ દેવાસ્તં તુષ્ટુવુર્હરિમ્ ॥ ૩૯॥

સ્તુતઃ સમ્પૂજિતો વિષ્ણુર્નૃસિંહો ગણપં સ્મરન્ ।
અન્તર્ધાનં યયૌ સદ્યો દેવાસ્તે સ્વપદં યયુઃ ॥ ૪૦॥

ઇદં નરહરેઃ પ્રોક્તં માહાત્મ્યં યઃ શ ृણોતિ વા ।
પઠતિ પ્રભવેત્તસ્ય સર્વદં નાત્ર સંશયઃ ॥ ૪૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે નૃસિંહમાહાત્મ્યં નામ સપ્તત્રિંશોઽધ્યાયઃ ॥ ૨.૩૭
(Page ખં. ૨ અ. ૩૮ પાન ૮૧)

## ૨.૩૮ વારાહમાહાત્મ્યં નામાષ્ટત્રિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
હિરણ્યકશિપૌ નષ્ટે હિરણ્યાક્ષં ચ દૈત્યપાઃ ।
રાજાનં કારયામાસુઃ સોઽપિ ચક્રે તથાઽખિલમ્ ॥ ૧॥

ભ્રાતુર્વધેન સન્તપ્તો દેવાન્ જિત્વા મહાબલઃ ।
તેષાં મૂલવિનાશાર્થં મતિં ચક્રે ચ દૈત્યપઃ ॥ ૨॥

તત્ર તેન વિચારેણ સમ્પ્રાપ્તં જ્ઞાનમુત્તમમ્ ।
કર્મનાશે ચ દેવાનાં મરણં પ્રભવિષ્યતિ ॥ ૩॥

કર્મરૂપમયં તેષામમૃતં નાત્ર સંશયઃ ।
અન્ને નષ્ટે કથં દેવાઃ સ્થાસ્યન્તિ તનુધારકાઃ ॥ ૪॥

કર્મમૂલમયીં ભૂમિં પ્રગૃહ્ય પ્રયયૌ ખલઃ ।
પાતાલં દૈત્યરાજસ્તુ ખેલયન્ સ્વેચ્છયા સ્વયમ્ ॥ ૫॥

દેવાશ્ચ મુનયો જગ્મુસ્તતઃ સર્વે પ્રજાપતિમ્ ।
નષ્ટે ચરાચરે ભૂમ્યાં શશંસુર્દૈત્યચેષ્ટિતમ્ ॥ ૬॥

બ્રહ્મણા નોદિતાઃ સર્વે વૈકુણ્ઠં જગ્મુરાદરાત્ ।
તુષ્ટુવુસ્તં રમાનાથં શશંસુશ્ચેષ્ટિતં મહત્ ॥ ૭॥

તતઃ સોઽપિ દયાયુક્તઃ સૌકરં રૂપમાસ્થિતઃ ।
કૈલાસે ગણપં ચેષ્ટ્વા યયૌ પાતાલમોજસા ॥ ૮॥

તત્ર દંષ્ટ્રાગ્રસંયુક્તાં પૃથ્વીં કૃત્વા બહિઃ પ્રભુઃ ।
નિર્યયૌ તં હિરણ્યાક્ષો યોદ્ધુકામઃ સમાયયૌ ॥ ૯॥

તતો યુદ્ધં મહાઘોરં તયોર્જાતં પ્રજાપતે ।
શુષ્કાર્દ્રદંષ્ટ્રયા દુષ્ટં સન્ધ્યાકાલે જઘાન સઃ ॥ ૧૦॥

મમાર સહસા દૈત્યો વરાહો ધરણીસુતઃ ।
નિર્ગત્ય સ્થાપયામાસ પૃથ્વીં પૂર્વવદચ્યુતઃ ॥ ૧૧॥

સંસ્થાપ્ય પૃથ્વીં વારાહો મયૂરેશં સમાયયૌ ।
અક્ષરબ્રહ્મરૂપશ્ચ સર્વેભ્યો જ્ઞાનદાયકઃ ॥ ૧૨॥

સ્ત્રીસ્વરૂપેણ પૃથિવી પત્નીભાવેન તં યયૌ ।
કર્મમૂલમયી પ્રોક્તાઽક્ષરાધારા સુખપ્રદા ॥ ૧૩॥

તત્રાનુષ્ઠાનમત્યન્તં ચક્રતુર્ભક્તિતત્પરૌ ।
દૃઢવાસસુસિદ્ધ્યર્થં ક્ષેત્રે સ્વાનન્દરૂપિણિ ॥ ૧૪॥

પ્રસન્નો ભગવાંસ્તત્ર ગણેશો દેવનાયકઃ ।
વરદસ્તૌ યયૌ પ્રીત્યોવાચ સંવૃણુતં વરમ્ ॥ ૧૫॥

તતસ્તાભ્યાં પ્રણમ્યાદૌ પૂજિતો ગણનાયકઃ ।
નામાષ્ટકેન સામ્ના વૈ સંસ્તુતો ભક્તિભાવિતઃ ॥ ૧૬॥

વરં તૌ વૃણુતાં ક્ષેત્રે સ્વાનન્દે દેહિ વિઘ્નપ ।
વાસં ભક્તિસુસિદ્ધ્યર્થં બ્રહ્મભૂતસુખપ્રદે ॥ ૧૭॥

તયોર્વચનમાકર્ણ્ય ગણેશઃ કૃપયા યુતઃ ।
ભક્તિં જ્ઞાત્વા મહોગ્રાં વૈ સૂર્યં પ્રોવાચ હર્ષિતઃ ॥ ૧૮॥

ગણેશ ઉવાચ ।
શુક્લગત્યાત્મકં દ્વારં ત્વદીયં મુક્તિદં પરમ્ ।
તત્ર પૃથ્વી વરાહૌ ચ તવાઙ્ગે કુરુ માનદ ॥ ૧૯॥

તથેતિ કૃતવાન્ સૂર્યઃ સંસ્થિતૌ દ્વારિ તાવુભૌ ।
ઉત્તરાઙ્ગં ગણેશસ્યાશ્રિત્ય પૂજાં પ્રચક્રતુઃ ॥ ૨૦॥

ઇદં વરાહરૂપસ્ય માહાત્મ્યં કથિતં મયા ।
શ્રવણાત્ પઠનાત્ સર્વમુક્તિદં પ્રભવેન્નૃણામ્ ॥ ૨૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે

દ્વિતીયે ખણ્ડે એકદન્તચરિતે વારાહમાહાત્મ્યં નામાષ્ટત્રિંશોઽધ્યાયઃ ॥ ૨.૩૮
(Page ખં. ૨ અ. ૩૯ પાન ૮૨)

## ૨.૩૯ ચ્યવનોત્પત્તિકથનં નામૈકોનચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
તતો દૈત્યપદે રાજા પ્રહ્લાદો વૈષ્ણવોઽભવત્ ।
સ તુ વૈરં સમુત્સૃજ્ય દેવૈઃ સમ્માનિતો બભૌ ॥ ૧॥

ગતે કિયતિ કાલે ચ ગૃહે તસ્ય મહાત્મનઃ ।
વિધાતા દૈત્યરાજસ્યાયયૌ પ્રીત્યા પ્રજાપતે ॥ ૨॥

સ તુ દુષ્ટૈર્મહાદૈત્યૈઃ ક્રમેણ ભ્રંશિતોઽસુરઃ ।
સંસર્ગદોષયુક્તોભૂન્ન તં મેને પિતામહમ્ ॥ ૩॥

ક્રોધેન વિધિના તત્ર શપ્તોઽસૌ વૈષ્ણવાધમઃ ।
જ્ઞાનં પ્રહ્લાદ નષ્ટં ચ ત્વદીયં પ્રભવિષ્યતિ ॥ ૪॥

પ્રહ્લાદમેવં શપ્ત્વા સ યયૌ સ્થાનં નિજં વિધિઃ ।
પ્રહ્લાદશ્ચ તથા દૈત્યૈર્દેવાનાં હનને રતઃ ॥ ૫॥

ન મેને મનસા વિષ્ણું શમ્ભું વામરનાયકમ્ ।
જિત્વા દેવાન્ સમસ્તાન્ સ રાજ્યં ચક્રેઽસુરાધિપઃ ॥ ૬॥

પ્રહ્લાદઃ સ તતો દેવૈર્મિત્રભાવેન ધારિતઃ ।
સહનં કૃતમત્યન્તં તદ્દૌરાત્મ્યસ્ય ચાદરાત્ ॥ ૭॥

દેવૈર્વિષ્ણુસહાયૈશ્ચ કાલેન વિજિતા બલાત્ ।
દૈત્યાઃ પ્રહ્લાદમત્યન્તં સંરક્ષ્ય સુરનાયકૈઃ ॥ ૮॥

સ્વરાજ્યે સંસ્થિતં દૈત્યં પ્રહ્લાદં ચ મહામુનિઃ ।
ભ્રમન્ સમાયયૌ દ્રષ્ટું શક્તો ગૃત્સમદો મહાન્ ॥ ૯॥

તં દૃષ્ટ્વા દૈત્યરાજઃ સ પ્રણનામ મહાયશાઃ ।
સ્વાસને તં સમાવેશ્ય પૂજયામાસ ભક્તિતઃ ॥ ૧૦॥

ભક્તો મુનિવરં દૈત્યઃ પાદસંવાહને સ્થિતઃ ।
ઉવાચ મધુરં વાક્યં પ્રહ્લાદો હર્ષસંયુતઃ ॥ ૧૧॥

પ્રલ્હાદ ઉવાચ ।
ધન્યં મેઽદ્ય કુલં જ્ઞાનં વિદ્યા દાનાદિકં ચ યત્ ।
તવાઙ્ઘ્રિયુગુલં દૃષ્ટ્વા પવિત્રો નાત્ર સંશયઃ ॥ ૧૨॥

મુને યોગીન્દ્રમુખ્યસ્ત્વં તવ દર્શનમુત્તમમ્ ।
ન ભવેત્ પાપકારાણાં ભુક્તિમુક્તિક્રમપ્રદમ્ ॥ ૧૩॥

અહં શપ્તશ્ચ યોગીન્દ્ર વિધિના તેન મોહિતઃ ।
અસુરૈઃ સંવૃતોઽત્યન્તં દુષ્ટકર્મરતોઽભવમ્ ॥ ૧૪॥

સ્ત્રીમદ્યાદિરતો નિત્યં જ્ઞાનહીનો નિરન્તરમ્ ।
દેવાનાં દ્વેષબુદ્ધ્યા વૈ છેદને પ્રયતોઽભવમ્ ॥ ૧૫॥

અધુના પાદપદ્મસ્ય દર્શનેન મહામુને ।
જ્ઞાનસ્ય સ્ફૂર્તિરલ્પા મે સઞ્જાતા નાત્ર સંશયઃ ॥ ૧૬॥

પૂર્વપુણ્યબલેનૈવ જાતં તે દર્શનં મહત્ ।
આસુરી પ્રકૃતિર્મેઽદ્ય ગતા તેન મહામુને ॥ ૧૭॥

વદ જ્ઞાનં મહાયોગિંસ્તારયસ્વ ભવાર્ણવાત્ ।
માં વૈ શરણાર્થિનં વિપ્ર શિષ્યં તે ચ જગદ્ગુરો ॥ ૧૮॥

મુદ્ગલ ઉવાચ ।
એવં સમ્પ્રાર્થિતો દક્ષ મુનિર્ગૃત્સમદો મહાન્ ।
કૃપયા પરયાઽઽવિષ્ટસ્તમુવાચ વિશેષતઃ ॥ ૧૯॥

ગૃત્સમદ ઉવાચ ।
શ ૃણુ પ્રહ્લાદ વક્ષ્યામિ જ્ઞાનં શાન્તિસુખપ્રદમ્ ।
ગણનાથં ભજસ્વ ત્વં વિઘ્નહીનો ભવિષ્યસિ ॥ ૨૦॥

મદાસુરશ્ચ દૈત્યેશો હૃદયે તે પ્રતાપવાન્ ।
આસુરેણ સ્વભાવેન સંસ્થિતો જ્ઞાનખણ્ડકઃ ॥ ૨૧॥

અતસ્તમેકદન્તસ્ય ભજનેન જહિ પ્રભો ।
તદા જ્ઞાનં દૃઢં તે વૈ હૃદયે સંસ્થિતં ભવેત્ ॥ ૨૨॥

ઇતિ તસ્ય વચઃ શ્રુત્વા પ્રહ્લાદસ્તં પુનર્જગૌ ।
કોઽસૌ મદાસુરઃ પાપી હૃદયે તિષ્ઠતિ પ્રભો ॥ ૨૩॥

એકદન્તસ્ય ભજનં કીદૃશં વદ સામ્પ્રતમ્ ।

મદાસુરસ્ય હન્તાઽસૌ કથં જાતો ગજાનનઃ ॥ ૨૪॥

એતત્સર્વં સુવિસ્તાર્ય વદ મહ્યં પ્રયાચતે ।
શિષ્યાય સકલં વિપ્ર યેન જ્ઞાનં દૃઢં ભવેત્ ॥ ૨૫॥

(Page ખં. ૨ અ. ૩૯ પાન ૮૩)
મુદ્ગલ ઉવાચ ।
પ્રહ્લાદસ્ય વચઃ શ્રુત્વા મુનિર્ગૃત્સમદોઽબ્રવીત્ ।
મદાસુરસ્ય માહાત્મ્યમેકદન્તાશ્રિતં પ્રભો ॥ ૨૬॥

ગૃત્સમદ ઉવાચ ।
શ‍ૃણુ પ્રહ્લાદ યત્ પૃષ્ટં તત્સર્વં કથયામિ તે ।
ચરિત્રમેકદન્તસ્ય સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૭॥

એકદા રાક્ષસઃ કશ્ચિદ્યયૌ ભૃગ્વાશ્રમં મહાન્ ।
મહાખલશ્છિદ્રદર્શી સમિદર્થં ગતે મુનૌ ॥ ૨૮॥

સ તત્રૈકાકિનીં વીક્ષ્ય ભૃગુપત્નીં વચોઽબ્રવીત્ ।
સુલોમા કિં ભૃગોઃ પત્ની ત્વં હિ માં વદ સામ્પ્રતમ્ ॥ ૨૯॥

મહ્યં કન્યાં મહીપાલો દાતું સ હ્યુદ્યતોઽભવત્ ।
એતસ્મિન્નન્તરે કન્યા યાચિતા ભૃગુણાઽભવત્ ॥ ૩૦॥

માં ત્યક્ત્વા ભૃગવે કન્યા દત્તા તેન મહીભૃતા ।
તસ્માદ્ભૃગોર્હરિષ્યામિ ભાર્યાં ચાઽહં ન સંશયઃ ॥ ૩૧॥

તસ્ય તદ્વચનં ક્રૂરં શ્રુત્વા તૂષ્ણીં બભૂવ હ ।
સુલોમા સા ભૃગોઃ પત્ની તતઃ સોઽપ્યગ્નિમબ્રવીત્ ॥ ૩૨॥

રાક્ષસ ઉવાચ ।
અગ્ને વદ મહાભાગ ત્વં સાક્ષી સર્વસમ્મતઃ ।
ઇયં પત્ની ભૃગોઃ કિં વાન્યસ્ય સત્યં મહાદ્યુતે ॥ ૩૩॥

રાક્ષસસ્ય વચઃ શ્રુત્વા ન કિઞ્ચિત્તં વચોઽબ્રવીત્ ।
ઉત્તરં શાપભીતોઽસૌ હવ્યવાહઃ પ્રતાપવાન્ ॥ ૩૪॥

પુનસ્તેન ચ સમ્પૃષ્ટોઽગ્નિર્નોવાચ સુદુર્મતિમ્ ।
પુનઃ પૃષ્ટસ્તથાગ્નિસ્તમુવાચ ભયસઙ્કુલઃ ॥ ૩૫॥

અજાનતા નરઃ પૃષ્ટઃ સંશયે પ્રસમુદ્યતે ।

કથયેત્તં ન પાપીયાન્ ભવેદ્વૈ સોઽપિ નિશ્ચિતમ્ ॥ ૩૬॥

અતોઽહં કથયિષ્યામિ સત્યં તુભ્યં ન સંશયઃ ।
આદૌ રાજ્ઞા ચ સન્દાતું કથિતા રાક્ષસાય સા ॥ ૩૭॥

અતસ્ત્વં રાક્ષસો ભાગી મતઃ શાસ્ત્રે ન સંશયઃ ।
તવાગ્રે કથિતં ચેન્મે પાપં ન સ્યાત્ કદાચન ॥ ૩૮॥

અતઃ કન્યાં પ્રદાતું વૈ નરાય દૃઢનિશ્ચયઃ ।
ન કર્તવ્યોઽસુરેશ ત્વં વિચારય મહામતે ॥ ૩૯॥

યદિ દાતું કૃતા કન્યા કસ્મૈચિન્નિશ્ચિતા ભવેત્ ।
તસ્મૈ સા વૈ પ્રદાતવ્યાઽન્યથા દોષી ભવેન્નરઃ ॥ ૪૦॥

આશાભઙ્ગમયં પાપં સમ્પ્રાપ્તં તસ્ય દૈત્યપ ।
ન કન્યા દૃષ્યતે તત્રાન્યસ્મૈ દત્તા નરાય ચેત્ ॥ ૪૧॥

તતસ્તં રાક્ષસં ક્રૂરમૂચે વૈ હવ્યવાહનઃ ।
પત્ની ભૃગોરિયં સાધો મા ગૃહ્ણીષ્વ પરસ્ત્રિયમ્ ॥ ૪૨॥

અગ્નેર્વચનમાકર્ણ્ય ગૃહીત્વા રાક્ષસો યયૌ ।
અન્તર્વત્નીં રુદન્તીં ચ મૂર્ચ્છિતાં સ વિહાયસા ॥ ૪૩॥

તસ્યામુદરવાસી ચ ભૃગોસ્તેજોધરો મુનિઃ ।
કુપિતો રાક્ષસં હન્તું ચ્યુતો વૈ જઠરાત્ સ્વયમ્ ॥ ૪૪॥

તસ્ય ક્રોધાનલેનૈવ ભસ્મસાદભવત્ક્ષણાત્ ।
રાક્ષસઃ સોઽપિ સઙ્ગૃહ્ય પુત્રં સ્વગૃહમાયયૌ ॥ ૪૫॥

દુઃખિતા રુદતી દેવી સુલોમા ભયવિહ્વલા ।
વનાદ્ ભૃગુઃ સમાયાતસ્તસ્મિન્ કાલે પ્રતાપવાન્ ॥ ૪૬॥

રુદન્ત્યા કથિતસ્તસ્મૈ વૃત્તાન્તો મુનિભાર્યયા ।
તં શ્રુત્વા કુપિતો યોગી સાક્ષાદ્રુદ્રૈવાઽપરઃ ॥ ૪૭॥

ઉવાચ કોપરક્તાક્ષોઽગ્ને ત્વં શપ્તો મયાઽધુના ।
સર્વભક્ષો ભવાઽજ્ઞાની દુષ્ટકર્મપરાયણ ॥ ૪૮॥

એવં શપ્ત્વા મહાદેવં ભૃગુરગ્નિં સ્વયં મુનિઃ ।
સુલોમાં સાન્ત્વયામાસ પુત્રં સ્વં પ્રશશંસ હ ॥ ૪૯॥

ઉદરાત્તુ ચ્યુતઃ ક્રોધાચ્ચ્યવનો નામ સત્તમઃ ।
તેનાઽયં ભવિતા પુત્રો મદીયો માતૃપાલકઃ ॥ ૫૦॥

સુખેન સ્વાશ્રમે યોગી ભૃગુઃ પરમતત્ત્વવિત્ ।
પત્ન્યા પુત્રેણ સંયુક્તઃ સ્થિતો ગણપતિં સ્મરન્ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ચ્યવનોત્પત્તિકથનં નામૈકોનચત્વારિંશોઽધ્યાયઃ ॥ ૨.૩૯

## ૨.૪૦ અગ્નિમાહાત્મ્યં નામ ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

મુદ્ગલ ઉવાચ ।
શાપિતો ભૃગુણાગ્નિશ્ચ યયૌ સ્થાનં નિજં તતઃ ।
અંર્તધાય સ્વમાત્માનં સ્થિતઃ પરમદુઃખિતઃ ॥ ૧॥

અગ્નિં વિના ચ સર્વત્ર હાહાકારો મહાનભૂત્ ।
મુનયઃ સહિતા દેવૈર્બ્રહ્માણં શરણં યયુઃ ॥ ૨॥

મુનય ઊચુઃ ।
શપ્તોઽગ્નિર્ભૃગુણા સ્વામિન્નન્તર્ધાય યયૌ સ્વયમ્ ।
કર્મહીના વયં નાથ વહ્નિહીના ભવામહે ॥ ૩॥

શરણં ત્વાં પ્રપન્નાઃ સ્મો રક્ષ રક્ષ પિતામહ ।
નોચેચ્ચરાચરં સર્વં નશ્યત્યત્ર ન સંશયઃ ॥ ૪॥

શ્રુત્વા સ વચનં તેષાં તૈઃ સહાઽગ્નિં યયૌ વિધિઃ ।
સાન્ત્વયામાસ તં વાક્યૈર્વેદાનાં પરમાદ્ભુતૈઃ ॥ ૫॥

બ્રહ્મોવાચ ।
અગ્ને શ઼ૃણુ મહાભાગ વેદેષુ કથિતં મહત્ ।
સર્વભક્ષઃ શુચિષ્માન્ વૈ તવ નામ વિનિશ્ચિતમ્ ॥ ૬॥

ભૃગોર્નૈવાપરાધોઽસ્તિ ભાવિ જાતં ન સંશયઃ ।
મા કુરુષ્વ વૃથા ચિન્તાં ભવ સૌમ્યો મહામતે ॥ ૭॥

અતસ્ત્વં સર્વભક્ષોઽપિ પવિત્રઃ પરમો મતઃ ।
ભક્ષદોષવિહીનસ્ત્વં ભવિતાઽસિ ન સંશયઃ ॥ ૮॥

વચઃ શ્રુત્વા ચુકોપાઽગ્નિઃ પ્રલયં કર્તુમુદ્યતઃ ।
જ્વાલાઃ સાંવર્તિકાઃ ક્રોધાચ્ચિક્ષેપ સ ચરાચરે ॥ ૯॥

જ્વાલાભિર્દહ્યમાનાસ્તે બ્રહ્માદ્યાઃ પ્રયયુસ્તતઃ ।
ગણેશં મનસા ધ્યાત્વા સ્થિતાઽભયસમન્વિતાઃ ॥ ૧૦॥

એતસ્મિન્નન્તરે તત્રૈકદન્તો બ્રાહ્મણોઽભવત્ ।
આયયાવગ્નિસાન્નિધ્યે તમુવાચ હિતં વચઃ ॥ ૧૧॥

બ્રાહ્મણ ઉવાચ ।
અગ્ને કિં ક્ષુભિતોઽત્યન્તં હરસિ ત્વં કથં જગત્ ।
અકાલે ક્રોધસંયુક્તો ન સ્મૃતસ્તે વિનાયકઃ ॥ ૧૨॥

સ્વાતન્ત્ર્યં પશ્ય યત્રાસ્તિ મા ગર્વં કુરુ દેવપ ।
વિનાયકં પરિત્યજ્ય સ્વાતન્ત્ર્યં ન ભવેદ્યતઃ ॥ ૧૩॥

એવમુક્તોઽપિ તં વિપ્રં દદાહ સ્વીયતેજસા ।
પ્રહસ્ય સ મુનીન્દ્રોઽસાવુવાચ ગણનાયકઃ ॥ ૧૪॥

શલાકાં ચન્ મહાવહ્ને દહસિ ત્વં સ્વસત્તયા ।
મયા દત્તાં સ્વસામર્થ્યાત્તદૈવં સચરાચરમ્ ॥ ૧૫॥

એવમુક્ત્વા શલાકાં સ તત્ર ચિક્ષેપ ભૂસુરઃ ।
ન તાં શક્તો દાહયિતું જાતો વહ્નિઃ સ્વસત્તયા ॥ ૧૬॥

તતસ્તં પ્રણનામાથ ગતગર્વો હુતાશનઃ ।
કો વિનાયકનામા વૈ સર્વેષાં નાયકઃ સ્મૃતઃ ॥ ૧૭॥

વદ મે કરુણાસિન્ધો તં ભજામિ વિશેષતઃ ।
ત્વં કોઽસિ વિપ્રરૂપેણ પ્રમોહયસિ માં પ્રભો ॥ ૧૮॥

શાન્તમગ્નિમુવાચાઽથ વિપ્રરૂપી ગજાનનઃ ।
(Page ખં. ૨ અ. ૪૦ પાન ૮૫)
બોધયન્ હેતુગર્ભાભિર્વાગ્ભિઃ સર્વાર્થકોવિદઃ ॥ ૧૯॥

વિપ્ર ઉવાચ ।
સ્વાનન્દવાસિનં વિદ્ધિ વિનાયકમનામયમ્ ।
સર્વેષાં નાયકં પૂર્ણં નાયકૈર્વર્જિતં પરમ્ ॥ ૨૦॥

શાન્તિયોગેન શાન્તિજ્ઞાસ્તં ભજન્તે દ્વિજોત્તમાઃ ।

તં યોગં તેઽભિધાસ્યામિ શૃણુષ્વૈકમનાઃ પ્રભો ॥ ૨૧॥

એકાનેકાદિભેદૈશ્ચ સંયુક્તઃ પ્રણવઃ સ્મૃતઃ ।
સમ્પ્રજ્ઞાતસમાધિં તં વિદ્ધિ વહ્ને મહાદ્યુતે ॥ ૨૨॥

સંયોગાયોગભેદૈશ્ચ સંયુક્તં બ્રહ્મ યત્ સ્મૃતમ્ ।
અસમ્પ્રજ્ઞાતરૂપસ્થં વિદ્ધિ તદ્યોગસેવયા ॥ ૨૩॥

સમ્પ્રજ્ઞાતાસમ્પ્રજ્ઞાતયોગે વૈ શાન્તિદાયકઃ ।
શાન્તિયોગઃ સમાખ્યાતો ગાણેશો હવ્યવાહન ॥ ૨૪॥

ગણાઃ સમૂહરૂપાશ્ચ તેષાં સ્વામી ગજાનનઃ ।
તં ભજસ્વ મહાતેજો વહ્ને ભક્તિસમન્વિતઃ ॥ ૨૫॥

એવમુક્ત્વા દદૌ તસ્મૈ મન્ત્રમેકાક્ષરં પરમ્ ।
વિધિયુક્તં સ દૈત્યેન્દ્ર ગાણેશં સર્વસિદ્ધિદમ્ ॥ ૨૬॥

દર્શયામાસ રૂપં સ્વં ત્યક્ત્વા બ્રાહ્મણરૂપકમ્ ।
ગજાનનાદિ ચિહ્નૈશ્ચ ચિહ્નિતં ભક્તપાલકમ્ ॥ ૨૭॥

તં દૃષ્ટ્વા નિપપાતોર્વ્યાં વહ્નિર્હર્ષસમન્વિતઃ ।
તાવદન્તર્હિતં રૂપં તતઃ ખિન્નોઽભવચ્છુચિઃ ॥ ૨૮॥

સ્વર્ગં ત્યક્ત્વા વનં વહ્નિર્યયૌ યોગવિધિત્સયા ।
સમાધિના તપસ્તેપે ગણેશપ્રાપ્તિહેતવે ॥ ૨૯॥

દિવ્યવર્ષશતેનૈવ તં યયૌ ભક્તવત્સલઃ ।
ગજાનનઃ પ્રસન્નાત્મા પરમાત્મા પરાત્પરઃ ॥ ૩૦॥

દૃષ્ટ્વાગ્નિં તપસા યુક્તં સ્વભક્તં પ્રત્યુવાચ હ ।
વરં વૃણુ મહાભાગ તુષ્ટોઽહં તપસા ચ તે ॥ ૩૧॥

ગૃત્સમદ ઉવાચ ।
ગણેશવચનં રમ્યં શ્રુત્વા હર્ષસમન્વિતઃ ।
નનામ દણ્ડવદ્ભૂમૌ ભાવયુક્તેન ચેતસા ॥ ૩૨॥

પૂજયિત્વા યથાન્યાયં તુષ્ટાવ સ કૃતાઞ્જલિઃ ।
હવ્યવાહઃ પ્રસન્નાત્મા ગણેશં યોગશાન્તિદમ્ ॥ ૩૩॥

અગ્નિરુવાચ ।
નમસ્તે વિઘ્નનાશાય ભક્તાનાં હિતકારક ।

નમસ્તે વિઘ્નકર્ત્રે વૈ હ્યભક્તાનાં વિનાયક ॥ ૩૪॥

નમો મૂષકવાહાય ગજવક્ત્રાય ધીમતે ।
આદિમધ્યાન્તહીનાયાદિમધ્યાન્તસ્વરૂપિણે ॥ ૩૫॥

ચતુર્ભુજધરાયૈવ ચતુર્વર્ગપ્રદાયિને ।
એકદન્તાય વૈ તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૩૬॥

લમ્બોદરાય દેવાય ગજકર્ણાય ઢુણ્ઢયે ।
યોગશાન્તિસ્વરૂપાય યોગશાન્તિપ્રદાયિને ॥ ૩૭॥

યોગિભ્યો યોગદાત્રે ચ યોગિનાં પતયે નમઃ ।
ચરાચરમયાયૈવ પ્રણવાકૃતિધારિણે ॥ ૩૮॥

સિદ્ધિબુદ્ધિમયાયૈવ સિદ્ધિબુદ્ધિપ્રદાયક ।
સિદ્ધિબુદ્ધિપતે તુભ્યં નમો ભક્તપ્રિયાય ચ ॥ ૩૯॥

અનન્તાનન દેવેશ પ્રસીદ કરુણાનિધે ।
દાસોઽહં તે ગણાધ્યક્ષ માં પાલય વિશેષતઃ ॥ ૪૦॥

ધન્યોઽહં સર્વદેવેષુ દૃષ્ટ્વા પાદં વિનાયક ।
કૃતકૃત્યો મહાયોગી બ્રહ્મભૂતો ન સંશયઃ ॥ ૪૧॥

યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા માં શાપહીનં ત્વં કુરુ દેવેન્દ્રસત્તમ ॥ ૪૨॥

તવ ભક્તિં દૃઢાં દેહિ યયા મોહો વિનશ્યતિ ।
તવ ભક્તૈઃ સહાવાસો મમાસ્તુ ગણનાયક ॥ ૪૩॥

યદા સઙ્કટસંયુક્તસ્તદા સ્મરણતસ્તવ ।
નિઃસઙ્કટોઽહમત્યન્તં ભવામિ ત્વત્પ્રસાદતઃ ॥ ૪૪॥

એવમુક્ત્વા ગણાધીશં પ્રણતો ભક્તિસંયુતઃ ।
તમુવાચ ગણાધ્યક્ષો ભક્તવત્સલભાવતઃ ॥ ૪૫॥

ગણેશ ઉવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
ભવિષ્યતિ નૃણાં ચૈવ શ‌ૃણ્વતાં પઠતાં સદા ॥ ૪૬॥

યં યં ચિન્તયસે કામં તં તં દાસ્યામિ શાશ્વતમ્ ।
ભક્તિભાવેન સન્તુષ્ટો ભૃશં સ્તોત્રેણ સંસ્થિતઃ ॥ ૪૭॥

મદીયા ભક્તિરચલા ભવિષ્યતિ સદાઽનઘ ।
સઙ્કટં સ્મરણેનૈવ મદીયેન વિનશ્યતિ ॥ ૪૮॥

ભૃગુર્મમ વિશેષેણ ભક્તોઽસૌ શાન્તિયોગધૃક્ ।
તસ્યાપિ વચનં મિથ્યા ન કરોમિ કદાચન ॥ ૪૯॥

યદ્યપિ ત્વં સર્વભક્ષઃ પવિત્રો ભવિતા સદા ।
પૂર્વવત્ સર્વમાન્યં ત્વાં કરિષ્યન્તિ દ્વિજાદયઃ ॥ ૫૦॥

સર્વભક્ષે ચ તે દુઃખં હરામિ શ‍ૃણુ મે વચઃ ।
પ્રાપ્તં શુભાશુભં તત્રામૃતભુક્ત્વં ભવિષ્યસિ ॥ ૫૧॥

સર્વભક્ષણરૂપા યે વિકારા ન ભવન્તિ તે ।
અમૃતાશી મયા તત્ર ત્વં કૃતોઽસિ ન સંશયઃ ॥ ૫૨॥

એવમુક્ત્વા ગણાધીશોંઽતર્ધાનમગમત્ સ્વયમ્ ।
વહ્નિહર્ષસમાયુક્તઃ સ્વગૃહં પ્રત્યપદ્યત ॥ ૫૩॥

તદહાદ્દહનો દૈત્ય સર્વભક્ષો બભૂવ હ ।
શુચિશ્ચામૃતભુગ્ દેવો યોગશાન્તિધરઃ સ્વયમ્ ॥ ૫૪॥

ગાણપત્યસ્વભાવેનાભજત્તં ગણનાયકમ્ ।
ગણેશભક્તસઙ્ગેષુ નિરતઃ સોઽસુરેશ્વર ॥ ૫૫॥

એતદગ્નેશ્ચ માહાત્મ્યં યઃ શ‍ૃણોતિ નરોત્તમઃ ।
પઠેદ્વા ભવિતા તસ્ય કામોપ્યત્યન્તદુર્લભઃ ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે અગ્નિમાહાત્મ્યં નામ ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૦

## ૨.૪૧ ચ્યવનતપોવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
ભૃગોઃ પુત્રશ્ચ યોગીશં ભૃગું નત્વા યયૌ વનમ્ ।
તતાપ તપ ઉગ્રં વૈ પ્રયાગે સ જલે સ્થિતઃ ॥ ૧॥

દશવર્ષસહસ્રાણિ ગતાનિ તપતો મુનેઃ ।

તસ્યૈવ તેજસા સર્વં વ્યાપ્તં બ્રહ્માણ્ડમણ્ડલમ્ ॥ ૨॥

એકદા ધીવરૈસ્તત્ર જલે જાલૈર્મહામતે ।
ગૃહીતા મત્સ્યકાદ્યાશ્ચ દૈવાત્ સોઽપિ સમાગતઃ ॥ ૩॥

દૃષ્ટ્વા મુનિવરં સર્વે ભયભીતા યયુર્નૃપમ્ ।
ધીવરા નહુષં સર્વમૂચુર્વૃત્તાન્તમાદરાત્ ॥ ૪॥

ભયભીતો નૃપસ્તત્ર પ્રધાનૈર્બ્રાહ્મણૈર્વૃતઃ ।
મુનિં યયૌ મહાભાગં પ્રણમ્ય સ પુરઃસ્થિતઃ ॥ ૫॥

મત્સ્યા જલવિયોગેન વ્યાકુલા મરણોન્મુખાઃ ।
તાન્ સ્વર્ગે સ્થાપયામાસ સાંસર્ગિકસુભાવતઃ ॥ ૬॥

કૃતાઞ્જલિપુટં દૃષ્ટ્વા નહુષં મુનિસત્તમઃ ।
ઉવાચ મોચય પ્રાજ્ઞ ધૃતં ધીવરતોઽધુના ॥ ૭॥

મદીયદેહમૌલ્યેન ધીવરાંસ્ત્વં પ્રસાદય ।
શ્રુત્વા તસ્ય વચઃ સર્વમૂચે વૈ ધીવરાન્નૃપઃ ॥ ૮॥

શતં સૌવર્ણમુદ્રાણાં ગૃહીત્વા મુચ્યતાં મુનિઃ ।
ભવદ્ભિશ્ચ મહાભાગૈસ્તતસ્તં મુનિરબ્રવીત્ ॥ ૯॥

(Page ખં. ૨ અ. ૪૧ પાન ૮૭)
શતં સૌવર્ણમુદ્રાણાં મૌલ્યં કિં મે ત્વયા કૃતમ્ ।
તતો રાજા ધનં લક્ષં મૌલ્યં ચ કૃતવાન્ મુનેઃ ॥ ૧૦॥

ન યોગ્યં મુનિના તત્ર કથિતં સ તતો નૃપઃ ।
ગ્રામમેકં મુનેર્મૌલ્યં ચકાર ભયસંયુતઃ ॥ ૧૧॥

મુનિના તન્ન યોગ્યં વૈ કૃતં તત્ર નૃપઃ પુનઃ ।
નગરં દેશસંયુક્તં મૌલ્યં સ કૃતવાન્ મુનેઃ ॥ ૧૨॥

તથાઽપિ મુનિના માન્યં ન કૃતં તત્તતો નૃપઃ ।
રાજ્યમર્ધં તતો મૌલ્યં ધીવરાન્ દાતુમુદ્યતઃ ॥ ૧૩॥

મુનિના કથિતં તત્ર મમ યોગ્યં ન મૂલ્યકમ્ ।
તતો રાજ્યં સ સમ્પૂર્ણં મૌલ્યં તસ્ય ચકાર હ ॥ ૧૪॥

તતોઽપિ મુનિના દૈત્ય ન માન્યં તત્કૃતં તતઃ ।
ભયભીતો નૃપોઽમાત્યૈઃ કર્તવ્યં નાભ્યપદ્યત ॥ ૧૫॥

અધુના કોપસંયુક્તશ્ચ્યવનઃ શાપયિષ્યતિ ।
માં તત્ર નૈવ સન્દેહો મદ્દૈવેન પ્રચોદિતઃ ॥ ૧૬॥

તતસ્તં વ્યાકુલં દૃષ્ટ્વા ચ્યવનો મુનિરબ્રવીત્ ।
બ્રાહ્મણૈઃ સહ રાજેન્દ્ર દેહિ મૌલ્યં વિચાર્ય ચ ॥ ૧૭॥

તતસ્તત્રાયયૌ યોગી ગાણપત્યો મહાયશાઃ ।
ભરદ્વાજઃ સ તં દૃષ્ટ્વા નહુષઃ પ્રણનામ હ ॥ ૧૮॥

ભરદ્વાજેન વૃત્તાન્તો જ્ઞાતઃ સર્વો હ્યશેષતઃ ।
ઉવાચ નૃપશાર્દૂલં ચિન્તાં મા કુરુ ભૂમિપ ॥ ૧૯॥

બ્રાહ્મણાનાં ગવાં રાજન્ કુલમેકં દ્વિધા કૃતમ્ ।
કર્મસંસિદ્ધયે ધાત્રા પૂજ્યં ચ દ્વિવિધં સમમ્ ॥ ૨૦॥

હવિષ્યં ગોભિરત્યન્તં ધૃતં વૈ યજ્ઞસિદ્ધયે ।
મન્ત્રાશ્ચ બ્રાહ્મણૈસ્તત્ર ધૃતાસ્તદ્વન્ન સંશયઃ ॥ ૨૧॥

ગાં દત્વા ધીવરેભ્યસ્ત્વં બન્ધહીનં મુનિં કુરુ ।
એવમુક્ત્વા ભરદ્વાજો યયૌ સ્વેચ્છાચરો મુનિઃ ॥ ૨૨॥

તથા નહુષભૂપેન કૃતં દૃષ્ટ્વા પ્રહર્ષિતઃ ।
ચ્યવનો મુનિશાર્દૂલ આશિષં વિવિધાં દદૌ ॥ ૨૩॥

તં નૃપં માનયિત્વા સ યયૌ વનમનુત્તમમ્ ।
સુચ્છાયં સુફલં રમ્યં સુજલં મુનિસત્તમઃ ॥ ૨૪॥

તત્ર સ્થિત્વા તપસ્તેપે મહોગ્રં તેજસા યુતઃ ।
નિરાહારેણ સંયુક્તો વર્ષાણાં ચ સહસ્રકમ્ ॥ ૨૫॥

એતસ્મિન્નન્તરે તત્ર શર્યાતિશ્ચ નૃપો યયૌ ।
મૃગયાભિરતો દૈવાત્ મુદા યુક્તસ્તદાઽઽશ્રમે ॥ ૨૬॥

તત્ર તસ્ય શરીરે ચ વલ્મીકસ્તૃણસંયુતઃ ।
જાતસ્તદપિ ઘોરં વૈ તતાપ સ તપો મહત્ ॥ ૨૭॥

નરાન્ સર્વાન્નિવાર્યૈવ સંસ્થિતસ્તત્ર ભૂમિપઃ ।
મા કુરુધ્વં પ્રવેશં સચ્ચ્યવનાશ્રમમણ્ડલે ॥ ૨૮॥

એતસ્મિન્નન્તરે તત્ર સુકન્યા સસખી યયૌ ।

વનં ક્રીડાર્થમુગ્રેણ તપસા સંયુતં મુનેઃ ॥ ૨૯॥

ભ્રમન્ત્યા ચાલિભિસ્તત્ર દૃષ્ટો વલ્મીક ઉત્તમઃ ।
તત્ર જ્યોતિર્મયે નેત્રે દૃષ્ટ્વા સા વિસ્મિતાऽભવત્ ॥ ૩૦॥

અજ્ઞાનેન તથા મુગ્ધભાવાદ્વૈ કણ્ટકેન ચ ।
કન્યયા ચક્ષુષી ભિન્ને જ્યોતીરૂપે મહામુનેઃ ॥ ૩૧॥

તાભ્યાં રક્તં પ્રસુસ્રાવ દૃષ્ટ્વા સા ભયસઙ્કુલા ।
સ્વનિવાસં યયૌ શીઘ્રં સખીભિરસુરેશ્વર ॥ ૩૨॥

તતઃ પુરીષમૂત્રે વૈ સૈન્યાનાં બન્ધમાગતે ।
ભૂપસ્ય તેન શર્યાતિર્ભયભીતો બભૂવ હ ॥ ૩૩॥

પપ્રચ્છ સર્વલોકાન્ સ મુનેરાશ્રમમણ્ડલે ।
છિદ્રં કેન કૃતં ઘોરં યેન સઙ્કુપિતો મુનિઃ ॥ ૩૪॥

તતઃ સા રાજકન્યા તં પિતરં પ્રાહ લજ્જિતા ।
ક્ષુભિતા ભયભીતા વૈ સુકન્યા રચિતાઞ્જલિઃ ॥ ૩૫॥

વને ક્રીડનભાવેન વલ્મીકે કણ્ટકેન ચ ।
વિદ્ધે મયા મહારાજ જ્યોતિષી નાત્ર સંશયઃ ॥ ૩૬॥

તતો રાજા વનં ગત્વા વલ્મીકે સંસ્થિતં મુનિમ્ ।
સ્તુત્વા પ્રસાદયામાસ વિનયેન સમન્વિતઃ ॥ ૩૭॥

તતસ્તં રાજશાર્દૂલમુવાચ ભૃગુનન્દનઃ ।
અજ્ઞાનેન કૃતં કર્મ તવ પુત્ર્યા નૃપાલક ॥ ૩૮॥

અતો મદીયસેવાર્થં કન્યાં દેહિ મહામતે ।
તદા સુખયુતં સર્વં ભવિષ્યતિ ન સંશયઃ ॥ ૩૯॥

તતો રાજા સ્વયં ભીતો દદૌ કન્યાં સુલોચનમ્ ।
તસ્મૈ સસૈન્યમાદાય સ્વપુરં પ્રયયૌ મુદા ॥ ૪૦॥

સુકન્યા રાજપુત્રી સા પતિં પ્રાપ્ય મહામુનિમ્ ।
ચ્યવનં સેવને સક્તા ત્યક્ત્વા દેહભ્રમં બભૌ ॥ ૪૧॥

તતઃ કદાચિત્તત્રૈવાऽશ્વિનૌ તૌ ભિષજાં વરૌ ।
આગતૌ મુનિશાર્દૂલં પ્રણમ્ય ચ પુરઃ સ્થિતૌ ॥ ૪૨॥

મુનિઃ પ્રોવાચ તૌ તત્ર માં ચ યૌવનશાલિનમ્ ।
કુરુતં ભિષજાં શ્રેષ્ઠૌ સનેત્રં પરમાદ્ભુતમ્ ॥ ૪૩॥

તતસ્તં મુનિશાર્દૂલમૂચતુશ્ચાશ્વિનૌ વચઃ ।
દેવૈઃ સાકં યજ્ઞભુજૌ કુર્વાવાં તપસો બલાત્ ॥ ૪૪॥

તથેતિ મુનિના પ્રોક્તં સભાર્યં મુનિસત્તમમ્ ।
ગૃહીત્વા ચાશ્વિનૌ કુણ્ડં યયતૂ રૂપદં પરમ્ ॥ ૪૫॥

તત્ર સ્નાનં ત્રયઃ કૃત્વા પુનસ્તે નિઃસૃતા બહિઃ ।
રૂપલાવણ્યસંયુક્તાઃ કામદેવોપમા બભુઃ ॥ ૪૬॥

એકરૂપધરાન્ દૃષ્ટ્વા સુકન્યા વિસ્મિતાઽભવત્ ।
નમોશ્વિભ્યાં ચ મે ભર્તા દાતવ્યો દેવસત્તમૌ ॥ ૪૭॥

તસ્યાઃ સતીસ્વભાવેન સન્તુષ્ટૌ દદતુર્મુનિમ્ ।
ચ્યવનં તૌ ગતૌ સ્થાનં મુનિશ્ચ સ્વસ્થલં યયૌ ॥ ૪૮॥

કદાચિન્નૃપવર્યં તં શર્યાતિં સ્વાશ્રમાગતમ્ ।
સુકન્યા તં પુરો દૃષ્ટ્વા પિતરં સસ્વજે સતી ॥ ૪૯॥

દૃષ્ટ્વા મુનિવરં રાજા યૌવનસ્થં મહાદ્યુતિમ્ ।
પપ્રચ્છ તનયાં વૃત્તં તયા સર્વં પ્રકાશિતમ્ ॥ ૫૦॥

તતસ્તં પ્રણનામાથ નૃપસ્તેનાઽપિ માનિતઃ ।
યજ્ઞાર્થં સહિતં પુત્ર્યા ગૃહીત્વા ચ્યવનં યયૌ ॥ ૫૧॥

શર્યાતિર્યજ્ઞસમ્ભારાંશ્ચક્રે વૈ હર્ષિતો ભૃશમ્ ।
આરેભે મુનિભિર્યજ્ઞં સર્વસમ્પદ્વિરાજિતઃ ॥ ૫૨॥

તત્ર દેવા મુદા સર્વે યયુરપ્સરસાં ગણાઃ ।
મુનયશ્ચ મહાભાગા નાનાદિગ્ભ્યઃ સમાયયુઃ ॥ ૫૩॥

વર્ણાઃ સર્વે તથા તત્ર માનવાનાં સમાયયુઃ ।
દ્રષ્ટું પ્રહ્લાદયજ્ઞં તમાનન્દેન સમન્વિતાઃ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ચ્યવનતપોવર્ણનં નામૈકચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૧

(Page ખં. ૨ અ. ૪૨ પાન ૮૯)

## ૨.૪૨ ભૃગુચરિતં નામ દ્વિચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
ચ્યવનેન તથા યજ્ઞેઽશ્વિનૌ તૌ ભાગસંયુતૌ ।
કૃત્વા ચાવહિતૌ તત્ર તત ઇન્દ્રોઽબ્રવીદ્વચઃ ॥ ૧॥

ઇન્દ્ર ઉવાચ ।
અશ્વિનૌ ભિષજૌ પ્રોક્તૌ મુને તસ્માન્ન યોગ્યતા ।
યજ્ઞભાગે તયોઃ સ્વામિન્ માહ્વયતિ વદામ્યહમ્ ॥ ૨॥

અભવન્ મુનિમુખ્યો સૌ ત્યક્ત્વેન્દ્રવચનં તતઃ ।
સમુદ્યુક્તશ્ચ તૌ તત્રાહ્વયિતું ત્વસુરેશ્વર ॥ ૩॥

તત ઇન્દ્રોઽબ્રવીદ્વિપ્રં ચ્યવનં ક્રોધસંયુતઃ ।
વજ્રેણૈવ હનિષ્યામિ યદ્યાયાતૌ મુનેઽશ્વિનૌ ॥ ૪॥

ચ્યવનેન સહાયેનાશ્વિનૌ તત્રાગતૌ મખે ।
અશ્વિનૌ તૌ તદા દૃષ્ટ્વા વજ્રં દધ્રે પુરન્દરઃ ॥ ૫॥

ચ્યવનેન સવજ્રસ્તુ તસ્ય પ્રસ્તમ્ભિતો ભુજઃ ।
તપસા સ્વપ્રભાવેણ મદં સંસસૃજે મુનિઃ ॥ ૬॥

ગ્રસિતું સ યયાવિન્દ્રં ચ્યવનેન પ્રચોદિતઃ ।
વિસ્મિતા મુનયો દેવા દૃષ્ટ્વા વીર્યં મહામુનેઃ ॥ ૭॥

વિકરાલમુખં વીરં લેલિહાન નભસ્તલમ્ ।
અઞ્જનાદ્રિસમં શ્યામં દદૃશુસ્તં મદં મખે ॥ ૮॥

ભયભીતાસ્તતો દેવસેના મુનિગણા જનાઃ ।
અન્યે પ્રદુદ્રુવુસ્તત્ર ત્યક્ત્વા યજ્ઞં દિશો દશ ॥ ૯॥

મદસ્તુ ગ્રસિતું તત્રેન્દ્રસાન્નિધ્યં સમાયયૌ ।
તં દૃષ્ટ્વા ભયભીતઃ સ ચ્યવનં શરણં યયૌ ॥ ૧૦॥

ઇન્દ્ર ઉવાચ ।
અશ્વિનૌ ભાગસંયુક્તૌ મયા માન્યૌ કૃતૌ મુને ।
મદાન્ માં રક્ષ વિપ્રેશ ગ્રસિષ્યતિ ન સંશયઃ ॥ ૧૧॥

તતસ્તેનાભયં દત્તમિન્દ્રાય શરણાર્થિને ।

મદં ચ તપસા સ્વેન વારયામાસ ભાર્ગવઃ ॥ ૧૨॥

સમાપ્ય ચ્યવનો યજ્ઞં યયૌ પિતૃગૃહે મુનિઃ ।
પ્રણનામ સભાર્યસ્તં ભૃગું યોગવિદાંવરમ્ ॥ ૧૩॥

તેન સમ્માનિતઃ પુત્રસ્તપઃસિદ્ધશ્ચ સન્નિધૌ ।
ચ્યવનશ્ચ કિયત્કાલમવસત્ સેવનોત્સુકઃ ॥ ૧૪॥

કદાચિચ્ચ્યવનં વિપ્રં ભૃગુઃ પરમતત્ત્વવિત્ ।
ઉવાચ જ્ઞાનસિદ્ધ્યર્થં સ્વસુતં કૃપયા યુતઃ ॥ ૧૫॥

ભૃગુરુવાચ ।
શ‍ૃણુ પુત્ર પ્રવક્ષ્યામિ કિં કૃતં દુઃખદં ત્વયા ।
મદઃ સ્વતપસા સૃષ્ટો દેવેન્દ્રસ્ય ભયાવહઃ ॥ ૧૬॥

તપોબલમદેનૈવં કુરુષે કર્મ તાપસ ।
મદયુક્તોઽસિ પુત્ર ત્વં ત્યજ તં યોગસેવયા ॥ ૧૭॥

શ‍ૃણુ વૃત્તાન્તમાદૌ ત્વં મદીયં કથયામિ તે ।
મયા તન્મદયુક્તેન તપોવીર્યેણ યત્કૃતમ્ ॥ ૧૮॥

સતતં તપસા યુક્તો પ્રતપામિ તપો મહત્ ।
મધ્યે મુનીનાં સર્વેષાં શ્રેષ્ઠોઽહં તપસાઽભવમ્ ॥ ૧૯॥

એકદા મુનયઃ સર્વે મિલિતા ગૌતમીતટે ।
સિંહસ્થે ચ ગુરૌ પુત્ર તત્ર વાદો ભવન્મહાન્ ॥ ૨૦॥

પિતામહં પરં શ્રેષ્ઠં જાનામિ સગુણં સુત ।
બ્રહ્મરૂપં મહાત્માનં સર્વસ્રષ્ટારમઞ્જસા ॥ ૨૧॥

સગુણં કેચિદૂચુશ્ચ ભિન્નદેહધરં શિવમ્ ।
કેચિદ્વિષ્ણું તથા બ્રહ્મન્ કેચિદ્બ્રહ્માણમઞ્જસા ॥ ૨૨॥

તત્ર સર્વૈરહં પુત્ર પ્રેષિતઃ કાર્યસિદ્ધયે ।
પરીક્ષાર્થં તપઃસિદ્ધસ્ત્રિષ્વેવં નિશ્ચયાર્થિભિઃ ॥ ૨૩॥

અહં પિતામહં શ્રેષ્ઠં જાનામ્યત્ર ન સંશયઃ ।
તં યયૌ પિતરં સિદ્ધં પરીક્ષાર્થં મહામુને ॥ ૨૪॥

તમપ્રણમ્ય વિશ્વેશં સમાસીનો મહાસને ।
માં દૃષ્ટ્વા દુર્વિનીતં સ કુપિતશ્ચ પિતામહઃ ॥ ૨૫॥

ઉવાચ માં સુરશ્રેષ્ઠઃ કિં મદેન સમન્વિતઃ ।
(Page ખં. ૨ અ. ૪૨ પાન ૯૦)
સમાગતોઽસિ દુર્બુદ્ધે ગચ્છ ત્વં સ્વગૃહેઽધુના ॥ ૨૬॥

તતોઽવદં સુતા ચાઽઽદૌ પત્નીભાવેન સન્ધૃતા ।
ત્વયા તત્ કિં મયા તાત દુર્બુદ્ધિત્વં કૃતં વદ ॥ ૨૭॥

તાતસ્તુ ક્ષુભિતોઽત્યન્તં સ ચ માં શપ્તુમુદ્યતઃ ।
તાતં તં દણ્ડવદ્ભૂમૌ નતોઽહં ભક્તિસંયુતઃ ॥ ૨૮॥

અવદં તં મહાભાગં માં ક્ષમસ્વ મહાગસમ્ ।
પરીક્ષાર્થં મહાવિપ્રૈઃ પ્રેષિતોઽહં પિતામહ ॥ ૨૯॥

ક્ષમસ્વેદં કૃતં કર્મ ત્વં શ્રેષ્ઠઃ સર્વભાવતઃ ।
સ્તુત્વા તં વિવિધૈર્વાક્યૈસ્તતઃ કૈલાસમાગમમ્ ॥ ૩૦॥

દૃષ્ટ્વા માં તાપસં પુત્ર ભ્રાતરં સહસા શિવઃ ।
આલિઙ્ગિતું સમાયાતો નિજભક્તસુખપ્રદઃ ॥ ૩૧॥

અવદન્ મહદત્યન્તં દુર્વચસ્તં પરીક્ષિતુમ્ ।
મા માં સ્પૃશ પિશાચેશ વર્ણાશ્રમવિવર્જિત ॥ ૩૨॥

નરમસ્તકમાત્રાદિચિહ્નયુક્તોઽશુચિઃ સદા ।
નામ્ના શિવોઽશિવસ્ત્વં વૈ જ્ઞાતં તે ચેષ્ટિતં મયા ॥ ૩૩॥

ઇતિ મદ્ગિરમાકર્ણ્ય ક્રોધયુક્તઃ સદાશિવઃ ।
તૃતીયં નેત્રમુદ્ઘાટ્ય જ્વાલિતું ચોદ્યતોઽભવત્ ॥ ૩૪॥

તતસ્તં સ્તુતવાન્ પુત્ર પ્રણતો દણ્ડવત્ ક્ષિતૌ ।
પરીક્ષાર્થમિદં કર્મ કૃતં ત્વં ક્ષન્તુમર્હસિ ॥ ૩૫॥

બ્રાહ્મણં માં વિદિત્વા સ ક્રોધં સંહૃત્ય શઙ્કરઃ ।
સંસ્થિતસ્તત્ર કૈલાસે વૈકુણ્ઠે ગતવાનહમ્ ॥ ૩૬॥

લક્ષ્મ્યા સહ સમાસીનં વિષ્ણું દૃષ્ટ્વા પ્રહર્ષિતઃ ।
સોઽપિ લક્ષ્મ્યા નતઃ સદ્યઃ પાદયોર્મમ પુત્રક ॥ ૩૭॥

મયા નિર્ભર્ત્સિતોઽત્યન્તં પાદં મા સ્પૃશ દુર્મતે ।
સ્ત્રીવેષધારી જાતોઽસિ ત્વં તેન મલિનો મતઃ ॥ ૩૮॥

મદીયા સ્ત્રી ત્વયા દુષ્ટ વર્ધિતા ગર્હિતં કૃતમ્ ।
ઇત્યાદ્યૈર્વિવિધૈર્વાક્યૈર્મયાઽસૌ નિન્દિતો ભૃશમ્ ॥ ૩૯॥

તતો વિષ્ણુઃ સ્વયં પુત્ર કૃતાઞ્જલિપુટઃ સ્થિતઃ ।
મયા ક્રોધેન પાદેન હૃદિ સન્તાડિતસ્તદા ॥ ૪૦॥

તથાઽપિ ન ચુકોપાઽસૌ પાદં ધૃત્વા મદીયકમ્ ।
તાડનશ્રમયુક્તં સંવાહિતં તં ચકાર હ ॥ ૪૧॥

તદૈવ હૃદયે તેન બ્રાહ્મણપ્રિયકામ્યયા ।
પુત્ર લાઞ્છનમેવેદં ભૃગુપાદાઙ્કિતં ધૃતમ્ ॥ ૪૨॥

અહં ચ નિશ્ચયં કૃત્વા ગતો બ્રાહ્મણસંસદિ ।
કથિતઃ સર્વવૃત્તાન્તઃ શ્રેષ્ઠો નારાયણઃ સ્મૃતઃ ॥ ૪૩॥

ક્ષમા યત્ર ભવેદ્વિપ્રાસ્તત્ર સર્વં પ્રતિષ્ઠિતમ્ ।
ક્રમેણ પ્રાપ્યતે બ્રહ્મ ક્ષમાયુક્તેન ચેતસા ॥ ૪૪॥

તતોઽહં વૈષ્ણવો જાતો યદા વિષ્ણુપરાયણઃ ।
કદાચિદ્દક્ષયજ્ઞે વૈ વિષ્ણુર્મુખ્યો બભૂવ હ ॥ ૪૫॥

શમ્ભું ત્યક્ત્વા હરિં મુખ્યં દૃષ્ટ્વાઽહં યજ્ઞકર્મણિ ।
મુખ્યત્વમાસ્થિતઃ પુત્ર યજ્ઞકર્મપ્રવર્તકઃ ॥ ૪૬॥

પાર્વતી તત્ર દગ્ધાતઃ શમ્ભુઃ કોપસમન્વિતઃ ।
મૃતાં સતીં સ વિજ્ઞાયાયયૌ ગણસમાવૃતઃ ॥ ૪૭॥

વિષ્ણું નિર્જિત્ય દક્ષં તં હત્વા યજ્ઞઃ પ્રણાશિતઃ ।
મદીયં ચિબુકં તત્ર વીરભદ્રેણ પાતિતમ્ ॥ ૪૮॥

બ્રહ્મણા સાન્ત્વિતઃ શમ્ભુર્દક્ષં સઞ્જીવ્ય તં મખમ્ ।
ચકાર સ્વયમેવેશઃ સમ્પૂર્ણં ભાગસંયુતઃ ॥ ૪૯॥

આજં ચ ચિબુકં મે ચ કૃતં તેન મહાત્મના ।
નન્દિના શાપિતસ્તત્ર વારુણિર્હ્યભવં કિલ ॥ ૫૦॥

તતોઽહં માનસે પુત્ર વિસ્મિતઃ શઙ્કરં સ્મરન્ ।
કાલરૂપી સ્વયં શમ્ભુઃ કાલાધીનમિદં જગત્ ॥ ૫૧॥

ઇશ્વરોઽયં શિવઃ પ્રોક્તઃ પરં તસ્માન્ન વિદ્યતે ।
(Page ખં. ૨ અ. ૪૨ પાન ૯૧)

વિચાર્ય શઙ્કરં ચિત્તે ધૃત્વાઽહં ભજને રતઃ ॥ ૫૨॥

શૈવો જાતોઽહમત્યન્તં ભસ્માઙ્ગાલેપને રતઃ ।
નાનાપાશુપતૈર્માર્ગૈરભજં શઙ્કરં સદા ॥ ૫૩॥

એકદા યજ્ઞમારેભે ક્ષેત્રે નામ્ના મહાબલે ।
શૈવે દેવગણૈર્બ્રહ્મા મુનિભિશ્ચ સમન્વિતઃ ॥ ૫૪॥

તત્રાસ્મૃતિર્ગણેશસ્ય જાતા તેષાં મહામખે ।
ઉષઃકાલે તતો જ્યેષ્ઠાં ત્યક્ત્વા યજ્ઞં વિતેનિરે ॥ ૫૫॥

ગાયત્રીં મુખ્યભાવાં વૈ પ્રાપ્તાં વીક્ષ્ય મહાસતી ।
સાવિત્રી કોપસંયુક્તા શશાપ સકલામરાન્ ॥ ૫૬॥

જલરૂપા ભવન્તો વૈ ભવિષ્યન્તિ ન સંશયઃ ।
જ્યેષ્ઠાં સન્ત્યજ્ય યજ્ઞોઽયમારબ્ધસ્તેન ભોઃ સુરાઃ ॥ ૫૭॥

જલરૂપાસ્તતો દેવાઃ શમ્ભુમુખ્યા બભૂવિરે ।
દેવસ્ત્રીભિર્ગણેશસ્ય તપઃ કૃત્વા વિમોચિતાઃ ॥ ૫૮॥

પુનશ્ચ દેવરૂપાસ્તે જાતાસ્તસ્ય પ્રસાદતઃ ।
ગણેશસ્ય ન સન્દેહોંશરૂપેણ જલે સ્થિતઃ ॥ ૫૯॥

તદા મયા ચ વિજ્ઞાતો ગણેશો વિઘ્નનાયકઃ ।
સર્વસત્તાધરઃ પુત્ર સ્વભાવાચ્ચ નિરઙ્કુશઃ ॥ ૬૦॥

નામતો ગણપસ્તત્ર સ્વયમેવ મખો મહાન્ ।
ધ્વંસિતોઽનેન દેવાશ્ચ જલરૂપાઃ કૃતાઃ સુત ॥ ૬૧॥

પુનશ્ચ ભક્તિભાવેન સન્તુષ્ટો યજ્ઞમાયયૌ ।
દેવરૂપાંશ્ચકારાઽસૌ દેવાનેવાઽકરોન્ મખમ્ ॥ ૬૨॥

સર્વત્ર સંસ્થિતોઽયં વૈ તેનેદૃક્ ચ ચકાર હ ।
ઇતિ મત્વા ગણેશસ્ય ભજને તત્પરોઽભવમ્ ॥ ૬૩॥

તતઃ કદાચિદ્વ્યાસસ્ય સઙ્ગતિર્મે મહામતે ।
જાતા ભાગ્યવશેનૈવ મયા પૃષ્ટો મહામુનિઃ ॥ ૬૪॥

વ્યાસ ત્વં વેદશાખાનાં મુને કર્તા ન સંશયઃ ।
પુરાણાનાં વિભાગસ્ય ભારતસ્ય મહામતે ॥ ૬૫॥

વેદેષુ ચ પુરાણેષુ કિં સારં સર્વસમ્મતમ્ ।
વદ માં ત્વં દયાસિન્ધો યેન શાન્તિં લભેન્નરઃ ॥ ૬૬॥

અવદત્ સ મહાભાગો ગાણેશં પદમુત્તમમ્ ।
પુરાણં ગણનાથસ્ય શ્રાવયામાસ માં સુત ॥ ૬૭॥

તતોઽહં યોગમાર્ગેણ સાધયિત્વા ગણેશ્વરમ્ ।
મદાદિં સર્વમુત્સૃજ્ય શાન્તિં પ્રાપ્તો ન સંશયઃ ॥ ૬૮॥

મદેનાઽહં પરિભ્રષ્ટઃ પરીક્ષાં કર્તુમુદ્યતઃ ।
સર્વજ્ઞોઽહં પરીક્ષાયાં સમર્થઃ શ‍ૃણુ પુત્રક ॥ ૬૯॥

અતસ્ત્વં ભજ વિઘ્નેશં મમ પુત્ર કૃતાજ્ઞયા ।
શાન્તિં પ્રાપ્સ્યસિ સર્વત્ર ગાણપત્યો ભવિષ્યસિ ॥ ૭૦॥

સર્વત્ર વ્યાપકત્વેન મદોયં સંસ્થિતોઽભવત્ ।
ત્વયા સૃષ્ટોઽધુના પાપી પીડયિષ્યતિ નિશ્ચિતમ્ ॥ ૭૧॥

તપસા મદયુક્તેન કિં કૃતં પુત્ર દુઃખદમ્ ।
અધુના ગણપં ભક્ત્યા ભજ યોગસ્ય સેવયા ॥ ૭૨॥

ઇત્યુક્ત્વા વિરરામાઽથ ભૃગુઃ સર્વાર્થકોવિદઃ ।
શાન્તિં યોગપ્રદઃ સાક્ષાદ્ગાણપત્યો મહાયશાઃ ॥ ૭૩॥

ઇદં ભૃગોશ્ચરિત્રં યઃ શ‍ૃણુયાદ્વા પઠેન્નરઃ ।
સ લભેદીપ્સિતં સર્વં પ્રહ્લાદાઽત્ર ન સંશયઃ ॥ ૭૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ભૃગુચરિતં નામ દ્વિચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૨

## ૨.૪૩ ચ્યવનમાહાત્મ્યં નામ ત્રિચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
ભૃગોર્વચનમાકર્ણ્ય લજ્જિતશ્ચ્યવનોઽભવત્ ।
તં પ્રણમ્ય મહાભક્ત્યા પ્રપચ્છ સ કૃતાઞ્જલિઃ ॥ ૧॥

ચ્યવન ઉવાચ ।
ક્ષમસ્વ મેઽપરાધં ચ યત્કૃતં સર્જનં મયા ।

મદસ્ય ભાગહીનૌ તાવશ્વિનૌ ભાગસંયુતૌ ॥ ૨॥

અધુના ગણનાથસ્ય જ્ઞાનં મે વદ શાન્તિદમ્ ।
મદાદિકં સમુત્સૃજ્ય યેન શાન્તો ભવામ્યહમ્ ॥ ૩॥

ગૃત્સમદ ઉવાચ ।
તદીયં વાક્યમાકર્ણ્ય ભૃગુસ્તં પ્રાહ સિદ્ધિદમ્ ।
યોગં પૂર્ણં ગણેશાખ્યં તં શૃણુષ્વ વદામ્યહમ્ ॥ ૪॥

ભૃગુરુવાચ ।
ગણેશો બ્રહ્મરૂપોઽયં પૂર્ણશાન્તિમયઃ સ્મૃતઃ ।
ભેદાભેદાદિયોગેન ગણેશઃ પ્રાપ્યતે નરૈઃ ॥ ૫॥

માયામયમિદં સર્વં ભેદાભેદમયં સુત ।
ત્યક્ત્વા ગણેશ્વરત્વેન ન ચિત્તં સમ્ભવેત્ કદા ॥ ૬॥

તદા ચિત્તસ્ય વૃત્તીનાં પઞ્ચાનાં નાશ એવ ચ ।
જાયતે નાઽત્ર સન્દેહો યોગશાન્તિમયો ભવેત્ ॥ ૭॥

અતસ્ત્વં ગણરાજં તં ભજ યોગસ્ય સેવયા ।
મયોક્તેન વિધાનેન શાન્તિયુક્તો ભવિષ્યસિ ॥ ૮॥

ઇત્યુક્ત્વા વિરરામાઽથ ભૃગુઃ શાન્તિસમન્વિતઃ ।
તં પ્રણમ્ય યયૌ સોઽપિ ચ્યવનઃ પરામાદૃતઃ ॥ ૯॥

વને ગત્વા તપસ્તપ્તં તેન યોગપ્રદાયકમ્ ।
ક્રમેણ ચિત્તભૂમીનાં શોધનં ચ કૃતં બલાત્ ॥ ૧૦॥

શમશ્ચૈવ દમસ્તેન સેવિતૌ ભૂમિનાશનાત્ ।
સર્વં સુસુલભં પ્રાપ્તં તતો બ્રહ્મવિચારતઃ ॥ ૧૧॥

શાન્તિયોગં સમાસાદ્ય તદાકારેણ સંસ્થિતઃ ।
ગણેશમભજન્નિત્યં ગાણપત્યસ્વભાવતઃ ॥ ૧૨॥

તં ગણેશો યયૌ દૈત્ય મૂષકોપરિ સંસ્થિતઃ ।
ગજાનનશ્ચતુર્બાહુઃ પ્રતાપી ચ મહોદરઃ ॥ ૧૩॥

તં દૃષ્ટ્વા દણ્ડવદ્ભૂમૌ પતિતશ્ચ્યવનો મુનિઃ ।
પૂજયિત્વા વિધાનેન તતઃ સ્તોતું પ્રચક્રમે ॥ ૧૪॥

હેરમ્બસ્યોપનિષદા સંસ્તુતો ગણનાયકઃ ।

તતઃ પ્રસન્નતાં યાતઃ પ્રદદૌ વરમુત્તમમ્ ॥ ૧૫॥

ગણેશ ઉવાચ ।
યદ્યદિચ્છસિ વિપ્રેન્દ્ર તત્તત્તે સફલં ભવેત્ ।
યોગશાન્તિસ્થભાવેન સદા તિષ્ઠસિ માનદ ॥ ૧૬॥

ભક્તિર્મદીયપાદે વૈ દૃઢા તવ ભવિષ્યતિ ।
સ્મૃતોઽહં પુરતો વિપ્ર તુભ્યં દાસ્યામિ દર્શનમ્ ॥ ૧૭॥

એવમુક્ત્વા ગણાધીશોન્તર્ધાનમગમત્ પ્રભુઃ ।
તેનાઽપિ સ્થાપિતા મૂતિર્ગણેશસ્ય ચતુર્ભુજા ॥ ૧૮॥

ચ્યવનાશ્રમવાસી સ તદહાત્ ગણપોઽભવત્ ।
દર્શનાત્ સ્મરણાત્ સદ્યો ભુક્તિર્મુક્તિશ્ચ જાયતે ॥ ૧૯॥

એતત્તે કથિતં પુણ્યં ચ્યવનસ્ય મહાત્મનઃ ।
આખ્યાનં સર્વદોષઘ્નં નાનાસિદ્ધિફલપ્રદમ્ ॥ ૨૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ચ્યવનમાહાત્મ્યં નામ ત્રિચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૩
(Page ખં. ૨ અ. ૪૪ પાન ૯૩)

## ૨.૪૪ મદાસુરસ્ય રાજ્યાભિષેકો નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

પ્રલ્હાદ ઉવાચ ।
શ્રુતં ચ્યવનમાહાત્મ્યં વિશ્રાન્તં મે ચ માનસમ્ ।
મદસ્ય ચરિતં બ્રૂહિ કિં ચકાર મહામુને ॥ ૧॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો ગૃત્સમદો મહાયોગી પ્રતાપવાન્ ।
ગાણપત્યવરિષ્ઠશ્ચોવાચ તચ્છૃણુ સાદરમ્ ॥ ૨॥

ગૃત્સમદ ઉવાચ ।
શ ૃણુ પ્રહ્લાદ માહાત્મ્યં મદસ્ય ક્રમસંયુતમ્ ।
ચ્યવનેન સ સંસૃષ્ટો મદઃ પાતાલમાયયૌ ॥ ૩॥

વિચાર્ય બલવાન્ દૈત્યૈર્યયૌ શુક્રં મહામુનિમ્ ।

તં પ્રણમ્ય સ્થિતો દૂરં બદ્ધાઞ્જલિપુટો મદઃ ॥ ૪॥

વિનયેન સમાયુક્તં મદં દૃષ્ટ્વા સ ભાર્ગવઃ ।
કાવ્યસ્તં માનયામાસ કુતઃ કોઽસિ વદસ્વ મામ્ ॥ ૫॥

તતઃ સ હર્ષિતો ભૂત્વા જગાદ મુનિસત્તમમ્ ।
ચ્યવનાચ્ચ સમુત્પન્નં ભાર્ગવં વિદ્ધિ માં મુને ॥ ૬॥

તવ ભ્રાતૃસુતોઽહં વૈ શરણં ત્વામુપાગતઃ ।
શિષ્યં માં કુરુ યોગીશ યેનાઽહં માનિતો ભુવિ ॥ ૭॥

બ્રહ્માણ્ડસ્ય મહદ્રાજ્યં કર્તુમિચ્છામિ ભાર્ગવ ।
મદોઽહં મદરૂપેણ જેષ્યામિ ત્વત્પ્રસાદતઃ ॥ ૮॥

ઇતિ તસ્ય વચઃ શ્રુત્વા નાતિહૃષ્ટેન ચેતસા ।
મદં તં શિષ્યભાવેન જગ્રાહ મુનિસત્તમઃ ॥ ૯॥

શક્તિમન્ત્રં દદૌ તસ્મૈ કવિઃ સર્વાર્થકોવિદઃ ।
એકાક્ષરવિધાનેન સહિતં ભાર્ગવાગ્રણીઃ ॥ ૧૦॥

સ યયૌ તં નમસ્કૃત્ય વનં તપસિ સંસ્થિતઃ ।
નિરાહારયુતો દૈત્યઃ શક્તિધ્યાનપરાયણઃ ॥ ૧૧॥

તસ્ય દેહે સમુત્પન્નો વલ્મીકો બહુકાલતઃ ।
લતાતરુસમાયુક્તસ્તથાઽપિ તપસિ સ્થિતઃ ॥ ૧૨॥

અસ્થિમાત્રાવશિષ્ટોઽભૂદજપન્ મનુમાદરાત્ ।
ધ્યાનં સાઙ્ગં ચકારાઽસૌ સ્થિરચિત્તેન તાપસઃ ॥ ૧૩॥

દિવ્યવર્ષસહસ્રાણિ પઞ્ચ વૈ તપતઃ કિલ ।
ગતાનિ દૈત્યરાજેન્દ્રાતુરં સર્વં તદાઽભવત્ ॥ ૧૪॥

તતઃ શક્તિર્યયૌ તસ્યાઽશ્રમે ભક્તિપ્રભાવિતા ।
સિંહારૂઢા મહાભાગા શક્તિભિઃ સંવૃતા પરા ॥ ૧૫॥

પુરુષાકૃતિસંસ્થા તુ તદધીનાશ્ચરન્તિ તાઃ ।
પુરતો ભક્તિસંયુક્તાઃ પ્રકૃતીનાં મહાબલાઃ ॥ ૧૬॥

બોધયામાસ સા શક્તિરાદિમાયા મદં તતઃ ।
સ્વભક્તં તાપસં નૈવ સ બુબોધ મદાસુરઃ ॥ ૧૭॥

તતસ્તયા જલેનૈવ માર્જિતાઙ્ગો મહામદઃ ।
સાવધાનોઽભવત્તત્ર દૃષ્ટ્વા શક્તિં સમુત્થિતઃ ॥ ૧૮॥

તાં પ્રણમ્ય મહાભક્ત્યાઽપૂજયન્ ભક્તિસંયુતઃ ।
કૃત્વા કરપુટં દેવીં તુષ્ટાવ ચ યથામતિ ॥ ૧૯॥

મદ ઉવાચ ।
નમામિ ત્વાં મહામાયે સર્વશક્તિસમન્વિતામ્ ।
ત્વદાધારમિદં સર્વં શક્તિયુક્તં પ્રવર્તતે ॥ ૨૦॥

અનાદિમપ્રમેયાં ત્વાં ન જાનન્તિ મહર્ષયઃ ।
વેદાન્તવેદ્યરૂપાં વૈ નમામિ પરમેશ્વરીમ્ ॥ ૨૧॥

નાનાભેદકરીં દેવીં નાનાભેદવિવર્જિતામ્ ।
ભેદાભેદમયીં ત્વાઽહં નમામિ સકલેશ્વરીમ્ ॥ ૨૨॥

પાર્વતીં દક્ષપુત્રીં ચ હિમાચલસુતાં તથા ।
સમુદ્રતનયાં લક્ષ્મીં સાવિત્રીં ત્વાં નમામ્યહમ્ ॥ ૨૩॥

ત્વાં સ્વાહાં ત્વાં સ્વધાં ચૈવ વષટ્કારાત્મિકાં શિવામ્ ।
બુદ્ધિરૂપાં દેવમયીં જ્ઞાનરૂપાં નમામ્યહમ્ ॥ ૨૪॥

સિદ્ધિદાં સર્વકાર્યેષુ સિદ્ધિરૂપાં તપસ્વિનીમ્ ।
યોગિનીં યોગદાત્રીં વૈ યોગેશીં ત્વાં નમામ્યહમ્ ॥ ૨૫॥

(Page ખં. ૨ અ. ૪૪ પાન ૯૪)
ત્વાં સ્તોતું ન સમર્થા યે મુનયો વેદવાદિનઃ ।
દેવાઃ સ્કન્દશ્ચ શેષશ્ચ તત્રાઽહં સ્તૌમિ કિં પરામ્ ॥ ૨૬॥

ધન્યૌ મે પિતરૌ જ્ઞાનં તપો વિદ્યાદિકં ચ યત્ ।
યત્તવાઙ્ઘ્રિયુગં દૃષ્ટં સર્વદુઃખવિમોચનમ્ ॥ ૨૭॥

ઇત્યુક્ત્વા સંસ્થિતસ્તૂષ્ણીં ભાવેન સ મદાસુરઃ ।
તમુવાચ મહાશક્તિર્ભક્તિભાવેન યન્ત્રિતા ॥ ૨૮॥

શક્તિરુવાચ ।
ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિવિવર્ધનમ્ ।
ભવિષ્યતિ મહાભાગ સર્વકામફલપ્રદમ્ ॥ ૨૯॥

ધર્માર્થકામમોક્ષાણાં સાધનં પ્રભવિષ્યતિ ।

પઠતાં શ‍ૃણ્વતાં સર્વં સુખદં ચ મહાસુર ॥ ૩૦॥

વરાન્ વરય દાસ્યામિ ત્વયા સ્તોત્રેણ તોષિતા ।
તપસોગ્રેણ દૈત્યેન્દ્ર દુર્લભાન્ મનસિ સ્થિતાન્ ॥ ૩૧॥

ગૃત્સમદ ઉવાચ ।
દેવ્યા વચનમાકર્ણ્ય હર્ષિતઃ સ મદાસુરઃ ।
તાં પ્રણમ્ય જગાદાઽથ વરાન્ પરસુદુર્લભાન્ ॥ ૩૨॥

મદાસુર ઉવાચ ।
યદિ દેવિ પ્રસન્ના ત્વં યદિ દેયા વરાઃ પરાઃ ।
તર્હિ મે મરણં કુત્ર ન ભવેત્ત્વં તથા કુરુ ॥ ૩૩॥

દેહિ મે સકલં રાજ્યં ત્રૈલોક્યસ્ય જગન્મયિ ।
યદ્યદિચ્છામિ તત્તદ્વૈ પ્રસિદ્ધ્યતુ સદાશિવે ॥ ૩૪॥

ત્વં ચ પ્રકૃતિરૂપા વૈ ત્વત્તઃ સર્વં સમુદ્ભવમ્ ।
પઞ્ચધા તન્મમાધીનં જનનિ ત્વં સદા કુરુ ॥ ૩૫॥

તતસ્તં જગદમ્બા સોવાચ વિસ્મિતમાનસા ।
યદુત્પન્નં મહાદૈત્ય તસ્માત્તે મરણં ન હિ ॥ ૩૬॥

પઞ્ચધા યદ્વિભક્તં તત્તવાધીનં ભવિષ્યતિ ।
યદ્યદિચ્છસિ તત્તદ્વૈ સફલં સર્વદા ભવેત્ ॥ ૩૭॥

આરોગ્યમચલં રાજ્યં બ્રહ્માણ્ડસ્ય ભવિષ્યતિ ।
ન સમસ્તે ચ દૈત્યેન્દ્ર યુદ્ધે કશ્ચિદ્ભવેદપિ ॥ ૩૮॥

ઇત્યુક્ત્વાન્તર્દધે દેવી જગન્માતાઽસુરેશ્વર ।
મદશ્ચ હર્ષિતોઽત્યન્તં સ્વગૃહં પ્રત્યપદ્યત ॥ ૩૯॥

પ્રમાદાસુરકન્યાં વૈ સાલસાં રૂપશાલિનીમ્ ।
ઉપયેમે વિધાનેન દૈત્યૈઃ સમ્માનિતો ભૃશમ્ ॥ ૪૦॥

વિલાસદં તતસ્તેન નગરં વાસિતં બભૌ ।
તત્રાયયુશ્ચ વાસાર્થં દિગ્ભ્યો દૈત્યા મહાસુરાઃ ॥ ૪૧॥

અમાત્યાસ્તસ્ય ચત્વારઃ સઞ્જાતા લોકવિશ્રુતાઃ ।
બાણસ્ત્રિપુરનામા વૈ તારકઃ શઙ્ખસંજ્ઞકઃ ॥ ૪૨॥

દૈત્યૈસ્તત્ર સમાનીતઃ કવિઃ પરમયોગવિત્ ।

બ્રાહ્મણૈઃ સહ તં રાજ્યે સિષેચ સ મદાસુરમ્ ॥ ૪૩॥

દૈત્યાનાં રાક્ષસાનાં ચાસુરાણાં પતિરાદરાત્ ।
જાતો મદાસુરસ્તત્ર હર્ષિતા દૈત્યપા બભુઃ ॥ ૪૪॥

પુત્રાસ્ત્રયઃ સમુત્પન્નાઃ સાલસાયાં મદાસુરાત્ ।
વિલાસી લોલુપશ્ચૈવ ધનપ્રિય ઇતિ સ્મૃતાઃ ॥ ૪૫॥

એવં રાજ્યં ચકારાઽસૌ દૈત્યાનામસુરેશ્વરઃ ।
ગર્વેણ તેન વા કો વૈ ન દધ્રે બલસંયુતઃ ॥ ૪૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે મદાસુરસ્ય રાજ્યાભિષેકો નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૪
(Page ખં. ૨ અ. ૪૫ પાન ૯૫)

## ૨.૪૫ મદાસુરસ્વર્ગવિજયો નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
તતઃ કદાચિદ્દૈત્યેન્દ્રૈર્બોધિતોઽભૂન્ મદાસુરઃ ।
વિજયાય સમુદ્યુક્તસ્ત્રૈલોક્યસ્ય મદાન્વિતઃ ॥ ૧॥

સ શુક્રમુપસઙ્ગમ્ય તં પ્રણમ્ય વિશેષતઃ ।
સઙ્ગૃહ્ય મુનિમુખ્યં વૈ વિજયાયાઽકરોન્ મતિમ્ ॥ ૨॥

નાનાદિગ્ભ્યઃ સમાયાતા અસુરા દૈત્યપાસ્તતઃ ।
સન્નદ્ધાસ્ત્વરમાણાશ્ચ રાક્ષસાઃ પ્રયયુર્મદમ્ ॥ ૩॥

ચતુરઙ્ગબલૈર્યુક્તઃ સઙ્ખ્યાતીતૈર્મદાસુરઃ ।
નિર્યયૌ દિગ્જયાર્થં સ સંસ્તુતો બન્દિભિર્નૃપઃ ॥ ૪॥

દૈત્યાઃ કેઽપિ મહાઘોરા નિઃસૃતાસ્તત્પુરો બભુઃ ।
મેરુમન્દરસઙ્કાશા યમાય ભયદાયકાઃ ॥ ૫॥

નાનાશસ્ત્રાસ્ત્રસંયુક્તાઃ કવચાદિસમાવૃતાઃ ।
નાનાવાહનગાસ્તે વૈ કમ્પયન્તો વસુન્ધરામ્ ॥ ૬॥

કેચિત્પાષાણહસ્તાશ્ચ કેચિદ્ વૃક્ષધરાસ્તથા ।
પર્વતસ્ય ધરાઃ કેચિન્ મહાબલપરાક્રમાઃ ॥ ૭॥

નાનાભયઙ્કરાકારા બભુઃ સૈન્યે સમન્તતઃ ।
તદા સંશયિતાઃ સર્વે બ્રહ્માણ્ડે લોકસઙ્કુલે ॥ ૮॥

પૃથિવીજયને સક્તા દૈત્યાઃ પરમદારુણાઃ ।
આદૌ તત્રાસુરેશાનમદાસુરસુચોદિતાઃ ॥ ૯॥

કેચિત્ કૃત્વા મૃતા યુદ્ધં કેચિત્તાન્ શરણં યયુઃ ।
રાજાનો ભયસંયુક્તાઃ કેચિચ્ચ્યવનમાશ્રિતાઃ ॥ ૧૦॥

પ્રલયં મેનિરે લોકા ભૂમિસ્થાઃ સર્વશસ્તદા ।
દૈત્યા ભૂમણ્ડલં જિત્વાઽભવંસ્તે હર્ષસંયુતાઃ ॥ ૧૧॥

સપ્તદ્વીપવતીં પૃથ્વીં જિત્વા દૈત્યા મહાસુરાઃ ।
દેવાનાં જયને બુદ્ધિં ચક્રુઃ પરમદારુણાઃ ॥ ૧૨॥

વાયુવેગસમાઃ સર્વે ગતાઃ સ્વર્ગં ક્ષણાર્ધતઃ ।
વનાનિ તે બભઞ્જુશ્ચ દેવોદ્યાનાનિ દૈત્યપ ॥ ૧૩॥

દેવૈઃ સંજ્ઞાપિતસ્તત્ર સુરેન્દ્રઃ ક્રોધસંયુતઃ ।
યુદ્ધાય શસ્ત્રસંયુક્તૈર્દેવૈર્વૈ તત્પરોઽભવત્ ॥ ૧૪॥

બૃહસ્પતિં સમાગમ્ય પ્રણનામ સુરેશ્વરઃ ।
સુરેશ્વરો દ્વિજેન્દ્રેણ માનિતો ભક્તિસંયુતઃ ॥ ૧૫॥

તત ઇન્દ્રં જગાદાઽસૌ મહાકાન્તિર્બૃહસ્પતિઃ ।
શ◌ૃણ દેવેન્દ્ર વાક્યં મે કાલકર્મયુતં મહત્ ॥ ૧૬॥

શક્તેઃ સ વરદાનેન દુર્જયઃ સ મદાસુરઃ ।
અતઃ સર્વં પરિત્યજ્ય પલાયધ્વં સુરેશ્વરાઃ ॥ ૧૭॥

એવમુક્તે ચ જીવેન પલાયન્ત ચ દેવતાઃ ।
બૃહસ્પતિસમાયુક્તાસ્ત્યક્ત્વા સ્વર્ગાદિકં ભયાત્ ॥ ૧૮॥

તતો મદાસુરો જ્ઞાત્વા સર્વં દેવવિચેષ્ટિતમ્ ।
દૈત્યૈર્યુક્તઃ સુસંહૃષ્ટ આયયાવમરાવતીમ્ ॥ ૧૯॥

તત્રેન્દ્રાસનગો ભૂત્વા રરાજ સ મદાસુરઃ ।
સેવ્યમાનોઽપ્સરોભિશ્ચ ગન્ધર્વૈર્ગાનતત્પરૈઃ ॥ ૨૦॥

વિવિધૈર્દિવ્યભોગૈઃ સ સેવ્યમાનોઽમરૈસ્તથા ।
બલદર્પસમાયુક્તો દૈત્યૈર્નાનાવિધૈર્બભૌ ॥ ૨૧॥

દેવાનાં સ પદેષ્વેવ સ્થાપયામાસ દૈત્યપાન્ ।
તારકાદ્યા મહાવીર્યાઃ સંસ્થિતા બુભુજુઃ સુખમ્ ॥ ૨૨॥

તતસ્તૈઃ સ વિચાર્યૈવ યયૌ બ્રહ્મપદં મહત્ ।
વિધાતા સ્થાનમુત્સૃજ્ય કૈલાસં તદ્ભયાદ્યયૌ ॥ ૨૩॥

સત્યલોકે સુરાઃ સર્વે બભ્રમુર્યત્ર તત્ર વૈ ।
નાનાભોગયુતા દુષ્ટા રેજિરે મદસંયુતાઃ ॥ ૨૪॥

વિમાનૈર્વાહ્યમાનાસ્તે મનોવેગૈઃ સુખપ્રદૈઃ ।
કામગૈશ્ચ મહાદૈત્યા મેનિરે કૃતકૃત્યતામ્ ॥ ૨૫॥

મદાસુરસ્તત્ર રાજા બ્રહ્માસનસમાશ્રિતઃ ।
મુદં લેભેઽસુરેશાનૈઃ સંવૃતઃ કાલભીતિદૈઃ ॥ ૨૬॥

(Page ખં. ૨ અ. ૪૫ પાન ૯૬)
તતસ્તૈઃ સંવૃતો દૈત્યો યયૌ વૈકુણ્ઠમાદરાત્ ।
જ્ઞાત્વાઽઽગતં મહાક્રૂરં પલાયત રમાપતિઃ ॥ ૨૭॥

સોઽપિ કૈલાસમગમદ્વિષ્ણુઃ સ્વૈઃ પાર્ષદૈર્વૃતઃ ।
મદાસુરો મહાદુષ્ટો વૈકુણ્ઠે સંસ્થિતોઽભવત્ ॥ ૨૮॥

નારાયણાસને સંસ્થો દૈત્યરાજૈર્મહાબલૈઃ ।
સંવૃતઃ શુશુભેઽતીવ નાનાભોગસમન્વિતઃ ॥ ૨૯॥

સુખં ચાનુપમં તત્ર વૈકુણ્ઠે વિષ્ણુના કૃતમ્ ।
તદેવ બુભુજે સોઽપિ દૈત્યૈર્દુષ્ટૈઃ સમન્વિતઃ ॥ ૩૦॥

વિમાનાનિ વિચિત્રાણિ દેવોદ્યાનાનિ સર્વશઃ ।
કલ્પવૃક્ષયુતાન્યેતે દૈત્યપાઃ સમભુઞ્જત ॥ ૩૧॥

તતસ્તૈઃ સહિતો વીરઃ પ્રતાપી સ મદાસુરઃ ।
કૈલાસં શઙ્કરસ્થાનં યયૌ રણવિધિત્સયા ॥ ૩૨॥

શિવોઽપિ સ્વગણૈર્યુક્તો દેવૈર્વિષ્ણ્વાદિભિર્વૃતઃ ।
શક્તિલોકં જગામાઽથ ભયસઙ્કુલિતો મદાત્ ॥ ૩૩॥

દૈત્યેશ્વરો મહાદૈત્યૈઃ કૈલાસે સંસ્થિતોઽભવત્ ।
અતુલં સુખમત્યન્તં બુભુજે તૈઃ સમન્વિતઃ ॥ ૩૪॥

શિવેન રચિતં પુણ્યં કૈલાસે કલ્પિતપ્રદમ્ ।
નાનાશ્ચર્યયુતં હૃષ્ટો દૈત્યસ્તદ્બુભુજે બલાત્ ॥ ૩૫॥

મોહિતો ભોગભાવેન ધન્યં ચૈવ મદાસુરઃ ।
મેને સ્વં સર્વદનુજૈસ્ત્રિપુરપ્રમુખૈઃ ખલૈઃ ॥ ૩૬॥

દેવાઃ સર્વે યયુઃ શક્તેર્લોકં તદ્ભયસઙ્કુલાઃ ।
શક્તિસ્તાન્ ગણસંયુક્તાન્ સમાશ્વાસ્ય સ્થિતાઽભવત્ ॥ ૩૭॥

શિવાદીનાદિમાયા સા જગાદ વદતાં વરા ।
જગતશ્ચ જગન્માતા સૃષ્ટિસ્થિત્યન્તકારિણી ॥ ૩૮॥

આદિશક્તિરુવાચ ।
મા ભયં દેવદેવેશાઃ કુરુધ્વં મમ સન્નિધૌ ।
તિષ્ઠતાઽત્ર ન દૈત્યોઽયં કદાપિ ત્વાગમિષ્યતિ ॥ ૩૯॥

મદીયવરદાનેન ગર્વયુક્તો બભૂવ હ ।
મદાસુરો મહાભાગો વચો મમ કરિષ્યતિ ॥ ૪૦॥

આગમિષ્યતિ દૈત્યશ્ચેત્તદા માં પૂજયિષ્યતિ ।
મદીયમવમાનં વૈ ન કરિષ્યતિ દેવપઃ ॥ ૪૧॥

કદાચિત્તેન ગર્વેણ મમલોકનિવાસિનઃ ।
પીડિતાશ્ચેત્ ક્ષણં સદ્યો હનિષ્યામિ ન સંશયઃ ॥ ૪૨॥

એવમાશ્વાસિતા દેવાઃ શક્ત્યા તે તત્ર સંસ્થિતાઃ ।
ભયં ત્યક્ત્વા ચ દૈત્યેભ્યો દુઃખયુક્તા મહાસુર ॥ ૪૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે મદાસુરસ્વર્ગવિજયો નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૫
(Page ખં. ૨ અ. ૪૬ પાન ૯૭)

## ૨.૪૬ તારકાસુરસામવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
કૈલાસે દૈત્યપૈર્યુક્તઃ સંસ્થિતોઽભૂન મદાસુરઃ ।
કિયત્કાલં પ્રભુઞ્જાનો ભોગાન્ પરમદુર્લભાન્ ॥ ૧॥

ગતે કિયતિ કાલે ચ ત્રિપુરાદ્યાસ્તમબ્રુવન્ ।
દેવાનાં છેદને દુષ્ટાઃ સંસક્તા મદસંયુતાઃ ॥ ૨॥

ત્રિપુરાદ્યા ઊચુઃ ।
શ‍ૃણુ રાજન્ મહાભાગ મદાસુર હિતં વચઃ ।
દેવાઃ શમ્ભુમુખાઃ સર્વે શક્તિલોકં ગતા બભુઃ ॥ ૩॥

તત્ર શક્ત્યા વિશેષેણ માનિતાઃ સુરસત્તમાઃ ।
ભયહીનાઃ સુખે સક્તા બુભુજુર્વિવિધં સુખમ્ ॥ ૪॥

અસ્માકં શત્રવઃ સર્વે દેવા દૈત્ય મતાઃ સદા ।
દૈત્યાનાં કદને સક્તાઃ સમર્થાશ્ચેન્ન સંશયઃ ॥ ૫॥

હિરણ્યાક્ષાદયઃ સર્વે સૂદિતા દેવપૈઃ પુરા ।
છિદ્રદર્શનસંયુક્તૈરસ્માકં તૈર્વિશેષતઃ ॥ ૬॥

સર્વત્ર ખ્યાતિમત્યન્તં જાનન્તિ સકલા જનાઃ ।
દેવાનાં વૈરિભાવં ચ પરસ્પરવધે રતમ્ ॥ ૭॥

અસ્માકં શક્તિરત્યન્તં વૈરિભાવે પ્રવર્તિતા ।
માન્યા તદપિ દૈત્યેન્દ્ર દેવાનાં સા હિતે રતા ॥ ૮॥

અતઃ શક્તિપુરે સ્વામિન્ ગમિષ્યામો ન સંશયઃ ।
હનિષ્યામોઽમરાન્ સર્વાન્ વૈરિભાવં સમાશ્રિતાન્ ॥ ૯॥

દૈત્યાનાં વચનં શ્રુત્વા પ્રતાપી સ મદાસુરઃ ।
ઉવાચ તાન્ મહાદૈત્યો વિનયેન સમન્વિતઃ ॥ ૧૦॥

મદાસુર ઉવાચ ।
શ‍ૃણુધ્વં ત્રિપુરાદ્યા મે વચનં હિતકારકમ્ ।
શક્તિપ્રસાદસમ્ભૂતમૈશ્વર્યં સકલં ચ મે ॥ ૧૧॥

ઇષ્ટા દેવી મદીયા સા તાં ભજામિ વિશેષતઃ ।
અતસ્તસ્યા હિતં માન્યં કર્તવ્યં સકલૈઃ સદા ॥ ૧૨॥

તાં ચ દેવા યયુઃ સર્વે શરણં નાત્ર સંશયઃ ।
મદીયદાસભાવેન યન્ત્રિતા શક્તિરાદરાત્ ॥ ૧૩॥

દેવાનાં પક્ષપાતેન સહ તૈર્નાગતાઽભવત્ ।
અસ્માકં તુ વધાર્થાય મહામાયા ચ દાનવાઃ ॥ ૧૪॥

અતઃ પ્રભજને તસ્યા આસક્તા યે ભવન્તિ વૈ ।
તે સમ્માન્યા મયા નિત્યં મા વૈરં કુરુતાઽસુરાઃ ॥ ૧૫॥

મદાસુરવચઃ શ્રુત્વા દૈત્યપાસ્તં પુનર્જગુઃ ।
ક્રોધયુક્તા મદોત્સિક્તા દેવાનાં તુ વધે રતાઃ ॥ ૧૬॥

દૈત્યેશા ઊચુઃ ।
મદાસુર શ઼ૃણુ સ્વામિન્ પુરાવૃત્તં કથાનકમ્ ।
હિરણ્યકશિપુઃ પ્રોક્તો બ્રહ્મલબ્ધવરો મહાન્ ॥ ૧૭॥

અભવન્ બહવશ્ચાન્યે દૈત્યેશા દેવશત્રવઃ ।
દેવપક્ષાશ્રયં સર્વે ત્યક્ત્વા સ્વં ધર્મમાશ્રિતાઃ ॥ ૧૮॥

કશ્યપસ્ય સુતૌ ચૈવ તાવુભૌ દેવસંશ્રયમ્ ।
ત્યક્ત્વા તુ દેવસંહારે દૈત્યેશૌ તત્પરૌ પુરા ॥ ૧૯॥

અતસ્ત્વયાઽપિ કર્તવ્યં દેવાનાં મૂલનાશનમ્ ।
અસુરાશ્ચ સુરાઃ પ્રોક્તા વેદેઽપિ ચ વિરોધિનઃ ॥ ૨૦॥

શક્તિલોકં ગમિષ્યામો ભક્તિયુક્તા વયં પ્રભો ।
દેવાસ્તાન્નિર્દલિષ્યામઃ ખલુ શક્તેઃ પ્રસન્નિધૌ ॥ ૨૧॥

યદિ શક્તિર્મહામાયાઽસ્માકં પક્ષં સમાશ્રિતા ।
તદા તાં પૂજયિષ્યામઃ કુલદૈવતમાદરાત્ ॥ ૨૨॥

અન્યથા યોધયિષ્યામો વયં શક્ત્યા ન સંશયઃ ।
શત્રુપક્ષાશ્રિતાં જ્ઞાત્વા નાઽત્ર દોષઃ પ્રવર્તતે ॥ ૨૩॥

દૈત્યેશાનાં વચઃ શ્રુત્વા દુર્મતિઃ સ મદાસુરઃ ।
તથેતિ સત્યમત્યન્તં માનયામાસ દૈત્યપઃ ॥ ૨૪॥

તદૈવ દૈત્યસંયુક્તો યયૌ લોકં મદાસુરઃ ।
શક્તેશ્ચ સન્નિધૌ દૂતં પ્રેષયામાસ દુર્મતિઃ ॥ ૨૫॥

(Page ખં. ૨ અ. ૪૬ પાન ૯૮)
તારકં પ્રજગાદાઽસૌ ગચ્છ દેવીં મહાબલ ।
સામયુક્તં વદાઽઽશુ ત્વં મહામાયાં મહાસુર ॥ ૨૬॥

તં પ્રણમ્ય યયૌ વેગાચ્છક્તેઃ સન્નિધિમાદરાત્ ।
તારકો માનિતસ્તૈસ્તુ દેવૈઃ પરમદારુણઃ ॥ ૨૭॥

નત્વા શક્તિં મહામાયાં કૃતાઞ્જલિપુટોઽસુરઃ ।
તારકસ્તામુવાચાઽથ સામયુક્તં વચઃ ખલઃ ॥ ૨૮॥

તારકાસુર ઉવાચ ।
શ‍ૃણુ શક્તે મહામાયે આગતઃ સ મદાસુરઃ ।
દર્શનાર્થં ચ તે માતસ્તેનાઽહં પ્રેષિતોઽધુના ॥ ૨૯॥

તેનોદિતં ચ શક્તે ત્વં વચનં શ‍ૃણુ માનદે ।
ભક્તેન ભક્તિસંયુક્તં ભાવજ્ઞે જગદમ્બિકે ॥ ૩૦॥

અસ્માકં કુલદેવી તુ ત્વમેવાત્ર ન સંશયઃ ।
અસુરા હિ વયં સર્વે ત્વદીયાઃ સેવકા મતાઃ ॥ ૩૧॥

યત્રાઽસુરા વિરાજન્તિ સુરાસ્તત્ર હતપ્રભાઃ ।
ભવન્તિ નાત્ર સન્દેહઃ સ્વભાવાચ્છત્રવો મતાઃ ॥ ૩૨॥

અતો દેવાન્ સમુત્સૃજ્ય તિષ્ઠ ત્વં પૂજિતાઽસુરૈઃ ।
અસ્માકં શત્રવો દેવાસ્ત્વદીયાઃ શત્રવો મતાઃ ॥ ૩૩॥

પ્રણમન્તો વયં યાવત્તાવદ્દેવનિકૃન્તનમ્ ।
કરિષ્યામો ન સન્દેહસ્તસ્માન્ માતસ્ત્યજાઽઽશુ તાન્ ॥ ૩૪॥

એકં પક્ષં સમાશ્રિત્ય તિષ્ઠ ત્વં જગદમ્બિકે ।
અસુરાણાં સુરાણાં વા પૂજિતા સતતં પરે ॥ ૩૫॥

ઇત્યેવં કથિતં દેવિ મદસ્ય વચનં મયા ।
કુરુ ત્વં ભક્તરાજસ્ય પાલનં પરમાદરાત્ ॥ ૩૬॥

ગૃત્સમદ ઉવાચ ।
મદસ્ય વચનં ક્રૂરં તારકેણ પ્રકાશિતમ્ ।
તચ્છ્રુત્વા કુપિતા દેવી તં જગાદ મહાસુરમ્ ॥ ૩૭॥

શક્તિરુવાચ ।
મદીયં જગદમ્બેતિ નામ વેદે પ્રકાશિતમ્ ।
કેન માર્ગેણ દૈત્યેશ પક્ષમેકં સમાશ્રયે ॥ ૩૮॥

યથા દેવાસ્તથા દૈત્યા માન્યા મે નાત્ર સંશયઃ ।
દેવૈર્દૈત્યૈશ્ચ કર્તવ્યઃ સ્વસ્વધર્મો મહાસુર ॥ ૩૯॥

પાતાલે રાજ્યમાનન્દાદ્દૈત્યૈઃ કર્તવ્યમઞ્જસા ।

સ્વર્ગેષુ સર્વદા દેવૈઃ કર્તવ્યં સ્વસ્વભાવજમ્ ॥ ૪૦॥

વિપરીતે હનિષ્યામિ ક્રુદ્ધાઽહં નાત્ર સંશયઃ ।
અતો દૈત્યૈઃ પ્રગન્તવ્યં પાતાલે વૈ મદાજ્ઞયા ॥ ૪૧॥

શક્તેર્વચનમાકર્ણ્ય ક્રુદ્ધઃ સોઽપિ મહાસુરઃ ।
ઉવાચ તાં મહાશક્તિં ભયં ત્યક્ત્વા પ્રભાવતઃ ॥ ૪૨॥

તારક ઉવાચ ।
મા ગર્વં કુરુ શક્તે ત્વં શત્રુપક્ષસમાશ્રિતે ।
તપસા વયમુત્કૃષ્ટા જાતાઃ સ્વસ્ય ન સંશયઃ ॥ ૪૩॥

કર્મણા ત્વં પ્રસૃજસિ જગન્તિ જગદમ્બિકે ।
કર્માધીનમિદં સર્વં તત્ર ત્વં કિં કરિષ્યસિ ॥ ૪૪॥

કર્મણા દૈત્યરાજશ્ચ પ્રતાપી સ મદાસુરઃ ।
બ્રહ્માણ્ડાધિપતિર્ભૂત્વા દેવાન્ સર્વાન્ હનિષ્યતિ ॥ ૪૫॥

યુદ્ધાય સજ્જ ત્વં દેવિ દેવૈઃસહ જગન્મયિ ।
અસુરૈશ્ચ મહાભાગૈર્ગચ્છામિ મદસન્નિધૌ ॥ ૪૬॥

એવમુક્ત્વા મહાશક્તિં તારકઃ ક્રોધસંયુતઃ ।
જગામ શક્તિલોકાદ્વૈ મદદૈત્યસ્ય સન્નિધૌ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે તારકાસુરસામવર્ણનં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૬
(Page ખં. ૨ અ. ૪૭ પાન ૯૯)

## ૨.૪૭ ઇન્દ્રતારકસમાગમો નામ સપ્તચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
આગતં તારકં દૃષ્ટ્વા હર્ષિતઃ સ મદાસુરઃ ।
દૈત્યૈઃ સહ મહાસાધો પ્રહ્વન્નશ્ચાભવત્ ખલઃ ॥ ૧॥

મદાસુરં પ્રણમ્યાઽસૌ કથયામાસ તારકઃ ।
વૃત્તાન્તં દેવપક્ષે ચ સંશ્રિતં કુલદૈવતમ્ ॥ ૨॥

તચ્છ્રુત્વા મદ્યપો દૈત્યઃ પ્રતાપી સ મદાસુરઃ ।

ક્રોધયુક્તોઽભવત્તત્ર દેવાન્ હન્તું સમુદ્યતઃ ॥ ૩॥

સન્નદ્ધૈર્દૈત્યપૈઃ સર્વૈઃ સન્નદ્ધશ્ચ મદાસુરઃ ।
શક્તિલોકં જગામાઽથ મહાકાલ ઇવાઽઽબભૌ ॥ ૪॥

પુરઃપ્રાન્તે સ્થિતાન્ શક્તેર્ગણાન્ પરમવિશ્રુતાન્ ।
તાઞ્જઘ્નુશ્ચ મહાદૈત્યાઃ શસ્ત્રૈઃ પરમદારુણૈઃ ॥ ૫॥

છિન્નાઙ્ગાસ્તે પલાયન્ત ગતાઃ સ્વનગરેઽભવન્ ।
વૃત્તાન્તં કથયામાસુર્દૈત્યાનામાગમાત્મકમ્ ॥ ૬॥

શ્રુત્વા તત્ર મહાશક્તિર્દેવૈઃ સર્વૈર્મહાબલૈઃ ।
શઙ્કરાદિભિરન્વીતા યયૌ સઙ્ગ્રામમણ્ડલમ્ ॥ ૭॥

સિંહારૂઢા ચતુર્બાહુઃ ખડ્ગચર્મધરા બભૌ ।
ધનુર્બાણધરા ક્રોધાન્નાનાશક્તિસમન્વિતા ॥ ૮॥

વામાઙ્ગાચ્છ્રીઃ સમુત્પન્ના સાવિત્રી દક્ષિણાઙ્ગતઃ ।
હૃદયાત્ પુરતઃ સંજ્ઞા તાસાં સૈન્યં પૃથગ્બભૌ ॥ ૯॥

વિષ્ણુશઙ્કરમુખ્યાશ્ચ સન્નદ્ધા વાહને સ્થિતાઃ ।
સ્વસ્વસૈન્યેન સંયુક્તા બભુઃ કાલસમાઃ પુરઃ ॥ ૧૦॥

ઇત્યાદિશક્તિભિઃ શક્તૈર્દેવૈર્વૈ સંયુતં મહત્ ।
સૈન્યં દૈત્યેન્દ્રમુખ્યૈસ્તૈર્દૃષ્ટં પરમદારુણમ્ ॥ ૧૧॥

તતો દૈત્યૈશ્ચ શસ્ત્રૌઘૈસ્તાડિતં સહસા બલાત્ ।
શક્તિસૈન્યં મહાઘોરં ક્રોધયુક્તં બભૂવ હ ॥ ૧૨॥

શક્ત્યા સમ્પ્રેષિતા દેવા યુયુધૂ રણમણ્ડલે ।
કાલિકાદ્યા મહાયુદ્ધે શક્તયઃ કુપિતા ભૃશમ્ ॥ ૧૩॥

અકસ્માન્મિલિતે સૈન્યે પરસ્પરજયૈષિણી ।
દૈત્યાનાં ચૈવ દેવાનાં મરણે કૃતનિશ્ચયે ॥ ૧૪॥

સૈન્યાનાં રજસા તત્ર હૃતં જ્ઞાનં સમન્તતઃ ।
ન પ્રકાશો રવેરાસીત્ સ્વપરજ્ઞાનકારકઃ ॥ ૧૫॥

હેષિતૈઃ ક્ષ્વેડિતૈસ્તત્ર બૃંહિતૈ રથનેમિભિઃ ।
વાદિત્રાણાં મહાશબ્દૈર્નાદયુક્તા દિશોઽભવન્ ॥ ૧૬॥

શઙ્ખનાદૈઃ સિંહનાદૈર્નાનાનાદૈશ્ચ દૈત્યપ ।
બધિરા ઇવ યોધાસ્તે સઞ્જાતા રણમૂર્ધનિ ॥ ૧૭॥

શસ્ત્રૈરસ્ત્રૈરનેકૈશ્ચ પરિજઘ્નુઃ સમન્તતઃ ।
દ્રુમૈઃ પર્વતખણ્ડૈશ્ચ સ્વાન્ પરાન્ યુદ્ધદુર્મદાઃ ॥ ૧૮॥

મૃતાઃ કેચિત્ ક્ષતાઃ કેચિત્ કેચિચ્છસ્ત્રધરા બભુઃ ।
નિજઘ્નુઃ પરવીરાંસ્તે સ્વબલેન મહાબલાઃ ॥ ૧૯॥

ભગ્ને શસ્ત્રે સમગ્રે તે મલ્લયુદ્ધપરાયણાઃ ।
યુયુધુઃ ક્રોધસંયુક્તાઃ શસ્ત્રહીનાસ્તથાઽપરે ॥ ૨૦॥

કબન્ધા યુયુધુસ્તત્ર શસ્ત્રહસ્તા મહાબલાઃ ।
સ્વાન્ પરાનપિ જઘ્નુસ્તે સ્વપરજ્ઞાનવર્જિતાઃ ॥ ૨૧॥

બાણૈર્બાણાન્ સમાક્ષુબ્ધા વિજઘ્નુશ્ચ પરસ્પરમ્ ।
ખડ્ગૈઃ ખડ્ગાંસ્તથા ચાન્યે ગદાભિશ્ચ ગદા ભૃશમ્ ॥ ૨૨॥

તોમરૈશ્ચ મહાવીરાઃ પર્શુભિસ્તુ તથાઽપરે ।
ભિન્દિપાલૈશ્ચ પાશૈશ્ચ પરિજઘ્નુઃ પરસ્પરમ્ ॥ ૨૩॥

રથારૂઢા ગજારૂઢૈર્ગજારૂઢાઃ પદાતિભિઃ ।
અશ્વારૂઢૈસ્તથાઽન્યેઽપિ યુયુધુર્જાતસમ્ભ્રમાઃ ॥ ૨૪॥

તુમુલં દૈત્યદેવાનાં યુદ્ધં તત્ર પ્રવર્તિતમ્ ।
ઉભયોર્નાશકં ઘોરં વક્તું નૈવ પ્રશક્યતે ॥ ૨૫॥

પ્રવાહબહુલૈ રક્તૈ રજઃ સમ્પ્લાવિતં મહત્ ।
પ્રકાશસ્તત્ર સઞ્જાતઃ સ્વપરજ્ઞાનકારકઃ ॥ ૨૬॥

(Page  ખં. ૨ અ. ૪૭ પાન ૧૦૦)
પ્રબોધ્ય કેચિદ્દૈત્યાંસ્તાન સુરા જઘ્નુર્મહાબલાઃ ।
અસુરાશ્ચ સુરાંસ્તદ્વન્ મહાક્રોધસમન્વિતાઃ ॥ ૨૭॥

શક્તયઃ કુપિતાસ્તત્ર દૈત્યાંશ્ચૈવ પ્રજહ્રિરે ।
શસ્ત્રાસ્ત્રૈર્વિવિધૈઃ સર્વાઃ પિપિષુશ્ચાસુરેશ્વરાન્ ॥ ૨૮॥

દૈત્યાઃ પ્રકુપિતા અન્યે શસ્ત્રાસ્ત્રૈર્દેવમણ્ડલમ્ ।
છિન્નં ભિન્નમિમે ચક્રુઃ ક્રોધયુક્તા મહાબલાઃ ॥ ૨૯॥

મેરુશીતાચલપ્રખ્યા દૈત્યા દેવાઃ સ્થિતા બભુઃ ।

ચેલુર્ન ચ પદં તત્ર પરસ્પરવધે રતાઃ ॥ ૩૦॥

અભવન્ શોણિતૌઘાનાં મહાનદ્યઃ સમન્તતઃ ।
દેવદૈત્યશરીરેભ્યઃ પ્રસૂતાશ્ચ સહસ્રશઃ ॥ ૩૧॥

મેદોમાંસમહાપઙ્કાઃ પ્રપેતુર્ધરણીતલે ।
દેવાશ્ચ શતશો દૈત્યા ગતપ્રાણા રણેઽસુર ॥ ૩૨॥

માંસં કર્દમરૂપેણ યત્ર તત્ર સ્થિતં રણે ।
મૃતાનાં ન ચ સઙ્ખ્યાઽઽસીન્ માર્ગરોધનકારિણામ્ ॥ ૩૩॥

અસૃક્પ્રવાહજસ્તત્ર પૂરઃ સન્દદૃશે જનૈઃ ।
જલૌઘ ઇવ દૈત્યેન્દ્ર મહામોહપ્રવર્ધનઃ ॥ ૩૪॥

મૃતૈર્ગજૈસ્તથા ભગ્નૈ રથૈર્વાજિભિરેવ ચ ।
નાનાપશુગણૈરુષ્ટ્રૈઃ પક્ષિભિર્દુર્ગમં કૃતમ્ ॥ ૩૫॥

મુમૂર્ષવસ્તત્ર પેતુર્મૃતાઃ કેચિચ્ચ ખણ્ડિતાઃ ।
તદપિ ક્રોધસંયુક્તાઃ પ્રયત્નં ચક્રુરાદૃતાઃ ॥ ૩૬॥

એવં દશ દિનાન્યેવ દિવારાત્રં મહારણમ્ ।
બભૂવ સમયે તસ્મિન્ દેવદૈત્યસમુદ્ભવમ્ ॥ ૩૭॥

પલાયનપરા દેવાસ્તતો જાતા મહારણે ।
દશદિક્ષુ ભયોદ્વિગ્નાઃ પલાયન્તાઽસુરેશ્વર ॥ ૩૮॥

તદ્ દૃષ્ટ્વા પરમાશ્ચર્યં વજ્રભૃદ્દેવપૈર્વૃતઃ ।
સઙ્ગ્રામમકરોદ્ઘોરં દૈત્યનાશકરં પરમ્ ॥ ૩૯॥

વજ્રપાતેનાસુરાન્ સ ચૂર્ણયામાસ વેગતઃ ।
દેવેન્દ્રો વિવિધૈરન્યૈર્યમાદ્યા આયુધૈસ્તથા ॥ ૪૦॥

મૃતા દૈત્યગણાઃ કેચિત્ ભૃશં કેચિચ્ચ મૂર્ચ્છિતાઃ ।
મુમૂર્ષવઃ પરે તત્ર કૃતા વૈ વજ્રિણાઽભવન્ ॥ ૪૧॥

શક્ત્યાદિશસ્ત્રપાતેન વહ્નિચન્દ્રયમાદયઃ ।
અસુરાન્ મારયામાસુઃ ક્રોધયુક્તાઃ સુરેશ્વરાઃ ॥ ૪૨॥

તતો ભગ્નં બલં સર્વં દૈત્યાનાં ભયસઙ્કુલમ્ ।
દુદ્રાવ દિક્ષુ સર્વાસુ ત્રાતારં નાભ્યપદ્યત ॥ ૪૩॥

તતઃ સંહર્ષિતા દેવાસ્તથા દેવગણાઃ પરે ।
જયશક્તે મહામાયેઽવદંસ્તે જય સર્વદા ॥ ૪૪॥

તતઃ ક્રોધસમાયુક્તસ્તારકો દૈત્યપૈર્વૃતઃ ।
આયયૌ ક્રોધદીપ્તાક્ષો યોદ્ધું શક્રેણ વીર્યવાન્ ॥ ૪૫॥

આગત્ય રણભૂમિં સ તમુવાચ પુરન્દરમ્ ।
ગર્વયુક્તં મહોગ્રં ચ મોહિતો મદસંયુતઃ ॥ ૪૬॥

તારક ઉવાચ ।
કિં ત્વં યુધ્યસિ દેવેન્દ્ર દૈત્યપૈઃ પરમાદૃતૈઃ ।
મયા યુક્તૈકબાણેન ન સમોઽસિ સુરાધિપ ॥ ૪૭॥

બલેન યદિ સંયુક્તસ્તદા કિમમરાવતીમ્ ।
ત્યક્તવાન્ વદ મે વાક્યં વૃથા મૃત્યુમવાપ્સ્યસિ ॥ ૪૮॥

ઇતિ તસ્ય વચઃ શ્રુત્વા સુરેન્દ્રસ્તમુવાચ હ ।
ક્રોધસંરક્તચક્ષુર્ભિર્ભક્ષયન્નિવ દાનવાન્ ॥ ૪૯॥

ઇન્દ્ર ઉવાચ ।
તારક ત્વં વલ્ગસિ કિં પશ્ય મે પૌરુષં મહત્ ।
આસુરં પ્રહરિષ્યામિ સૈન્યં તે પશ્યતો મહત્ ॥ ૫૦॥

પશ્ચાત્ત્વાં ચ ક્રમેણાઽહં મદં સબલવાહનમ્ ।
હત્વાઽભિવાદ્ય શક્તિં ચ ગમિષ્યામ્યમરાવતીમ્ ॥ ૫૧॥

(Page ખં. ૨ અ. ૪૮ પાન ૧૦૧)
આદૌ શક્તિવિહીનોઽહં કિં કરોમિ પરાક્રમમ્ ।
અધુના શક્તિસંયુક્તઃ કદનં તે કરોમ્યહમ્ ॥ ૫૨॥

કિં બહૂક્તેન દૈત્યેન્દ્ર દર્શય સ્વપરાક્રમમ્ ।
નોચેદ્ગચ્છસ્વ પાતાલં મિથ્યા વલ્ગસિ કિં વચઃ ॥ ૫૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ઇન્દ્રતારકસમાગમો નામ સપ્તચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૭

## ૨.૪૮ ઇન્દ્રપરાજયો નામાષ્ટચત્વારિંશોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
એવં ગદિત્વા દેવેન્દ્રો દૈત્યેન્દ્રં ક્રોધસંયુતમ્ ।
તારકં શરવર્ષેણ વવર્ષ રણમણ્ડલે ॥ ૧॥

એકસ્માન્ મન્ત્રિતાદ્બાણાદનન્તૈર્નિઃસૃતૈઃ શરૈઃ ।
બભૂવુર્દૈત્યસઙ્ઘાતાઃ પીડિતાસ્તૈઃ સમન્તતઃ ॥ ૨॥

તતો દૈત્યઃ સ દૈત્યેશાઃ પ્રધાનપ્રમુખાઃ સ્થિતાઃ ।
શરવર્ષાણિ સર્વત્ર ચક્રુઃ પરમદારુણાઃ ॥ ૩॥

તૈબાર્ણૈર્દેવસૈન્યાનાં હતા વીરા અનેકશઃ ।
છિન્નાઙ્ગાઃ પતિતાસ્તત્ર રુધિરૌઘપ્રવર્ષિણઃ ॥ ૪॥

યત્ર તત્ર પલાયન્ત દેવા ભયસમાકુલાઃ ।
ત્રાતારં નાભ્યપદ્યન્ત પ્રલયેષુ યથા પ્રજાઃ ॥ ૫॥

તેષાં તત્કર્મ દૃષ્ટ્વા તે વવૃષુઃ સુરપા શરાન્ ।
અગ્નિધર્માદયસ્તત્ર કાલમૃત્યૂપમાન દૃઢાન્ ॥ ૬॥

તૈરાહતં બલં પૂર્ણં દૈત્યાનાં યત્ર તત્ર તે ।
મૃતા મુમૂર્ષવઃ સર્વે બભૂવૂ રાક્ષસા મૃધે ॥ ૭॥

તતોઽતિકુપિતો દૈત્યસ્તારકોઽતિભયાનકઃ ।
નિષ્કાસ્ય સુદૃઢં બાણં મોચયામાસ દારુણમ્ ॥ ૮॥

આકર્ણં ધનુરાકૃષ્ય દીપ્તો બાણો સુરેશ્વર ।
ઇન્દ્રસ્ય સહસાગત્ય હૃદિ સમ્પતિતોઽભવત્ ॥ ૯॥

તેન સમ્પીડિતો દેવો મૂર્ચ્છિતો દેવનાયકઃ ।
મુહૂર્તાત્ સાવધાનોઽભૂદ્વજ્રં હસ્તે સમાદદે ॥ ૧૦॥

વજ્રેણ તાડિતોઽત્યન્તં તારકો દૈત્યપુઙ્ગવઃ ।
પતિતઃ સ ધરાપૃષ્ઠે ગતપ્રાણ ઇવાઽભવત્ ॥ ૧૧॥

એવં વરુણવન્હ્યાદ્યૈર્વાયુધર્મકુબેરકૈઃ ।
હતા દૈત્યા અનેકે ચ પતિતા મૂર્ચ્છિતા મૃતાઃ ॥ ૧૨॥

હાહાકારશ્ચ સર્વત્ર દૈત્યસૈન્યે પ્રવર્તિતઃ ।
પલાયન્ત ચ દિક્પ્રાન્તે ત્રાસિતા દેવનાયકૈઃ ॥ ૧૩॥

તતઃ શુક્રેણ તે સર્વે તારકાદ્યા મહાસુરાઃ ।
વિદ્યયા સાવધાનાશ્ચ કૃતા યુદ્ધાય સજ્જિતાઃ ॥ ૧૪॥

અગ્નિમન્ત્રસમાયુક્તં બાણં ધનુષિ સન્દધે ।
તારકઃ ક્રોધસંયુક્તો દાહકં સ મુમોચ હ ॥ ૧૫॥

પતિતો દેવસૈન્યે ચ બાણસ્તસ્માન્ મહાબલઃ ।
નિઃસૃતઃ પુરુષસ્તત્ર ભક્ષયામાસ વૈ સુરાન્ ॥ ૧૬॥

મેરુમન્દરસઙ્કાશો વિચચાર મહાબલઃ ।
દેવસૈન્યેષુ દૈત્યેન્દ્ર પ્રલયાગ્નિસમોઽદહન્ ॥ ૧૭॥

અગ્નિજ્વાલાશ્ચ સર્વત્ર સમુદ્ભૂતા ભયાનકાઃ ।
અદહદ્દેવસઙ્ઘાંસ્તાન્ વાહનૈઃ સહિતાન્ મૃધે ॥ ૧૮॥

હાહાકારરવા દેવાઃ પલાયનમકુર્વત ।
(Page ખં. ૨ અ. ૪૮ પાન ૧૦૨)
તત્રાપિ પુરુષોઽત્યન્તં ભક્ષયામાસ ચામરાન્ ॥ ૧૯॥

તતઃ ક્રોધસમાયુક્તો મહેન્દ્રો વારુણં મહત્ ।
અસ્ત્રં ધનુષિ સઙ્ગૃહ્ય મૃધે તત્યાજ દારુણમ્ ॥ ૨૦॥

તસ્માચ્ચ જલધારાઽભૂત્ સમન્તાન્નિઃસૃતા બહુ ।
વવર્ષુરતુલાં વૃષ્ટિં મેઘાઃ સર્વત્ર ગર્જિતૈઃ ॥ ૨૧॥

જલૌઘેન મહાવહ્નિઃ પ્રશાન્તઃ સહસા કૃતઃ ।
અસ્ત્રેણ પુરુષઃ સોઽપિ પતિતો રણમૂર્ધનિ ॥ ૨૨॥

તતો દેવગણાઃ સર્વે સાવધાના બભૂવિરે ।
દૈત્યા વૃષ્ટ્યા ચ વાતેન પીડિતા બલસંયુતાઃ ॥ ૨૩॥

વિદ્યુજ્જ્વાલાભિરત્યન્તં દગ્ધાઃ કેચિન્ મહાસુરાઃ ।
જલૌઘેન તથા કેચિદ્વાહિતાશ્ચ સવાહનાઃ ॥ ૨૪॥

દૈત્યાનાં પ્રબલં સૈન્યં પીડિતં વારુણેન ચ ।
હાહાકારરવા દૈત્યા યયુર્મૃત્યું ભયાનકમ્ ॥ ૨૫॥

તતઃ સ તારકો દૈત્યઃ ક્રોધસંરક્તલોચનઃ ।

વાય્વસ્ત્રં તન્નિવૃત્ત્યર્થં સન્દધેઽતિભયાનકમ્ ॥ ૨૬॥

મુમોચ ધનુરાકૃષ્ય દેવસૈન્યે મહાસુરઃ ।
તેન વારુણમસ્ત્રં ચ ગ્રસ્તં વૈ શાન્તિમાગમત્ ॥ ૨૭॥

વાયુના પ્રબલેનૈવ ઘૂર્ણિતા દેવવાહિની ।
શુષ્કપત્રસમા તત્ર બભ્રામ સમરાઙ્ગણે ॥ ૨૮॥

તતઃ સમાગતો દૈત્યસ્તારકોઽતિભયાનકઃ ।
ખડ્ગેન દેવરાજં તં જઘાનાર્મષતો દૃઢમ્ ॥ ૨૯॥

ખડ્ગાઘાતેન દેવેન્દ્રં પતિતં મૂર્ચ્છયા ભૃશમ્ ।
સઙ્ગૃહ્ય દૈત્યરાજસ્તુ તારકઃ સ્વબલં યયૌ ॥ ૩૦॥

મદાસુરસ્ય સાન્નિધ્યે સ્થાપયામાસ દેવપમ્ ।
મદેન મૂર્ચ્છિતો દેવો બદ્ધઃ પાશૈઃ સમન્તતઃ ॥ ૩૧॥

તતો હાહાકૃતં સર્વૈઃ પલાયત દિશો દશ ।
સૈન્યં દેવગણાનાં વૈ વિનાથં ભયસઙ્કુલમ્ ॥ ૩૨॥

યમં ચ સહસાઽઽગત્ય ગદયા હૃદિ વિવ્યથે ।
તારકઃ સ મહામૂર્ચ્છાં જગામ પ્રેતનાયકઃ ॥ ૩૩॥

સઙ્ગૃહ્ય સ્વબલે નીત્વા હર્ષિતોઽભૂન્ મહાસુરઃ ।
એવમગ્નિમુખાઃ સર્વે ધૃતાસ્તે દૈત્યનાયકૈઃ ॥ ૩૪॥

અનાથં દેવસૈન્યં તત્ પલાયત ભયાકુલમ્ ।
મૃતં ભગ્નં ચ શસ્ત્રૈઃ સંહતં દૈત્યૈર્મહાબલૈઃ ॥ ૩૫॥

એવં નિર્જિત્ય દૈત્યેન્દ્રા જહૃષુર્નાદસંયુતાઃ ।
દેવાઃ સર્વે ભયોદ્વિગ્નાઃ શરણં શઙ્કરં યયુઃ ॥ ૩૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ઇન્દ્રપરાજયો નામાષ્ટચત્વારિંશોઽધ્યાયઃ ॥ ૨.૪૮
(Page ખં. ૨ અ. ૪૯ પાન ૧૦૩)

## ૨.૪૯ શિવાદિદેવપરાજયો નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।

વિષ્ણુના સહિતો દેવૈસ્તતઃ સર્વૈઃ સુસંવૃતઃ ।
ગણૈઃ સુદારુણૈસ્તત્ર યયૌ શમ્ભૂ રણસ્થલમ્ ॥ ૧॥

સમાગતં શિવં જ્ઞાત્વા તારકઃ ક્રોધસંયુતઃ ।
ઉવાચ તં મહાદેવં ગર્વયુક્તેન ચેતસા ॥ ૨॥

તારક ઉવાચ ।
કિમાગતોઽસિ સઙ્ગ્રામે મદેન ત્વં સદાશિવ ।
સિંહેન શશકો યુદ્ધં કિં કરિષ્યતિ માં વદ ॥ ૩॥

મદાસુરસ્ય દાસોઽહં ત્વાં હનિષ્યામિ નિશ્ચિતમ્ ।
સંહારકારિણં સદ્યો મહાસંહારકારકઃ ॥ ૪॥

વચઃ શ્રુત્વા ત્રિશૂલેન તારકઃ શમ્ભુના હતઃ ।
સ મૃતસ્તત્ક્ષણાદ્દૈત્યઃ પતિતો ભગ્નવૃક્ષવત્ ॥ ૫॥

તતશ્ચક્રેણ દેવેશઃ કેશવો દૈત્યનાયકાન્ ।
મારયામાસ સઙ્ક્રુદ્ધઃ સકલાન્યત્ર તત્ર ચ ॥ ૬॥

તતોઽતિભયસંયુક્તાઃ પલાયન્ત દિશો દશ ।
દત્યાઃ પ્રાણપરીપ્સાર્થં હાહાકારકરા ભૃશમ્ ॥ ૭॥

દેવૈસ્તત્ર ધૃતા દૈત્યા મૃતાસ્તારકમુખ્યકાઃ ।
શુક્રસ્ય તુ ભયાચ્છ્રેષ્ઠાસ્ત્યક્તાસ્તે વિવરે સ્થિતાઃ ॥ ૮॥

દેવેશાનાં ચ દૈત્યેશા દૃષ્ટ્વાઽતીવપરાક્રમમ્ ।
બાણસ્ત્રિપુરશઙ્ખૌ ચ સસૈન્યા આયયુર્મૃધે ॥ ૯॥

કોલાહલં પ્રકુર્વાણાઃ શઙ્ખશબ્દૈઃ સમન્તતઃ ।
વવૃષુઃ શસ્ત્રધારાભિર્વર્ષાકાલે યથા ઘનાઃ ॥ ૧૦॥

તતઃ પરસ્પરં યુદ્ધં નિયતં સમ્બભૂવ હ ।
દેવાનાં ચૈવ દૈત્યાનાં વિનાશકરમદ્ભુતમ્ ॥ ૧૧॥

બાણઃ સૂર્યં યયૌ ક્રુદ્ધઃ શઙ્ખો વિષ્ણું મહાબલઃ ।
રુદ્રં ચ ત્રિપુરો વેગાત્ પરસૈન્યનિબર્હણઃ ॥ ૧૨॥

અન્યે ચ શતશસ્તત્ર દૈત્યા દેવાન્ સમાયયુઃ ।
ગદિતું ન ભવેચ્છક્યં બહુત્વાદ્યુદ્ધમદ્ભુતમ્ ॥ ૧૩॥

ક્રોધયુક્તા નિજઘ્નુસ્તે દાનવા દેવમુખ્યકાન્ ।

શસ્ત્રાસ્ત્રૈર્વિવિધૈઃ ક્રુદ્ધા વૃક્ષૈર્વૈ પર્વતૈર્મૃધે ॥ ૧૪॥

દૈત્યાનાં બલમુત્કૃષ્ટં જ્ઞાત્વા દેવા મહાબલાઃ ।
યત્નયુક્તાશ્ચ સઙ્ગ્રામે યુયુધુઃ શસ્ત્રપાણયઃ ॥ ૧૫॥

એવં ત્રિદિવસં યુદ્ધં સઞ્જાતં દારુણં મહત્ ।
દેવસેના તતો ભગ્ના ભયભીતા સમન્તતઃ ॥ ૧૬॥

જઘાન શઙ્કરોઽત્યન્તં ક્રોધયુક્તો મહાબલમ્ ।
ગદયા ત્રિપુરં તત્ર તતઃ પરમદુર્જયમ્ ॥ ૧૭॥

જઘાન ગદયા શમ્ભું સોઽપિ તં ચ પરાક્રમી ।
ગદાયુદ્ધં મહત્તત્ર બભૂવાઽતિભયાનકમ્ ॥ ૧૮॥

તતસ્ત્રિશૂલઘાતેન હતો દૈત્યઃ પપાત હ ।
ત્રિપુરો મૂર્ચ્છયાત્યન્તં પીડિતઃ શઙ્કરેણ સઃ ॥ ૧૯॥

જ્વાલયા રવિણા તત્ર બાણો ભૂમૌ નિપાતિતઃ ।
ચક્રેણ વિષ્ણુના દુષ્ટઃ શઙ્ખઃ સમર્દિતોઽભવત્ ॥ ૨૦॥

ધૃત્વા તાન્ દૈત્યમુખ્યાંશ્ચ ચિક્ષિપુર્વિવરેઽમરાઃ ।
પાશૈર્બદ્ધ્વા તતો દુષ્ટાન્ પુનરુત્પાતશઙ્કયા ॥ ૨૧॥

તતો દૈત્યા હતાઃ સર્વે દેવૈર્દેવગણૈર્મૃધે ।
મૃતા મુમૂર્ષવઃ કેચિચ્છરણં તે યયુઃ સુરાન્ ॥ ૨૨॥

વિજયં પ્રાપ્ય દેવેન્દ્રા હર્ષિતાઃ સમ્બભૂવિરે ।
જગર્જુર્જયશબ્દેન પ્રાટ્ટહાસં પ્રચક્રિરે ॥ ૨૩॥

તતો મદાસુરઃ ક્રુદ્ધો જ્ઞાત્વા વૃત્તાન્તમદ્ભુતમ્ ।
સંરક્તનયનો દુષ્ટો યયૌ રણવિધિત્સયા ॥ ૨૪॥

શુક્રેણ સહિતઃ સોઽપિ મહાવીરૈઃ સમાવૃતઃ ।
રથારૂઢઃ સ્વપુત્રૈશ્ચ સઙ્ગ્રામે સન્દધે મનઃ ॥ ૨૫॥

તતસ્તં દૈત્યમુખ્યં વૈ તનયાશ્ચ સમાયયુઃ ।
સઙ્ગ્રામાર્થં મહાવીર્યાસ્ત્રયો દેવૈઃ શિવાદિભિઃ ॥ ૨૬॥

(Page ખં. ૨ અ. ૪૯ પાન ૧૦૪)
ધનપ્રિયશ્ચ સઙ્ગ્રામે સૂર્યં વિવ્યાધ સાયકૈઃ ।
ઉવાચ ગર્વસહિતો રવિં ત્રૈલોક્યભાવિનમ્ ॥ ૨૭॥

ધનપ્રિય ઉવાચ ।
શ઼ૃણુ દુષ્ટાર્યમંસ્ત્વં મે વચનં હિતકારકમ્ ।
ગચ્છ શીઘ્રં મહાબાહો નોચેન્ મૃત્યુમુપેષ્યસિ ॥ ૨૮॥

ત્વયા દૈત્યા હતાઃ પૂર્વં ભુઙ્ક્ષ્વ તેષાં ફલં મહત્ ।
ન મુઞ્ચામિ મહાદુષ્ટ જીવન્તં ત્વાં ચ કાશ્યપ ॥ ૨૯॥

તતઃ સૂર્યેણ ખડ્ગેન હતો દૈત્યો મહાબલઃ ।
પપાત મૂર્ચ્છયાઽઽવિષ્ટઃ પુનઃ સંજ્ઞાં ચ સોઽલભત્ ॥ ૩૦॥

આગત્ય કાશ્યપં દૈત્યપુત્રો વેગસમન્વિતઃ ।
ખડ્ગેન તીક્ષ્ણધારેણ જઘાન દૃઢમઞ્જસા ॥ ૩૧॥

દૃઢાઘાતેન સૂર્યઃ સ પતિતો મૂર્ચ્છયા ભૃશમ્ ।
તં ધૃત્વા વિજયી દૈત્યપુત્રશ્ચ સ્વસ્થલં યયૌ ॥ ૩૨॥

પ્રણમ્ય પિતરં પુત્રો નનન્દ હ ધનપ્રિયઃ ।
પાશૈર્બદ્ધ્વા દૃઢં સૂર્યં ચિક્ષેપ વિવરેઽસુરઃ ॥ ૩૩॥

વિલાસી વિષ્ણુમાગત્ય ક્રોધેન મહતાઽઽવૃતઃ ।
બાણજાલૈઃ સમાચ્છાદ્યોવાચ તં દારુણં વચઃ ॥ ૩૪॥

ત્વયા વિષ્ણો મદીયા વૈ સેના સન્નાશિતા બલાત્ ।
ગૃહીતા દૈત્યવર્યાશ્ચ નાઽહં તત્ર સ્થિતોઽભવમ્ ॥ ૩૫॥

અધુના શસ્ત્રઘાતેન હતસ્ત્વં ગચ્છસિ પ્રભો ।
મૃત્યોર્ભુવનમુગ્રં યન્ન ત્વાં મુઞ્ચામિ કર્હિચિત્ ॥ ૩૬॥

તતઃ ક્રોધસમાવિષ્ટો વિષ્ણુશ્ચક્રેણ દૈત્યપમ્ ।
વિલાસિનં જઘાનાઽથ ચક્રે સમ્મૂર્ચ્છિતં ખલમ્ ॥ ૩૭॥

ક્ષણેન સાવધાનોઽભૂદાગત્ય ગદયા વિભુમ્ ।
હૃદિ વિવ્યાધ દુષ્ટોઽસૌ પપાત ગરુડાદ્ધરિઃ ॥ ૩૮॥

તં ધૃત્વા દૈત્યપુત્રઃ સ યયૌ સ્વસ્થાનમુત્તમમ્ ।
પિતરં પ્રણનામાઽથ પિત્રા સમ્માનિતોઽભવત્ ॥ ૩૯॥

બદ્ધ્વા પાશૈર્મહાવિષ્ણું ચિક્ષેપ વિવરે મદઃ ।
દૈત્યા હર્ષસમાયુક્તા જગર્જુશ્ચ ભયાનકમ્ ॥ ૪૦॥

લોલુપશ્ચ સમાગમ્ય શઙ્કરં વૃષભધ્વજમ્ ।
ઉવાચ કોપરક્તાક્ષઃ શ◌ૃણુ ત્વં નીલલોહિત ॥ ૪૧॥

મદીયમતુલં સૈન્યં ત્વયા યુધિ નિપાતિતમ્ ।
અધુના ત્વાં હનિષ્યામિ ફલદાતા ભવામ્યહમ્ ॥ ૪૨॥

બ્રુવન્તં તં તતો મૂર્ખં ત્રિશૂલેન જઘાન હ ।
શઙ્કરઃ ક્રોધસંયુક્તઃ સોઽપતન્ મૂર્ચ્છયા ભૃશમ્ ॥ ૪૩॥

શુક્રેણ સહસાઽઽગત્ય સાવધાનઃ કૃતોઽસુરઃ ।
લોલુપો નિર્મમે માયાં સર્વદેવવિમોહિનીમ્ ॥ ૪૪॥

અકસ્માજ્જલધિસ્તત્ર વ્યાપ્તઃ સર્વભયાવહઃ ।
અગ્નિશ્ચ સર્વતઃ સર્વાન્ દાહયામાસ ભૈરવઃ ॥ ૪૫॥

નાનાશસ્ત્રધરા અન્યે નગ્નાસ્તે શૂલપાણયઃ ।
નગ્નાસ્ત્રિયશ્ચ શસ્ત્રૌઘૈર્મારયામાસુરઞ્જસા ॥ ૪૬॥

શઙ્કરો વિસ્મિતો ભૂત્વા પશ્ચાદ્ભયસમન્વિતઃ ।
મોહિતો માયયા તત્ર લોલુપેનાસુરેશ્વર ॥ ૪૭॥

એતસ્મિન્નન્તરે તત્ર સમુદ્રે સર્વતઃ સ્થિતે ।
મમજ્જ તત્ર દેવેશઃ શિવઃ પ્રહ્લાદ મોહતઃ ॥ ૪૮॥

કર્મણા ચ તપોરૂપેણેદં સર્વં કૃતં મૃધે ।
મજ્જન્તં શઙ્કરં ધૃત્વા લોલુપઃ સ્વસ્થલં યયૌ ॥ ૪૯॥

પિત્રાઽસૌ માનિતોઽત્યન્તં પાશૈર્બદ્ધ્વા સદાશિવમ્ ।
(Page ખં. ૨ અ. ૫૦ પાન ૧૦૫)
ચિક્ષેપ વિવરે દૈત્યો લોલુપઃ સર્વલોલુપઃ ॥ ૫૦॥

તતો હાહારવં કૃત્વા દેવા દેવાગણા મૃધે ।
શરણં જગદમ્બાં તે યયુઃ સન્ત્રાસતાપિતાઃ ॥ ૫૧॥

દૈત્યેન્દ્રા હર્ષિતાઃ સર્વે જગર્જુર્ઘનવદ્ભૃશમ્ ।
કુર્વન્તો વાદ્યશબ્દાન્ વૈ જયશબ્દકરા ભૃશમ્ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે શિવાદિદેવપરાજયો નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૪૯

## ૨.૫૦ મદાસુરવિજયો નામ પઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
શિવવિષ્ણ્વાદિદેવેષુ ગૃહીતેષુ મહાબલૈઃ ।
દૈત્યપુત્રૈઃ સુરાણાં ચ સૈન્યે ત્રાસઃ પ્રવર્તિતઃ ॥ ૧॥

દેવા દેવગણાઃ કેઽપિ ક્ષતા ભગ્નાસ્તથાઽપરે ।
મૃતા મુમૂર્ષવસ્તત્ર ગૃહીતા દૈત્યપૈર્મૃધે ॥ ૨॥

કેચિત્તાન્ શરણં જગ્મુર્દૈત્યાન્ કેચિત્ પલાયિતાઃ ।
શશંસુઃ સર્વવૃત્તાન્તં શક્તયે ભયવિહ્વલાઃ ॥ ૩॥

વૃત્તાન્તમતુલં શ્રુત્વા દૈત્યાનાં કર્મસમ્ભવમ્ ।
ક્રોધયુક્તા મહામાયા યયૌ સઙ્ગ્રામમણ્ડલમ્ ॥ ૪॥

આગતાં જગદમ્બાં તાં સ્વયં જ્ઞાત્વા મદાસુરઃ ।
પુત્રૈઃ પ્રધાનમુખ્યૈશ્ચ નાનાવીરૈર્વૃતો યયૌ ॥ ૫॥

સમાગતં મહાદૈત્યં જ્ઞાત્વા ક્રોધસમન્વિતા ।
જગદમ્બા રણે તત્ર ધનુઃ સજ્જમથાઽકરોત્ ॥ ૬॥

ધનુષઃ શબ્દમુગ્રં તે શ્રુત્વા દૈત્યા ભયાતુરાઃ ।
મૂર્च્છિતાઃ કેઽપિ ભીતાશ્ચ દુદ્રુવુઃ કેઽપિ દૈત્યપાઃ ॥ ૭॥

તતઃ શઙ્ખનિનાદં વૈ ચકાર સ મદાસુરઃ ।
મહતા તસ્ય નાદેન વ્યાપ્તં સર્વં જગત્રયમ્ ॥ ૮॥

તતઃ શઙ્ખનિનાદૈશ્ચ દેવીનાં પૂરિતં નભઃ ।
દૈત્યેન્દ્રાણાં ચ સર્વત્ર મહાન્ કોલાહલો હ્યભૂત્ ॥ ૯॥

સિંહનાદૈર્જગર્જુસ્તે વીરા વૈ શક્તયસ્તથા ।
વિનેદુર્બહુવાદ્યાનિ સુરા હર્ષં સમાયયુઃ ॥ ૧૦॥

એતસ્મિન્નન્તરે તત્ર કાલિકા ક્રોધસંયુતા ।
શક્તિભિઃ સંવૃતા કૂરા દૈત્યસૈન્યં મમર્દ હ ॥ ૧૧॥

ત્રિશૂલેન તથા પાશૈઃ શસ્ત્રૈર્નાનાવિધૈર્મૃધે ।
શક્તિભિશ્છેદિતા દૈત્યાઃ પલાયન્ત દિશો દશ ॥ ૧૨॥

તતઃ ક્રોધસમાયુક્તા દૈત્યપુત્રાઃ સમાયયુઃ ।
વવૃષુર્બાણજાલાનિ કાલરૂપાણિ સંયુગે ॥ ૧૩॥

તેષાં બાણૈર્હતાસ્તત્ર દેવાનાં શક્તયો ગણાઃ ।
હાહાકારરવાઃ સર્વે પલાયન્ત ભયાકુલાઃ ॥ ૧૪॥

તતઃ કાલી સમાક્રુધ્ધા રૂપં કૃત્વા ભયાનકમ્ ।
જઘાન દૈત્યસેનાં તાં સમન્તાત્ પ્રલયપ્રભા ॥ ૧૫॥

ગૃહીત્વા દૈત્યપુત્રાન્ વૈ બદ્ધ્વા પાશૈર્મહામદાન્ ।
ચિક્ષિપુર્વિવરે સંજ્ઞાલક્ષ્મીસાવિત્ર્ય આહવે ॥ ૧૬॥

તતઃ ક્રોધસમાયુક્તો મદદૈત્યઃ પ્રતાપવાન્ ।
ધનુઃ સજ્જમથો કૃત્વા મુમોચ શરમુલ્બણમ્ ॥ ૧૭॥

સંહારાસ્ત્રાન્ મહાઘોરાત્તસ્માજ્જાતો મહાબલઃ ।
પુરુષઃ પર્વતાકારઃ શક્તીનાં બુભુજે બલમ્ ॥ ૧૮॥

અસ્ત્રસ્ય તત્ર દૈત્યેન્દ્ર જ્વાલયા પીડિતા રણે ।
(Page ખં. ૨ અ. ૫૦ પાન ૧૦૬)
શક્તયશ્ચ મૃતા દગ્ધા દુદ્રુવુર્યત્ર તત્ર તાઃ ॥ ૧૯॥

નિઃસહાયા ભયોદ્વિગ્નાઃ કાલીમુખ્યાઃ પ્રદુદ્રુવુઃ ।
મહામાયાસમીપે તાઃ સંસ્થિતાઃ સઞ્જગુઃ કથાઃ ॥ ૨૦॥

તતઃ ક્રોધસમાવિષ્ટાં સ્વયં શક્તિં સમાગતામ્ ।
સિંહારૂઢાં સ તાં દૃષ્ટ્વા દૈત્યેન્દ્રઃ પ્રણનામ ચ ॥ ૨૧॥

ઉવાચ શક્તિં ગર્વેણ પૂરિતોઽસૌ મહાસુરઃ ।
દેવાંસ્ત્યક્ત્વા જગન્માતરસ્માકં પક્ષમાશ્રય ॥ ૨૨॥

નોચેત્ત્વાં કર્મણાં દેવીં હનિષ્યામિ ન સંશયઃ ।
સદેવાં સપરીવારાં પશ્ય મે પૌરુષં મહત્ ॥ ૨૩॥

તતઃ ક્રોધસમાયુક્તા શૂલં ચિક્ષેપ વૈ રણે ।
વધાય દૈત્યરાજસ્ય મહામાયા પ્રભાવતઃ ॥ ૨૪॥

ત્રિશૂલેનાઽઽહતો દુષ્ટઃ પ્રહ્લાદ ન ચચાલ હ ।
મદાસુરો જગર્જાસાવતિક્રોધયુતોઽભવત્ ॥ ૨૫॥

શસ્ત્રાણિ સહસા ત્યક્ત્વા મલ્લયુદ્ધાય દૈત્યપઃ ।

યયૌ શક્તિર્મહદ્રૂપં કૃત્વા પ્રયયુધે તતઃ ॥ ૨૬॥

ન શક્યતે વર્ણયિતું યુદ્ધં ઘોરં તયોર્મહત્ ।
બાહુભિર્હસ્તપાદૈશ્ચ પ્રવૃત્તં દારુણં પરમ્ ॥ ૨૭॥

પરસ્પરં જયન્તૌ તૌ જલ્પન્તૌ સાધુ સાધ્વિતિ ।
દિવસાનિ ગતાન્યેવ ત્રીણિ તત્રાસુરેશ્વર ॥ ૨૮॥

વરદાનબલેનૈવ તેન ક્ષીણબલા કૃતા ।
શક્તિસ્ત્વશક્તિરૂપા ચ જાતા કર્મપ્રભાવતઃ ॥ ૨૯॥

મમર્દ દેહપાતેન મહાશક્તિં મહાસુરઃ ।
મૂર્ચ્છિતાં તાં સમાદાય યયૌ હર્ષસમન્વિતઃ ॥ ૩૦॥

અન્યાશ્ચ શક્તયસ્તેન ધૃતાઃ કાશ્ચિત્પલાયિતાઃ ।
હાહાકારશ્ચ સર્વત્રાઽભવચ્છક્તિબલે મહાન્ ॥ ૩૧॥

દૈત્યેન્દ્રો વારયામાસ શક્તીનાં કદને રતાન્ ।
ઉવાચ કુલદેવ્યશ્ચ શક્તયો નો ન સંશયઃ ॥ ૩૨॥

તતો મદાસુરેણૈવ મોચિતાઃ સ્વસુતાસ્ત્રયઃ ।
પ્રધાનાદિ મહાદૈત્યા ધૃતા દેવૈ રણે પુરા ॥ ૩૩॥

શક્તિલોકં સમાસાદ્ય ગર્વિતઃ સ મદાસુરઃ ।
ભોગાંશ્ચ વિવિધાંસ્તત્ર બુભુજે જ્ઞાતિભિઃ સહ ॥ ૩૪॥

ન મમર્ષ નિજાત્માનં મોહિતો દૈત્યનાયકઃ ।
સ્ત્રીમાંસમદિરાસક્તઃ પ્રબભૂવાસુરેશ્વર ॥ ૩૫॥

તતઃ શક્તિં સમાનીયોવાચ ગર્વસમન્વિતઃ ।
દેવૈઃ સહ મહાશક્તે ગચ્છ યત્ર ચ તે રુચિઃ ॥ ૩૬॥

ઉવાચ મોહિતો વાક્યં શિવાદીન્ સમદાસુરઃ ।
ગચ્છન્તુ યત્ર કુત્રાઽપિ મમાજ્ઞા વશગાઃ સુરાઃ ॥ ૩૭॥

શક્તિં પ્રણમ્ય દૈત્યેન્દ્ર ઊચિવાન્ ભક્તિસંયુતઃ ।
અસ્માકં પક્ષમાશ્રિત્ય વસ ત્વં પૂજિતા મયા ॥ ૩૮॥

તતસ્તં શક્તિરાદૃત્યોવાચ મ્લાનમુખશ્રિયા ।
દેવૈઃ સહ ગમિષ્યામિ યત્ર કુત્ર મહાસુર ॥ ૩૯॥

તતસ્તાં દૈત્યરાજસ્તુ મુક્તવાન્ ગર્વમોહિતઃ ।
અનાદૃત્ય મહામાયાં સાઽઽગતા દેવસંયુતા ॥ ૪૦॥

વનેષુ ગિરિદર્યાં ચ સંસ્થિતા ભયસઙ્કુલા ।
દેવૈઃ સહ જગન્માતા નિઃસૃતા દારુણાદ્ભયાત્ ॥ ૪૧॥

દૈત્યોઽપિ દૈત્યપૈસ્તત્ર સંવૃતો બુભુજે સુખમ્ ।
શક્તિલોકભવં વીરઃ કર્મણા નિર્મિતં પરમ્ ॥ ૪૨॥

તતો બાણાદયસ્તેનાઽભવંશ્ચ સ્થાપિતાઃ સુતાઃ ।
દેવાનાં ચ પદે મુખ્યાઃ શક્તિલોકે તથા કૃતાઃ ॥ ૪૩॥

પૃથિવ્યાં નગરે દુષ્ટ આયયૌ સ વિલાસદે ।
તત્ર સ્થિત્વા ત્રિલોકસ્ય રાજ્યં ચક્રે મદાસુરઃ ॥ ૪૪॥

(Page ખં. ૨ અ. ૫૧ પાન ૧૦૭)
તતઃ પાતાલવિવરે પ્રેષયામાસ દૈત્યપઃ ।
ત્રિપુરં શેષનાગેન્દ્રજયનાય મહાબલમ્ ॥ ૪૫॥

શેષો જ્ઞાત્વા ચ વૃત્તાન્તં સામ ચક્રે પુરૈવ ચ ।
દૈત્યેન વાર્ષિકં ભાગં દદૌ જગ્રાહ શાસનમ્ ॥ ૪૬॥

એવં મદાસુરો દુષ્ટો જિત્વા બ્રહ્માણ્ડમણ્ડલમ્ ।
રાજ્યં ચકાર સર્વેષાં ભુવનાનાં પ્રતાપવાન્ ॥ ૪૭॥

અનુત્તમાન્ વિચિત્રાંશ્ચ દેવાદીનાં સુદુર્લભાન્ ।
ભોગાન્ સર્વાન્ સ આહૃત્ય બુભુજે જ્ઞાતિભિઃ સહ ॥ ૪૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે મદાસુરવિજયો નામ પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૦

## ૨.૫૧ સનત્કુમારદેવસમાગમો નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
શ‍ૃણુ પ્રહ્લાદ દૈત્યસ્ય ચેષ્ટિતં પરમાદ્ભુતમ્ ।
મદાસુરસ્ય સર્વં યન્ મદમોહકરં મહત્ ॥ ૧॥

તતઃ કિયતિ કાલે સ ગતે દુષ્ટૈર્મહાસુરઃ ।

બભૌ પરિવૃતો દૈત્યૈર્મહાબલપરાક્રમૈઃ ॥ ૨॥

તત્ર તં ત્રિપુરો દુષ્ટ ઉક્તવાન્ દત્યપૈઃ સહ ।
કૃતાઞ્જલિપુટો ભૂત્વા વચનં સાહસં ખલઃ ॥ ૩॥

ત્રિપુર ઉવાચ ।
શ્ૃણુ પ્રભો મહારાજ દૈત્યાનાં હિતકારકમ્ ।
વચનં સુખદં સાધ્યમખણ્ડાનન્દદાયકમ્ ॥ ૪॥

જિત્વા ત્રિભુવનં પૂર્વે દૈત્યાઃ સન્તોષમાયયુઃ ।
હિરણ્યકશિપુસ્તત્રાદ્યો મહાન્ પરમદ્યુતિઃ ॥ ૫॥

મૃત્યુભીતિવિહીનોઽયમાનન્દેન સમાવૃતઃ ।
અખિલં બુભુજે રાજ્યં ત્રિલોકસ્ય ન સંશયઃ ॥ ૬॥

વને ગિરિગુહાસંસ્થા દેવાશ્છદ્મપ્રદર્શિનઃ ।
શત્રવસ્તત્ર કાલેન સસૃજુર્નરસિંહકમ્ ॥ ૭॥

નૃસિંહેન હતો નૂનં હિરણ્યકશિપુઃ પ્રભુઃ ।
એવં ક્રમેણ શ્રેષ્ઠા યે તે હતા દૈત્યપાઃ ક્રમાત્ ॥ ૮॥

અધુના ત્વં તથા જાતો બ્રહ્માણ્ડાધિપતિઃ સ્વયમ્ ।
દેવાન મુક્ત્વા મહારાજ કિં સ્થિતોઽસિ વિચારય ॥ ૯॥

અસ્માકં શત્રવો નિત્યં દેવા વેદે પ્રતિષ્ઠિતાઃ ।
કથં મિત્રાણિ તે રાજન્ ભવિષ્યન્તિ વદ પ્રભો ॥ ૧૦॥

અતસ્તેષાં વિનાશાય યતસ્વ નૃપસત્તમ ।
નોચેત્ત્વાં કાલયોગેન હનિષ્યન્તિ ન સંશયઃ ॥ ૧૧॥

શસ્ત્રાસ્ત્રૈઃ પીડિતા દેવા ન મરિષ્યન્તિ કર્હિચિત્ ।
અમરાઃ કથિતા વેદે ઘોરરૂપા ન સંશયઃ ॥ ૧૨॥

તેષાં મરણમત્યુગ્રં વેદે પશ્ય પ્રતિષ્ઠિતમ્ ।
કર્મનાશાદ્ ભવેત્ પૂર્ણં કર્માન્ના દેવતા યતઃ ॥ ૧૩॥

તસ્માત્ કર્મકરા વિપ્રાસ્તાડનીયા ન સંશયઃ ।
આસુરં કર્મ કુર્વન્તો મન્તવ્યાસ્તે ત્વયાઽનિશમ્ ॥ ૧૪॥

અન્યે વર્ણાશ્રમસ્થા યે બ્રાહ્મણાઃ કર્મકારકાઃ ।
નષ્ટેષુ વિપ્રજાતેષુ સર્વે નષ્ટા ભવન્તિ તે ॥ ૧૫॥

અત આજ્ઞાપય પ્રાજ્ઞ અસુરાન્ કર્મખણ્ડને ।
સર્વત્રાસુરભાવેન કર્મ સર્વં પ્રવર્તતામ્ ॥ ૧૬॥

એવમુક્ત્વા મહાદૈત્યં તૂષ્ણીં ભાવેન સંસ્થિતમ્ ।
(Page ખં. ૨ અ. ૫૧ પાન ૧૦૮)
સદસિ ત્રિપુરં વીક્ષ્ય તમુવાચ મદાસુરઃ ॥ ૧૭॥

મદાસુર ઉવાચ ।
સમીચીનં ત્વયા પ્રોક્તમસિ ત્રિપુર બુદ્ધિમાન્ ।
યાદૃશં કથિતં વાક્યં તાદૃશં કુરુ દૈત્યપૈઃ ॥ ૧૮॥

તતો દૈત્યગણૈર્યુક્તસ્ત્રિપુરો નિર્ગતોઽસુરઃ ।
પૃથિવ્યાં યત્ર તત્રાઽપિ કર્મખણ્ડનકોઽભવત્ ॥ ૧૯॥

ધૃતા મુનિગણાસ્તેન તાડિતા વધિતા બહુ ।
કેચિત્તદાજ્ઞયા યુક્તાઃ સંસ્થિતાઃ કર્મદૂષકાઃ ॥ ૨૦॥

કેચિન્ મુનિગણા દુષ્ટં શરણં તં યયુસ્તતઃ ।
તસ્યાજ્ઞાવર્તિનો ભૂત્વા સંસ્થિતા બ્રાહ્મણાધમાઃ ॥ ૨૧॥

કેચિચ્ચ દુદ્રુવુસ્તસ્ય વનેષુ બ્રાહ્મણા ભયાત્ ।
તત્ર સ્થિતાઃ સ્વધર્મસ્થં કર્મ ચક્રુર્ગતજ્વરાઃ ॥ ૨૨॥

સિંહાદિભયમુત્સૃજ્ય મરણે કૃતનિશ્ચયાઃ ।
સિંહાદીનાં સમીપસ્થા અવસન્ કર્મસિદ્ધયે ॥ ૨૩॥

એવં દ્વિજાઃ સ્થિતાસ્તત્ર ન જ્ઞાતા દૈત્યપેન તે ।
કર્મભ્રષ્ટાઃ સ્વભાવેન બ્રાહ્મણા બહવોઽભવન્ ॥ ૨૪॥

તીર્થાનિ યજ્ઞવૃક્ષાશ્ચ દેવતાયતનાનિ તે ।
બભઞ્જુર્દૈત્યચારાશ્ચ યત્ર તત્રાસુરેશ્વર ॥ ૨૫॥

આસુરં કર્મ સર્વત્ર સ્થાપિતં ત્રિપુરેણ ચ ।
વર્ણેષુ બ્રાહ્મણાદ્યેષુ દુષ્ટસઙ્કરકારકમ્ ॥ ૨૬॥

તતો હાહાઽકરોત્ સર્વં જગત્તેન દુરાત્મના ।
સ્વધર્મવર્જિતં દુઃખાજ્જાતં દુષ્ટપ્રપીડિતમ્ ॥ ૨૭॥

ન સ્વાહા ન વષટ્કારો ન સ્વધાદિકમુત્તમમ્ ।

તેન દેવગણાઃ સર્વે દૈત્યસ્ય વધકાઙ્ક્ષિણઃ ॥ ૨૮॥

ઉપોષણૈશ્ચ સંયુક્તા જાતાઃ કાલેન દેવપાઃ ।
સગણાઃ પરિવારણ નિસ્તેજસ્કા બભૂવિરે ॥ ૨૯॥

તતો દેવગણાઃ સર્વે દૈત્યસ્ય વધકાઙ્ક્ષિણઃ ।
મિલિતાસ્તત્ર ચોપાયં લેભિરે ન વધસ્ય ચ ॥ ૩૦॥

સનત્કુમારશ્ચ મહાયોગી તત્રાદરાદ્યયૌ ।
સહસા ભાગ્યયોગેન સર્વેષાં હિતકારકઃ ॥ ૩૧॥

તં દૃષ્ટ્વા દેવપાઃ સર્વે સમુત્તસ્થુઃ પ્રણમ્ય તમ્ ।
પૂજયામાસુરત્યન્તમુપચારૈર્મનોહરૈઃ ॥ ૩૨॥

કન્દમૂલાદિકં તત્ર નિવેદ્ય ચ સુભક્તિતઃ ।
પપ્રચ્છુસ્તં મદસ્યૈતે મરણોપાયમઞ્જસા ॥ ૩૩॥

દેવા ઊચુઃ ।
ધન્યં જન્મ તપો વિદ્યા જ્ઞાનં દેહાશ્ચ પૂર્વજાઃ ।
તવાઙ્ઘ્રિદર્શનાદ્યોગિન્ કૃતકૃત્યા વયં તતઃ ॥ ૩૪॥

મદાસુરેણ બલિના જિતાઃ સર્વે મહામુને ।
અતસ્તસ્ય વધાર્થં નો વદોપાયં મહામતે ॥ ૩૫॥

સાધવો દેવતા વિપ્રાઃ પીડિતાસ્તેન યોગિપ ।
અતઃસાધ્વાદિરક્ષાર્થં વદ સર્વજ્ઞ તે નમઃ ॥ ૩૬॥

સમશીલો ભવાન્ સાક્ષાન્ મૂર્તં બ્રહ્મેવ સંસ્થિતઃ ।
તથાપિ દોષસંયુક્તમેકં હન્તા ભવ પ્રભો ॥ ૩૭॥

અતિદુષ્ટમનાદૃત્ય જગત્સર્વં સુખી કુરુ ।
ન હત્વા ત્વં સ્વયં સાક્ષાન્ માર્ગદર્શી ભવસ્વ નઃ ॥ ૩૮॥

સાધવઃ સમશીલાશ્ચ માર્ગં સન્દર્શયન્તિ તે ।
દીનાનાં ધર્મનિષ્ઠાનામનાથાનાં મહામુને ॥ ૩૯॥

સત્કર્મનિરતાન્ જન્તૂન્ સદા કુર્વન્તિ સાધવઃ ।
વિકર્મણશ્ચ સંહારસ્તત્ર સઞ્જાયતે યથા ॥ ૪૦॥

ન હિંસા સા મહાયોગિન્ વિકર્મહિતકારિકા ।
ભવજ્જ્ઞાનેન ચાજ્ઞાનં નાશયન્તિ સુસાધવઃ ॥ ૪૧॥

અતસ્ત્વં વદ નાશાર્થમુપાયં કરવામહૈ ।
ધર્મસંસ્થાપનાર્થં તં ધર્માન્નાશ્ચ વયં યતઃ ॥ ૪૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે સનત્કુમારદેવસમાગમો નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૧
(Page ખં. ૨ અ. ૫૨ પાન ૧૦૯)

## ૨.૫૨ એકદન્તપ્રસન્નભાવો નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
એવં દીનસ્વભાવેન પ્રાર્થિતો મુનિસત્તમઃ ।
સનત્કુમાર આનન્દદાયકં તાનુવાચ હ ॥ ૧॥

સનત્કુમાર ઉવાચ ।
શૃણુતેશાદયો દેવા મદાસુરવિનાશને ।
ઉપાયં કથયિષ્યામિ તત્ કુરુધ્વં સુરેશ્વરાઃ ॥ ૨॥

ગણેશં પૂજયધ્વં વૈ યૂયં સર્વે સમાદૃતાઃ ।
સબાહ્યાન્તરસંસ્થં તં હનિષ્યતિ મદાસુરમ્ ॥ ૩॥

સનત્કુમારવાક્યં તચ્છ્રુત્વા દેવર્ષિસત્તમાઃ ।
ઊચુસ્તં પ્રણિપત્યાદૌ ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૪॥

દેવર્ષય ઊચુઃ ।
કેનોપાયેન દેવેશં ગણેશં મુનિસત્તમ ।
પૂજયામ વિશેષેણ તં વદ ત્વં યથાતથમ્ ॥ ૫॥

એવં પૃષ્ટો મહાયોગી દેવૈશ્ચ મુનિભિઃ સહ ।
ઉવાચારાધનં તેભ્યો ગાણપત્યો મહાયશાઃ ॥ ૬॥

એકાક્ષરેણ તં દેવં હૃદિસ્થં ગણનાયકમ્ ।
વિધિના પૂજયધ્વં ચ તુષ્ટસ્તેન ભવિષ્યતિ ॥ ૭॥

ધ્યાનં તસ્ય પ્રવક્ષ્યામિ શૃણુધ્વં સુરસત્તમાઃ ।
યૂયં તં તાદૃશં ધ્યાત્વા તોષયધ્વં નિધાનતઃ ॥ ૮॥

એકદન્તં ચતુર્બાહું ગજવક્ત્રં મહોદરમ્ ।
સિદ્ધિબુદ્ધિસમાયુક્તં મૂષકારૂઢમેવ ચ ॥ ૯॥

નાભિશેષં સપાશં વૈ પરશું કમલં શુભમ્ ।
અભયં દધતં ચૈવ પ્રસન્નવદનામ્બુજમ્ ॥ ૧૦॥

ભક્તેભ્યો વરદં નિત્યમભક્તાનાં નિષૂદનમ્ ।
એતાદૃશં હૃદિ ધ્યાત્વા સેવધ્વં ચૈકદન્તકમ્ ॥ ૧૧॥

સર્વેષાં હૃદિ સંસ્થોઽયં બુદ્ધિપ્રેરકભાવતઃ ।
સ્વયં બુદ્ધિપતિઃ સાક્ષાદાત્મા વૈ સર્વદેહિનામ્ ॥ ૧૨॥

એકશબ્દો મતા માયા દેહરૂપા વિલાસિની ।
સત્તાત્મકો દન્તશબ્દઃ પ્રોક્તસ્તત્ર ન સંશયઃ ॥ ૧૩॥

માયાયા ધારકોઽયં વૈ સત્તામાત્રેણ સંસ્થિતઃ ।
એકદન્તો ગણેશાનઃ કથ્યતે વેદવાદિભિઃ ॥ ૧૪॥

સર્વસત્તાધરં પૂર્ણમેકદન્તં ગજાનનમ્ ।
સેવધ્વં ભક્તિભાવેન ભવિષ્યતિ સદા સુખમ્ ॥ ૧૫॥

સનત્કુમાર ઉક્ત્વૈવં યયૌ યોગી સ આદરાત્ ।
જયહેરમ્બમન્ત્રં વૈ સમુચ્ચાર્ય મુખેન સઃ ॥ ૧૬॥

તતો દેવગણાઃ સર્વે મુનયસ્તપસિ સ્થિતાઃ ।
એકાક્ષરવિધાનેન તોષયામાસુરાદરાત્ ॥ ૧૭॥

પત્રભક્ષા નિરાહારા વાયુભક્ષા જલાશિનઃ ।
કન્દમૂલફલાહારાઃ કેચિત્ કેચિદ્ધ્રભૂવિરે ॥ ૧૮॥

સંસ્થિતા ધ્યાનનિષ્ઠા વૈ જપહોમપરાયણાઃ ।
નાનાતપઃપ્રભાવેણાઽતોષયન્ ગણનાયકમ્ ॥ ૧૯॥

ગતે વર્ષશતે ચૈવ સન્તુષ્ટશ્ચૈકદન્તકઃ ।
આયયૌ તાન્ વરં દાતું ધ્યાતસ્તૈર્યાદૃશસ્તથા ॥ ૨૦॥

જગાદ સ તપોયુક્તાન્ મુનીન્ દેવાન્ ગજાનનઃ ।
વરં વૃણુત તુષ્ટોઽહં દાસ્યામિ બ્રાહ્મણાઽમરાઃ ॥ ૨૧॥

તસ્ય તદ્વચનં શ્રુત્વા હૃષ્ટા દેવર્ષયોઽભવન્ ।
ઉન્મીલ્ય લોચને દેવમપશ્યન્ સવિધસ્થિતમ્ ॥ ૨૨॥

દૃષ્ટ્વા મૂષકસંસ્થં તં પ્રણેમુસ્તે ગજાનનમ્ ।
મુનયો દેવદેવેન્દ્રા ભક્તિયુક્તા અપૂજયન્ ॥ ૨૩॥

પૂજયિત્વા યથાન્યાયં પ્રણમ્ય કરસમ્પુટૈઃ ।
તુષ્ટુવુશ્ચૈકદન્તં તં ભક્તિનમ્રાત્મકન્ધરાઃ ॥ ૨૪॥

દેવર્ષય ઊચુઃ ।
નમસ્તે ગજવક્ત્રાય ગણેશાય નમો નમઃ ।
અનન્તાનન્દભોક્ત્રે વૈ બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૨૫॥

(Page ખં. ૨ અ. ૫૨ પાન ૧૧૦)
આદિમધ્યાન્તહીનાય ચરાચરમયાય તે ।
અનન્તોદરસંસ્થાય નાભિશેષાય તે નમઃ ॥ ૨૬॥

કર્ત્રે પાત્રે ચ સંહર્ત્રે ત્રિગુણાનામધીશ્વર ।
સર્વસત્તાધરાયૈવ નિર્ગુણાય નમો નમઃ ॥ ૨૭॥

સિદ્ધિબુદ્ધિપતે તુભ્યં સિદ્ધિબુદ્ધિપ્રદાય ચ ।
બ્રહ્મભૂતાય દેવેશ સગુણાય નમો નમઃ ॥ ૨૮॥

પરશું દધતે તુભ્યં કમલેન પ્રશોભિને ।
પાશાભયધરાયૈવ મહોદર નમો નમઃ ॥ ૨૯॥

મૂષકારૂઢદેવાય મૂષકધ્વજિને નમઃ ।
આદિપૂજ્યાય સર્વાય સર્વપૂજ્યાય તે નમઃ ॥ ૩૦॥

ગુણસંયુક્તકાયાય નિર્ગુણાત્મકમસ્તક ।
તયોરભેદરૂપેણ ચૈકદન્તાય તે નમઃ ॥ ૩૧॥

વેદાન્તાગોચરાયૈવ વેદાન્તાલભ્યકાય તે ।
યોગાધીશાય વૈ તુભ્યં બ્રહ્માધીશાય તે નમઃ ॥ ૩૨॥

અપારગુણધારાયાનન્તમાયાપ્રચાલક ।
નાનાવતારભેદાય શાન્તિદાય નમો નમઃ ॥ ૩૩॥

વયં ધન્યા વયં ધન્યા યૈર્દૃષ્ટો ગણનાયકઃ ।
બ્રહ્મભૂયમયઃ સાક્ષાત્ પ્રત્યક્ષં પુરતઃ સ્થિતઃ ॥ ૩૪॥

એવં સ્તુત્વા પ્રહર્ષેણ નનૃતુર્ભક્તિસંયુતાઃ ।

સાશ્રુનેત્રાન્ સરોમાઞ્ચાન્ દૃષ્ટ્વા તાન્ ઢુણ્ઢિરબ્રવીત્ ॥ ૩૫॥

એકદન્ત ઉવાચ ।
વરં વૃણુત દેવેશા મુનયશ્ચ યથેપ્સિતમ્ ।
દાસ્યામિ તં ન સન્દેહો ભવેદ્યદ્યપિ દુર્લભઃ ॥ ૩૬॥

ભવત્કૃતં મદીયં યત્ સ્તોત્રં સર્વાર્થદં ભવેત્ ।
પઠતે શ ૃણ્વતે દેવા નાનાસિદ્ધિપ્રદં દ્વિજાઃ ॥ ૩૭॥

શત્રુનાશકરં ચૈવાન્તે સ્વાનન્દપ્રદાયકમ્ ।
પુત્રપૌત્રાદિકં સર્વં લભતે પાઠતો નરઃ ॥ ૩૮॥

ગૃત્સમદ ઉવાચ ।
એવં તસ્ય વચઃ શ્રુત્વા હર્ષયુક્તાઃ સુરર્ષયઃ ।
પ્રણમ્ય ચૈકદન્તં તમૂચુસ્તે ભક્તિભાવતઃ ॥ ૩૯॥

સુરર્ષય ઊચુઃ ।
યદિ તુષ્ટોઽસિ સર્વેશ એકદન્ત મહાપ્રભો ।
યદિ દેયો વરો નશ્ચેજ્જહિ દુષ્ટં મહાસુરમ્ ॥ ૪૦॥

સ્થાનભ્રષ્ટાઃ સુરેશાનાઃ કર્મભ્રષ્ટા મુનીશ્વરાઃ ।
કૃતાસ્તેન જગન્નાથ તસ્માત્તં જહિ વિઘ્નપ ॥ ૪૧॥

ત્વદીયાં ભક્તિમત્યન્તમચલાં દેહિ માનદ ।
યયા માયાભયં ઘોરં ભવિષ્યતિ કદાપિ ન ॥ ૪૨॥

એવમુક્તો ગણાધીશસ્તથેતિ સ ઉવાચ તાન્ ।
અન્તર્ધાનં યયૌ સદ્ય એકદન્તઃ પ્રતાપવાન્ ॥ ૪૩॥

મહર્ષિભિસ્તતો દેવૈઃ સ્થાપના ગણપસ્ય ચ ।
કૃતા તત્ર મહાભાગૈરભૂત્ ક્ષેત્રં ચ વૈઘ્નપમ્ ॥ ૪૪॥

આગ્નેય્યાં દિશિ વિખ્યાતં સ્વસ્વખણ્ડેષુ વિદ્યતે ।
એકદન્તસ્ય તત્ ક્ષેત્રં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૪૫॥

તત્રૈવ દેવદેવેન્દ્રા મુનયઃ સંસ્થિતા બભુઃ ।
સેવાર્થં પૂર્ણભાવેન સ્વાધિકારે કલાંશતઃ ॥ ૪૬॥

તસ્ય સન્દર્શનાજ્જન્તુર્લભેદીપ્સિતમુત્તમમ્ ।
તત્રૈવ મરણે બ્રહ્મ પ્રહ્લાદાત્ર ન સંશયઃ ॥ ૪૭॥

મહિમા ગદિતું પૂર્ણો વર્ષકોટિશતૈરપિ ।
ન શક્યતે મયા તસ્માદુક્તં સારં ચ સારતઃ ॥ ૪૮॥

તત્ર સિદ્ધિં વિશેષેણ પ્રાપ્ય દેવર્ષયોઽમલાઃ ।
ભવન્તિ કૃતકૃત્યાસ્તે હ્યન્યે નાનાજનાસ્તથા ॥ ૪૯॥

ધન્યં જન્મ નરાણાં વૈ દૃષ્ટો યૈરેકદન્તકઃ ।
જન્મમૃત્યુભયઘ્નશ્ચ સ્વેપ્સિતાર્થપ્રદઃ પ્રભુઃ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે એકદન્તપ્રસન્નભાવો નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૨
(Page ખં. ૨ અ. ૫૩ પાન ૧૧૧)

## ૨.૫૩ મદાસુરપરાજયો નામ ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
એવં દત્વા વરં દેવાન્ મુનીન્ સર્વાન્ ગજાનનઃ ।
અન્તર્ધાય સ્વમાત્માનમેકદન્તો યયૌ પુરમ્ ॥ ૧॥

તતઃ કદાચિદ્દૈત્યેન્દ્રં પ્રયયૌ નારદો મુનિઃ ।
મદાસુરં મહાક્રૂરં તેનાયં માનિતોઽભવત્ ॥ ૨॥

ઉવાચ તં મહાદૈત્યં નારદઃ પ્રહસન્ મુનિઃ ।
શ ૃણુ દૈત્યપતે વાક્યં મદીયં સર્વસૌખ્યદમ્ ॥ ૩॥

વનેષુ દેવવિપ્રૈશ્ચ તપસ્તમં સુદારુણમ્ ।
ગણેશસ્ય મુદે ભૂપ શતવર્ષાણિ ભૂરિ વૈ ॥ ૪॥

તતસ્તેષાં પ્રસન્નોઽભૂદ્ગણેશો બ્રહ્મનાયકઃ ।
વરદો હ્યભવત્તત્ર ભક્ત્યા સન્તોષિતઃ સ્વયમ્ ॥ ૫॥

તૈસ્તે વધાર્થમત્યન્તં યાચિતઃ સ તથાઽવદત્ ।
ત્વાં હનિષ્યતિ વેગેન તસ્માદ્યત્નપરો ભવ ॥ ૬॥

નારદસ્ય વચઃ શ્રુત્વા ક્રોધયુક્તો બભૂવ હ ।
મદાસુરો મુનિં તત્ર વિસૃજ્યાઽભૂત્ સુદુઃખિતઃ ॥ ૭॥

બ્રહ્માણ્ડવાસિનો યે વૈ તેભ્યો મૃત્યુર્ન મે ભવેત્ ।

અયં ક એકદન્તશ્ચ તં હન્મિ ક્રોધસંયુતઃ ॥ ૮॥

મયા વિમોચિતા દેવા દયયા તૈઃ કૃતં મહત્ ।
શત્રુભાવયુતં કાર્યં તસ્માત્તાન્ હન્મિ નિશ્ચિતમ્ ॥ ૯॥

દૈત્યેન્દ્રૈઃ કથિતં સર્વં સત્યં જાતં ન સંશયઃ ।
દેવેન્દ્રાઃ શત્રવઃ સર્વે સુરાણાં વેદવાક્યતઃ ॥ ૧૦॥

એવં વિચાર્ય દૈત્યેશઃ સમાહૂય મહાસુરાન્ ।
સન્નદ્ધો દેવનાશાર્થં સસૈન્યો નિઃસૃતો બહિઃ ॥ ૧૧॥

તતોઽકસ્માન્ મહાદેવ એકદન્તઃ પ્રતાપવાન્ ।
બભૂવ પ્રકટસ્તેષાં સમીપે ભયદાયકઃ ॥ ૧૨॥

મૂષકારૂઢમુગ્રં તં નરનાગસ્વરૂપિણમ્ ।
શસ્ત્રપાણિં ચતુર્બાહું દૃષ્ટ્વા દૈત્યાઃ સુવિસ્મિતાઃ ॥ ૧૩॥

તતઃ કોલાહલં તત્ર ચક્રુઃ સર્વે સમન્તતઃ ।
કોઽયં સમાગતો દૈત્યા મહત્ પશ્યત કૌતુકમ્ ॥ ૧૪॥

દૈત્યાઃ સર્વે ચ તં દૃષ્ટ્વા ભયભીતા બભૂવિરે ।
સ્થિત્વા તત્રૈવ દૈત્યેશા દૂતં તે સઞ્જગુર્વચઃ ॥ ૧૫॥

ગચ્છ દૂત સમીપં ત્વં પુરુષસ્ય ત્વરાન્વિતઃ ।
વૃત્તાન્તમખિલં જ્ઞાત્વાઽઽયાહિ ત્વં સામસંયુતઃ ॥ ૧૬॥

તતસ્તમેકદન્તં સ યયૌ દૂતઃ પ્રણમ્ય ચ ।
ઉવાચ પ્રાઞ્જલિર્ભૂત્વા ગણેશં દેવનાયકમ્ ॥ ૧૭॥

દૂત ઉવાચ ।
સ્વામિન્ મદાસુરસ્યાઽહં દૂતસ્તેન પ્રચોદિતઃ ।
સ તુ બ્રહ્માણ્ડરાજો વૈ ત્વાં દૃષ્ટ્વા વિસ્મિતોઽભવત્ ॥ ૧૮॥

ભવાન્ કશ્ચ કુતો યાતઃ કિં કાર્યં નામ તે પ્રભો ।
કસ્ય વા વદ સર્વજ્ઞ સંશયસ્યાપનુત્તયે ॥ ૧૯॥

ઇતિ પૃષ્ટઃ સ દૂતેન એકદન્તસ્તમાદરાત્ ।
જગાદ હાસ્યસંયુક્તો દૈત્યદૂતં વિચક્ષણમ્ ॥ ૨૦॥

એકદન્ત ઉવાચ ।
અહં સ્વાનન્દવાસી ચ સ્વાનન્દાદાગતોઽધુના ।

મદાસુરં નિહન્તું વૈ દેવાનાં સુખવૃદ્ધયે ॥ ૨૧॥

એકદન્ત ઇતિ ખ્યાતઃ સદા બ્રહ્મસુખાત્મકઃ ।
દૂતવર્ય વદાશુ ત્વં મોહિતં તં મદાસુરમ્ ॥ ૨૨॥

ઇચ્છસિ ત્વં જીવિતું ચેત્તદા માં શરણં વ્રજ ।
દેવાનાં દ્વેષમુત્સૃજ્ય વસ ત્વં નગરે સ્વકે ॥ ૨૩॥

દેવા હવિર્ભુજઃ સન્તુ દૈત્યાઃ પાતાલભોગિનઃ ।
વિશ્વં સુખસ્થં ભવતુ સ્વસ્વધર્મપરાયણમ્ ॥ ૨૪॥

એતદર્થમહં યાતો વદ સર્વં સુવિસ્તરમ્ ।
મદાસુરં મહાક્રૂરં નોચેદ્ધન્મિ ક્ષણેન તમ્ ॥ ૨૫॥

એકદન્તવચઃ શ્રુત્વા દૈત્યદૂતઃ પ્રણમ્ય તમ્ ।
(Page ખં. ૨ અ. ૫૩ પાન ૧૧૨)
યયૌ મદાસુરં તત્ર વૃત્તાન્તં ચાઽબ્રવીત્ પુરઃ ॥ ૨૬॥

દૂતસ્ય વચનં શ્રુત્વા મૂર્ચ્છિતો દૈત્યપુઙ્ગવઃ ।
દૈતેયૈઃ સાવધાનશ્ચ કૃતઃ સોઽપિ શુશોચ હ ॥ ૨૭॥

ઉવાચ દૈત્યપાન્ સર્વાન્નારદેન સમીરિતમ્ ।
વાક્યં તદભવત્ સત્યં મમ શત્રુરયં મતઃ ॥ ૨૮॥

નાનાશસ્ત્રૈસ્તથાસ્ત્રૈસ્તં હનિષ્યામિ ન સંશયઃ ।
કથં કાલસ્ય મે મૃત્યુર્ભવિષ્યતિ મહાસુરાઃ ॥ ૨૯॥

એવમુક્ત્વા યયૌ પાપી મદઃ સર્વસમન્વિતઃ ।
એકદન્તં સમુદ્દિશ્ય શસ્ત્રમુગ્રં મુમોચ હ ॥ ૩૦॥

અનિવાર્યમમોઘં ચ શસ્ત્રં દૃષ્ટ્વા ગજાનનઃ ।
પરશું તોલયિત્વા સ મુમોચ યમસન્નિભમ્ ॥ ૩૧॥

પરશું દૈત્યપા દૃષ્ટ્વા તેજસા સંવૃતં પરમ્ ।
ભયભીતાઃ સમન્તાત્તે પલાયન્ત દિશો દશ ॥ ૩૨॥

પરશુર્દૈત્યરાજાસ્ત્રં સચ્છિત્વા સ્વેન તેજસા ।
તતો દૈત્યાંશ્ચ સર્વત્ર ચિચ્છેદ યમસન્નિભઃ ॥ ૩૩॥

હતાઃ પરશુના દૈત્યાઃ સર્વે પ્રહ્લાદ તત્ક્ષણાત્ ।
ત્રિપુરાદય એવં તે દૃષ્ટ્વા વૈ દુદ્રુવુર્ભયાત્ ॥ ૩૪॥

તતો મદાસુરઃ ક્રુદ્ધો જગ્રાહાસ્ત્રમનુત્તમમ્ ।
સંહારાખ્યમમોઘં વૈ યુયોજ ધનુષિ સ્વયમ્ ॥ ૩૫॥

તાવત્ પરશુના વિદ્ધો હૃદયે દૈત્યપુઙ્ગવઃ ।
પપાત સ ધરાપૃષ્ઠે વાતાહત ઇવ દ્રુમઃ ॥ ૩૬॥

તતસ્તત્ર મહાસ્ત્રં તત્ પરશૂપસ્થિતં ત્વભૂત્ ।
પ્રહરાર્ધેન દૈત્યેશઃ સાવધાનો બભૂવ હ ॥ ૩૭॥

અપશ્યત્ સ મહાસ્ત્રં તત્ પરશું યમસન્નિભમ્ ।
સમીપે દૈત્યરાજસ્તુ વિસ્મિતો હૃદયેઽભવત્ ॥ ૩૮॥

અયં પરશુરાજઃ કિં તેજઃપુઞ્જમયો મયા ।
દૃશ્યતે ન ચ સંસૃષ્ટો હ્યત આશ્ચર્યકં ત્વિદમ્ ॥ ૩૯॥

તતો હસ્તેન દૈત્યેન ગૃહીતઃ પરશુર્મહાન્ ।
તથાઽપિ હસ્તમધ્યેઽસૌ ખવચ્છૂન્યસ્તદાઽભવત્ ॥ ૪૦॥

મદઃ સ હૃદિ વિજ્ઞાય શસ્ત્રં બ્રહ્મમયં પરમ્ ।
જ્ઞાત્વાઽવયવસંહીનં વિચારમકરોત્તદા ॥ ૪૧॥

અહો ક એકદન્તોઽયં બ્રહ્માકારો ન સંશયઃ ।
ન બ્રહ્માણ્ડમયાકારો ભવેત્તદ્વર્જિતો ન ચ ॥ ૪૨॥

અતોઽનેન રણે પૂર્ણં ન ભવિષ્યતિ કિઞ્ચન ।
મારયિષ્યતિ માં નૂનં નાત્ર કાર્યા વિચારણા ॥ ૪૩॥

એવમુક્ત્વા હૃદિ ક્ષુબ્ધો દૈત્યેશશ્ચ મદાસુરઃ ।
દૈવયોગેન સસ્માર વેદવાક્યં સુખપ્રદમ્ ॥ ૪૪॥

એકદન્તાર્થજં જ્ઞાનં વિચાર્યૈવ ચ વિઘ્નપમ્ ।
બુબોધ હૃદિ દૈત્યેન્દ્રો બ્રહ્મરૂપઃ પ્રધારકમ્ ॥ ૪૫॥

માયાત્મકશ્ચૈકશબ્દસ્તત્ર સર્વં સમુદ્ભવત્ ।
ભ્રાન્તિદં મોહદં પૂર્ણં નાનાખેલમયં જગત્ ॥ ૪૬॥

દન્તસત્તાત્મકસ્તત્ર માયાચાલકસંજ્ઞકઃ ।
બિમ્બેન મોહયુક્તઃ સ સ્વયં સ્વાનન્દગોઽભવત્ ॥ ૪૭॥

માયા ભ્રાન્તિમયી પ્રોક્તા સત્તા ચાલક ઉચ્યતે ।

તયોર્યોગે ગણેશોઽયમેકદન્તઃ પ્રકથ્યતે ॥ ૪૮॥

મહદ્ભાગ્યં મદીયં તદ્યેનાઽયં દૃષ્ટિગોચરમ્ ।
આયાસેન વિના પ્રાપ્તસ્તં યામિ શરણં તતઃ ॥ ૪૯॥

(Page ખં. ૨ અ. ૫૪ પાન ૧૧૩)
ભક્ત્યા સંયોગિનો નિત્યં ભજન્તે શુકમુખ્યકાઃ ।
બ્રહ્મભૂતા મહાભાગાસ્તં યામિ શરણં તતઃ ॥ ૫૦॥

એવં ભક્ત્યા મદો દૈત્યઃ પરિયુક્તો મહામતે ।
ત્યક્ત્વાઽભિમાનજં દોષં તમેવ શરણં યયૌ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે મદાસુરપરાજયો નામ ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૩

## ૨.૫૪ મદાસુરશાન્તિપ્રાપ્તિવર્ણનં નામ ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
મદાસુરઃ પ્રણમ્યાઽઽદૌ પરશું યમસન્નિભમ્ ।
તુષ્ટાવ વિવિધૈર્વાક્યૈઃ શસ્ત્રં બ્રહ્મમયં ભયાત્ ॥ ૧॥

મદાસુર ઉવાચ ।
નમસ્તે શસ્ત્રરાજાય નમસ્તે પરશો મહન્ ।
તેજઃપુઞ્જમયાયૈવ કાલકાલાય તે નમઃ ॥ ૨॥

એકદન્તસ્ય યદ્વીર્યં સ્વધર્મસ્થાપનાત્મકમ્ ।
ત્વમેવ નાત્ર સન્દેહો રક્ષ માં શરણાગતમ્ ॥ ૩॥

કાલરૂપસ્ત્વમેવેહ મહાપ્રલયસૂચકઃ ।
કઃ સમર્થશ્ચ તે વેગસહને દેહધારકઃ ॥ ૪॥

અતસ્ત્વાં પ્રણમામ્યેવ જ્યોતીરૂપં મહાદ્ભુતમ્ ।
રક્ષ માં ભયભીતં વૈ શરણાગતવત્સલ ॥ ૫॥

એવં સ્તુવન્તમત્યન્તં પરશુઃ શાન્તિમાદધે ।
યયૌ ત્યક્ત્વા પુનર્હસ્તે એકદન્તસ્ય દૈત્યપ ॥ ૬॥

તતો મદાસુરઃ શીઘ્રં યયૌ તં શરણં ભયાત્ ।

એકદન્તં પ્રણમ્યાऽऽદૌ પૂજયામાસ સાદરમ્ ॥ ૭॥

પૂજયિત્વા યથાન્યાયં ગણેશં ધરણીતલે ।
દણ્ડવત્તં પ્રણમ્યૈવ ભક્ત્યા તુષ્ટાવ સંયુતઃ ॥ ૮॥

મદાસુર ઉવાચ ।
નમસ્તે એકદન્તાય માયામાયિકરૂપિણે ।
સદા બ્રહ્મમયાયૈવ ગણેશાય નમો નમઃ ॥ ૯॥

મૂષકારૂઢરૂપાય મૂષકધ્વજિને નમઃ ।
સર્વત્ર સંસ્થિતાયૈવ બન્ધહીનાય તે નમઃ ॥ ૧૦॥

ચતુર્બાહુધરાયૈવ લમ્બોદર સુરૂપિણે ।
નાભિશેષાય વૈ તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૧૧॥

ચિન્તામણિધરાયૈવ ચિત્તસ્થાય ગજાનન ।
નાનાભૂષણયુક્તાય ગણાધિપતયે નમઃ ॥ ૧૨॥

અનન્તવિભવાયૈવાનન્તમાયાપ્રચાલક ।
ભક્તાનન્દપ્રદાત્રે તે વિઘ્નેશાય નમો નમઃ ॥ ૧૩॥

યોગિનાં યોગદાત્રે તે યોગાનાં પતયે નમઃ ।
યોગાકારસ્વરૂપાય હ્યેકદન્તપ્રધારિણે ॥ ૧૪॥

માયાકારં શરીરં ત એકશબ્દઃ પ્રકથ્યતે ।
દન્તઃ સત્તામયસ્તત્ર મસ્તકસ્તે નમો નમઃ ॥ ૧૫॥

માયાસત્તાવિહીનસ્ત્વં તયોર્યોગધરસ્તથા ।
કસ્ત્વાં સ્તોતું સમર્થઃ સ્યાદતસ્તે વૈ નમો નમઃ ॥ ૧૬॥

શરણાગતપાલાય શરણાગતવત્સલ ।
પુનઃ પુનઃ સિદ્ધિબુદ્ધિપતે તુભ્યં નમો નમઃ ॥ ૧૭॥

રક્ષ મામેકદન્તસ્ત્વં શરણાગતમઞ્જસા ।
ભક્તં ભાવેન સમ્પ્રાપ્તં સંસારાત્તારયસ્વ ચ ॥ ૧૮॥

એવમુક્ત્વા પ્રણમ્યાપિ મદઃ કૃત્વા પ્રદક્ષિણામ્ ।
કૃતાઞ્જલિપુટો ભૂત્વા સંસ્થિતો દેવસન્નિધૌ ॥ ૧૯॥

તમુવાચ ગણાધીશઃ પ્રહૃષ્ટેનાન્તરાત્મના ।
વિકારરહિતં દૃષ્ટ્વા હૃદયં ભક્તિસંયુતમ્ ॥ ૨૦॥

(Page  ખં. ૨ અ. ૫૫ પાન ૧૧૪)
એકદન્ત ઉવાચ ।
ત્વાં હન્તું ક્રોધસંયુક્તો જાતોઽહં નાત્ર સંશયઃ ।
અધુના શરણં પ્રેપ્સું ન હન્મિ શરણાગતમ્ ॥ ૨૧॥

મદાજ્ઞાવશગો ભૂત્વા તિષ્ઠ સ્થાને સ્વકે સદા ।
દેવાનાં વૈરમુત્સૃજ્ય મદ્ભક્તિનિરતો ભવ ॥ ૨૨॥

વરં વરય મત્તસ્ત્વં ત્વયા દાસ્યામિ ચિન્તિતમ્ ।
વિનયેન ચ સન્તુષ્ટઃ સ્તોત્રેણાઽહં વિશેષતઃ ॥ ૨૩॥

ત્વયા કૃતમિદં સ્તોત્રં યઃ પઠિષ્યતિ દૈત્યપ ।
શ‍ૃણુયાદ્વા પ્રયત્નેન ભવેત્તસ્યેપ્સિતપ્રદમ્ ॥ ૨૪॥

ન તત્ર મદસમ્ભૂતં ભયં ભવતિ કર્હિચિત્ ।
અન્તે સ્વાનન્દદં તસ્મૈ સ્તોત્રં મદ્ભક્તિદં ભવેત્ ॥ ૨૫॥

એવં તસ્ય વચઃ શ્રુત્વૈકદન્તસ્ય મદાસુરઃ ।
આસુરં ભાવમુત્સૃજ્ય શાન્તરૂપસ્તમબ્રવીત્ ॥ ૨૬॥

મદાસુર ઉવાચ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
એકદન્તપદે ભક્તિં દેહિ નાથ દૃઢાં સદા ॥ ૨૭॥

અન્યં વરં ગણેશાન દેહિ વૃત્તિં ચ શાશ્વતીમ્ ।
ભક્ષયિત્વા સદા દેવ ભજેયં તે પદામ્બુજમ્ ॥ ૨૮॥

મદસ્ય વચનં શ્રુત્વા હ્યેકદન્તસ્તમબ્રવીત્ ।
મદીયા ભક્તિરુગ્રા તે ભવિષ્યતિ મદાસુર ॥ ૨૯॥

યત્ર મે સ્મરણં ચાદૌ પૂજનં વા મદાસુર ।
તત્ર કર્મ સુશાન્ત્યા ત્વં યુક્તો ભવ સુરક્ષયન્ ॥ ૩૦॥

વિપરીતે સદા દૈત્ય આસુરેણ સ્વભાવતઃ ।
પ્રવર્તય ફલં તેષાં કર્મણાં ભક્ષયસ્વ ચ ॥ ૩૧॥

એવમુક્તો મહાદૈત્યસ્તં તથેતિ પ્રણમ્ય ચ ।
નગરં સ્વં જગામાસાવેકદન્તપરાયણઃ ॥ ૩૨॥

દૈત્યાસ્ત્રિપુરકાદ્યા યે ત્યક્ત્વા તં તે યયુસ્તતઃ ।
પાતાલાનિ ભયોદ્વિગ્ના દેવાઃ સ્વસ્થાનમાશ્રિતાઃ ॥ ૩૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે મદાસુરશાન્તિપ્રાપ્તિવર્ણનં નામ ચતુઃપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૪

## ૨.૫૫ મદાસુરચરિતસમાપ્તિર્નામ પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
મદાસુરં સુશાન્તં વૈ દૃષ્ટ્વા વિષ્ણુમુખાઃ સુરાઃ ।
ભૃગ્વાદયશ્ચ યોગીન્દ્રા એકદન્તં સમાયયુઃ ॥ ૧॥

પ્રણમ્ય તં પ્રપૂજ્યાઽઽદૌ પુનસ્તે નેમુરાદરાત્ ।
તુષ્ટુવુર્હર્ષસંયુક્તા એકદન્તં ગજાનનમ્ ॥ ૨॥

દેવર્ષય ઊચુઃ ।
સદાત્મરૂપં સકલાદિભૂતમમાયિનં સોઽહમચિન્ત્યબોધમ્ ।
અથાદિમધ્યાન્તવિહીનમેકં તમેકદન્તં શરણં વ્રજામઃ ॥ ૩॥

અનન્તચિદ્રૂપમયં ગણેશમભેદભેદાદિવિહીનમાદ્યમ્ ।
હૃદિ પ્રકાશસ્ય ધરં સ્વધીસ્થં તમેકદન્તં શરણં વ્રજામઃ ॥ ૪॥

સમાધિસંસ્થં હૃદિ યોગિનાં તુ પ્રકાશરૂપેણ વિભાન્તમેવમ્ ।
સદા નિરાલમ્બસમાધિગમ્યં તમેકદન્તં શરણં વ્રજામઃ ॥ ૫॥

સ્વબિમ્બભાવેન વિલાસયુક્તાં પ્રકૃત્ય માયાં વિવિધસ્વરૂપામ્ ।
સુવીર્યકં તત્ર દદાતિ યો વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૬॥

યદીય વીર્યેણ સમર્થભૂતં સ્વમાયયા સંરચિતં ચ વિશ્વમ્ ।
(Page ખં. ૨ અ. ૫૫ પાન ૧૧૫)
તુરીયકં હ્યાત્મકવિત્તિસંજ્ઞં તમેકદન્તં શરણં વ્રજામઃ ॥ ૭॥

ત્વદીયસત્તાધરમેકદન્તં ગુણેશ્વરં યં ગુણબોધિતારમ્ ।
ભજન્ત આદ્યં તમજં ત્રિસંસ્થાસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૮॥

તતસ્ત્વયા પ્રેરિતનાદકેન સુષુપ્તિસંજ્ઞં રચિતં જગદ્વૈ ।
સમાનરૂપં ચ તથૈકભૂતં તમેકદન્તં શરણં વ્રજામઃ ॥ ૯॥

તદેવ વિશ્વં કૃપયા પ્રભૂતં દ્વિભાવમાદૌ તમસા વિભાતમ્ ।
અનેકરૂપં ચ તથૈકભૂતં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૦॥

તતસ્ત્વયા પ્રેરિતકેન સૃષ્ટં સુસૂક્ષ્મભાવં જગદેકસંસ્થમ્ ।
સુસાત્ત્વિકં સ્વપ્નમનન્તમાદ્યં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૧॥

તત્ સ્વપ્નમેવં તપસા ગણેશ સુસિદ્ધિરૂપં દ્વિવિધં બભૂવ ।
સદૈકરૂપં કૃપયા ચ તે યત્તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૨॥

ત્વદાજ્ઞયા તેન સદા હૃદિસ્થ તથા સુસૃષ્ટં જગદંશરૂપમ્ ।
વિભિન્નજાગ્રન્મયમપ્રમેયં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૩॥

તદેવ જાગ્રદ્રજસા વિભાતં વિલોકિતં ત્વત્કૃપયા સ્મૃતેશ્ચ ।
બભૂવ ભિન્નં ચ સદૈકરૂપં તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૪॥

તદૈવ સૃષ્ટ્વા પ્રકૃતિસ્વભાવાત્તદન્તરે ત્વં ચ વિભાસિ નિત્યમ્ ।
ધિયઃ પ્રદાતા ગણનાથ એકસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૫॥

સર્વે ગ્રહા ભાનિ યદાજ્ઞયા ચ પ્રકાશરૂપાણિ વિભાન્તિ ખે વૈ ।
ભ્રમન્તિ નિત્યં સ્વવિહારકાર્યાત્તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૬॥

ત્વદાજ્ઞયા સૃષ્ટિકરો વિધાતા ત્વદાજ્ઞયા પાલક એવ વિષ્ણુઃ ।
ત્વદાજ્ઞયા સંહારકો હરો વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૭॥

યદાજ્ઞયા ભૂસ્તુ જલે પ્રસંસ્થા યદાજ્ઞયાઽઽપઃ પ્રવહન્તિ નદ્યઃ ।
સ્વતીરસંસ્થશ્ચ કૃતઃ સમુદ્રસ્તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૮॥

યદાજ્ઞયા દેવગણા દિવિસ્થા યચ્છન્તિ વૈ કર્મફલાનિ નિત્યમ્ ।
યદાજ્ઞયા શૈલગણાઃ સ્થિરા વૈ તમેકદન્તં શરણં વ્રજામઃ ॥ ૧૯॥

યદાજ્ઞયા શેષ ઇલાધરો વૈ યદાજ્ઞયા મોહદ એવ કામઃ ।
યદાજ્ઞયા કાલધરોઽર્યમા ચ તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૦॥

યદાજ્ઞયા વાતિ વિભાતિ વાયુર્યદાજ્ઞયાઽગ્નિર્જઠરાદિસંસ્થઃ ।
યદાજ્ઞયેદં સચરાચરં ચ તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૧॥

તદન્તરિક્ષં સ્થિતમેકદન્તં ત્વદાજ્ઞયા સર્વમિદં વિભાતિ ।
અનન્તરૂપં હૃદિ બોધકં ત્વાં તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૨॥

સુયોગિનો યોગબલેન સાધ્યં પ્રકુર્વતે કઃ સ્તવને સમર્થઃ ।
અતઃ પ્રણામેન સુસિદ્ધિદોઽસ્તુ તમેકદન્તં શરણં વ્રજામઃ ॥ ૨૩॥

ગૃત્સમદ ઉવાચ ।
એવં સ્તુત્વા ગણેશાનં દેવાઃ સમુનયઃ પ્રભુમ્ ।
તૂષ્ણીમ્ભાવં પ્રપદ્યૈવ નનૃતુર્હર્ષસંયુતાઃ ॥ ૨૪॥

સ તાનુવાચ પ્રીતાત્મા દેવર્ષીણાં સ્તવેન વૈ ।
એકદન્તો મહાભાગાન્ દેવર્ષીન્ ભક્તવત્સલઃ ॥ ૨૫॥

એકદન્ત ઉવાચ ।
સ્તોત્રેણાઽહં પ્રસન્નોઽસ્મિ સુરાઃ સર્ષિગણાઃ ખલુ ।
વૃણુધ્વં વરદોઽહં વો દાસ્યામિ મનસીપ્સિતમ્ ॥ ૨૬॥

ભવત્કૃતં મદીયં યત્ સ્તોત્રં પ્રીતિપ્રદં ચ તત્ ।
ભવિષ્યતિ ન સન્દેહઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૭॥

યદ્યદિચ્છતિ તત્તદ્વૈ પ્રાપ્નોતિ સ્તોત્રપાઠકઃ ।
(Page ખં. ૨ અ. ૫૫ પાન ૧૧૬)
પુત્રપૌત્રાદિકં સર્વં કલત્રં ધનધાન્યકમ્ ॥ ૨૮॥

ગજાશ્વાદિકમત્યન્તં રાજ્યભોગાદિકં ધ્રુવમ્ ।
ભુક્તિં મુક્તિં ચ યોગં વૈ લભતે શાન્તિદાયકમ્ ॥ ૨૯॥

મારણોચ્ચાટનાદીનિ રાજ્યબન્ધાદિકં ચ યત્ ।
પઠતાં શ‍ૃણ્વતાં નૃણાં ભવેત્તદ્બન્ધહીનતા ॥ ૩૦॥

એકવિંશતિવારં યઃ શ્લોકાનેવૈકવિંશતિમ્ ।
પઠેદ્વૈ હૃદિ માં સ્મૃત્વા દિનાનિ ત્વેકવિંશતિમ્ ॥ ૩૧॥

ન તસ્ય દુર્લભં કિઞ્ચિત્ ત્રિષુ લોકેષુ વૈ ભવેત્ ।
અસાધ્યં સાધયેન્ મર્ત્યઃ સર્વત્ર વિજયી ભવેત્ ॥ ૩૨॥

નિત્યં યઃ પઠતિ સ્તોત્રં બ્રહ્મીભૂતઃ સ વૈ નરઃ ।
તસ્ય દર્શનતઃ સર્વે દેવાઃ પૂતા ભવન્તિ ચ ॥ ૩૩॥

એવં તસ્ય વચઃ શ્રુત્વા પ્રહૃષ્ટા અમરર્ષયઃ ।
ઊચુઃ સર્વે કરપુટૈર્ભક્ત્યા યુક્તા ગજાનનમ્ ॥ ૩૪॥

દેવર્ષય ઊચુઃ ।
ધન્યા વયં ગણેશાન એકદન્તધર પ્રભો ।

ત્વદીયદર્શનાદેવ ભાષણાન્નાત્ર સંશયઃ ॥ ૩૫॥

વરં દેહિ ત્વદીયા નો ભક્તિશ્ચ સુદૃઢા ભવેત્ ।
માયાહીનાસ્તથા દેવ કૃતકૃત્યા ભવામહે ॥ ૩૬॥

યદા સઙ્કટયુક્તા વૈ વયં સ્યામ ગજાનન ।
તદા નો રક્ષ દેવેશ વરમેવં વૃણીમહે ॥ ૩૭॥

તેષાં વચનમાકર્ણ્ય તાનુવાચ તથાસ્ત્વિતિ ।
એકદન્તોંઽન્તર્દધેઽસૌ સ્વસ્વાનન્દગતોઽભવત્ ॥ ૩૮॥

દેવા મુનિગણાઃ સર્વે યયુઃ સ્વસ્વપદેષુ ચ ।
સ્વસ્વધર્મયુતા નિત્યમભજન્નેકદન્તકમ્ ॥ ૩૯॥

એવં મદાસુરસ્તેન શાન્તિરૂપધરઃ કૃતઃ ।
પ્રહ્લાદ ચૈકદન્તેન કથિતં તે ચરિત્રકમ્ ॥ ૪૦॥

દુષ્ટસઙ્ગતિયોગેન ત્વં મદોત્સિક્તભાવતઃ ।
અનાદૃત્ય વિધાતારં ભ્રષ્ટો જ્ઞાનાન્ન સંશયઃ ॥ ૪૧॥

એકદન્તં ગણેશં ત્વં ભજાઽતો દૈત્યનાયક ।
તેન શાન્તો મહાભાગ ભવિષ્યસિ ન સંશયઃ ॥ ૪૨॥

સ એવ એકદન્તસ્તુ ભક્તાનાં કાર્યસિદ્ધયે ।
કરોતિ સ્વાવતારાંશ્ચ નાનારૂપાંસ્તુ દૈત્યપ ॥ ૪૩॥

પરમૌ દારુણૌ દૈત્યૌ દેવાન્તકનરાન્તકૌ ।
સમ્ભૂતૌ તૌ હતૌ તેન ભૂત્વા કશ્યપવેશ્મનિ ॥ ૪૪॥

તથૈવ દુર્મતિર્નામ દૈત્યોઽભૂદ્ધર્મલોપકઃ ।
શાન્તયે તસ્ય વિઘ્નેશઃ શિવપુત્રો બભૂવ હ ॥ ૪૫॥

ગણાસુરેણ દુષ્ટેન ધર્મલોપઃ કૃતો યદા ।
તદા કપિલપુત્રોઽભૂત્ સ એવ ત્વેકદન્તકઃ ॥ ૪૬॥

એવં નાનાવતારૈઃ પાલયતે સકલં જગત્ ।
એકદન્તઃ કલાંશેન ધર્મરક્ષણતત્પરઃ ॥ ૪૭॥

તેષાં કથા ન શક્યા વૈ ગદિતું કેનચિત્ પરા ।
ગુણાન્તં ન યયુર્યસ્ય બ્રહ્માદ્યા મુનયઃ સુરાઃ ॥ ૪૮॥

અતસ્ત્વમેકદન્તં તં ભજ ભાવેન દૈત્યપ ।
તેન સર્વં ચ તે જ્ઞાનં ભવિષ્યતિ સુશાન્તિદમ્ ॥ ૪૯॥

એવં મદાસુરસ્યાઽપિ કૃતં ખણ્ડનમઞ્જસા ।
એકદન્તેન સઙ્ક્ષેપાચ્ચરિતં કથિતં મયા ॥ ૫૦॥

પઠેદ્યઃ શ‍ૃણુયાત્તસ્મૈ ભક્તિં મુક્તિં દદાતિ સઃ ।
એકદન્તઃ પ્રસન્નાત્મા સદા ભવતિ સૌખ્યદઃ ॥ ૫૧॥

નાસુરેણ સ્વભાવેન મદસ્તં પીડયિષ્યતિ ।
શાન્તિરૂપેણ નિત્યં સ સંરક્ષેદ્દૈત્યનાયકઃ ॥ ૫૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે મદાસુરચરિતસમાપ્તિર્નામ પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૫
(Page ખં. ૨ અ. ૫૬ પાન ૧૧૭)

## ૨.૫૬ વિનાયકકાશીપ્રવેશો નામ ષટ્પઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
પ્રહ્લાદેન શ્રુતં પૂર્ણં મદાસુરચરિત્રકમ્ ।
પુનઃ કિં ચ કૃતં યોગિંસ્તદ્વદ ત્વં મહામતે ॥ ૧॥

શ્રુત્વા કથામૃતં પૂર્ણં હર્ષશ્ચેતસિ મુદ્ગલ ।
જાયતે નાઽત્ર સન્દેહો ન તૃપ્તોઽહં ભવામ્યતઃ ॥ ૨॥

સૂત ઉવાચ ।
દક્ષસ્ય વચનં શ્રુત્વા મુદ્ગલો હર્ષિતોઽભવત્ ।
ઉવાચ તં મહાભાગં તત્ત્વં શ‍ૃણુ ચ શૌનક ॥ ૩॥

મુદ્ગલ ઉવાચ ।
ધન્યોઽસિ દક્ષ સારજ્ઞ ગણેશસ્ય કથામૃતમ્ ।
શ્રુત્વા હૃષ્યસિ તે પુણ્યં કથયામિ કથાનકમ્ ॥ ૪॥

મદાસુરસ્ય સંશાન્તિં શ્રુત્વા પપ્રચ્છ દૈત્યપઃ ।
પ્રહ્લાદસ્તં ગૃત્સમદં વિનયાવનતઃ કથામ્ ॥ ૫॥

પ્રલ્હાદ ઉવાચ ।

મહદ્ભાગ્યં મુને મે યદ્યેન સંશ્રાવિતં ત્વયા ।
એકદન્તસ્ય માહાત્મ્યં પરમાનન્દદાયકમ્ ॥ ૬॥

તથાપિ ન સુતૃપ્તોઽહં શ્રુત્વા જ્ઞાનપ્રદાયકમ્ ।
ચરિતં ચ પુનસ્ત્વં મે ગણેશસ્ય કથાં વદ ॥ ૭॥

કશ્યપસ્ય ગૃહે દેવઃ કથં પુત્રત્વમાગતઃ ।
કથં દૈત્યૌ હતૌ યોગિન્ વિસ્તરેણ વદસ્વ મામ્ ॥ ૮॥

કથં સ શિવપુત્રોઽભૂત્ કથં દુર્મતિકં પ્રભુઃ ।
અહનત્તં વદસ્વ ત્વં સર્વજ્ઞોઽસિ કૃપાનિધે ॥ ૯॥

કથં ગણાસુરં દૈત્યં કાપિલો હતવાન્ પુરા ।
એતત્ સર્વં વદ સ્વામિન્નેકદન્તચરિત્રકમ્ ॥ ૧૦॥

ભવાદૃશા મહાભાગા નૌકારૂપેણ સંસ્થિતાઃ ।
સંસારાબ્ધૌ નરાણાં વૈ મજ્જતાં તરણાય તુ ॥ ૧૧॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો મહાયોગી તમુવાચ સુહર્ષિતઃ ।
ગુણૈર્યુક્તં ગૃત્સમદઃ પ્રહ્લાદં ભાવધારકમ્ ॥ ૧૨॥

ગૃત્સમદ ઉવાચ ।
શ ૃણુ પ્રહ્લાદ યત્ પૃષ્ટં તત્સર્વં કથયામિ તે ।
સુખદં ચ સમાસેન એકદન્તચરિત્રકમ્ ॥ ૧૩॥

પુરા કૃતયુગે દૈત્ય ગૌડદેશે બભૂવ હ ।
નગરે ગૌડસંજ્ઞે ચ રૌદ્રકેતુસ્તપોધનઃ ॥ ૧૪॥

તસ્ય પત્ની મહાભાગા શારદા રૂપશાલિની ।
ગર્ભયુક્તા કદાચિત્ સા બભૂવે હર્ષિતાઽભવત્ ॥ ૧૫॥

સમયે સુષુવે પુત્રૌ યમલૌ લોકભીતિદૌ ।
નામ્ના ચક્રે દ્વિજાતિઃ સ દેવાન્તકનરાન્તકૌ ॥ ૧૬॥

કદાચિન્નારદેનાઽપિ ગત્વા તત્ર શિવસ્ય ચ ।
પઞ્ચાક્ષરેણોપદિષ્ટૌ ચેરતુઃ પરમં તપઃ ॥ ૧૭॥

દિવ્યવર્ષસહસ્રૈસ્તુ સન્તુષ્ટઃ સ સદાશિવઃ ।
અભયં ગુણરૂપેભ્યો પ્રદદૌ દૈત્યયોઃ પરમ્ ॥ ૧૮॥

વરગર્વેણ દૈત્યેન્દ્રૌ જિત્વા સર્વં ચરાચરમ્ ।
તતસ્તુ કર્મનાશં તૌ ચક્રતુઃ પૃથિવીતલે ॥ ૧૯॥

ન સ્વાહા ન સ્વધા કુત્ર ન વષટ્કાર એવ ચ ।
અભવન્નમરાઃ સર્વે ક્ષુધિતાસ્તૃષિતાસ્તતઃ ॥ ૨૦॥

તૈઃ સર્વૈઃ પ્રાર્થિતો દેવ એકદન્તઃ પ્રતાપવાન્ ।
તપસોગ્રેણ સન્તુષ્ટો બભૂવ પ્રદદૌ વરમ્ ॥ ૨૧॥

કશ્યપસ્ય ચ પુત્રોઽહં ભવિષ્યામિ પ્રસિદ્ધયે ।
દૈત્યેન્દ્રયોર્વધસ્યૈવમુક્ત્વા ગણપતિર્યયૌ ॥ ૨૨॥

અથ દેવજનિત્રી સા કદાચિત્ કશ્યપં મુનિમ્ ।
જગાદ હાસ્યસંયુક્તા હ્યદિતિઃ કૃતસમ્પુટા ॥ ૨૩॥

ઇન્દ્રો વિષ્ણુશ્ચ સૂર્યશ્ચ દેવાઃ પુત્રાશ્ચ મેઽભવન્ ।
સ્વામિન્ બ્રહ્મ કથં પુત્રઃ સમ્ભવિષ્યતિ મે પરમ્ ॥ ૨૪॥

તદા મે નિશ્ચલં ચેતો ભવેચ્ચૈવ ન સંશયઃ ।
તસ્ય સેવાં કર્તુમીહે તત્રોપાયં વદ પ્રભો ॥ ૨૫॥

(Page ખં. ૨ અ. ૫૬ પાન ૧૧૮)
તસ્યાસ્તદ્વચનં શ્રુત્વા ગણેશસ્ય મનું દદૌ ।
અષ્ટાક્ષરં તયા તેનારાધિતો હ્યેકદન્તકઃ ॥ ૨૬॥

સહસ્રવર્ષપૂર્તૌ તાં વરદઃ સ સમાયયૌ ।
તયા પુત્રો ભવ સ્વામિન્ યાચિતઃ સ તથાઽકરોત્ ॥ ૨૭॥

અદિત્યાં કશ્યપાચ્ચૈવ સમ્ભૂતઃ પુત્રતાં ગતઃ ।
માયામાસ્થાય વિઘ્નેશશ્ચિક્રીડ પ્રાકૃતો યથા ॥ ૨૮॥

એકદા રાક્ષસી ઘોરા વિરજાસ્તં જગાલ હ ।
વિદાર્ય જઠરં તસ્યા બહિર્યાતો મમાર સા ॥ ૨૯॥

ઉદ્ધતૌ ધુન્ધુરત્યુગ્રૌ શુકરૂપૌ સમાગતૌ ।
ધૃત્વા તૌ સ્ફાલિતૌ શૈલે મૃતૌ દૈત્યૌ તથાઽકરોત્ ॥ ૩૦॥

કદાચિત્ સહિતા તેન સ્નાનાર્થમદિતિર્યયૌ ।
તત્ર તં મકરાકારો ગન્ધર્વશ્ચ પદેઽગ્રહીત્ ॥ ૩૧॥

તેનોડ્ડીનં કૃતં પશ્ચાદ્બહિઃ સ ચ મમાર હ ।

શાપમુક્તોઽભવચ્ચિત્રં તં પ્રણમ્ય યયૌ દિવમ્ ॥ ૩૨॥

ઉપવીતપ્રદાને વૈ રાક્ષસા વિપ્રલિઙ્ગિનઃ ।
પઞ્ચ તં હન્તુમાયાતા હતાસ્તેન ક્ષણેન તે ॥ ૩૩॥

કર્મણિ પ્રસમાપ્તે તં બ્રહ્મવિષ્ણ્વાદયઃ સુરાઃ ।
મુનયશ્ચ વસિષ્ઠાદ્યા નેમુર્ભક્તિસમન્વિતાઃ ॥ ૩૪॥

ઇન્દ્રસ્તત્ર મદેનૈવ સંસિક્તો ન નનામ તમ્ ।
કશ્યપેન સમાજ્ઞપ્તસ્તથાઽપિ જ્યેષ્ઠભાવતઃ ॥ ૩૫॥

પરીક્ષાર્થં મહેન્દ્રેણ બાલં હન્તું પ્રભઞ્જનઃ ।
પ્રેરિતઃ સોઽપિ ભગ્નોઽભૂત્તતોઽગ્નિં સ સમાદિશત્ ॥ ૩૬॥

ઇન્દ્રેણાઽઽજ્ઞાપિતો વહ્નિસ્તં દગ્ધું સહસાઽઽગતઃ ।
ગિલિતસ્તેન બાલેન મહેન્દ્રો વિસ્મિતોઽભવત્ ॥ ૩૭॥

વિનાયકેન દેવેન્દ્રઃ શ્વાસેન જઠરે સ્વકે ।
નીતસ્તત્ર સવિસ્તારં દદર્શ સકલં જગત્ ॥ ૩૮॥

એવં નાનાણ્ડકં દૃષ્ટ્વા હતગર્વોઽભવત્ સ્વયમ્ ।
ન દદર્શ બહિર્યાતું માર્ગં વર્ષશતેન વૈ ॥ ૩૯॥

તતસ્તં પ્રાર્થયામાસ વિનાયકમનામયમ્ ।
તેનાઽપિ શ્વાસમાર્ગેણ બહિર્નિષ્કાસિતો હરિઃ ॥ ૪૦॥

તતસ્તેન મહેન્દ્રેણ દૃષ્ટં કૌતુકમુત્તમમ્ ।
કાલોદ્ભવં મહચ્ચિત્રં તચ્છૃણુષ્વ મહાસુર ॥ ૪૧॥

વિનાયકસ્ય વર્ષાણિ જઠરે સ શતં સ્વયમ્ ।
સંસ્થિતશ્ચ બહિસ્તત્ર ક્ષણ એકસ્તથાઽભવત્ ॥ ૪૨॥

તતસ્તં પ્રણનામાઽઽદૌ સ્તુત્વા ચ વિવિધૈઃ સ્તવૈઃ ।
ચકાર સાધુભાવેન સ ભક્તિં નિત્યમાદરાત્ ॥ ૪૩॥

તતઃ કદાચિત્ કાશીપો મુનિગેહં સમાયયૌ ।
પુત્રસ્યોદ્વાહસિદ્ધ્યર્થં કશ્યપં તમમન્ત્રયત્ ॥ ૪૪॥

મુનિર્યજ્ઞેન રુદ્ધો વૈ પુત્રં તસ્મૈ દદૌ લઘુમ્ ।
ઉપાધ્યાયત્વસિદ્ધ્યર્થં વિધાનજ્ઞો વિનાયકમ્ ॥ ૪૫॥

કાશિરાજો ગણેશં સઙ્ગૃહ્ય માર્ગે જગામ હ ।
તત્ર ધૂમ્રાક્ષદૈત્યેશં સૂર્યાસ્ત્રેણ જઘાન સઃ ॥ ૪૬॥

તસ્ય પુત્રૌ મહાવીર્યૌ જઘનશ્ચ મનુઃ સ્મૃતૌ ।
ભક્ષણાર્થં સમાયાતૌ વિનાયકમનામયમ્ ॥ ૪૭॥

વિનાયકેન નિઃશ્વાસેન નીતૌ ગગને ગતૌ ।
ભ્રમન્તૌ પતિતૌ તત્ર નરાન્તકસુમન્દિરે ॥ ૪૮॥

નરાન્તકસ્તતસ્તાભ્યાં જ્ઞાત્વા વૃત્તાન્તમુલ્બણમ્ ।
શતાનિ પઞ્ચ રક્ષાંસિ પ્રેષયામાસ દૈત્યપઃ ॥ ૪૯॥

તેન દૃષ્ટા મહાવીરા રાક્ષસા ગણપેન ચ ।
હુઙ્કારેણ મહોગ્રેણ મમ્રુઃ સર્વે ભયાતુરાઃ ॥ ૫૦॥

તતઃ સ કાશિરાજેન સહિતશ્ચ વિનાયકઃ ।
કાશીં પ્રાપ્તસ્તદા લોકૈરવિશત્ પૂજિતઃ પરમ્ ॥ ૫૧॥

(Page ખં. ૨ અ. ૫૭ પાન ૧૧૯)
આદૌ મુદ્ગલવિપ્રેણોપદિષ્ટઃ સ મહામનાઃ ।
કાશિરાજશ્ચ ગણપમભજન્નિત્યમાદરાત્ ॥ ૫૨॥

કાશીસ્થાશ્ચ જનાઃ સર્વે ગણેશધ્યાનતત્પરાઃ ।
મુદ્ગલાન્ મહિમાનં ચાઽભવન્ જ્ઞાત્વા વિચક્ષણાઃ ॥ ૫૩॥

કશ્યપસ્ય સ્વયં પુત્રો ભવિષ્યતિ વધાય ચ ।
દૈત્યાનાં સોઽપિ કાશ્યાં વૈ વિવાહાયાઽઽગમિષ્યતિ ॥ ૫૪॥

તસ્ય દર્શનમાત્રેણ ભવિષ્યન્તિ સુયોગિનઃ ।
સર્વે કાશીસ્થભૂતાનિ નરા નાર્યો ન સંશયઃ ॥ ૫૫॥

એવં મુદ્ગલવિપ્રેણ બોધિતાઃ સકલા જનાઃ ।
તે સર્વેઽપૂજયંસ્તં ચ જ્ઞાત્વા દેવં વિનાયકમ્ ॥ ૫૬॥

સ્ત્રિયઃ સર્વાઃ સમાયાતા દર્શનાર્થં મહાપથે ।
અનાદૃત્ય પિતૄન્ ભ્રાતૄન ભર્તૄન ભક્તિપરાયણાઃ ॥ ૫૭॥

મહોત્સવોઽભવત્તત્ર પ્રવેશાખ્યો મહાસુર ।
તત્રૈકા રોધિતા નારી દેહં તત્યાજ સોત્તમમ્ ॥ ૫૮॥

તાલુસ્ફોટેન સા યાતા સર્વાદૌ તં વિનાયકમ્ ।

પશ્યન્ત્યસ્યાઽભવદ્દેહે લીના ભક્તિસમન્વિતા ॥ ૫૯॥

યત્ર તત્ર જનૈર્દેવઃ પૂજિતશ્ચ મહાપથે ।
ચચાર તત્ર દૈત્યૌ દ્વૌ બાલરૂપૌ પ્રચેરતુઃ ॥ ૬૦॥

વિનાયકેન હસ્તાભ્યાં ચૂર્ણિતૌ દશયોજને ।
પતિતૌ વિસ્મિતા લોકા મેનિરે ગણપં ચ તમ્ ॥ ૬૧॥

તતો દ્વૌ ચક્રવાતસ્ય રૂપેણૈવ સમાગતૌ ।
શિખાં ધૃત્વા તયોસ્તેન મમ્રતુઃ સ્ફાલિતૌ દૃઢૌ ॥ ૬૨॥

તતઃ પાષાણરૂપેણ દૈત્યો માર્ગે વ્યવસ્થિતઃ ।
મુષ્ટિના બાલકેનૈવ હતો મૃત્યુમવાપ સઃ ॥ ૬૩॥

કાશિરાજસ્તતસ્તં સ નીત્વા ચ સ્વગૃહે સ્વયમ્ ।
પૂજયામાસ વિધિવત્ સ્થાપયામાસ ભાવતઃ ॥ ૬૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે વિનાયકકાશીપ્રવેશો નામ ષટ્પઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૬

## ૨.૫૭ ભ્રુશુણ્ડીભક્તિવર્ણનં નામ સપ્તપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
દ્વિતીયે દિવસે તત્ર ધર્મદત્તો મહામુનિઃ ।
સ્વગૃહે તં મુનેઃ પુત્રમાનયામાસ યત્નતઃ ॥ ૧॥

માર્ગે દૈત્યૌ હતૌ તેન ખરવેષધરાવુભૌ ।
કામક્રોધાસુરૌ પશ્ચાદ્ગજવેષધરૌ હતૌ ॥ ૨॥

તતો મુનિઃ સુભાવેનાપૂજયત્તં વિનાયકમ્ ।
કન્યે સ્વે પ્રદદૌ તસ્મૈ સિદ્ધિબુદ્ધી સુલક્ષણે ॥ ૩॥

તતસ્તત્રાઽઽયયૌ જૃમ્ભા રાક્ષસી ઘોરરૂપિણી ।
રૂપં ધૃત્વા મનુષ્યસ્ય સુપ્રસન્નાનનામ્બુજા ॥ ૪॥

વિષયુક્તેન તૈલેન સા મમર્દ વિનાયકમ્ ।
વિજ્ઞાતા દેવદેવેન હતા મૃત્યુમવાપ ચ ॥ ૫॥

ચતુર્થે દિવસે તત્ર સમ્પ્રાપ્તા દૈત્યપુઙ્ગવાઃ ।

જ્વાલામુખોઽથ વ્યાઘ્રાસ્યો દારુણશ્ચ મહાબલઃ ॥ ૬॥

તાન્ હત્વા યોગભાવેન કાશ્યપો લીલયાઽરમત્ ।
બાલમધ્યે યથાઽન્યો વૈ પ્રાકૃતો માયયાઽસુર ॥ ૭॥

બ્રહ્મવિષ્ણુમુખાસ્તત્ર દ્રષ્ટુમાશ્ચર્યમુત્કટમ્ ।
બાલક્રીડનસમ્ભૂતં સંસ્થિતાશ્ચ વ્યલોકયન્ ॥ ૮॥

(Page ખં. ૨ અ. ૫૭ પાન ૧૨૦)
તત્ર તં પઞ્ચમે દેવં દિવસે મુનિનન્દનમ્ ।
પ્રણમ્ય કાશિરાજઃ સ ભોજનાર્થમમન્ત્રયત્ ॥ ૯॥

ચતુર્થ્યાં શુક્લપક્ષસ્ય પ્રાતઃકાલે મહામુનિઃ ।
ભ્રુશુણ્ડી ચાપૂજયત્તં માનસ્યા પૂજયા પ્રભુમ્ ॥ ૧૦॥

પૂજાં દૃષ્ટ્વા સ્વયં રાજા પ્રાતસ્તત્ર સુવિસ્મિતઃ ।
ઉવાચ તં કૃતા કેન પૂજેયં વદ મે પ્રભો ॥ ૧૧॥

તતસ્તં કથયામાસ ભ્રુશુણ્ડી મેઽતિવલ્લભઃ ।
મહાભક્તઃ કરોતીમાં પૂજાં પશ્ય નરાધિપ ॥ ૧૨॥

એકનિષ્ઠતયા વિપ્રો ભજતે માં વિશેષતઃ ।
મદ્ભિનાન્યન્ન જાનાતિ દેવતીર્થાદિકં કદા ॥ ૧૩॥

શ્રુત્વા તસ્ય વચો રમ્યં જગાદ નૃપસત્તમઃ ।
વિનાયકં પ્રણમ્યૈવ તં પ્રદર્શય યોગિનમ્ ॥ ૧૪॥

કાશિરાજવચઃ શ્રુત્વા પ્રેષયામાસ તં તતઃ ।
જવનાશ્વસમારૂઢો રાજા તસ્યાશ્રમં યયૌ ॥ ૧૫॥

દૃષ્ટ્વા તં શુણ્ડયા યુક્તં સ નત્વા વિસ્મિતો નૃપઃ ।
પ્રાર્થયામાસ યોગીશં કાશ્યાં નેતું સુભક્તિતઃ ॥ ૧૬॥

કાશિરાજ ઉવાચ ।
વિનાયકાજ્ઞયા સ્વામિન્નાગતસ્તેઽહમાશ્રમે ।
ત્વામાહ્વયતિ દેવોઽસૌ મદ્ગૃહે સંસ્થિતઃ સ્વયમ્ ॥ ૧૭॥

ચતુર્થ્યામદ્ય યોગીન્દ્ર માનસ્યા પૂજયા ત્વયા ।
પૂજિતસ્તાં મહાપૂજાં દર્શયામાસ માં વિભુઃ ॥ ૧૮॥

કશ્યપસ્ય ગૃહે સોઽપિ વિનાયક ઇતિ સ્મૃતઃ ।

તપસાઽઽરાધિતસ્તેન પુત્રોઽભૂદ્ગણનાયકઃ ॥ ૧૯॥

અહં તસ્ય તથા દાસો યજમાનો મહામતે ।
વિવાહાર્થં તુ પુત્રસ્યાઽઽનીતોઽસૌ મદ્ગૃહે મયા ॥ ૨૦॥

વિનાયકેન કથિતમાનયસ્વ મહામુનિમ્ ।
યાચે હ્યતોઽહં યોગીન્દ્રાઽઽગચ્છ કાશીં મહાપુરીમ્ ॥ ૨૧॥

તસ્ય તદ્વચનં શ્રુત્વા વિસ્મિતો મુનિસત્તમઃ ।
ઉવાચ તં સ ગાણેશઃ કાશિરાજં મહામતિમ્ ॥ ૨૨॥

ભ્રુશુણ્ડ્યુવાચ ।
શ‍ૃણુ રાજન્ મહાભાગ વેદાન્તાગોચરો વિભુઃ ।
યદિ ભક્ત્યા સમાયાતસ્ત્વદ્ગૃહે કશ્યપાત્મજઃ ॥ ૨૩॥

તથાપિ શુણ્ડયા હીનં નમામિ ન કદાચન ।
કલાંશાદિસમાયુક્તં જાનીહિ નૃપસત્તમ ॥ ૨૪॥

કલાત્મકાસ્તસ્ય સર્વે દેવા વિષ્ણુશિવાદયઃ ।
તે સર્વે માં નમન્ત્યેવ શુણ્ડાભક્તિયુતં પરમ્ ॥ ૨૫॥

ગજાનનં પરિત્યજ્યાઽહં નમામિ ન કઞ્ચન ।
અતસ્ત્વં ગચ્છ કાશ્યાં વૈ તં નયામિ વિનાયકમ્ ॥ ૨૬॥

તસ્ય તદ્વચનં શ્રુત્વા હ્યેકભક્તિસમન્વિતમ્ ।
ઉવાચ તં પ્રણમ્યૈવ કાશિરાજઃ પ્રતાપવાન્ ॥ ૨૭॥

કાશિરાજ ઉવાચ ।
મુને શ‍ૃણુ વચો મેઽદ્ય નાઽહં શક્તો ભવામિ ચ ।
કાશ્યાં ગન્તું મહાભાગાઽપરાહ્ને શ્રાન્તવાહનઃ ॥ ૨૮॥

તતો મુનિર્નૃપં પ્રાહ લોચનામીલનં કુરુ ।
તથાભૂતં નૃપશ્રેષ્ઠં પ્રેષયામાસ તાં પુરીમ્ ॥ ૨૯॥

પુનરુન્મીલ્ય નેત્રે સ્વેઽપશ્યદ્ગેહં મહાનૃપઃ ।
સ્વાં પુરીં વિસ્મિતો ભૂત્વા પ્રણનામ વિનાયકમ્ ॥ ૩૦॥

વૃત્તં સંશ્રુત્ય ભૂપેશાત્ પુનસ્તં ગણનાયકઃ ।
માયયા સ મુનેસ્તસ્યાશ્રમસ્થમકરોત્તતઃ ॥ ૩૧॥

પુનઃ સમાગતં વીક્ષ્ય નૃપં પ્રાહ મહામુનિઃ ।

કિમર્થમાગતો રાજન્નદ્યૈવ વદ મે ગૃહે ॥ ૩૨॥

તતસ્તં રાજશાર્દૂલો જગાદ કથિતં ચ યત્ ।
વિનાયકેન ભોઃ સ્વામિંસ્ત્વામાહ્વયતિ વિઘ્નપઃ ॥ ૩૩॥

(Page ખં. ૨ અ. ૫૭ પાન ૧૨૧)
તેનાઽહં પ્રેષિતો નૂનં શુણ્ડાદણ્ડધરેણ ચ ।
ચલ શીઘ્રં મયા સાર્ધં દ્રષ્ટું પૂર્ણં ગજાનનમ્ ॥ ૩૪॥

શ્રુત્વા તસ્ય વચો રમ્યં ભક્ત્યાઽત્યન્તં લુલોઠ ચ ।
રોમાઞ્ચિતશરીરોઽસૌ સાશ્રુનેત્રો મહામુનિઃ ॥ ૩૫॥

તં દૃષ્ટ્વા વિસ્મિતોઽત્યન્તં કાશિરાજો મહામનાઃ ।
અહો ભક્તિરિયં સાક્ષાદ્ દૃશ્યતે દેહધારિણી ॥ ૩૬॥

દેહભાવં સમાસાદ્ય યાત્રાર્થં તેન ભૂભુજા ।
ભ્રુશુણ્ડી ચલિતશ્ચૈવ સ્વાશ્રમાત્ પ્રજગામ સઃ ॥ ૩૭॥

દેહશ્રમેણ યાત્રા વૈ કર્તવ્યા ગણપસ્ય ચ ।
વિચાર્યૈવં યયૌ પદ્ભ્યામવિમુક્તં મહામુનિઃ ॥ ૩૮॥

જ્ઞાત્વા તસ્ય હૃદિસ્થં સા નિશ્ચયં ધરણી મુનિમ્ ।
પ્રાપયામાસ કાશ્યાં તં ક્ષણેન નૃપસંયુતમ્ ॥ ૩૯॥

નૃપેણ નગરી દૃષ્ટા તમુવાચ તતઃ પરમ્ ।
સ્વામિન્ સમાગતા કાશી પ્રભાવાત્તપસશ્ચ તે ॥ ૪૦॥

તતસ્તં સ્વગૃહે નીત્વાઽપૂજયન્ નૃપસત્તમઃ ।
વિનાયકઃ સમાયાતં ભક્તં પશ્યતિ સાશ્રુકઃ ॥ ૪૧॥

તસ્ય ભાવં વિદિત્વાઽસૌ શુણ્ડાં ધૃત્વા વિનાયકઃ ।
મૂષકોપરિ સંસ્થાય પ્રજગામ મહામુનિમ્ ॥ ૪૨॥

ચતુર્ભુજધરં વિપ્રો મહોદરવિરાજિતમ્ ।
શેષનાભિં ત્વેકદન્તં દૃષ્ટ્વા તં પ્રણનામ ચ ॥ ૪૩॥

અપૂજયત્ ભ્રુશુણ્ડી તં ભક્તિભાવસમન્વિતઃ ।
પુનઃ પ્રણમ્ય તુષ્ટાવ નાનાસ્તોત્રૈઃ પ્રસન્નધીઃ ॥ ૪૪॥

ઉવાચ વિસ્ખલદ્વાક્યો ભક્તે રસપરિપ્લુતઃ ।
ગજાનનં નિજં નાથં કૃતકૃત્યો મહાસુર ॥ ૪૫॥

ભ્રુશુણ્ડ્યુવાચ ।
તવ દર્શનમાત્રેણ કૃતકૃત્યો ગજાનન ।
મહતા ભાગ્યયોગેન દૃષ્ટે તે ચરણં વિભો ॥ ૪૬॥

અધુના મે વરં દેહિ તેન તુષ્ટો ભવામ્યહમ્ ।
તવ વિસ્મરણં નાથ ન ભવેન્ મે તથા કુરુ ॥ ૪૭॥

અનેનૈવ સ્વરૂપેણ મત્સ્થાને સંસ્થિતો ભવ ।
આશાપૂરકનામ્ના ત્વં ખ્યાતો ભવ ગજાનન ॥ ૪૮॥

તત્રૈવાનન્યભક્ત્યા ત્વાં ભજામિ રસયુક્તયા ।
મુદ્ગલેન સમં માં ત્વં પૂર્ણં ભક્તં કુરુ પ્રભો ॥ ૪૯॥

અથવા મુદ્ગલાચ્ચૈવાધિકં માં કુરુ વિઘ્નપ ।
ગુરોરતિક્રમાચ્છિષ્યઃ પુત્રો વા તસ્ય નાલ્પકઃ ॥ ૫૦॥

એવં પ્રાર્થયમાનં તં તથેતિ ગણનાયકઃ ।
જગાદ સ પુનર્બાલો ભૂત્વાઽખેલત્તુ સાદરમ્ ॥ ૫૧॥

તં પ્રણમ્ય યયૌ સ્થાનં સ્વકીયં મુનિસત્તમઃ ।
ભ્રુશુણ્ડી ચ તતઃ કાશિરાજઃ સંવિસ્મિતોઽભવત્ ॥ ૫૨॥

હૃદિ રાજા વિચાર્યાસાવેકનિષ્ઠો બભૂવ હ ।
ગણેશભજને દૃષ્ટ્વા ભ્રુશુણ્ડીચરિતં મહત્ ॥ ૫૩॥

અહો મુનિવરો ધન્યો નાનારૂપાત્મિકાં પરામ્ ।
માયાં ત્યક્ત્વા સ યોગેન ભજતે ગણનાયકમ્ ॥ ૫૪॥

સર્વેષાં બ્રહ્મણાં યોગો ગણેશે ભવતિ પ્રભો ।
અતસ્તમેકભાવેન ભજતેઽસૌ મહામુનિઃ ॥ ૫૫॥

એકનિષ્ઠા સમા ભક્તિર્ન ભૂતા ન ભવિષ્યતિ ।
કોટ્યંશેન સમા નાન્યા તત્ ભજેત્ યોગિસત્તમઃ ॥ ૫૬॥

સર્વત્ર ગણરાજોઽયં વસત્યત્ર ન સંશયઃ ।
કલાંશેન તતોઽન્યેષાં ભજને ચ ફલં લભેત્ ॥ ૫૭॥

ગણેશભજનં હ્યેકં ચેત્ પૂર્ણં ભજનં ભવેત્ ।
સર્વેષાં ચ ગણેશસ્ય ભ્રુશુણ્ડી તત્ સમાશ્રિતઃ ॥ ૫૮॥

અહો ભ્રુશુણ્ડિના તુલ્યો દૃશ્યતે ન કદાચન ।
(Page  ખં. ૨ અ. ૫૮ પાન ૧૨૨)
પ્રત્યક્ષો ગણરાજોઽયં શુણ્ડાવાન્નાત્ર સંશયઃ ॥ ૫૯॥

કાશ્યાં મુક્તિસ્વરૂપાયામાગતોઽસૌ મહામુનિઃ ।
મણિકર્ણીં ચ વિશ્વેશં સસ્માર મનસાઽપિ ન ॥ ૬૦॥

ગણેશાર્થં સમાયાતસ્તં પ્રણમ્ય મહામુનિઃ ।
સ્વાશ્રમં પુનરેવાસૌ જગામ સુખદાયકમ્ ॥ ૬૧॥

એવં વિસ્મયભાવેન કાશિરાજસ્તથાઽભજત્ ।
ગણેશં સાધુભાવજ્ઞઃ સોઽપિ તત્સમતાં યયૌ ॥ ૬૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ભ્રુશુણ્ડીભક્તિવર્ણનં નામ સપ્તપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૭

## ૨.૫૮ યમશાપવર્ણનં નામાષ્ટપઞ્ચાશત્તમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

પ્રલ્હાદ ઉવાચ ।
શ ृણુ ગૃત્સમદ ત્વં મે વચનં દીનપાલક ।
કોઽસૌ ભ્રુશુણ્ડિનામા વૈ મુનિર્મે બ્રૂહિ સામ્પ્રતમ્ ॥ ૧॥

તપસા કેન તસ્યાઽપિ ભૃશુણ્ડા નિઃસૃતા પ્રભો ।
કીદૃશી માનસી પૂજા કૃતા માં વદ વિસ્તરાત્ ॥ ૨॥

આશ્ચર્યં પરમં પ્રાપ્તઃ શ્રુત્વા મુનિવરસ્ય ચ ।
મહિમાનં મહાભાગ ધન્યો ભૂમણ્ડલેઽભવત્ ॥ ૩॥

ગણેશભજને સક્તા નરાસ્તે બ્રહ્મરૂપિણઃ ।
તેષાં કથા પ્રવક્તારં શ્રોતારં પ્રપુનાતિ ચ ॥ ૪॥

મુદ્ગલ ઉવાચ ।
એવં પૃષ્ટો ગૃત્સમદો મહાયોગી તમબ્રવીત્ ।
પ્રહ્લાદં ભક્તિપાત્રં વૈ દૃષ્ટ્વા હર્ષસમન્વિતઃ ॥ ૫॥

ગૃત્સમદ ઉવાચ ।
શ ृણુ પ્રહ્લાદ ભાવેન કથાં લોકૈકપાવનીમ્ ।

ભ્રુશુણ્ડિસંશ્રિતાં પુણ્યાં બ્રહ્મભૂતપદપ્રદામ્ ॥ ૬॥

નન્દુરે ત્વવસદ્ ગ્રામે નામા કૈવર્તકઃ પુરા ।
નામ્ના પાપી સુવિખ્યાતો મહાપાપપરાયણઃ ॥ ૭॥

ધૃત્વા ગ્રામેષુ શસ્ત્રાદીન્ વનેષુ વિચચાર હ ।
જીવહિંસાં સદા તત્ર ચકાર કામવર્જિતઃ ॥ ૮॥

માર્ગસ્થાંશ્ચ જનાન્ વીક્ષ્યાઽમારયદ્ધનલિપ્સયા ।
સઙ્ગૃહ્ય મિલિતં ગ્રામે જગામ પ્રત્યહં ખલઃ ॥ ૯॥

દ્રવ્યવસ્ત્રાદિહીનાંસ્તાન્ દૃષ્ટ્વા મારયતાપ્યહો ।
જીવં દૃષ્ટ્વા ક્રૂરકર્મા ન મુમોચ વધપ્રિયઃ ॥ ૧૦॥

ધનં તેષાં ગૃહીત્વાઽસૌ ધનવાન્ પ્રબભૂવ હ ।
દ્રવ્યસઞ્ચયભાવેન ન તુતોષ કદાચન ॥ ૧૧॥

ન સઙ્ખ્યાં કર્તુમત્યન્તં તસ્ય પાપસ્ય વૈ ભવેત્ ।
બ્રહ્મા સમર્થઃ શેષશ્ચ પાપાનાં ભાગિનૌ ભયાત્ ॥ ૧૨॥

સ્ત્રીગોબાલદ્વિજાદીનાં હત્યાઽપારા કૃતા પુરા ।
તેન તસ્ય ચ ભારેણ પીડિતા ભૂરભૂત્તતઃ ॥ ૧૩॥

એકદા વનમધ્યેઽસૌ કઞ્ચિત્પુરુષમુત્તમમ્ ।
દૃષ્ટ્વા વધાર્થમાનન્દાદધાવચ્છસ્ત્રસંયુતઃ ॥ ૧૪॥

તમાગતં સમાલોક્ય દુષ્ટં દૂરે પલાય્ય સઃ ।
ગવ્યૂતિમાત્રમાસાદ્ય ગ્રામં તત્ર જગામ હ ॥ ૧૫॥

નામા પ્રહ્લાદ માર્ગે સ પતિતોઽધાવનાઽઽકુલઃ ।
જાતશ્ચ દુઃખિતોઽત્યન્તં વિરરામ વધાત્તદા ॥ ૧૬॥

મન્દગત્યા ચચાલાઽસૌ માર્ગે કુણ્ડં દદર્શ હ ।
તત્ર શ્રમાપનોદાર્થં સ્નાનં ચક્રે મહાખલઃ ॥ ૧૭॥

તદેવ ગણરાજસ્ય તીર્થં પુણ્યપ્રદં મહત્ ।
(Page ખં. ૨ અ. ૫૮ પાન ૧૨૩)
તસ્ય પ્રભાવયોગેન પાપં સંશિથિલં ત્વભૂત્ ॥ ૧૮॥

સ પાપશિથિલો નામા વિચારમકરોદ્ હૃદિ ।
અહો મયા ચ પાપાનિ કૃતાનિ કતિ નાઽવિદમ્ ॥ ૧૯॥

મૃતોઽહં નરકે ઘોરે પતિષ્યામિ ન સંશયઃ ।
કલ્પાન્ દુઃખમનેકાંશ્ચ સહિષ્યામિ કથં પરમ્ ॥ ૨૦॥

મુદ્ગલ ઉવાચ ।
એવં બ્રુવન્તમાનન્દદાયકં મુનિસત્તમમ્ ।
પ્રહ્લાદો વૈ ગૃત્સમદં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૨૧॥

પ્રલ્હાદ ઉવાચ ।
કીદૃશં કુણ્ડરૂપં ચ કેન વા ચરિતં તપઃ ।
તત્ર યેન ગણેશસ્ય સ્થાનં કુણ્ડાત્મકં હ્યભૂત્ ॥ ૨૨॥

તતો ગૃત્સમદઃ પ્રાહ પ્રહ્લાદં સર્વમઞ્જસા ।
આહ્લાદેન સમાયુક્તો ગાણપત્યો મહાયશાઃ ॥ ૨૩॥

ગૃત્સમદ ઉવાચ ।
અત્ર તે કથયિષ્યામિ ચેતિહાસં પુરાતનમ્ ।
સૂર્યસ્ય યમરાજસ્ય સંવાદં પાપનાશનમ્ ॥ ૨૪॥

સૂર્યાય પ્રદદૌ કન્યાં વિશ્વકર્મા મહાદ્ભુતામ્ ।
સંજ્ઞાં કર્મમયીં દેવીં માયારૂપાં મહાદ્યુતિઃ ॥ ૨૫॥

તપસા શતવર્ષૈસ્તાં પ્રસન્નાં સ ચકાર હ ।
યયાચે વિશ્વકર્મા તાં પુત્રી મે ભવ માનદે ॥ ૨૬॥

સાઽઽદિમાયા વરાત્તસ્ય પુત્રી જાતા સુરેશ્વર ।
તાં ગૃહીત્વા ગૃહં દેવ સવિતા પ્રજગામ હ ॥ ૨૭॥

તયા રેમે મહાતેજાશ્ચિરકાલં વિભાવસુઃ ।
તસ્યાં પુત્રૌ ચ પુત્રીં વૈ જનયામાસ વીર્યતઃ ॥ ૨૮॥

વૈવસ્વતો મનુર્જ્યેષ્ઠો યમશ્ચ યમુના નદી ।
સર્વે સ્વધર્મશીલાસ્તે મહાભાગા બભૂવિરે ॥ ૨૯॥

તીક્ષ્ણેન તેજસા તપ્તા સંજ્ઞા સૂર્યસ્ય નિત્યદા ।
નિર્મમે માયયા છાયાં સ્વસ્યાકૃતિધરાં તતઃ ॥ ૩૦॥

તસ્યૈ સર્વં નિવેદ્યૈવ પુત્રીં પુત્રૌ ગૃહાદિકમ્ ।
ઉવાચ રવિણા પૃષ્ટા મા વદ ત્વં સ્વચેષ્ટિતમ્ ॥ ૩૧॥

તાં છાયા પ્રત્યુવાચેદં યદિ માં ધર્ષયિષ્યતિ ।
સવિતા ચેન્ મહાભાગે વદિષ્યામિ ન સંશયઃ ॥ ૩૨॥

ગચ્છ દેવિ યથા ચિત્તે નિશ્ચયસ્તાદૃશં કુરુ ।
અહં સર્વં ત્વદીયં યત્ કાર્યં સંસાધયામિ તત્ ॥ ૩૩॥

તતઃ સંજ્ઞા યયૌ ગેહં પિતુસ્તેન તિરસ્કૃતા ।
ભર્તારં ત્યજ મૈવં ત્વં સ્વગૃહં ગચ્છ મા કુરુ ॥ ૩૪॥

તતઃ સા વનવાસાય જગામાશ્વસ્વરૂપિણી ।
ભૂત્વા તતાપ સા ધ્યાત્વા તપો ગણપતિં પ્રભુમ્ ॥ ૩૫॥

માલામન્ત્રેણ વિઘ્નેશં તોષયામાસ સા સતી ।
પૂર્ણે વર્ષશતે તત્રાજગામ ગણનાયકઃ ॥ ૩૬॥

તયા સમ્પૂજિતો દેવઃ સ્તુતશ્ચૈવ વિશેષતઃ ।
વરં દદૌ મહારાજ મનસીપ્સિતમાદરાત્ ॥ ૩૭॥

દેવ્યર્યમા સૌમ્યતેજા ભવિષ્યતિ ન સંશયઃ ।
ત્વં માયાબન્ધહીના વૈ મદ્ભક્તિનિરતા ભવ ॥ ૩૮॥

યદ્યદિચ્છસિ તત્તત્તે સફલં પ્રભવિષ્યતિ ।
કોપહીનઃ સ્વયં ભાનુસ્ત્વામત્રાગત્ય નેષ્યતિ ॥ ૩૯॥

એવમુક્ત્વા ગણાધીશોન્તર્ધાનં પ્રચકાર હ ।
સા તત્ર ગણપં દેવં ધ્યાયન્તી સંસ્થિતાઽભવત્ ॥ ૪૦॥

છાયાયાં સવિતા તદ્વત્ પુત્રૌ પુત્રીં મહાયશાઃ ।
અથ સઞ્જનયામાસ ધર્મયુક્તાન્ મહૌજસઃ ॥ ૪૧॥

સાવર્ણિશ્ચ મનુર્જ્યેષ્ઠઃ સમ્ભૂતશ્ચ શનૈશ્ચરઃ ।
તાપી નામ્ની નદી કન્યા ત્રયસ્તે પ્રથિતા ભુવિ ॥ ૪૨॥

છાયા સ્વપુત્રવાત્સલ્યાત્ સંજ્ઞા પુત્રાંશ્ચ ભેદતઃ ।
(Page ખં. ૨ અ. ૫૯ પાન ૧૨૪)
સતતં ન્યૂનભાવેનાઽવર્તયત્ સાધુસત્તમ ॥ ૪૩॥

મનુશ્ચ સેહે તં માતુરપરાધં વિચક્ષણઃ ।
ધર્મરાજઃ સ તાં તત્ર નિષિષેધ મુહુર્મુહુઃ ॥ ૪૪॥

સા સ્વભાવં સ્વકીયં તં ન તત્યાજ કદાચન ।

કુપિતો ધર્મરાજસ્તાં પદા હન્તું પ્રચક્રમે ॥ ૪૫॥

તં ચાવિનયસંયુક્તં શશાપ જનની સુતમ્ ।
પાદસ્તે ક્લેદ્યતાં પ્રાપ્ય પતિષ્યતિ ધરાતલે ॥ ૪૬॥

ધર્મઃ ક્રોધં સમાગૃહ્ય સવિતારં જગામ હ ।
ભયભીતશ્ચ શાપેન વૃત્તાન્તં તં જગાદ સઃ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે યમશાપવર્ણનં નામાષ્ટપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૨.૫૮

## ૨.૫૯ કુણ્ડસમ્ભવચરિત્રં નામૈકોનષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
યમસ્ય વચનં શ્રુત્વા સવિતા વિસ્મિતોઽભવત્ ।
ધર્મશીલસ્ય સઙ્ક્રોધો માતરિ પ્રબભૂવ હ ॥ ૧॥

માતા સ્વદેહજં પુત્રં ભેદબુદ્ધ્યા શશાપ હ ।
અતઃ કારણકં કિઞ્ચિદ્વિપરીતં ભવેદિહ ॥ ૨॥

તતો જ્ઞાનેન બુદ્ધ્વા સ યમં ભાનુરુવાચ હ ।
માતુઃ શાપં કદા મિથ્યા મયા કર્તું ન શક્યતે ॥ ૩॥

અતો વિનાયકં દેવં ભજ ત્વં ભક્તિભાવતઃ ।
સ ચેત્ પ્રસન્નતાં યાતસ્તદા સુખમવાપ્સ્યસિ ॥ ૪॥

એવમુક્ત્વાર્યમા પુત્રં મન્ત્રં પઞ્ચાક્ષરં દદૌ ।
વિધિયુક્તં ગણેશસ્ય સ યયૌ વનમાદરાત્ ॥ ૫॥

સવિતાઽસૌ જગામેદં છાયાં વચનમબ્રવીત્ ।
સંજ્ઞા કુત્ર ગતા દેવિ વદ નોચેચ્છપામ્યહમ્ ॥ ૬॥

સા ભીતા સત્યમેવેદં વચનં તં જગાદ હ ।
પિતુર્ગેહં ગતા સંજ્ઞાઽસ્થાપ્ય માં ત્વદ્ગૃહે પ્રભો ॥ ૭॥

સત્યભાષણયોગેન તુષ્ટસ્તાં ન શશાપ સઃ ।
જગામ વિશ્વકર્માણં ક્રોધયુક્તો દિવાકરઃ ॥ ૮॥

તં પ્રણમ્ય સ પપ્રચ્છ વૃત્તાન્તં રક્તલોચનઃ ।

સંજ્ઞાયા વિશ્વકર્મા તં સાન્ત્વયામાસ યુક્તિભિઃ ॥ ૯॥

વિશ્વકર્મોવાચ ।
મયા તે ગૃહમેવં સા પ્રેષિતા નાગતા યદા ।
માયયા ગુપ્તરૂપેણ કુત્ર વૈ સંસ્થિતા ભવેત્ ॥ ૧૦॥

ત્વદીયતેજસા તપ્તા ગતા શુષ્કશરીરકા ।
અતસ્ત્વં તેજસા સૌમ્યો ભવ તસ્યાં રમસ્વ ચ ॥ ૧૧॥

તતઃ સોઽપિ જગાદેદં વચનં તં વિભાવસુઃ ।
ત્વં વિશ્વકર્મતાં પ્રાપ્તોઽતો માં સૌમ્યં કુરુ પ્રભો ॥ ૧૨॥

તતસ્તેન સ્વયન્ત્રે સંસ્થાપ્ય તેજો હૃતં મહત્ ।
તીક્ષ્ણં તેન સુસૌમ્યશ્ચ સૂર્યસ્તાં પ્રજગામ હ ॥ ૧૩॥

અશ્વિની રૂપભાવેન સ્થિતાં વીક્ષ્ય વનેષુ સઃ ।
અશ્વો ભૂત્વા પ્રયત્નેન ધર્તું તામુદ્યતોઽભવત્ ॥ ૧૪॥

સાઽપરં પુરુષં જ્ઞાત્વા ગણેશં મનસાઽસ્મરત્ ।
તતઃ સૂર્યેણ વીર્યં સ્વં નસિ નિક્ષિપ્તમાદરાત્ ॥ ૧૫॥

તતસ્તયા રવેર્વીર્યં સ્વશ્વાસેન બહિર્બલાત્ ।
નિષ્કાસિતં પરસ્યૈવ જ્ઞાત્વા સુવિમનાસ્ત્વભૂત્ ॥ ૧૬॥

(Page ખં. ૨ અ. ૫૯ પાન ૧૨૫)
એવં દૃઢાગ્રહં દૃષ્ટ્વા સવિતા તોષવાનભૂત્ ।
સ્વરૂપં દર્શયામાસ તાં પ્રગૃહ્ય ગૃહં યયૌ ॥ ૧૭॥

સંજ્ઞયા સવિતુર્વીર્યં ત્યક્તં તસ્માત્ સમુદ્ભવૌ ।
અશ્વિનૌ ભિષજાં શ્રેષ્ઠૌ સર્વમાન્યો બભૂવતુઃ ॥ ૧૮॥

ગણેશભક્તિભાવેન સંજ્ઞા સુખયુતાઽભવત્ ।
તમેવ સતતં દેવી ભજતેઽનન્યમાનસા ॥ ૧૯॥

યમોઽપિ ચ તપસ્તેપે દારુણં ભાવસંયુતઃ ।
નિરાહારતયા દેવં ધ્યાત્વા જપપરોઽભવત્ ॥ ૨૦॥

સંવત્સરસહસ્રેણ ગણેશો વરદોઽભવત્ ।
તં દૃષ્ટ્વા સહસોત્થાયાઽઽપૂજ્ય તુષ્ટાવ ભાનુજઃ ॥ ૨૧॥

યમ ઉવાચ ।

નમો ગણપતે તુભ્યં નાનામાયાવિલાસિને ।
માયાધારકવેષેણ સ્થિતાય તુ નમો નમઃ ॥ ૨૨॥

માયામોહવિહીનાય સાક્ષિણે જગદાદયે ।
બ્રહ્માદયે બ્રહ્મવિદે બ્રહ્મણે વૈ નમો નમઃ ॥ ૨૩॥

અનન્તાય નમસ્તુભ્યં હેરમ્બાય ચ ઢુણ્ઢયે ।
વિઘ્નેશાય ત્રિનેત્રાય લમ્બોદર નમોઽસ્તુ તે ॥ ૨૪॥

ગજાનનાય દેવાય દેવાનાં પતયે નમઃ ।
દેવાનાં ગર્વહન્ત્રે ચ રક્ષસાં મર્દિને નમઃ ॥ ૨૫॥

ભક્તિપ્રિયાય ભક્તેભ્યો નાનાસૌખ્યપ્રદાય તે ।
અનન્તાનનધારાયાનન્તહસ્તાય તે નમઃ ॥ ૨૬॥

અનન્તશિરસે તુભ્યં બ્રહ્મભૂતાય વેધસે ।
શિવાય શિવવન્દ્યાય શિવદાય નમો નમઃ ॥ ૨૭॥

અખણ્ડવિભવાયૈવ મૂષકધ્વજિને નમઃ ।
મૂષકશ્રેષ્ઠવાહસ્થાયૈકદન્તાય તે નમઃ ॥ ૨૮॥

આદિમધ્યાન્તરૂપાય સર્વાકારાય તે નમઃ ।
પાશાઙ્કુશધરાયૈવ સર્વભોક્ત્રે નમો નમઃ ॥ ૨૯॥

ત્વાં સ્તોતું કઃ સમર્થઃ સ્યાદ્યોગાકારસ્વરૂપિણમ્ ।
અતોઽહં પ્રણમામીહ તેન તુષ્ટો ભવ પ્રભો ॥ ૩૦॥

ધન્યોઽહં સર્વભાવૈશ્ચ યેન દૃષ્ટો ગણેશ્વરઃ ।
અધુના રક્ષ માં ભક્તં શરણાગતવત્સલ ॥ ૩૧॥

એવં સ્તુવન્તમત્યન્તમુવાચ ગણનાયકઃ ।
યમં પરમભક્તં ચ સૂર્યપુત્રં યશસ્વિનમ્ ॥ ૩૨॥

ગણેશ ઉવાચ ।
વરં વૃણુ મહાભાગ યમ ત્વં મનસીપ્સિતમ્ ।
દાસ્યામિ તે મહાભક્ત્યા તોષિતોઽહં ન સંશયઃ ॥ ૩૩॥

તતસ્તં ભાનુજસ્તત્રોવાચ દેહિ ગજાનન ।
ભક્તિં ત્વદીયપાદે વૈ સુદૃઢાં મે મહોદર ॥ ૩૪॥

અન્યં વરં ચ મે દેહિ માતૃશાપહરં પરમ્ ।

યદ્યદિચ્છામિ દેવેશ તત્તત્ સિધ્યતુ વિઘ્નપ ॥ ૩૫॥

એવં તસ્ય વચઃ શ્રુત્વા તથેતિ ગણપોઽબ્રવીત્ ।
મદીયા તે મહાભક્તિર્ભવિષ્યતિ ન સંશયઃ ॥ ૩૬॥

માતૃશાપસ્ય યોગેન કિઞ્ચિદ્ દુઃખમવાપ્સ્યસિ ।
ક્લેદ્યપાદાચ્ચ માંસં તે કીટાઃ સઙ્ગૃહ્ય સત્વરમ્ ॥ ૩૭॥

પતિષ્યન્તિ પૃથિવ્યાં તે ત્વં સુપાદો ભવિષ્યસિ ।
યદ્યદિચ્છસિ તત્તત્તે સુલભં પ્રભવિષ્યતિ ॥ ૩૮॥

દક્ષિણસ્યાં દિશિ પ્રાજ્ઞ દિક્પાલસ્ત્વં ભવિષ્યસિ ।
ધર્મરાજ ઇતિ ખ્યાતો નામ્ના સર્વત્ર પૂજિતઃ ॥ ૩૯॥

સ્વધર્મપાલકેષુ ત્વં શ્રેષ્ઠો ધર્મકરો મતઃ ।
જીવાનાં કર્મયોગેન ફલદશ્ચ ભવિષ્યસિ ॥ ૪૦॥

ત્વદીયાઽઽજ્ઞા ત્રિલોકેષુ વર્તતાં ધર્મભાવતઃ ।
ત્વયા સ્તોત્રમિદં પુણ્યં કૃતં તચ્ચ સુસિદ્ધિદમ્ ॥ ૪૧॥

પઠતે શ ૃણ્વતે પૂર્ણં ભવિષ્યતિ ન સંશયઃ ।
યમસ્ય યાતનાં ઘોરાં સ્તોત્રેણ પ્રસ્તુતો યમ ॥ ૪૨॥

(Page ખં. ૨ અ. ૬૦ પાન ૧૨૬)
હરામિ નાત્ર સન્દેહોંઽતે સ્વાનન્દં દદામ્યહમ્ ।
ત્વયા યત્ર કૃતં સ્નાનં નિત્યં મદ્ભક્તિભાવિના ॥ ૪૩॥

ગણેશતીર્થસંજ્ઞં તદ્ભવિષ્યતિ ન સંશયઃ ।
અત્રૈવ સ્નાનમાત્રેણ સર્વપાપક્ષયો ભવેત્ ॥ ૪૪॥

સુબુદ્ધિપ્રદમેતચ્ચ તત્ક્ષણાત્ પ્રભવિષ્યતિ ।
એવમુક્ત્વાન્તર્દધેઽસૌ યમસ્તત્ર સ્થિતોઽભવત્ ॥ ૪૫॥

સંસ્થાપ્ય મૂર્તિમચલાં હેરમ્બસ્ય મહાદ્વિજૈઃ ।
કુણ્ડં ચકાર ભાવેન ગણેશપદલાઞ્છિતમ્ ॥ ૪૬॥

હેરમ્બગણપો નામ્ના તત્ર ખ્યાતો બભૂવ હ ।
યમઃ શાપવિહીનશ્ચ બભૂવ સ દિશોધિપઃ ॥ ૪૭॥

સદા ગણપતિં ચિત્તેઽધ્યાયદ્વૈ રવિનન્દનઃ ।
સમઃ સર્વત્ર સઞ્જાતઃ સર્વમાન્યો મહાયશાઃ ॥ ૪૮॥

એતત્તે કથિતં દિવ્યં ચરિત્રં કુણ્ડસમ્ભવમ્ ।
યમેન રચિતં પુણ્યં સર્વસિદ્ધકરં મહત્ ॥ ૪૯॥

એતદ્યમસ્ય માહાત્મ્યં યઃ શ‍ૃણોતિ નરોત્તમઃ ।
પઠેદ્વા શુભદં તસ્મૈ સર્વદં પ્રભવિષ્યતિ ॥ ૫૦॥

અધુના શ‍ૃણુ દૈત્યેન્દ્ર પ્રકૃતં યત્ કથાનકમ્ ।
ભૃશુણ્ડિનશ્ચ પાપઘ્નં વાઞ્છિતાર્થપ્રદં પરમ્ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે કુણ્ડસમ્ભવચરિત્રં નામૈકોનષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૫૯

## ૨.૬૦ ભ્રૂશૂણ્ડિબ્રાહ્મણત્વવર્ણનં નામ ષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
કૈવર્તકસ્તતો નામા મહાદુષ્ટો દદર્શ હ ।
મુદ્ગલં મુનિશાર્દૂલં સ્થિતં તત્ર મહાવને ॥ ૧॥

દૃષ્ટ્વા મુનિવરં હૃષ્ટઃ પાપચેતા બભૂવ સઃ ।
ખડ્ગમુદ્યમ્ય તં હન્તું યયૌ નામા દૃઢાગ્રહઃ ॥ ૨॥

યાવત્ સમીપગો ભૂત્વા હન્તું તમુપચક્રમે ।
તાવત્તસ્ય કરાત્ ખડ્ગઃ પપાત ધરણીતલે ॥ ૩॥

શસ્ત્રાણ્યન્યાનિ સર્વાણિ દૃઢબદ્ધાનિ સર્વતઃ ।
પેતુર્ધરાતલે તાનિ તેનાઽસૌ વિસ્મિતોઽભવત્ ॥ ૪॥

અપશ્યન્મુદ્ગલં દુષ્ટો વદન્નેવં કિમદ્ભુતમ્ ।
તેન નિર્મલચિત્તોઽસૌ પ્રબભૂવાઽતિદારુણઃ ॥ ૫॥

તં પ્રણમ્ય મહાદુષ્ટ ઉવાચ પ્રાઞ્જલિર્મુનિમ્ ।
યોગિદર્શનમાત્રેણ યથા સાધુસ્તથા વચઃ ॥ ૬॥

નામોવાચ ।
આજન્મનોઽદ્યપર્યન્તં બુદ્ધિર્મે પાપનિશ્ચયા ।
તયા કૃતાનિ પાપાનિ તેષાં સઙ્ખ્યા ન વિદ્યતે ॥ ૭॥

અધુના કુણ્ડજેનૈવ કિઞ્ચિત્ સ્નાનેન ચાઞ્જસા ।
જાતા નિર્મલભાવા સા પાપાદ્વૈ સમ્બિભેતિ ચ ॥ ૮॥

તવદર્શનમાત્રેણ સન્તોષે સંસ્થિતા મુને ।
મુક્તિમિચ્છતિ મે બુદ્ધિર્મહાપાપિન આદરાત્ ॥ ૯॥

શસ્ત્રાણિ ગલિતાન્યેવ ન ગ્રહીષ્યામિ તાનિ વૈ ।
ઉપદેશં વદ પ્રાજ્ઞ સંસારોત્તારણાત્મકમ્ ॥ ૧૦॥

તસ્ય તદ્વચનં શ્રુત્વા મુદ્ગલસ્તમુવાચ હ ।
ગચ્છ ત્વં સ્વગૃહં તાત સ્વશસ્ત્રાણિ પ્રગૃહ્ય ચ ॥ ૧૧॥

તતસ્તં મુનિશાર્દૂલં જગાદાઽસૌ મહાખલઃ ।
કૈવર્તકઃ પ્રણમ્યાઽઽદૌ રુદન્નશ્રુજલાવિલઃ ॥ ૧૨॥

નામોવાચ ।
શિષ્યં માં કુરુ યોગીન્દ્ર નોચેદ્ દેહં ત્યજામ્યહમ્ ।
(Page ખં. ૨ અ. ૬૦ પાન ૧૨૭)
સન્નિધૌ તે મહાભાગ નેચ્છામિ વિષયે સુખમ્ ॥ ૧૩॥

ઇતિ તસ્ય વચઃ શ્રુત્વા શરણાગતવત્સલઃ ।
ગણેશાય નમો મન્ત્રં યોગી તસ્મૈ દદૌ સ્વયમ્ ॥ ૧૪॥

સ્વયષ્ટિં તત્ર યોગીન્દ્રઃ સમારોપ્ય જગાદ તમ્ ।
શુષ્કામત્રૈવ તિષ્ઠ ત્વં જપન્મન્ત્રં મહાખલ ॥ ૧૫॥

યાવદ્યષ્ટિશ્ચ નામાન્ મે સાઙ્કુરા પ્રભવિષ્યતિ ।
તાવત્ત્વં જપ તં મન્ત્રં તદા શુદ્ધો ભવિષ્યસિ ॥ ૧૬॥

ન ફલં ન જલં મૂલં પર્ણમન્નાદિકં કદા ।
ભક્ષસ્વ વાયુમાત્રં ત્વં તદા શુદ્ધો ભવિષ્યસિ ॥ ૧૭॥

એવમુક્ત્વા મહાદુષ્ટં મુદ્ગલો ગાણપાગ્રણીઃ ।
અન્તર્ધાનં ચકારૈવ સોઽપિ તાદૃશમાચરત્ ॥ ૧૮॥

ગતે વર્ષસહસ્રે તુ વલ્મીકોઽલ્પસ્તદઙ્ગકે ।
સમુત્પન્નસ્તૃણૌઘાદ્યૈઃ સંવૃતઃ સર્વતો બભૌ ॥ ૧૯॥

તથાપિ નામમન્ત્રં સ નામાઽજાપીચ્ચ ભાવતઃ ।
નામમન્ત્રપ્રભાવેણ સાઙ્કુરા યષ્ટિરાબભૌ ॥ ૨૦॥

પાપં સર્વં લયં પ્રાપ્તં તસ્ય મન્ત્રપ્રભાવતઃ ।
પુણ્યરાશિઃ સમુત્પન્નોઽપારરૂપો મહાસુર ॥ ૨૧॥

અતિપુણ્યેન ભક્ત્યા ચ શુણ્ડા તસ્ય વિનિઃસૃતા ।
ભ્રૂમધ્યાત્તેન સઞ્જાતો ગજાનન ઇવાઽપરઃ ॥ ૨૨॥

તતસ્તત્ર સમાયાતો મુદ્ગલશ્ચ મહાયશાઃ ।
શિષ્યં કૈવર્તકં દૈવાત્ સોઽસ્મરત્ સાધુસત્તમઃ ॥ ૨૩॥

તતો યષ્ટિં દદર્શાઽસૌ સાઙ્કુરા વિસ્મિતોઽભવત્ ।
અહો દુષ્ટમતિર્નામા તપસે સંસ્થિતોઽભવત્ ॥ ૨૪॥

ચઞ્ચલં ભાવમુત્સૃજ્ય દેહશોષણતત્પરઃ ।
કુત્રાઽસ્તિ સ મયા શિષ્યો દૃશ્યતે ન મહાતપાઃ ॥ ૨૫॥

તતો વલ્મીકરૂપં સ ચાઽપશ્યત્તત્ર મુદ્ગલઃ ।
કૈવર્તકસ્ય તસ્યૈવ નેત્રે દૃષ્ટે તતઃ કિલ ॥ ૨૬॥

તતો યષ્ટ્યા સ વલ્મીકમુત્ખાય ચ જલેન તમ્ ।
સિષેચ તેન નામાઽપિ સાવધાનો બભૂવ હ ॥ ૨૭॥

ગુરું દૃષ્ટ્વા સમુત્તસ્થૌ તં પ્રણમ્ય પુરઃસ્થિતઃ ।
તતઃ સમ્માન્ય યોગીશો ધૃત્વાઽઽલિઙ્ગ્ય જગાદ તમ્ ॥ ૨૮॥

વલ્મીકાત્ત્વં સમુત્પન્નઃ પુત્રો મે નાત્ર સંશયઃ ।
ભવ બ્રાહ્મણમુખ્યશ્ચ ભૃશુણ્ડી સંજ્ઞયાઽધુના ॥ ૨૯॥

સિદ્ધોઽસિ નામમન્ત્રેણ સર્વવન્દ્યો ભવિષ્યસિ ।
તવ દર્શનમાત્રેણ નરા મુક્તિમવાપ્નુયુઃ ॥ ૩૦॥

લક્ષકલ્પમયં કાલં જીવં સ્થાસ્યસિ ભો મુને ।
કલ્પે કલ્પે ચ શિષ્યાસ્તે ભવિષ્યન્તિ શિવાદયઃ ॥ ૩૧॥

એવમુક્ત્વા ગણેશસ્ય દદૌ તસ્મૈ મહામનુમ્ ।
એકાક્ષરં વિધાનેન તતોંઽતર્ધાનમાયયૌ ॥ ૩૨॥

સોઽપિ તત્ર પુનસ્તેન તતાપ તપ ઉત્તમમ્ ।
વર્ષમાત્રેણ તસ્યાઽગ્રે પ્રત્યક્ષોઽભૂદ્ગજાનનઃ ॥ ૩૩॥

ઉવાચ તં મહાભક્તં કિં વાઞ્છસિ વદસ્વ મે ।
તતસ્તં સ્તોતુમારેભે સ્તોત્રૈઃ સ્વાનુભવાત્મકૈઃ ॥ ૩૪॥

ભૃશુણ્ડ્યુવાચ ।
નમો નમસ્તે ગણનાથ ઢુણ્ઢે સદા સુશાન્તિપ્રદ શાન્તિમૂર્તે ।
અપારયોગેન ચ યોગિનસ્ત્વાં ભજન્તિ ભાવેન નમો નમસ્તે ॥ ૩૫॥

પ્રજાપતીનાં ત્વમથો વિધાતા સુપાલકાનાં ગણનાથ વિષ્ણુઃ ।
હરોઽસિ સંહારકરેષુ દેવ કલાંશમાત્રેણ નમો નમસ્તે ॥ ૩૬॥

ક્રિયાત્મકાનાં જગદમ્બિકા ત્વં પ્રકાશકાનાં રવિરેવ ઢુણ્ઢે ।
યત્નપ્રદાનાં ચ ગુણેશ નામા કલાંશમાત્રેણ નમો નમસ્તે ॥ ૩૭॥

(Page ખં. ૨ અ. ૬૦ પાન ૧૨૮)
શરીરભાજાં ત્વમથાસિ બિન્દુઃ શરીરિણાં સોઽહમથો વિભાસિ ।
સુબોધરૂપઃ સ્વત ઉત્થકાનાં કલાંશમાત્રેણ નમો નમસ્તે ॥ ૩૮॥

વિદેહકાનામસિ સાઙ્ખ્યરૂપઃ સમાધિદાનાં ચ નિજાત્મકસ્ત્વમ્ ।
નિવૃત્તિયોગે ત્વમયોગધારી કલાંશમાત્રેણ નમો નમસ્તે ॥ ૩૯॥

ગણાસ્ત એતે ગણનાથ નામ્ના ત્વમેવ વેદાદિષુ યોગકીર્તે ।
સદા સુશાન્તિપ્રદ સંસ્થિતોઽસિ ભક્તેશ ભક્તિપ્રિય તે નમો વૈ ॥ ૪૦॥

ગકારસિદ્ધિસ્ત્વપિ મોહદાત્રી ણકારબુદ્ધિસ્ત્વથ મોહધાત્રી ।
તયોર્વિલાસી પતિરેવ નામ્ના ગણેશ્વરસ્ત્વં ચ નમો નમસ્તે ॥ ૪૧॥

ગકારરૂપેણ ભવાન્ સ ગૌણો ણકારરૂપેણ ચ નિર્ગુણોઽસિ ।
તયોરભેદે ગણનાથનામા યોગેશ ભક્તેશ નમો નમસ્તે ॥ ૪૨॥

કિં વદામિ ગણાધીશ મહિમાનં મહાદ્ભુતમ્ ।
યત્ર વેદાદયો ભ્રાન્તા ઇવ જાતાઃ પ્રવર્ણને ॥ ૪૩॥

પતિતાનામહં શ્રેષ્ઠઃ પતિતોત્તમ એવ ચ ।
તવ નામપ્રભાવેણ જાતોઽહં બ્રાહ્મણોત્તમઃ ॥ ૪૪॥

કિઞ્ચિત્ સંસ્કારયોગેન વિશ્વામિત્રાદયઃ પ્રભો ।
જાતા વૈ બ્રાહ્મણત્વસ્ય બ્રાહ્મણા નિર્મલાઃ પુરા ॥ ૪૫॥

અહં સંસ્કારહીનશ્ચ જાત્યા કૈવર્તકોદ્ભવઃ ।
તત્રાઽપિ પાપસક્તાત્મા ત્વયા ચ બ્રાહ્મણઃ કૃતઃ ॥ ૪૬॥

એવમુક્ત્વા નતં વિપ્રં પ્રાઞ્જલિં પુરતઃ સ્થિતમ્ ।

ભક્તિભાવેન સન્તુષ્ટસ્તમુવાચ ગજાનનઃ ॥ ૪૭॥

ગણેશ ઉવાચ ।
વરાન્ વરય દાસ્યામિ યાંસ્ત્વં વિપ્ર પ્રવાઞ્છસિ ।
ત્વત્સમો નૈવ તેજસ્વી ભક્તો મે પ્રભવિષ્યતિ ॥ ૪૮॥

તસ્ય તદ્વચનં શ્રુત્વા સાશ્રુનેત્રો મહામુનિઃ ।
ભૃશુણ્ડી ગદ્ગદોક્ત્યા ચ તં જગાદ ગજાનનમ્ ॥ ૪૯॥

યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
ત્વદીયાં ભક્તિમુગ્રાં મે દેહિ સમ્પૂર્ણભાવતઃ ॥ ૫૦॥

તથેતિ તમુવાચાઽથ ગણેશો ભક્તવત્સલઃ ।
ક્ષેત્રં ત્વદીયમત્રૈવ ભવિષ્યતિ મદાજ્ઞયા ॥ ૫૧॥

અમલાશ્રમકં નામ્ના જનાનાં સેવિનાં સદા ।
અજ્ઞાનજં મલં હત્વા જ્ઞાનં દાસ્યતિ નિર્મલમ્ ॥ ૫૨॥

એવમુક્ત્વાંઽતર્દધે ચ ગણેશો દેવનાયકઃ ।
ભૃશુણ્ડી ભક્તિભાવેન ભેજે વૈ તં નિરન્તરમ્ ॥ ૫૩॥

નાન્યત્ સ મનસા ક્વાપિ ક્ષેત્રં દેવાદિકં મુનિઃ ।
તીર્થં જજ્ઞૌ સ યોગીન્દ્રો ગણેશાનાન્ન સંશયઃ ॥ ૫૪॥

તતસ્તત્ર મહાક્ષેત્રે બ્રાહ્મણાદ્યા યયુર્મુદા ।
તત્રૈવ ગણનાથં તે ભેજિરે ભક્તિભાવતઃ ॥ ૫૫॥

શિષ્યાસ્તસ્ય મહાભાગા જાતા બ્રહ્મર્ષયોઽમલાઃ ।
ક્ષેત્રસંન્યાસભાવેન તેઽસેવન્ત મહામુનિમ્ ॥ ૫૬॥

ભૃશુણ્ડિનસ્તત્ર તીર્થં ગણેશસ્ય ચ સુન્દરમ્ ।
ભુક્તિમુક્તિપ્રદં પ્રોક્તં સ્નાનમાત્રેણ જન્તવે ॥ ૫૭॥

તસ્યૈવં દર્શનાર્થં ચ મુનયઃ કશ્યપાદયઃ ।
શુકાદિયોગિનઃ સર્વે ગત્વા તેઽપૂજયન્ મુદા ॥ ૫૮॥

કૃતાર્થં મન્યમાનાશ્ચ સ્વસ્થલં તે યયુઃ પુનઃ ।
પ્રશંસન્તો મુનિં સર્વે સાક્ષાચ્છુણ્ડાધરં પ્રભુમ્ ॥ ૫૯॥

ઇન્દ્રાદયસ્તમેવં ચ દર્શનાર્થં સમાગતાઃ ।
કૃતકૃત્યાઃ સ્વભાવેન સ્વાલયં તે યયુઃ પુનઃ ॥ ૬૦॥

બ્રહ્મવિષ્ણુમહેશાદ્યા ઈશ્વરાસ્તે મહામુનેઃ ।
(Page  ખં. ૨ અ. ૬૧ પાન ૧૨૯)
નિત્યદર્શનસંસક્તા બભૂવુર્હૃષ્ટમાનસાઃ ॥ ૬૧॥

એવં પ્રભાવયુક્તઃ સ ભૃશુણ્ડી કથિતો મયા ।
ચાણ્ડાલો બ્રાહ્મણો જાતો ગણેશસ્મરણેન વૈ ॥ ૬૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ભ્રૂશૂણ્ડિબ્રાહ્મણત્વવર્ણનં નામ ષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૦

## ૨.૬૧ ભૃશુણ્ડિચરિતં નામૈકષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
નિત્યં સ માનસીં પૂજામકરોત્ બ્રાહ્મણોત્તમઃ ।
બાહ્યાં ચૈવ મહાભાગો ગણેશસ્ય યથાવિધિ ॥ ૧॥

માનસી યા ત્વયા પૃષ્ટા તાં શ ૃણુષ્વ મહામતે ।
યથા સ્વલ્પેન કાલેન ગાણપત્યો નરો ભવેત્ ॥ ૨॥

ચતુર્ધા માનસી પૂજા જ્ઞાતવ્યા ચાસુરોત્તમ ।
સાધારા દ્વિવિધા પ્રોક્તા નિરાધારા તથા દ્વિધા ॥ ૩॥

હૃદિ મૂર્તિં ગણેશસ્ય ધ્યાત્વા તત્રોપચારકૈઃ ।
માનસૈઃ પૂજયેદ્દેવં સાધારા સા મતા બુધૈઃ ॥ ૪॥

અન્યા હ્યેકાગ્રચિત્તેન સર્વત્રૈકાત્મભાવના ।
તયા યત્તસ્ય ભોગાદિ કૃતં તત્ પૂજનં ભવેત્ ॥ ૫॥

તત્રૈકાત્મસ્વરૂપશ્ચાધારઃ પ્રાપ્તો જનેન વૈ ।
તેન સાધારરૂપા સા પ્રોક્તા પૂજા મનીષિભિઃ ॥ ૬॥

નિરોધચિત્તવૃત્ત્યા યજ્જનૈઃ સર્વાત્મવર્જિતમ્ ।
મનોવાણીમયં સર્વમુપચારેણ ચાર્પિતમ્ ॥ ૭॥

તદેવ પૂજનં તેન કૃતં પ્રહ્લાદ નિશ્ચિતમ્ ।
નિરાધારા મતા પૂજા ગણેશસ્ય મહાત્મનઃ ॥ ૮॥

ચિત્તસ્ય પઞ્ચ ભૂમીનાં લયં કૃત્વા સમા સ્થિતિઃ ।
તત્ર શાન્તિસ્વરૂપં યદ્યોગાકારેણ દૃશ્યતે ॥ ૯॥

યોગે વિધિનિષેધાદિ સર્વં તેનોપચારકૈઃ ।
સમર્પિતં ગણેશાય તદેવં પૂજનં ભવેત્ ॥ ૧૦॥

શાન્તિયોગે નિરાધારા પૂજા પ્રોક્તા ચ યોગિભિઃ ।
એવં માનસજં દૈત્ય ચતુર્ધા પૂજનં ભવેત્ ॥ ૧૧॥

એવં ભૃશુણ્ડિના તેન કૃતા પૂજા વિશેષતઃ ।
ભક્તિભાવેન કાશ્યાં સા પ્રાપ્તાઽભૂદ્ગણપાય ચ ॥ ૧૨॥

ઇદં ભૃશુણ્ડિનશ્ચિત્રં ચરિત્રં ચ નરોત્તમઃ ।
યઃ શૃણોતિ શ્રાવયતિ સ વૈ સ્વાનન્દગો ભવેત્ ॥ ૧૩॥

યં યમિચ્છતિ તં તં વૈ લભતે નાઽત્ર સંશયઃ ।
મહાપુણ્યતમં શ્રેષ્ઠં કથિતં તે કથાનકમ્ ॥ ૧૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ભૃશુણ્ડિચરિતં નામૈકષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૧
(Page ખં. ૨ અ. ૬૨ પાન ૧૩૦)

## ૨.૬૨ વિનાયકચરિતં નામ દ્વિષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
તતો વિનાયકસ્તત્ર કાશ્યાં બાલગણૈઃ સહ ।
ચિક્રીડ પ્રાકૃતો ભૂત્વા ભક્તાનન્દવિવર્ધનઃ ॥ ૧॥

તતો ગણકરૂપેણ દૈત્યો હેમાસુરો યયૌ ।
તં માયયા ગણેશાનો મારયામાસ દૈત્યપ ॥ ૨॥

તતઃ કૂપાસુરસ્તત્ર કન્દરેણ સહાગતઃ ।
પરસ્પરવિભેદેન તૌ હતૌ ગણપેન ચ ॥ ૩॥

તતોંઽભોસુરનામા યઃ પ્રતાપી ચ તથાંઽધકઃ ।
તુઙ્ગાસુરસ્ત્રયઃ પ્રાપ્તા બ્રહ્મલબ્ધવરાઃ ખલાઃ ॥ ૪॥

ખગરૂપગણેશેન હતા મુક્તિં પ્રલેભિરે ।

વિનાયકસ્ય હસ્તસ્ય સ્પર્શનાદિપ્રભાવતઃ ॥ ૫॥

તેષાં માતા સમાયાતા ભ્રમરી નામ રાક્ષસી ।
રૂપં કૃત્વા હ્યદિત્યાશ્ચ સા હતા તેન દૈત્યપ ॥ ૬॥

પરીક્ષ્ય વિસ્મિતાસ્તત્ર માનવા ભોજનાર્થિનઃ ।
નિમન્ત્ર્ય તં યયુઃ સર્વે કાશિરાજસમન્વિતાઃ ॥ ૭॥

એકસ્મિન્ દિવસે તત્ર ગેહે ગેહે મહોત્સવઃ ।
ભોજનાર્થં કાશ્યપસ્ય સામગ્રીં ચક્રિરે જનાઃ ॥ ૮॥

તત્ર શુક્લો મહાભક્તઃ કાશીપ્રાન્તનિવાસકઃ ।
શુક્લવૃત્યાઽચરદ્ભિક્ષાં પ્રભોઃ શુશ્રાવ ચેષ્ટિતમ્ ॥ ૯॥

શુક્લો દારિદ્ર્યસંયુક્તઃ સન્તોષી ભજને રતઃ ।
વિદ્રુમા તસ્ય પત્ની સા પતિભક્તિયુતાઽભવત્ ॥ ૧૦॥

સર્વસ્વદાનભાવેન ચક્રતુસ્તૌ મહોત્સવમ્ ।
ભોજનાર્થં કાશ્યપસ્ય માર્જિતં સ્વાઙ્ગણં તયા ॥ ૧૧॥

દર્ભાન્ બદ્ધ્વા મહાયષ્ટ્યાં ધ્વજં ચક્રે મહામુનિઃ ।
સર્વધાન્યસ્ય પિષ્ટેન ચક્રે વૈ ભાસ્કરીં સતી ॥ ૧૨॥

તન્દુલાન્નં જલૈર્યુક્તં ચક્રે પરમહર્ષિતા ।
પ્રયત્નેનાલ્પતૈલં ચ શુક્લ આનયદાદરાત્ ॥ ૧૩॥

ગૃહે પલાનિ શુક્લસ્ય ત્રીણિ સઞ્ચયમાનતઃ ।
તન્દુલાનાં હિ પિષ્ટસ્યાઽભવન્ પઞ્ચ પલાનિ ચ ॥ ૧૪॥

કાશ્યપસ્ય ચ ભક્ષ્યાર્થં પાકં ચક્રે ચ ભાવતઃ ।
શુષ્કામલકખણ્ડં સોઽસ્થાપયન્ મુખશુદ્ધયે ॥ ૧૫॥

નૈવેદ્યં વૈશ્વદેવં ચ કૃત્વા ધ્યાનપરોઽભવત્ ।
વિનાયકસ્ય શુક્લોઽપિ મહાભક્તિપરાયણઃ ॥ ૧૬॥

એતસ્મિન્નન્તરે તત્ર સનકશ્ચ સનન્દનઃ ।
દર્શનાર્થં સમાયાતૌ કાશ્યપસ્ય મહાત્મનઃ ॥ ૧૭॥

રાજ્ઞા સમ્માનિતૌ વિપ્રૌ દૃષ્ટ્વા બાલસમન્વિતમ્ ।
વિનાયકં તથા તૌ નિર્ભર્ત્સ્ય ગઙ્ગાં પ્રજગ્મતુઃ ॥ ૧૮॥

વિનાયકો યયૌ બાલૈઃ શુક્લસ્યાઽઽદૌ ગૃહં પ્રતિ ।
કુત્સિતાન્નં બભક્ષૈવ દદૌ સમ્પત્તિમુત્તમામ્ ॥ ૧૯॥

તતો વિનાયકો દેવોઽનન્તરૂપધરઃ સ્વયમ્ ।
સ કાશિરાજતાં પ્રાપ્ય ગેહે ગેહે બભક્ષ સઃ ॥ ૨૦॥

એતસ્મિન્ સમયે તૌ તં સનકશ્ચ સનન્દનઃ ।
ભિક્ષાર્થં વૈ દદૃશતુઃ પર્યટન્તૌ ચ કાશ્યપમ્ ॥ ૨૧॥

ગૃહે ગૃહે ચ દૃષ્ટ્વા તં ભ્રષ્ટાચારયુતં મુની ।
ત્યક્ત્વા કાશીં ક્ષુધાયુક્તૌ જગ્મતુર્બહિરેવ તૌ ॥ ૨૨॥

તતો વિનાયકેનૈવ સર્વં રૂપં પ્રદર્શિતમ્ ।
પુનસ્તૌ શરણં ભ્રાન્તાવેવ તં જગ્મતુર્હૃદા ॥ ૨૩॥

તતો ગાણેશકં જ્ઞાનં દત્તં તેન મહાત્મના ।
ગાણપત્યસ્વભાવેન ચેરતુસ્તૌ ગતૌ તતઃ ॥ ૨૪॥

કાશિરાજેન તત્સર્વં ન જ્ઞાતં ચેષ્ટિતં મહત્ ।
ભ્રાન્તો રાજા સ તં નેતું યયૌ શુક્લગૃહં મુદા ॥ ૨૫॥

શિબિકાયાં ગણેશં સંસ્થાપયિત્વા યયૌ નૃપઃ ।
સ્વગૃહં તત્ર દૈત્યૌ દ્વૌ વિદ્યુદ્રૂપૌ પ્રપેતતુઃ ॥ ૨૬॥

(Page ખં. ૨ અ. ૬૨ પાન ૧૩૧)
વિનાયકેન તૌ ત્યક્તૌ શિખાં સન્ધૃત્ય દૈત્યપૌ ।
પ્રજગ્મતુઃ સ્વવૃત્તાન્તં કથયિત્વા નરાન્તકમ્ ॥ ૨૭॥

રાજાઽપિ સ્વગૃહં પ્રાપ તતો દૈત્યઃ સમાયયૌ ।
શ્રુત્વા વૃત્તાન્તમત્યન્તં તાભ્યાં સર્વં નરાન્તકઃ ॥ ૨૮॥

ગુલ્મસ્થા નગરદ્વારિ કાશિરાજં યયુર્જનાઃ ।
અવદન્ દૈત્યવૃત્તાન્તં નરાન્તક ઉપાગતઃ ॥ ૨૯॥

સન્નદ્ધઃ સર્વસૈન્યેન કાશિરાજઃ સ તં યયૌ ।
યુયુધે તેન દૈત્યેન ધૃતો રાજા ક્ષણેન વૈ ॥ ૩૦॥

તતો વિનાયકઃ ક્રુદ્ધઃ સિદ્ધિમાજ્ઞાપયત્ પ્રભુઃ ।
તયા સૃષ્ટં મહાસૈન્યં કાલરૂપં ચ તદ્વભૌ ॥ ૩૧॥

તત્રૈકો નાયકઃ ક્રૂરઃ પ્રણમ્ય ગણનાયકમ્ ।

યયૌ તસ્ય મહાસેનાં ભક્ષયન્ પશ્યતઃ ક્ષણાત્ ॥ ૩૨॥

ધૃત્વા નરાન્તકં સોઽપિ જગામ ચ વિનાયકમ્ ।
વિનાયકેન સૈન્યેશો મુખે લીનઃ કૃતઃ સ્વકે ॥ ૩૩॥

તસ્યોદરે ગણેશેન રક્ષિતઃ કાશિપાલકઃ ।
તેન સાર્ધં ગણેશસ્ય દેહે લીનોઽભવન્નૃપઃ ॥ ૩૪॥

તં નૃપં જઠરે દેવો દર્શયિત્વા જગત્ પુનઃ ।
રોમમાર્ગેણ પુત્રાભ્યાં બહિશ્ચક્રે સ વિઘ્નપઃ ॥ ૩૫॥

પ્રધાનાભ્યાં ચ પુત્રાભ્યાં નિઃસૃતં નૃપસત્તમમ્ ।
વિસ્મિતં માયયા તં સ મોહિતં પ્રચકાર હ ॥ ૩૬॥

તત્ દૃષ્ટ્વા દૈત્યરાજઃ સ વિસ્મિતો તર્કયત્ સ્વયમ્ ।
અયં બ્રહ્મમયો દેવઃ કશ્યપાત્મજ એવ ચ ॥ ૩૭॥

અસ્ય હસ્તેન મે મૃત્યુર્ભવિતા ચેત્ સુમઙ્ગલમ્ ।
બ્રહ્મભૂયકરં તસ્માદ્યુદ્ધ્યેયં હર્ષસંયુતઃ ॥ ૩૮॥

નરાન્તકેન કૃત્વા ચ યુદ્ધં તેન મહત્તતઃ ।
મોહયિત્વા તં જઘાન વિરાડ્રૂપેણ વિઘ્નપઃ ॥ ૩૯॥

મમાર દૈત્યરાજસ્તુ મસ્તકસ્તસ્ય વૈ ગૃહે ।
પતિતસ્તં વિલોક્યૈવ શુશોચ જનની પિતા ॥ ૪૦॥

શિરો ધૃત્વા ગતૌ સ્વર્ગે દૃષ્ટ્વા દેવાન્તકો હિ તત્ ।
સોઽપિ ક્રોધસમાયુક્તો યયૌ કાશ્યાં સ દૈત્યપઃ ॥ ૪૧॥

કૃત્વા યુદ્ધં મહાઘોરં તેન સાર્ધં વિનાયકઃ ।
ગજાનનસ્વરૂપં ચ દર્શયામાસ શત્રવે ॥ ૪૨॥

દૃષ્ટ્વા દૈત્યેન દન્તસ્તુ ભગ્નો વામોઽસ્ય તત્ક્ષણાત્ ।
દૈત્યેન્દ્રં તેન દન્તેન મારયામાસ વિઘ્નપઃ ॥ ૪૩॥

તતો હર્ષયુતૈર્દેવઃ સ્તુતો દેવર્ષિભિઃ પ્રભુઃ ।
પ્રવિવેશ નૃપેણાઽસૌ કાશીં ભક્તપરાયણઃ ॥ ૪૪॥

રાજપુત્રસ્ય દેવેશો વિવાહં ચ ચકાર હ ।
રાજ્ઞા સમ્પૂજિતો ઢુણ્ઢિઃ સ્વાશ્રમં ગન્તુમુત્સકઃ ॥ ૪૫॥

તતો લોકા મહા ભક્તાસ્ત્યક્ત્વા ગેહાદિકં યયુઃ ।
તેભ્યો જ્ઞાનં દદૌ દેવઃ શાન્તિં પ્રાપ્તા ગૃહાન્ યયુઃ ॥ ૪૬॥

રાજ્ઞા રથેન શીઘ્રં વૈ સ્વાશ્રમં સ જગામ હ ।
કાશિરાજં ચ કાશ્યામપ્રેષયદ્ગણનાયકઃ ॥ ૪૭॥

લોકૈર્નૃપો ઢુણ્ઢિરાજં સ્થાપયામાસ વૈ પુરે ।
નિત્યં તં પૂજયામાસ સર્વૈર્ભક્તિસમન્વિતઃ ॥ ૪૮॥

અદિતિં કશ્યપં દેવસ્તૌ પ્રોવાચ વિનાયકઃ ।
ભૂભારહરણાર્થં ચ જાતોઽહં યુવયોઃ સુતઃ ॥ ૪૯॥

તચ્ચ સર્વં કૃતં કર્માધુના યામિ નિજં પુરમ્ ।
એવમુક્ત્વા દદૌ તાભ્યાં જ્ઞાનં સોઽન્તર્હિતોઽભવત્ ॥ ૫૦॥

તતસ્તાભ્યાં ગણેશસ્ય મૂર્તિઃ સંસ્થાપિતા પ્રભોઃ ।
વિનાયકેતિ નામ્ના સા વિખ્યાતા પ્રબભૂવ હ ॥ ૫૧॥

(Page ખં. ૨ અ. ૬૩ પાન ૧૩૨)
પ્રહ્લાદ કાશિરાજોઽપિ મુદ્ગલસ્યોપદેશતઃ ।
સદેહઃ સ યયૌ રાજા સ્વાનન્દે ગણનાયકમ્ ॥ ૫૨॥

એતત્તે કથિતં સર્વં વિનાયકચરિત્રકમ્ ।
સઙ્ક્ષેપેણ મહાભાગ એકદન્તાવતારજમ્ ॥ ૫૩॥

શ‍ૃણુયાદ્યઃ પઠેદ્વાઽપિ સ લભેદીપ્સિતં ફલમ્ ।
અન્તે સ્વાનન્દવાસેન બ્રહ્મભૂતો ભવિષ્યતિ ॥ ૫૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે વિનાયકચરિતં નામ દ્વિષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૨

## ૨.૬૩ શનિસમાગમો નામ ત્રિષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
શ‍ૃણુ પુષ્ટિપતેઃ ખ્યાતં સર્વપાપહરં પરમ્ ।
ભુક્તિમુક્તિપ્રદં ચૈવ ગણેશસ્ય મહાત્મનઃ ॥ ૧॥

શકુનેશ્ચ મહામાની પુત્રોઽભૂદ્ દુર્મતિઃ પુરા ।

દૈત્યરાજસ્ય તેજસ્વી મહાપર્વતસન્નિભઃ ॥ ૨॥

તતાપ તપ ઉગ્રં સ શક્તિં ધ્યાત્વા મહાસુરઃ ।
નવાર્ણેન સુમન્ત્રેણ શુક્રશિષ્યઃ પ્રતાપવાન્ ॥ ૩॥

સહસ્રવર્ષે પ્રગતે શક્તિઃ સા વરદાઽભવત્ ।
આયયૌ ભક્તમુખ્યં સાઽબોધયત્તં વરં વૃણુ ॥ ૪॥

તેનાઽપિ પૂજિતા દેવી માહાત્મ્યેન ચ સંયુતા ।
શક્તેસ્તેન પ્રસન્ના સા તસ્મૈ સર્વાઽભયં દદૌ ॥ ૫॥

ત્રૈલોક્યરાજમુગ્રં ચ સઙ્ગ્રામે જયમાદરાત્ ।
આરોગ્યં ચ સ્વલોકે સા પ્રયયૌ સિંહવાહિની ॥ ૬॥

તત્ર તેન ક્રમેણૈવ જિતં સર્વં ચરાચરમ્ ।
વિષ્ણુમુખ્યાઃ સુરાઃ સર્વે વને વાસં પ્રચક્રિરે ॥ ૭॥

શક્તિં શિવેન સંયુક્તાં પીડયિત્વા મહાખલઃ ।
પત્નીં કર્તું સમુદ્યુક્તો દેવીં દૈત્યાધિપોઽભવત્ ॥ ૮॥

શક્તિર્લોકં પરિત્યજ્ય શિવેન સહિતા યયૌ ।
અન્તર્ધાય સ્વમાત્માનં વને વાસં ચકાર હ ॥ ૯॥

ગતે કિયતિ કાલે તૌ નારદસ્તત્ર ચાગતઃ ।
જગાદ વિઘ્નરાજસ્ય તાભ્યાં ચોપાસનાં શુભામ્ ॥ ૧૦॥

પુત્રભાવેન દેવેશો ભવિષ્યતિ ગણેશ્વરઃ ।
આરાધિતો ન સન્દેહો દુર્મતિં સ હનિષ્યતિ ॥ ૧૧॥

એવમુક્ત્વા ગતે ચૈવ નારદે શક્તિશઙ્કરૌ ।
તેપાતે તપ ઉગ્રં તૌ ષોડશાક્ષરમાનતઃ ॥ ૧૨॥

મન્ત્રં ષોડશવર્ણાખ્યં જેપતુર્ગણપસ્ય ચ ।
એવં વર્ષશતે પૂર્ણે ગણેશો વરદોઽભવત્ ॥ ૧૩॥

આગતં ગણપં દૃષ્ટ્વા નેમતુશ્ચરણામ્બુજે ।
ગણાધીશં તુષ્ટુવતઃ શિવશક્તી કૃતાઞ્જલી ॥ ૧૪॥

શક્તિશિવાવૂચતુઃ ।
નમસ્તે ગણનાથાય ગણાનાં પતયે નમઃ ।
ભક્તિપ્રિયાય દેવેશ ભક્તેભ્યઃ સુખદાયક ॥ ૧૫॥

સ્વાનન્દવાસિને તુભ્યં સિદ્ધિબુદ્ધિવરાય ચ ।
નાભિશેષાય દેવાય ઢુણ્ઢિરાજાય તે નમઃ ॥ ૧૬॥

વરદાભયહસ્તાય નમઃ પરશુધારિણે ।
અનામયાય સર્વાય સર્વપૂજ્યાય તે નમઃ ॥ ૧૭॥

સગુણાય નમસ્તુભ્યં બ્રહ્મણે નિર્ગુણાય ચ ।
બ્રહ્મભ્યો બ્રહ્મદાત્રે ચ ગજાનન નમોઽસ્તુ તે ॥ ૧૮॥

(Page ખં. ૨ અ. ૬૩ પાન ૧૩૩)
જ્યેષ્ઠાય ચાદિપૂજ્યાય જ્યેષ્ઠરાજાય તે નમઃ ।
માત્રે પિત્રે ચ સર્વેષાં હેરમ્બાય નમો નમઃ ॥ ૧૯॥

અનાદયે ચ વિઘ્નેશ વિઘ્નકર્ત્રે નમો નમઃ ।
વિઘ્નહર્ત્રે સ્વભક્તાનાં લમ્બોદર નમોઽસ્તુ તે ॥ ૨૦॥

ત્વદીયભક્તિયોગેન યોગીશાઃ શાન્તિમાગતાઃ ।
કિં સ્તુવો યોગરૂપં ત્વાં પ્રણમાવશ્ચ વિઘ્નપ ॥ ૨૧॥

તેન તુષ્ટો ભવ સ્વામિન્નિત્યુક્ત્વા તં પ્રણેમતુઃ ।
તાવુત્થાપ્ય ગણાધીશ ઉવાચાઽસૌ મહેશ્વરૌ ॥ ૨૨॥

ગણેશ ઉવાચ ।
ભવત્કૃતમિદં સ્તોત્રં મમ ભક્તિવિવર્ધનમ્ ।
પઠતે શૃણ્વતે ચૈવ ભવિષ્યતિ સુખપ્રદમ્ ॥ ૨૩॥

ભુક્તિમુક્તિપ્રદં ચૈવ પુત્રપૌત્રાદિકં તથા ।
ધનધાન્યાદિકં સર્વં લભતે તેન નિશ્ચિતમ્ ॥ ૨૪॥

વરં ચ વદતં દેવૌ પ્રસન્નોઽહં દદામિ તમ્ ।
ભવતોર્ભક્તિભાવેન વિભુઃ સ્તોત્રેણ તોષિતઃ ॥ ૨૫॥

શક્તિશિવાવૂચતુઃ ।
યદિ પ્રસન્નભાવેન વરદોઽસિ ગજાનન ।
તદા નૌ પુત્રતાં યાહિ કૃતકૃત્યૌ તયા વિભો ॥ ૨૬॥

ભક્તિં દેહિ દૃઢાં દેવ ત્વદીયે પાદપઙ્કજે ।
દુર્મતિં જહિ વિઘ્નેશ ત્રૈલોક્યં ચ સુખીકુરુ ॥ ૨૭॥

ગૃત્સમદ ઉવાચ ।
તયોર્વચનમાકર્ણ્યોમિત્યુક્ત્વાંઽતર્દધે વિભુઃ ।
શિવૌ સન્તોષયુક્તૌ ચ તત્ર સઞ્ચેરતુર્ભયાત્ ॥ ૨૮॥

એકદા પાર્વતી શમ્ભુર્વૈશાખસ્નાનમાદરાત્ ।
ચક્રતુર્ગણનાથસ્ય પ્રીતયે હિમપર્વતે ॥ ૨૯॥

ભાગીરથીજલે નિત્યં સ્નાત્વાઽપૂજયતાં ચ વૈ ।
દૂર્વાદિભિર્મૃન્મયં તૌ ગણનાથં સુભક્તિતઃ ॥ ૩૦॥

વૈશાખપૂર્ણિમાયાં તાવુષઃકાલે તુ ભક્તિતઃ ।
સ્નાત્વા મૂર્તિં શિવૌ કૃત્વા ધ્યાનં ચક્રતુરાદરાત્ ॥ ૩૧॥

ધ્યાત્વા હૃદ્યાવાહયતાં ગણાધીશં તમઞ્જસા ।
મૂર્તૌ સા હ્યચલા મૂર્તિઃ સચૈતન્યા બભૂવ હ ॥ ૩૨॥

ચતુર્ભુજધરસ્તત્ર ગણરાજો બભૌ સ્વયમ્ ।
ઉવાચ પિતરૌ દેવઃ પુત્રોઽહં વાં ન સંશયઃ ॥ ૩૩॥

વરદાનપ્રભાવેણ વૈશાખસ્નાનજેન ચ ।
તપસા પુત્રરૂપં માં રક્ષતં પિતરૌ સદા ॥ ૩૪॥

તતઃ પ્રણમ્ય તં દેવઃ શઙ્કરઃ શક્તિસંયુતઃ ।
તુષ્ટાવાથર્વવેદોક્તોપનિષદ્ભિર્મહાયશાઃ ॥ ૩૫॥

તતો ગણપતિઃ પ્રીત્યા મોહયામાસ માયયા ।
શિવં સશક્તિકં તત્ર પુત્રભાવપ્રકાશનાત્ ॥ ૩૬॥

તતસ્તસ્ય સ સંસ્કારાન્ કારયામાસ વૈ દ્વિજૈઃ ।
શિવશ્ચ જાતકર્માદીન્ હર્ષયુક્તેન ચેતસા ॥ ૩૭॥

તતો લક્ષ્મીસુતા પુષ્ટિસ્તપસા ચ બભૂવ હ ।
તાં દદૌ સ ગણેશાય વિષ્ણુઃ પરમહર્ષિતઃ ॥ ૩૮॥

એકદા તત્ર સંયાતો ગ્રહોત્તમશનૈશ્ચરઃ ।
દર્શનાર્થં ગણેશસ્ય સસ્ત્રીકસ્ય મહામતિઃ ॥ ૩૯॥

પ્રણનામ સ સસ્ત્રીકં ગણેશં દૈત્યનાયક ।
જગાદ ભક્તિસંયુક્તો વચનં સર્વસન્નિધૌ ॥ ૪૦॥

ધન્યં મે જન્મ વિદ્યા ચ તપો વિદ્યાદિકં મહત્ ।

યેન તે દર્શનં પ્રાપ્તં સસ્ત્રીકસ્ય ગજાનન ॥ ૪૧॥

ત્વં સાક્ષાદ્યોગરૂપશ્ચ પુષ્ટિઃ પોષણકારિણી ।
વિશ્વમ્ભરા મહાશક્તિસ્તસ્માદ્વાં વૈ નમો નમઃ ॥ ૪૨॥

(Page ખં. ૨ અ. ૬૪ પાન ૧૩૪)
એતસ્મિન્નન્તરે તત્ર શક્તિઃ સ્વયમુપાગતા ।
પ્રણતં રવિપુત્રં તમુવાચ પ્રેમનિર્ભરા ॥ ૪૩॥

પશ્ય પશ્ય ગ્રહશ્રેષ્ઠ સમ્યક્ સર્વત્ર ભાવતઃ ।
તતસ્તાં સ શનિર્દેવીમવોચદ્ દુઃખિતો ભૃશમ્ ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે શનિસમાગમો નામ ત્રિષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૩

## ૨.૬૪ વિષ્ણુદૌત્યવર્ણનં નામ ચતુઃષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

પ્રલ્હાદ ઉવાચ ।
કિમર્થં દુઃખિતો દેવઃ શનિસ્તત્ર બભૂવ હ ।
તન્મે ત્વં સકલં બ્રૂહિ રવિપુત્રસ્ય ચેષ્ટિતમ્ ॥ ૧॥

ગૃત્સમદ ઉવાચ ।
શ‍ૃણુ તત્રૈવ સઞ્જાતં વૃત્તાન્તં સાધુસત્તમ ।
તેન તે સર્વસન્દેહો નાશં યાસ્યતિ નિશ્ચિતમ્ ॥ ૨॥

શનિરુવાચ ।
શ‍ૃણુ શક્તે મહામાયે એકદાઽહં ગૃહે સ્થિતઃ ।
સૂર્યપૂજનસંશીલો ધ્યાનનિષ્ઠોઽભવં પુરા ॥ ૩॥

નિશિ તત્ર સમાયાતા પત્ની મે વેષધારિણી ।
ભૂષણૈર્ભૂષિતા સર્વૈર્માં જગાદ સુવિહ્વલા ॥ ૪॥

ઋતુદાનમિદાનીં ત્વં મહ્યં દેહ્યેવ ભાનુજ ।
પશ્ય માં સર્વશ‍ૃઙ્ગારયુક્તાં ભર્તર્નમોઽસ્તુ તે ॥ ૫॥

અહં ધ્યાનસમાયુક્તો નાઽપશ્યં ચ હિ તાં પ્રિયામ્ ।
દ્વિમુહૂર્તે ગતે સા માં શશાપ ક્રોધસંયુતા ॥ ૬॥

યદિ માં પશ્યસિ ન ચ ભર્તસ્ત્વં વિફલં ઋતુમ્ ।
કરોષિ તેન દૃષ્ટં યત્ત્વયા નષ્ટં ભવિષ્યતિ ॥ ૭॥

એવમુક્ત્વા ગતા સા વૈ તદહાદહમઞ્જસા ।
ન પશ્યામિ કદા કુત્ર જગદમ્બ યથાયથમ્ ॥ ૮॥

તસ્ય તદ્વચનં શ્રુત્વા જગદમ્બા તમબ્રવીત્ ।
પશ્ય ત્વં ગ્રહ વૈ ઢુણ્ઢિં તેન સર્વં શુભં ભવેત્ ॥ ૯॥

એવમુક્તઃ શનિસ્તત્ર ગણેશાનમલોકયત્ ।
સર્વાઙ્ગૈઃ શોભમાનં વૈ સસ્ત્રીકં સાધુસત્તમ ॥ ૧૦॥

તતસ્તસ્ય ગણેશસ્ય મસ્તકં સહસા ગતમ્ ।
અન્તર્ધાનં ચ તદ્ દૃષ્ટ્વા હાહાકારો બભૂવ હ ॥ ૧૧॥

મુહૂર્તે પ્રગતે તત્ર પુનસ્તં દેવવિપ્રપાઃ ।
અપશ્યન્ શિરસા યુક્તં સર્વાવયવસુન્દરમ્ ॥ ૧૨॥

તતો હર્ષયુતાઃ સર્વે તુષ્ટુવુસ્તં ગજાનનમ્ ।
શનિઃ પ્રણતભાવેન તુષ્ટાવ ગણનાયકમ્ ॥ ૧૩॥

શનિરુવાચ ।
નમસ્તે ગણનાથાય પુષ્ટિકાન્તાય તે નમઃ ।
વિશ્વમ્ભરાય સર્વાદિપૂજ્યાય તુ નમો નમઃ ॥ ૧૪॥

સર્વેષાં માતૃરૂપેણ સ્થિતેયં પુષ્ટિકારિકા ।
પિતા ત્વં પુષ્ટિદાતા ચ સત્તારૂપેણ સંસ્થિતઃ ॥ ૧૫॥

ક્ષમસ્વૈતં ચાપરાધં મદીયં ગણનાયક ।
પુત્રોઽહં તે મહાભાગ પ્રાર્થયે દ્વિરદાનન ॥ ૧૬॥

કિં સ્તૌમિ ત્વાં ચ હેરમ્બ યોગરૂપં સનાતનમ્ ।
વેદાદ્યૈર્યોગિભિઃ સ્તોતું શક્યતે ન નમામ્યહમ્ ॥ ૧૭॥

તથાપિ બુદ્ધિપ્રામાણ્યાત્ સ્તુવન્તિ ત્વાં મહેશ્વરાઃ ।
અતોઽહં ત્વાં મહારાજ સ્તૌમિ ભક્તિસમન્વિતઃ ॥ ૧૮॥

નમસ્તે બુદ્ધિકાન્તાય સિદ્ધિનાથ નમોઽસ્તુ તે ।
બ્રહ્મણાં પતયે તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૧૯॥

(Page ખં. ૨ અ. ६४ પાન ૧૩૫)

સગુણત્વે સરૂપાય નૈર્ગુણ્યે ગજરૂપિણે ।
તયોર્યોગે ચ યોગાય શાન્તિરૂપાય તે નમઃ ॥ ૨૦॥

પુન્નામનરકાત્ત્રાતા પુત્રસ્તેન પ્રકીર્તિતઃ ।
શિવપુત્રાય વૈ તુભ્યં ગણેશાય નમો નમઃ ॥ ૨૧॥

સિદ્ધિર્માયા ચ વામાઙ્ગે માયિકે દક્ષિણ ચ ધીઃ ।
તયોરભેદયોગે ત્વમેકદન્તાય તે નમઃ ॥ ૨૨॥

એવમુક્ત્વા પ્રહર્ષેણ સરોમાઞ્ચો બભૂવ હ ।
પ્રણનામ સ સાષ્ટાઙ્ગં ભક્તિભાવેન સમ્પ્લુતઃ ॥ ૨૩॥

તમુત્થાપ્ય ગણાધીશો જગાદ સ શનૈશ્ચરમ્ ।
વરં વરય દાસ્યામિ યસ્તે ચિત્તે પ્રવર્તતે ॥ ૨૪॥

ત્વયા કૃતમિદં સ્તોત્રં મમ પ્રીતિકરં ભવેત્ ।
યઃ પઠિષ્યતિ યો મર્ત્યઃ શ◌ૃણુયાત્ સર્વદં ભવેત્ ॥ ૨૫॥

તતસ્તં ગણનાથં સ ઉવાચ રવિનન્દનઃ ।
ભક્તિં દેહિ ત્વદીયાં મે શાપાન્ મોચય માં પ્રભો ॥ ૨૬॥

તતસ્તં ગણરાજશ્ચ સ જગાદાસુરેશ્વર ।
ભક્તિર્મદીયા ભવિતા દૃઢા સૌરે ન સંશયઃ ॥ ૨૭॥

ક્રૂરદૃષ્ટ્યા ચ યં કઞ્ચિત્ પશ્યસિ ત્વં શનૈશ્ચર ।
સ એવ નાશમાયાતુ નિઃશાપો ભવ સર્વદા ॥ ૨૮॥

તતો વિષ્ણું જગામાઽસૌ તં પ્રણમ્ય ચ ભાનુજઃ ।
ઉવાચ દેહિ મે નાથ ગણેશોપાસનાં શુભામ્ ॥ ૨૯॥

તતસ્તેન સમાખ્યાતં કવચાદિકમુત્તમમ્ ।
ગીતાસારં દદૌ તસ્મા એકાક્ષરમનું પ્રભોઃ ॥ ૩૦॥

તતસ્તં પ્રયયૌ ગેહે પ્રણમ્ય સ શનૈશ્ચરઃ ।
યોગં ચ સાધયામાસ ગાણપત્યો બભૂવ હ ॥ ૩૧॥

તતઃ કિયતિ કાલે ચ ગતે શઙ્કરમબ્રવીત્ ।
ગણેશો ભાવયુક્તં યદ્વચનં ભક્તવત્સલઃ ॥ ૩૨॥

કિં તાત દેવદેવેશૈર્મુનિભિશ્ચ સદાશિવ ।
વનવાસં કરોષિ ત્વં વદ કારણમત્ર મામ્ ॥ ૩૩॥

જગાદ શઙ્કરો હૃષ્ટસ્તતસ્તં ભક્તિભાવિતઃ ।
જગત્ સર્વં દુર્મતિનાઽસુરેશેન પરાજિતમ્ ॥ ૩૪॥

બ્રહ્માણ્ડાધિપતિઃ સોઽપિ પ્રજાતો વરદાનતઃ ।
અસ્માકં સકલૈશ્વર્યં હૃત્વા શ્રેષ્ઠોઽભવત્ સ્વયમ્ ॥ ૩૫॥

ગૃત્સમદ ઉવાચ ।
શિવસ્ય વચનં શ્રુત્વા ક્રોધયુક્તો બભૂવ હ ।
ગજાનનો જગાદેદં વચનં હિતકારકમ્ ॥ ૩૬॥

ગણેશ ઉવાચ ।
મયિ તે પુત્રતાં યાતે દુર્લભં કિં ચ તે ભવેત્ ।
હનિષ્યામિ મહાદૈત્યં પશ્ય મે પૌરુષં શિવ ॥ ૩૭॥

એવમુક્ત્વા મહાદેવં સન્નદ્ધઃ સ ગજાનનઃ ।
મૂષકારૂઢકો ભૂત્વા ત્વગમદ્દૈત્યનાયકમ્ ॥ ૩૮॥

તમનુ પ્રયયુર્દેવા મુનયો ભક્તિતત્પરાઃ ।
નગરપ્રાન્તભાગે ચ સ ગત્વા સંસ્થિતોઽભવત્ ॥ ૩૯॥

દૂતં સમ્પ્રેષયામાસ વિષ્ણું દેવવરં તતઃ ।
સ ગત્વા દુર્મતિં દુષ્ટમબોધીદ્યુક્તિભિશ્ચ તમ્ ॥ ૪૦॥

વિષ્ણુરુવાચ ।
સ્વાનન્દવાસકારી યો ગણેશો બ્રહ્મનાયકઃ ।
શિવેન તપસા સોઽપિ યાચિતઃ પુત્રકામ્યયા ॥ ૪૧॥

સ એવ પુત્રતાં પ્રાપ્તઃ પુષ્ટીશો યઃ સમાગતઃ ।
ત્વાં બોધિતું ચ માં સોઽપિ પ્રેષયામાસ દુર્મતે ॥ ૪૨॥

દેવાનાં દ્વેષમુત્સૃજ્ય વસ પાતાલમણ્ડલે ।
સ્વસ્વધર્મરતા લોકા ભવન્તુ વિગતજ્વરાઃ ॥ ૪૩॥

એવમુક્તો મહાદૈત્યસ્તમુવાચ જનાર્દનમ્ ।
દૂત્યેન ત્વં સમાયાતો નો ચેદ્ધન્મિ પ્રભાવતઃ ॥ ૪૪॥

કઃ સ્વાનન્દપતિઃ સોઽપિ દેવપક્ષધરોઽભવત્ ।
(Page ખં. ૨ અ. ૬૫ પાન ૧૩૬)

તં હનિષ્યામિ વેગેન દ્રક્ષસિ ત્વં ગજાનનમ્ ॥ ૪૫॥

તતો વિષ્ણુઃ સમાયાતો ગણેશં તસ્ય દુર્મતેઃ ।
વૃત્તાન્તમવદત્તીવ્રં શ્રુત્વા ચુક્રોધ વિઘ્નપઃ ॥ ૪૬॥

બભૂવ મૂષકારૂઢો તં હન્તું શસ્ત્રધારકઃ ।
દેવાઃ સર્વે ચ સન્નદ્ધા બભૂવુરસુરેશ્વર ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે વિષ્ણુદૌત્યવર્ણનં નામ ચતુઃષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૪

## ૨.૬૫ દ્રવ્યપ્રયત્નો નામ પઞ્ચષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ વાચ ।
તતઃ સ દૈત્યરાજોઽપિ સ્વસેનાસંવૃતો યયૌ ।
રથારૂઢો મહાતેજાઃ શસ્ત્રાસ્ત્રૈઃ સંયુતો બભૌ ॥ ૧॥

દુર્મતિર્ગણપં દૃષ્ટ્વા ચુકોપાઽતિતરાં ખલઃ ।
આજ્ઞાપયત્ સ્વસેનાં વૈ દેવાનાં કદનાય ચ ॥ ૨॥

તતો દૈત્યાશ્ચ દેવાસ્તે યુયુધુશ્ચાતિદારુણમ્ ।
અસમ્બદ્ધં મહાક્રોધા જગ્મુઃ સપ્ત ચ વાસરાઃ ॥ ૩॥

દેવસેના તતો ભગ્ના પલાયત દિશો દશ ।
ભયભીતા તતઃ ક્રોધાદ્યુયુધે શઙ્કરો ભૃશમ્ ॥ ૪॥

તતો દુર્મતિના તત્ર કૃતં યુદ્ધં મહાદ્ભુતમ્ ।
મૂર્ચ્છિતાઃ પતિતાઃ કેચિદ્દેવેશાઃ ખણ્ડિતાઃ શરૈઃ ॥ ૫॥

શમ્ભું વિષ્ણું ચ દેવેન્દ્રં સર્વાનન્યાન્ સુમૂર્ચ્છિતાન્ ।
તાન્ દૃષ્ટ્વા ગણરાજસ્તુ ક્રોધયુક્તો બભૂવ હ ॥ ૬॥

મૂષકારુઢ એવાઽસૌ સઙ્ગ્રામાય સમાયયૌ ।
તં દૃષ્ટ્વા દુર્મતિઃ પ્રાહ ક્રોધારુણવિલોચનઃ ॥ ૭॥

દુર્મતિરુવાચ ।
કિમર્થં મૂર્ખભાવેન યુદ્ધાય સમુપાગતઃ ।
બાણેનૈકેન હન્મિ ત્વાં પશ્ય મે પૌરુષં ખલ ॥ ૮॥

બ્રહ્માણ્ડં નિર્જિતં યેન તેન યુદ્ધં કરિષ્યસિ ।
અજ્ઞાનેનાવૃતો નૂનં ગચ્છ ત્વાં નૈવ હન્મ્યહમ્ ॥ ૯॥

એવં વદન્તમુગ્રં તં દૈત્યેશં દુર્મતિં પ્રભુઃ ।
જગાદ હાસ્યસંયુક્તઃ પતિઃ પુષ્ટેઃ પ્રતાપવાન્ ॥ ૧૦॥

પુષ્ટિપતિરુવાચ ।
મા ગર્વં કુરુ દૈત્યેશ દુર્મતે શ ृણુ મે વચઃ ।
ત્વાં હનિષ્યામિ નૂનં ચ પશ્ય મે પૌરુષં મહત્ ॥ ૧૧॥

ઇત્યુક્તવન્તમપ્યેનં દુર્મતિઃ સહસા યયૌ ।
દન્તં ધૃત્વા ગણેશસ્યાકર્ષયત્ ક્રોધસંયુતઃ ॥ ૧૨॥

મહાબલેન દૈત્યેન વામદન્તઃ પ્રપાતિતઃ ।
ભક્ત્ત્વા સ ધરણી પૃષ્ઠે તં દન્તં ગણપોઽગ્રહીત્ ॥ ૧૩॥

દન્તેન શિરસિ પ્રોતો દુર્મતિઃ સ મમાર હ ।
તતઃ પુષ્ટિપતિર્દેવાન્ સાવધાનાંશ્ચકાર હ ॥ ૧૪॥

તતો દૈત્યગણાઃ સર્વે પલાયન્ત દિશો દશ ।
પાતાલં જગ્મુરત્યન્તં ભયભીતાઃ સમન્તતઃ ॥ ૧૫॥

તતો દેવેશ્વરાસ્તત્ર મુનયો હર્ષસંયુતાઃ ।
અપૂજયંસ્તથા પુષ્ટિપતિં તે તુષ્ટુવુઃ પુનઃ ॥ ૧૬॥

દેવર્ષય ઊચુઃ ।
જય દેવ ગણાધીશ જય વિઘ્નહરાવ્યય ।
જય પુષ્ટિપતે ઢુણ્ઢે જય સર્વેશ સત્તમ ॥ ૧૭॥

જયાનન્ત ગુણાધાર જય સિદ્ધિપ્રદ પ્રભો ।
જય યોગેન યોગાત્મન્ જય શાન્તિપ્રદાયક ॥ ૧૮॥

જય બ્રહ્મેશ સર્વજ્ઞ જય સર્વપ્રિયઙ્કર ।
જય સ્વાનન્દપસ્થાયિન્ જય વેદવિદાંવર ॥ ૧૯॥

(Page ખં. ૨ અ. ૬૫ પાન ૧૩૭)
જય વેદાન્તવાદજ્ઞ જય વેદાન્તકારણ ।
જય બુદ્ધિધર પ્રાજ્ઞ જય સર્વામરપ્રિય ॥ ૨૦॥

જય માયામયે ખેલિન્ જયાવ્યક્ત ગજાનન ।

જય લમ્બોદરઃ સાક્ષિન્ જય દુર્મતિનાશન ॥ ૨૧॥

જયૈકદન્તહસ્તસ્ત્વં જયૈકરદધારક ।
જય યોગિહૃદિસ્થ ત્વં જય બ્રાહ્મણપૂજિત ॥ ૨૨॥

જય કર્મ તપોરૂપ જય જ્ઞાનપ્રદાયક ।
જયામેય મહાભાગ જય પૂર્ણમનોરથ ॥ ૨૩॥

જયાનન્દ ગણેશાન જય પાશાઙ્કુશપ્રિય ।
જય પર્શુધર ત્વં વૈ જય પાવનકારક ॥ ૨૪॥

જય ભક્તાભયાધ્યક્ષ જય ભક્તમહાપ્રિય ।
જય ભક્તેશ વિઘ્નેશ જય નાથ મહોદર ॥ ૨૫॥

નમો નમસ્તે ગણનાયકાય નમો નમસ્તે સકલાત્મકાય ।
નમો નમસ્તે ભવમોચનાય નમો નમસ્તેઽતિસુખપ્રદાય ॥ ૨૬॥

ઇતિ સ્તુત્વા ગણાધીશં પ્રણેમુસ્તં મહામતે ।
ઉત્થાય નનૃતુઃ સર્વે હર્ષયુક્તાઃ સુરર્ષયઃ ॥ ૨૭॥

તેષાં મહોત્સવં દૃષ્ટ્વા તાન્ જગાદ મહાપ્રભુઃ ।
પ્રસન્નાત્મા પુષ્ટિપતિર્ભક્તાન્ ભક્તપ્રિયઙ્કરઃ ॥ ૨૮॥

પુષ્ટિપતિરુવાચ ।
ભવત્કૃતમિદં સ્તોત્રં યઃ પઠિષ્યતિ નિત્યશઃ ।
શ્રોષ્યતે સકલં તસ્ય જયરૂપં ભવિષ્યતિ ॥ ૨૯॥

પઠનાચ્છ્રવણાદસ્ય સર્વં જયતિ માનવઃ ।
અન્તે મદીયસાયુજ્યં પ્રાપ્નોત્યત્ર ન સંશયઃ ॥ ૩૦॥

એવમુક્ત્વાન્તર્દધેઽસૌ પતિઃ પુષ્ટેર્ગણેશ્વરઃ ।
દેવાશ્ચ મુનયઃ સર્વે વિસ્મિતા અભવંસ્તદા ॥ ૩૧॥

સ્વે સ્વે પદે ચ તે જગ્મુર્યથા સુખરતાઃ પુરા ।
તથા પુનઃસ્વલોકસ્થા મોદન્તે સ્મ ચ તત્પરાઃ ॥ ૩૨॥

સ્વાચારં મુનયશ્ચક્રુર્વર્ણાશ્રમરતા જનાઃ ।
બભૂવુરભજંસ્તં તે સ્વધર્મેણ ગજાનનમ્ ॥ ૩૩॥

શિવશ્ચ શક્તિસંયુક્તસ્તમેવ હૃદયે સ્થિતમ્ ।
અભજત્ ભાવયુક્તશ્ચ ગાણપત્યઃ પ્રતાપવાન્ ॥ ૩૪॥

મૂર્તિં ચક્રુર્ગણેશસ્ય સ્થાપયામાસુરાદરાત્ ।
વૈશાખપૂર્ણિમાયાં ચાભવત્તત્ર મહોત્સવઃ ॥ ૩૫॥

તત્ર સિદ્ધિરનુપ્રાપ્તા શિવેન નનુ માનદ ।
ચક્રુઃ સિદ્ધાશ્રમં નામ્ના ક્ષેત્રં દેવર્ષયઃ પરમ્ ॥ ૩૬॥

તત્રૈવ સિદ્ધિમાપન્ના દેવા બ્રહ્મર્ષયઃ પુરા ।
સનકાદ્યા મહાત્માનો ગાણેશાસ્તેઽભવંસ્તતઃ ॥ ૩૭॥

અત્ર તે વર્ણયિષ્યેઽહમિતિહાસં પુરાતનમ્ ।
અગસ્ત્યસ્ય ચ સંવાદયુક્તં ચ બ્રહ્મણઃ પુરા ॥ ૩૮॥

એકદા વનગો ભૂત્વાઽગસ્ત્યસ્તપસિ સંસ્થિતઃ ।
લોપામુદ્રા ચ સેવાયાં રતા પત્ની તથાઽભવત્ ॥ ૩૯॥

રાજપુત્રી મહાભાગા પાતિવ્રત્યપરાયણા ।
સુકુમારાઽભવત્તત્ર કર્ષિતા સેવનોત્સુકા ॥ ૪૦॥

ઘર્મેણ સકલં વ્યાપ્તં વપુસ્તસ્યા રજોયુતમ્ ।
શિરો જટાયુતં વીક્ષ્ય તુતોષ મુનિસત્તમઃ ॥ ૪૧॥

તામુવાચ વરં બ્રૂહિ દાસ્યેઽહં ભાવયન્ત્રિતઃ ।
સોવાચ રાજભોગેન યુક્તં દેહિ મુને ઋતુમ્ ॥ ૪૨॥

તતઃ સ રાજભોગાર્થં દ્રવ્યેપ્સુશ્ચ સમાગતઃ ।
રાજાનં યાચનાર્થાય સાર્વભૌમં યયાચ વૈ ॥ ૪૩॥

દિલીપસ્તમુવાચાથ કિયન્માનં ધનં વદ ।
દાસ્યામિ ભાવસંયુક્તસ્તુભ્યં તત્તાપસોત્તમ ॥ ૪૪॥

રાજ્ઞો વચનમાકર્ણ્યોવાચ તં મુનિસત્તમઃ ।
વ્યયાદુર્વરિતં યન્ મે ધનં દેહિ સુપુષ્કલમ્ ॥ ૪૫॥

(Page ખં. ૨ અ. ૬૫ પાન ૧૩૮)
તતો દિલીપો રાજા તં જગાદ વ્યયમાનકમ્ ।
દ્રવ્યં મેઽસ્તિ મહાભાગ તસ્માત્ સઙ્ખ્યાં વદસ્વ ભો ॥ ૪૬॥

જગાદ મુનિશાર્દૂલઃ તતસ્તં વિસ્મયાન્વિતઃ ।
ન ગ્રહીષ્યામિ તે દ્રવ્યં દરિદ્રસ્ય ન સંશયઃ ॥ ૪૭॥

મયા દ્રવ્યં ત્વદીયં વૈ ગૃહીતં ચેન્નરાધિપ ।
તદા સર્વે જના રાજન્ ભવન્તિ ચ નિપીડિતાઃ ॥ ૪૮॥

અતસ્ત્વં રાજભિર્યુક્તશ્ચલ શીઘ્રં નરાધિપ ।
મયા સાર્ધં મહદ્ દ્રવ્યં યત્ર વૈ સઞ્ચિતં ભવેત્ ॥ ૪૯॥

તતો રાજા ચ વૃત્તાન્તં કથયામાસ તં મુનિમ્ ।
વાતાપિર્દૈત્યપોઽગસ્ત્યદ્રવ્યયુક્તો ભવત્યપિ ॥ ૫૦॥

દેવૈરવધ્યતાં પ્રાપ્ય હન્તિ વિપ્રાંશ્ચ નિત્યશઃ ।
પશું કૃત્વાઽનુજં દુષ્ટ ઇલ્વલં શ્રાદ્ધકર્મણિ ॥ ૫૧॥

દેવાનાં નિધનાર્થાય કર્મમૂલનિકૃન્તનઃ ।
અખિલં બ્રાહ્મણાધારં કર્મ તેન હિનસ્તિ તત્ ॥ ૫૨॥

ઇલ્વલશ્ચાઽપિ યોગીન્દ્ર વરયુક્તપ્રભાવતઃ ।
ગત્વોદરે કામરૂપો વાતાપ્યાહૂત એવ સઃ ॥ ૫૩॥

તદા તેષાં નખેનૈવ સ્ફોટયિત્વા મહોદરમ્ ।
નિર્ગત્ય પૂર્વવદ્દેહસંયુક્તો ભવતીત્યહો ॥ ૫૪॥

અતસ્ત્વં ગચ્છ યોગીન્દ્ર તં હત્વા દ્રવ્યસઞ્ચયમ્ ।
ગૃહાણાસ્માભિરત્યન્તં વાતાપિં ભ્રાતૃસંયુતમ્ ॥ ૫૫॥

દિલીપસ્ય વચઃ શ્રુત્વા હર્ષયુક્તો મહામુનિઃ ।
રાજભિર્બ્રાહ્મણૈર્યુક્તસ્તત્ર ગન્તું મનો દધે ॥ ૫૬॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પુષ્ટિપત્યુપાખ્યાને અગસ્ત્યસ્ય
દ્રવ્યપ્રયત્નો નામ પઞ્ચષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૫

## ૨.૬૬ કૃષ્ણરાધાશાપવર્ણનં નામ ષટ્ષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
અગસ્ત્યો રાજભિર્યુક્તો બ્રાહ્મણૈશ્ચ સમન્વિતઃ ।
વાતાપેઃ સુસ્થલં રમ્યં યયૌ ક્રોધસમન્વિતઃ ॥ ૧॥

તમાગતં સ વિજ્ઞાય વાતાપિર્હર્ષિતો યયૌ ।

પ્રણમ્ય પ્રત્યુવાચેદં વચનં વિનયાન્વિતઃ ॥ ૨॥

વાતાપિરુવાચ ।
સ્વામિંસ્તે સ્વાગતં મેઽદ્ય ભાગ્યં સુફલિતં મહત્ ।
બ્રાહ્મણૈ રાજભિઃ સાર્ધં પ્રપશ્યામીઽહ તાપસમ્ ॥ ૩॥

શ્રાદ્ધં મે ભગવન્નદ્ય પિતુરત્ર સમાગતમ્ ।
નિમન્ત્રયામ્યહં સર્વૈસ્ત્વાં મહાભાગ વૈ સહ ॥ ૪॥

જગાદ તં તથેત્યેવ દૈત્યઃ સંહર્ષિતોઽભવત્ ।
ઇલ્વલં પશુભાવસ્થં કૃત્વા સઞ્છિદ્ય દૈત્યપઃ ॥ ૫॥

પપાચ વિધિવન્માંસં બ્રાહ્મણાર્થં વિધાનવિત્ ।
તતોઽગસ્ત્યં સમાયાતં ભોજનાર્થં સહાનુગમ્ ॥ ૬॥

વિધિવત્ પૂજયિત્વા તં સ્થાપયામાસ ચાસને ।
તેનાઙ્ગુષ્ઠેન ભૂમિઃ સા પીડિતા મુનિના કૃતઃ ॥ ૭॥

ગર્તસ્તત્ર ચ સર્વાન્નં પૂરિતં દૈત્યદેહજમ્ ।
તજ્જ્ઞાત્વા વિસ્મિતો દૈત્યો ન કિઞ્ચિત્તમુવાચ હ ॥ ૮॥

અન્યાન્ સર્વાન્ સુભોજ્યેન ભોજયામાસ ચાન્ધસા ।
અગસ્ત્યઃ સકલં ભુક્ત્વા ચાન્નમિલ્વલજં મહત્ ॥ ૯॥

મન્ત્રેણ વૈદિકેનાઽસૌ મન્ત્રયામાસ ચોદરમ્ ।
(Page ખં. ૨ અ. ૬૬ પાન ૧૩૯)
તસ્ય મન્ત્રપ્રભાવેણ દૈત્યઃ સઞ્જીર્ણતાં ગતઃ ॥ ૧૦॥

અપાનવાયુરત્યુગ્રો નિઃસૃતો ધૂલિમુદ્વહન્ ।
તેન નાદેન સર્વે તે વિસ્મિતાઃ પ્રબભૂવિરે ॥ ૧૧॥

તતો મુનિઃ સમુત્તસ્થૌ મુખપ્રક્ષાલનાય ચ ।
ક્ષાલયિત્વા સ હસ્તાદિ સંસ્થિતઃ સ મહાધને ॥ ૧૨॥

તતો વાતાપિના ભ્રાતૈહીત્યાહૂતોઽભવત્તદા ।
ઉવાચ મુનિશાર્દૂલસ્તતસ્તં દૈત્યપુઙ્ગવમ્ ॥ ૧૩॥

સ મૃતો મે ચ મન્ત્રેણ સઞ્જીર્ણો જઠરઽધુના ।
અધુના ત્વાં હનિષ્યામિ દુષ્ટ બ્રાહ્મણહિંસકમ્ ॥ ૧૪॥

પલાયત સ તચ્છ્રુત્વા વાતાપિર્ભયસઙ્કુલઃ ।

તતઃ સરાજકા વિપ્રાઃ સ્થાપિતા મુનિનાઽમુના ॥ ૧૫॥

તત્રૈવ સ્વયમેનં તમગમત્ દૈત્યનાયકમ્ ।
અગસ્ત્યઃ પૃષ્ઠગં દૃષ્ટ્વા સમુદ્રં શરણં યયૌ ॥ ૧૬॥

વાતાપિસ્તેન દૈત્યેન્દ્રઃ સ્થાપિતઃ સ્વજલેઽભવત્ ।
તતસ્તં જલાધિં વિપ્ર ઉવાચ ક્રોધસંયુતઃ ॥ ૧૭॥

દેહિ દૈત્યં સમુદ્ર ત્વં નોચેચ્છાપં દદામ્યહમ્ ।
તતોઽગસ્ત્યં સમુદ્રશ્ચ જગાદ ભયસઙ્કુલઃ ॥ ૧૮॥

સ્વભાવો મે મહાભાગ અતો નાઽહં દદામિ તમ્ ।
દૈત્યા દેવભયાદ્વિપ્ર શરણં મામુપાગતાઃ ॥ ૧૯॥

અન્યે પર્વતભૂપાશ્ચ ન દત્તાસ્તે મયા મુને ।
અતસ્ત્વાં પ્રાર્થયામીહ કૃપાં કુરુ દયાનિધે ॥ ૨૦॥

ત્યક્ત્વા દૈત્યં મુનિશ્રેષ્ઠ ગચ્છ ત્વં પ્રણમામ્યહમ્ ।
ક્ષુભિતોઽભૂત્તતોઽગસ્ત્યો ગર્વિષ્ઠોઽયં મહોદધિઃ ॥ ૨૧॥

મદમસ્ય હરિષ્યામિ તાદૃશં ન દદર્શ હ ।
તતો મુનિર્વિધાતારં શરણં વૈ જગામ હ ॥ ૨૨॥

પ્રણમ્ય લોકનાથં તં પપ્રચ્છ ચ જગદ્ગુરુમ્ ॥ ૨૩॥

અગસ્ત્ય ઉવાચ ।
સ્વામિન્ સમુદ્રસમ્મગ્નો વાતાપિર્દ્વિજહિંસકઃ ।
તદર્થં જલધિં નાથ શોષયામિ મદાન્વિતમ્ ॥ ૨૪॥

તત્રોપાયં વદ બ્રહ્મન્ તં કરિષ્યામિ યત્નતઃ ।
ત્વં સર્વજ્ઞશ્ચ સર્વેષાં પિતામહ વિશેષતઃ ॥ ૨૫॥

એવં તસ્ય વચઃ શ્રુત્વા તં જગાદ મહામુનિમ્ ।
અગસ્ત્યં લોકનાથસ્તુ હર્ષયુક્તેન ચેતસા ॥ ૨૬॥

બ્રહ્મોવાચ ।
શૃણુ પુત્ર મહાભાગ ગર્વિષ્ઠોઽયં મહોદધિઃ ।
અધર્મચારિણો દૈત્યા રક્ષિતાસ્તેન નિશ્ચિતમ્ ॥ ૨૭॥

વાતાપિરધુનાઽરક્ષ્યઃ સત્કૃતસ્તેન પુત્રક ।
અતસ્તચ્છોષણાર્થાય ગણપં શરણં વ્રજ ॥ ૨૮॥

તસ્ય તદ્વચનં શ્રુત્વા જગાદ સ પિતામહમ્ ।
કથં ત્યક્ત્વા વિધે દેવાન્ ગણેશાનં પ્રશંસસિ ॥ ૨૯॥

તતસ્તં મુનિમુખ્યં સ બ્રહ્મોવાચ પ્રજાપતિઃ ।
શ‍ૃણુ પુત્ર મહાભાગ કથાં પાપપ્રણાશિનીમ્ ॥ ૩૦॥

વિઘ્નકર્તા ચ તદ્ધર્તા ગણેશોઽયં ન સંશયઃ ।
તેન વિઘ્નેશ્વરો નામ્ના વર્તતે સર્વમણ્ડલે ॥ ૩૧॥

વિઘ્નાઃ સત્તાત્મકાઃ પ્રોક્તાસ્તેષાં સ્વામી ગણેશ્વરઃ ।
સર્વસત્તાધરઃ પૂર્ણસ્તસ્માત્તં કથયામ્યહમ્ ॥ ૩૨॥

અન્યચ્ચ શ‍ૃણુ પુત્ર ત્વં વિનાયક ઇતિ શ્રુતિઃ ।
નાયકૈઃ સેવ્યતે સર્વૈઃ સ્વસ્વકાર્યાર્થમાદરાત્ ॥ ૩૩॥

નાયકૈર્વર્જિતઃ સાક્ષાત્તેન સ્વાધીનતાં ગતઃ ।
સંસૃષ્ટં સકલં વિશ્વં કલાંશેન મહામુને ॥ ૩૪॥

સ્વસ્વાધિકારસંયુક્તા કલાંશજવિભૂતયઃ ।
સમુદ્રસ્તાસુ તં પુત્ર ચાલિતું ન ક્ષમા વયમ્ ॥ ૩૫॥

અત્ર તે વર્ણયિષ્યેઽહમિતિહાસં પુરાતનમ્ ।
શ્રવણાત્ સંશયસ્તે ચ નાશમેષ્યતિ નિશ્ચિતમ્ ॥ ૩૬॥

ગોલોકે રાધયા યુક્તઃ કૃષ્ણો ગોલોકવાસિભિઃ ।
ઉવાસ તત્ર દેવેશઃ સર્વવન્દ્યઃ પ્રતાપવાન્ ॥ ૩૭॥

સર્વેષાં મદહન્તા સ જાતઃ સ્વસ્યૈવ તેજસા ।
અસ્માકં પાલકો ભૂત્વા વિઘ્નહીનઃ સ્વભાવતઃ ॥ ૩૮॥

તથા રાધાઽપિ દેવીનાં મદસ્ય હરણં બલાત્ ।
કૃત્વા વન્દ્યા સ્વયં ભૂત્વોવાસ વિઘ્નવિવર્જિતા ॥ ૩૯॥

ત્રિપુરાદિભિરુગ્રૈશ્ચ પરસ્પરવિરોધતઃ ।
વિઘ્નયુક્તાઃ શિવાદ્યાસ્તે શરણં ત્વગમન્ પરમ્ ॥ ૪૦॥

અન્યાશરણકૃષ્ણસ્ય હૃદિ ગર્વઃ સમાગતઃ ।
સતતં મદયુક્તઃ સ બભૂવ પરમાદ્ભુતઃ ॥ ૪૧॥

અહં બ્રહ્મેતિ યત્ પ્રોક્તં તદેવાઽહં ન સંશયઃ ।

મદાધારમિદં સર્વં તસ્માન્નાન્યોઽસ્તિ મત્પરઃ ॥ ૪૨॥

મદનુગ્રહમાત્રેણ દેવાઃ શમ્ભુપુરોગમાઃ ।
શક્તાઃ સ્વવ્યવહારેષુ તસ્માન્નાન્યોઽસ્તિ મત્પરઃ ॥ ૪૩॥

એવં મનસિ ગર્વેણ મદેન ચ સમાકુલઃ ।
મદયુક્તા તથા રાધા બભૂવ મુનિસત્તમ ॥ ૪૪॥

તતો વિઘ્નકરો વિઘ્નં ચકાર પરમાદ્ભુતમ્ ।
સ્વભક્તિભાવદાનાર્થં શાન્તિયોગાર્થમાદરાત્ ॥ ૪૫॥

વિરરામૈકદા યુક્તો રાધયા વનમણ્ડલે ।
રતિક્રીડાસમાયુક્તો બભૂવે કામસંયુતઃ ॥ ૪૬॥

તત્રૈકા નાયિકા તસ્ય પ્રીતિદા વિરજાઽભવત્ ।
તયા સંસ્મરણં સદ્યઃ કૃતં કૃષ્ણસ્ય તત્ક્ષણે ॥ ૪૭॥

અધઃ સ્થિતાં પરિત્યજ્ય રાધાં કૃષ્ણો યયૌ મુને ।
વિરજાં સ તયા સાર્ધં ક્રીડાસક્તો બભૂવ હ ॥ ૪૮॥

તતઃ સઙ્કુપિતા રાધા રતિભઙ્ગેન માનદ ।
જગાદ યાઃ સમીપસ્થા ગોપિકા વચનં તદા ॥ ૪૯॥

કુત્ર દૃષ્ટો મહામાની કૃષ્ણઃ સ્ત્રીલમ્પટાગ્રણીઃ ।
તં માં વદત વૈ દેવ્યસ્ત્યજામિ મનસા પતિમ્ ॥ ૫૦॥

તતસ્તાં ગોપિકા કાચિદુવાચ વિનયાન્વિતા ।
વિરજાયા મયા રાધે દૃષ્ટ આશ્રમસન્નિધૌ ॥ ૫૧॥

તતઃ સા ક્રોધતામ્રાક્ષી રથોપરિ યયૌ સ્થિતા ।
વિરજાશ્રમસાન્નિધ્યં ગોપીભિઃ સંવૃતા મુને ॥ ૫૨॥

તામાગતાં સમાજ્ઞાય કૃષ્ણશ્ચાન્તર્દધે ભયાત્ ।
વિરજા જલરૂપા સા જાતા ભયસમન્વિતા ॥ ૫૩॥

તયા ન દૃષ્ટઃ સસ્ત્રીકો દેવેશસ્તત્ર રાધયા ।
પુનઃ સ્વમન્દિરે ગત્વાઽતિષ્ઠચ્ચ ક્રોધસંયુતા ॥ ૫૪॥

તતઃ સ પ્રકટઃ કૃષ્ણો બભૂવ હ ચકાર તામ્ ।
સ્ત્રીરૂપાં જલભાવસ્થાં ચિક્રીડ ભૃશહર્ષિતઃ ॥ ૫૫॥

સન્તોષેણ સમાયુક્તાં કૃત્વા સ વિરજાં યયૌ ।
રાધાં દ્વારસમીપે ચાગતં વીક્ષ્ય જગાદ સા ॥ ૫૬॥

રાધોવાચ ।
કિમર્થં લમ્પટોઽત્યન્તમાગતોઽસિ મમાન્તિકમ્ ।
ગચ્છ તાં વિરજાં દેવ કદા ન ત્વાં સ્પૃશામ્યહમ્ ॥ ૫૭॥

મદીયસત્તયા લોકો રચિતોઽયં મયા પુરા ।
ત્યક્ત્વા લોકં મદીયં વૈ ગચ્છ ત્વં યત્ર તે રુચિઃ ॥ ૫૮॥

ઇત્યાદિવિવિધૈર્વાક્યૈઃ પતિં નિર્ભત્સ્ય રાધિકા ।
શશાપ ક્રોધસંયુક્તા મૃત્યુલોકે પતેતિ તમ્ ॥ ૫૯॥

તતઃ શપ્તં ચ તં જ્ઞાત્વા શ્રીદામા ગોપનાયકઃ ।
(Page  ખં. ૨ અ. ૧૭ પાન ૧૪૧)
ન્યભર્ત્સયત્ સ તાં ક્રુદ્ધઃ કૃષ્ણમિત્રં પ્રતાપવાન્ ॥ ૬૦॥

તમતિક્રોધસંયુક્તા રાધિકા હ્યસુરો ભવ ।
શશાપ સા મુનિશ્રેષ્ઠ સોઽપિ ક્રોધયુતોઽભવત્ ॥ ૬૧॥

રાધાં શશાપ મર્ત્યેષુ ભવ નારી ત્વમઞ્જસા ।
શતવર્ષાણિ કૃષ્ણસ્ય વિયોગેન સમન્વિતા ॥ ૬૨॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે કૃષ્ણરાધાશાપવર્ણનં નામ ષટ્ષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૬

## ૨.૬૭ રાધાકૃષ્ણગોલોકપ્રાપ્તિવર્ણનં નામ સપ્તષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

બ્રહ્મોવાચ ।
એવં પરસ્પરં શપ્ત્વા ખેદયુક્તા બભૂવિરે ।
ગતગર્વાશ્ચ સર્વે તે વિચારં ચક્રુરાદરાત્ ॥ ૧॥

અહં ગોલોકરાજોઽહં સર્વાધીશો ન સંશયઃ ।
ઇયં પ્રકૃતિરૂપા મે કૃતૌ કેનાપરાધિનૌ ॥ ૨॥

કૃષ્ણોઽહં સર્વદેવેશ અપિ માં વિઘ્ન ઉત્થિતઃ ।
અતો વૈ વિઘ્નરાજઃ સ ગણેશઃ કુરુતેઽખિલમ્ ॥ ૩॥

હિતાહિતં ન સન્દેહસ્તદાધારમિદં જગત્ ।
સસ્ત્રીકઃ શરણં યામિ બ્રહ્માકારમતશ્ચ તમ્ ॥ ૪॥

એવં વિચાર્ય દેવેશઃ સસ્ત્રીકો મિત્રસંયુતઃ ।
પપાત ભગવાન્ કૃષ્ણો મૃત્યુલોકે મહામુને ॥ ૫॥

મથુરાયાં ચ દેવક્યાં વસુદેવાત્ સમુદ્ભવઃ ।
કૃષ્ણો યાદવવંશે વૈ તેષાં સ સુખદોઽભવત્ ॥ ૬॥

વૃષભાનુસુતા જાતા રાધા સા ગોકુલે મુને ।
શઙ્ખચૂડો બભૂવાઽથ શ્રીદામાઽસુરસત્તમઃ ॥ ૭॥

તતશ્ચ ગોકુલં કૃષ્ણઃ કંસસ્યૈવ ભયાદ્યયૌ ।
તત્ર રાધાસમાયુક્તો બભૂવ સ જનાર્દનઃ ॥ ૮॥

તતો વિઘ્નેશમત્યન્તં ભેજતુસ્તૌ સ્વભાવતઃ ।
ષોડશાક્ષરમન્ત્રેણ પરે તપસિ સંસ્થિતૌ ॥ ૯॥

પુરશ્ચરણમેકં તૌ ચક્રતુઃ પરમાદરાત્ ।
બભૂવતુસ્તતો ધ્યાનસમાયુક્તૌ નિરન્તરમ્ ॥ ૧૦॥

તપસ્ત્યક્ત્વા તસ્ય હૃદિ ધ્યાનયુક્તૌ વિશેષતઃ ।
તપસોઽધિકમુગ્રં વૈ ધ્યાનં શાસ્ત્રેષુ સમ્મતમ્ ॥ ૧૧॥

સંવત્સરાન્ સ તત્રૈવ કૃષ્ણશ્ચૈકાદશ સ્થિતઃ ।
તતશ્ચ મથુરાયાં સ જગામાક્રૂરસંયુતઃ ॥ ૧૨॥

શતવર્ષં વિયોગેન રાધાકૃષ્ણૌ બભૂવતુઃ ।
યુક્તૌ પરમદુઃખાર્તૌ ધ્યાયન્તૌ ગણનાયકમ્ ॥ ૧૩॥

તતસ્તયોશ્ચ સમ્પ્રાપ્તો યોગઃ શાન્તિપ્રદાયકઃ ।
તેન સન્તોષમાપન્નૌ ગાણપત્યૌ બભૂવતુઃ ॥ ૧૪॥

ગતે વર્ષશતે વિપ્ર જગ્મતુસ્તૌ સહાનુગૌ ।
વૈશાખપૂર્ણિમાયાં વૈ મુને બદરિકાશ્રમમ્ ॥ ૧૫॥

તત્ર શમ્ભુમુખા દેવાઃ સસ્ત્રીકાશ્ચ સમાગતાઃ ।
યાત્રાર્થં ગણનાથસ્ય મુનયશ્ચ યયુર્મુદા ॥ ૧૬॥

શેષાદયો મહાનાગા રાજાનશ્ચ વિશેષતઃ ।
ત્રિલોકસ્થા જનાઃ સર્વે જગ્મુસ્તત્ર મહામુને ॥ ૧૭॥

યોગિનઃ કપિલાદ્યાશ્ચ તત્રાઽહં સઙ્ગતો મુને ।
સર્વૈર્મહોત્સવસ્તત્ર વાર્ષિકઃ ક્રિયતે સદા ॥ ૧૮॥

તતસ્તં પૂજયિત્વા તે સર્વે ચોપોષણાન્વિતાઃ ।
સ્થિતાશ્ચક્રુઃ પ્રતિપદિ પારણં તે મહામુને ॥ ૧૯॥

તત્ર રાધા ચ કૃષ્ણશ્ચ મિલિતૌ ગણપં નિશિ ।
(Page ખં. ૨ અ. ૫૭ પાન ૧૪૨)
ધ્યાયન્તૌ ભાવસંયુક્તૌ જેપતુર્મન્ત્રમુત્તમમ્ ॥ ૨૦॥

તતસ્તયોર્ગણેશાનો દર્શયામાસ ચોત્તમમ્ ।
રૂપં ચતુર્ભુજં સાક્ષાદ્ગજવક્ત્રાદિચિહ્નિતમ્ ॥ ૨૧॥

તં દૃષ્ટ્વા સહસોત્થાય નેમતુશ્ચરણામ્બુજે ।
સરોમાઞ્ચૌ તુષ્ટુવતુઃ સાશ્રુનેત્રૌ ગણેશ્વરમ્ ॥ ૨૨॥

રાધાકૃષ્ણાવૂચતુઃ ।
નમસ્તુભ્યં પુષ્ટિપતે નમઃ શઙ્કરસૂનવે ।
બ્રહ્મભૂતાય દેવાય સર્વસિદ્ધિપ્રદાય તે ॥ ૨૩॥

સ્વાનન્દવાસિને તુભ્યં બ્રહ્મપુત્રાય તે નમઃ ।
સિદ્ધિબુદ્ધિપતે તે વૈ ગણેશાય નમો નમઃ ॥ ૨૪॥

હેરમ્બાય નમસ્તુભ્યં નમો યોગમયાય ચ ।
સર્વાદયે ચ સર્વેશ સર્વજ્ઞાય નમો નમઃ ॥ ૨૫॥

નિર્ગુણાય નમસ્તુભ્યં સગુણાય નમો નમઃ ।
ગજાનનાય વૈ તુભ્યમભેદાય તયોર્નમઃ ॥ ૨૬॥

શાન્તિરૂપાય શાન્તાય શાન્તિદાય મહોદર ।
મૂષકશ્રેષ્ઠયાનાય ગાણપત્યપ્રિયાય તે ॥ ૨૭॥

અનન્તાનન્તરૂપાય ભક્તસંરક્ષકાય ચ ।
ભક્તિપ્રિયાય દેવાય ભક્ત્યધીનાય તે નમઃ ॥ ૨૮॥

ચતુર્બાહુધરાયૈવ નાગયજ્ઞોપવીતિને ।
શૂર્પકર્ણાય શૂરાય પરશોર્ધર તે નમઃ ॥ ૨૯॥

વિષ્ણુપુત્રાય સર્વેષાં પિત્રે માત્રે નમો નમઃ ।

વિનાયકાય વિપ્રાણાં પુત્રાય ચ નમો નમઃ ॥ ૩૦॥

સર્વેષાં ગર્વહન્ત્રે ચ સર્વેભ્યઃ સુખદાય તે ।
લમ્બોદરાય વિઘ્નેશ બ્રહ્મનાયક તે નમઃ ॥ ૩૧॥

કિં સ્તુવસ્ત્વાં ગણાધીશ યત્ર વેદાદયઃ પ્રભો ।
શમ્ભુઃ શુકાદયશ્ચૈવ બભૂવુઃ કુણ્ઠિતાઃ પરમ્ ॥ ૩૨॥

આવાં ગર્વયુતૌ જાતૌ બ્રહ્માકારૌ વૃથા પ્રભો ।
તવ તત્ર ચ વિઘ્નેન કૃતં ગર્વસ્ય ખણ્ડનમ્ ॥ ૩૩॥

સાધૂનાં વિઘ્નદાતા ત્વં શાન્તિયોગાર્થમઞ્જસા ।
અસાધૂનાં વિનાશાય હ્યતસ્ત્વાં પ્રણમાવહે ॥ ૩૪॥

વિઘ્નયુક્તતયા ઢુણ્ઢે આવાભ્યાં યોગસેવયા ।
સાક્ષાત્કારકૃતસ્ત્વં વૈ સમીચીનમિદં કૃતમ્ ॥ ૩૫॥

હૃદિ ચિન્તામણિં ત્વાં ચ પશ્યાવઃ સતતં પ્રભો ।
અતઃ સ શુભદો વિઘ્નઃ સઞ્જાતો નૌ ગજાનન ॥ ૩૬॥

અધુના દેહિ વિઘ્નેશ ભક્તિં તે ચરણામ્બુજે ।
દૃઢાં યયા ચ ગર્વેણ ન ભવાવઃ સમાયુતૌ ॥ ૩૭॥

ઇત્યુક્ત્વા તં નનૃततુઃ પ્રણમ્યૈવ મુદાન્વિતૌ ।
ધન્યૌ ધન્યૌ પ્રબ્રુવન્તૌ દર્શનાદ્ગણપસ્ય તૌ ॥ ૩૮॥

બ્રહ્મોવાચ ।
જગાદ ગણનાથસ્તૌ તતો વૈ ભક્તિભાવિતઃ ।
દૃષ્ટ્વા બ્રહ્મરસાહ્લાદયુતૌ રાધાજનાર્દનૌ ॥ ૩૯॥

પુષ્ટિપતિરુવાચ ।
ભો રાધે કૃષ્ણ મે વાક્યં શૃણુતં જગદીશ્વરૌ ।
મદીયાં ભક્તિમત્યન્તં સંશયો ન કરિષ્યથઃ ॥ ૪૦॥

સઙ્કટે સ્મરણેનૈવ પ્રકટઃ સમ્ભવામ્યહમ્ ।
યં યમિચ્છથ આનન્દં સફલઃ સ ભવિષ્યતિ ॥ ૪૧॥

ભવત્કૃતમિદં સ્તોત્રં પઠતાં શૃણ્વતાં નૃણામ્ ।
સર્વસિદ્ધિપ્રદં પૂર્ણં ભવિષ્યતિ સુરેશ્વરૌ ॥ ૪૨॥

મત્પ્રીતિવર્ધનં નિત્યં વાઞ્છિતાર્થકરં ભવેત્ ।

અન્તે સ્વાનન્દદં કૃષ્ણ ભવિષ્યતિ ન સંશયઃ ॥ ૪૩॥

એવમુક્ત્વાંઽતર્દધેઽસૌ ગણેશો બ્રહ્મનાયકઃ ।
તૌ તં હૃદિ વિશેષેણ પશ્યન્તૌ તસ્થતુર્નિશિ ॥ ૪૪॥

તતઃ પુનશ્ચ ગોલોકે ગતૌ રાધાહરી સ્વકે ।
બભૂવતુરખણ્ડૈશ્વર્યસંયુક્તૌ મહામુને ॥ ૪૫॥

(Page ખં. ૨ અ. ૬૮ પાન ૧૪૩)
અતસ્ત્વં મદહીનશ્ચ શરણં ગણપં વ્રજ ।
અગસ્ત્ય તેન તે વાઞ્છાં પૂરયિષ્યતિ સ પ્રભુઃ ॥ ૪૬॥

બ્રહ્માણ્ડં વર્તતે તસ્યાઽઽધારેણ મુનિસત્તમ ।
સર્વત્ર ગણનાથોઽયં ક્રીડતિ સ્વેચ્છયા સ્વયમ્ ॥ ૪૭॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે રાધાકૃષ્ણગોલોકપ્રાપ્તિવર્ણનં નામ સપ્તષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૭

## ૨.૬૮ પુષ્ટિપતિચરિતં નામાષ્ટષષ્ટિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ।
ગૃત્સમદ ઉવાચ ।
શ્રુત્વા કથાં મહારમ્યામગસ્ત્યસ્તમુવાચ હ ।
પ્રણયાવનતો ભૂત્વા બ્રહ્માણં સર્વવેદિનમ્ ॥ ૧॥

અગસ્ત્ય ઉવાચ ।
ભગવન્ સર્વતત્ત્વજ્ઞ કથિતં સર્વમઞ્જસા ।
ત્વયા તેનાહમત્યન્તં સુતુષ્ટો બ્રહ્મવિત્તમ ॥ ૨॥

એતાદૃશો ગણેશોઽયં તસ્ય જ્ઞાનં કથં ભવેત્ ।
તદ્વદસ્વ દયાસિન્ધો ભવેયં દુઃખવર્જિતઃ ॥ ૩॥

તતસ્તં પ્રત્યુવાચેદં વચનં સ પિતામહઃ ।
જ્ઞાનયુક્તં ગણેશસ્ય ભક્તિદં પરમાદ્ભુતમ્ ॥ ૪॥

બ્રહ્મોવાચ ।
શૃણુ પુત્ર પ્રવક્ષ્યામિ જ્ઞાનં યોગાત્મકં મહત્ ।
યસ્ય ત્વં ગાણપત્યો વૈ ભવિષ્યસિ સુસેવનાત્ ॥ ૫॥

દેહદેહિમયં બ્રહ્મ સ્વત ઉત્થાનવાચકમ્ ।
જાનીહિ સર્વભાવેન બોધરૂપં વિશેષતઃ ॥ ૬॥

સાઙ્ખ્યં યદ્વદતિ બ્રહ્મ પરતોત્થાનવાચકમ્ ।
બોધહીનસ્વભાવેન લભતે સ્વસુખસ્થિતમ્ ॥ ૭॥

તયોરભેદયોગે વૈ સ્વસંવેદ્યમતઃ પરમ્ ।
જાનીહિ સર્વસંયોગકારકં યોગસેવયા ॥ ૮॥

પઞ્ચ ભેદા મતાસ્તસ્ય તાઞ્છૃણુષ્વ મહામતે ।
જાનીહિ ભેદરૂપં યદસત્યં શક્તિવાચકમ્ ॥ ૯॥

સત્યં ભાનુમયં પ્રોક્તમાત્માકારેણ તત્ર તુ ।
જાનીહિ સંસ્થિતં પુત્ર સદા ભેદાદિવર્જિતમ્ ॥ ૧૦॥

તયોઃ સંયોગકર્તા સ વિષ્ણુરાનન્દવાચકઃ ।
સમાત્મકં મતં બ્રહ્મ જાનીહિ સુખદં પરમ્ ॥ ૧૧॥

ત્રયાણાં નેતિ કર્તા ચ શઙ્કરઃ પરિકીર્તિતઃ ।
અવ્યક્તં બ્રહ્મ જાનીહિ તત્ પ્રોક્તં મોહવર્જિતમ્ ॥ ૧૨॥

ત્રિવિધં મોહયુક્તં વૈ તુરીયં મોહવર્જિતમ્ ।
તેષાં સંયોગભાવેન સ્વાનન્દઃ પરિલભ્યતે ॥ ૧૩॥

સ્વસંવેદ્યાત્ પરં બ્રહ્મ નાસ્તિ સંયોગધારકમ્ ।
સર્વત્રાઽયં નિજાનન્દઃ સ્વાનન્દે સકલો ભવેત્ ॥ ૧૪॥

અયોગવાચકં બ્રહ્મ નિજાનન્દાત્ પરં મતમ્ ।
સંયોગહીનભાવેન લભ્યતે નાત્ર સંશયઃ ॥ ૧૫॥

સંયોગાયોગયોર્યોગે તયોર્નાશે મહામુને ।
સ એવ યોગ આખ્યાતઃ શાન્તિરૂપેણ લભ્યતે ॥ ૧૬॥

સ એવ ગણનાથોઽયં જાનીહિ બ્રહ્મનાયકઃ ।
ગકારશ્ચૈવ સંયોગો ણકારો યોગ ઉચ્યતે ॥ ૧૭॥

તયોઃ સ્વામી સ વેદેષુ વિચારય મહામતે ।
તમારાધય યત્નેન તતઃ સૌખ્યમવાપ્સ્યસિ ॥ ૧૮॥

અધુના ત્વં સુસઙ્કષ્ટયુક્તસ્તત્ર કુરુષ્વ ભો ।
ચતુર્થીં કૃષ્ણપક્ષસ્ય ધ્યાત્વા હૃદિ ગજાનનમ્ ॥ ૧૯॥

(Page  ખં. ૨ અ. ૬૯ પાન ૧૪૪)
સમુદ્રગર્વં ત્વં તેન હરિષ્યસિ મહાદ્ભુતમ્ ।
તપોવનં તાત ગચ્છ વ્યવસાયં કરોમ્યહમ્ ॥ ૨૦॥

ગૃત્સમદ ઉવાચ ।
બ્રહ્માણં સ નમસ્કૃત્ય યયૌ સ્વકતપોવનમ્ ।
ષડક્ષરેણ વિઘ્નેશં તોષયન્ મુનિસત્તમઃ ॥ ૨૧॥

સદા ધ્યાનરતો ભૂત્વા તતાપ તપ ઉત્તમમ્ ।
સઙ્કષ્ટહરણીં પ્રાપ્તાં ચતુર્થીં સ ચકાર હ ॥ ૨૨॥

ત્રિમાસે પ્રગતે તુષ્ટો ગણેશો વ્રતસેવયા ।
ધ્યાનેન તસ્ય પ્રહ્લાદ તપસા ભક્તિભાવતઃ ॥ ૨૩॥

પઞ્ચમ્યાં કૃષ્ણપક્ષસ્ય બભૂવાકાશવાક્ પરા ।
અગસ્ત્યસ્તત્ર શુશ્રાવ તાં વાણીં સુખદાયિનીમ્ ॥ ૨૪॥

ગચ્છ ત્વં પિબ વિઘ્નેશં સ્મૃત્વા તં જલધિં મુને ।
વાતાપિં જહિ તત્રસ્થં તપસ્તેજઃસમન્વિતઃ ॥ ૨૫॥

તતઃ સ હર્ષિતો ભૂત્વા ગત્વા જલધિસન્નિધૌ ।
ગણેશં મનસા ધ્યાત્વા પપૌ તં ક્રોધસંયુતઃ ॥ ૨૬॥

શોષયિત્વા જલં સર્વં સંસ્થિતો મુનિસત્તમઃ ।
તેજસા જ્વાલયામાસ વાતાપિં વિપ્રઘાતિનમ્ ॥ ૨૭॥

તતો દેવગણાઃ સર્વે તુષ્ટવુસ્તં મહામુનિમ્ ।
દૈત્યાંસ્તત્ર સ્થિતાન્ સર્વાન્ જઘ્નુર્દેવા ઉદાયુધૈઃ ॥ ૨૮॥

પુનર્ગઙ્ગાં સમાનીયોદધિમાપૂર્ય તજ્જલૈઃ ।
ભગીરથેન દેવાસ્તે સંસ્થિતા વિગતજ્વરાઃ ॥ ૨૯॥

તતોઽગસ્ત્યઃ સમાગમ્ય વાતાપિનગરં પ્રભુઃ ।
રાજભિઃ પુષ્કલં દ્રવ્યં ગૃહીત્વા સ્વસ્થલં યયૌ ॥ ૩૦॥

લોપામુદ્રાં મહાતેજાસ્તોષયામાસ યત્નતઃ ।
પશ્ચાત્તપસિ સંસ્થોઽસાવજપન્ મન્ત્રમુત્તમમ્ ॥ ૩૧॥

જિત્વા પઞ્ચવિધં ચિત્તં યોગીન્દ્રો યોગસેવયા ।

તતો મહાયશાઃ શાન્તિમાપેદે ગણનાયકે ॥ ૩૨॥

પુનર્ભક્ત્યા ગણેશાનં મયૂરે તં સમાગતઃ ।
ક્ષેત્રે તત્રાપૂજયત્ સ નિત્યં હર્ષસમન્વિતઃ ॥ ૩૩॥

એવં પુષ્ટિપતેશ્ચૈવ મહિમા તે નિરૂપિતઃ ।
સઙ્ક્ષેપેણ મયા દૈત્ય શ ृણુ ચિન્તામણેઃ કથામ્ ॥ ૩૪॥

ઇદં પુષ્ટિપતેશ્ચિત્રં ચરિતં યઃ શ ृણોતિ વા ।
પઠેચ્ચ સકલં તસ્ય હસ્તગં પ્રભવેત્ ધ્રુવમ્ ॥ ૩૫॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે પુષ્ટિપતિચરિતં નામાષ્ટષષ્ટિતમોઽધ્યાયઃ ॥ ૨.૬૮

## ૨.૬૯ દેવહૂતિકર્દમશાન્તિપ્રાપ્તિવર્ણનં નામૈકોનસપ્તતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
સ્વાયમ્ભુવો દદૌ કન્યાં કર્દમાય પ્રહર્ષિતઃ ।
દેવહૂતિં ચ તસ્યાં સ કપિલઃ સમ્બભૂવ હ ॥ ૧॥

સાક્ષાદ્વિષ્ણુઃ સ્વયં દેવસ્તપસા કર્દમેન સઃ ।
આરાધિતશ્ચ પુત્રોઽભૂત્તત્ત્વજ્ઞાનપ્રકાશકઃ ॥ ૨॥

તં મહોત્સવયુક્તશ્ચાપૂજયત્ સ મહામુનિઃ ।
બ્રહ્માદયઃ સમાયાતા દર્શનાર્થં ગૃહે મુનેઃ ॥ ૩॥

ઉપવીતયુતં કૃત્વા કર્દમો હર્ષનિર્ભરઃ ।
વેદાન્ સાઙ્ગાન્ સ્વપુત્રાય હ્યધ્યાપયત યત્નતઃ ॥ ૪॥

સ ચ શ્રવણમાત્રેણ જગ્રાહ ગુરુણોદિતમ્ ।
સ્વલ્પકાલેન સમ્પૂર્ણવિદ્યાયુક્તો બભૂવ હ ॥ ૫॥

(Page ખં. ૨ અ. ૬૯ પાન ૧૪૫)
નનામ કર્દમઃ પુત્રમેકદા ભક્તિસંયુતઃ ।
સસ્ત્રીકશ્ચ મહાભાગં પપ્રચ્છ વિનયાન્વિતઃ ॥ ૬॥

કર્દમ ઉવાચ ।
ત્વં સાક્ષાદ્વિષ્ણુરૂપો માં શુક્લઃ સર્વાર્થકોવિદઃ ।

વદ જ્ઞાનં મહાબાહો તારયસ્વ ભવાર્ણવાત્ ॥ ૭॥

એવં પૃષ્ટો મહાત્માઽસૌ કપિલસ્તમુવાચ હ ।
સર્વસારમયં જ્ઞાનં ગાણેશં તારકઃ પ્રભુઃ ॥ ૮॥

કપિલ ઉવાચ ।
શ‍ૃણુ તાત મયા દૃષ્ટમેવ તત્ શાન્તિદાયકમ્ ।
કથયામિ મહાજ્ઞાનં શાન્તિયોગપ્રદં પ્રભો ॥ ૯॥

સર્વં માયામયં વિદ્ધિ પઞ્ચકં પઞ્ચકં યતઃ ।
ત્રિવિધં ભ્રાન્તિરૂપં યન્નાનાભેદમયં ભવેત્ ॥ ૧૦॥

ભ્રાન્તિધારકરૂપં યત્તચ્ચતુર્થં પ્રકથ્યતે ।
તેષામભેદસંયોગે બ્રહ્મયોગમયં મતમ્ ॥ ૧૧॥

પૃથ્વી જલં તથા તેજસ્ત્રિવિધં ભ્રાન્તિદાયકમ્ ।
વાયુર્ભ્રાન્તિધરસ્તત્ર તુરીયાત્મા પ્રકથ્યતે ॥ ૧૨॥

તેષામભેદસંયોગ આકાશં બ્રહ્મ કથ્યતે ।
ભૂતાનાં જ્ઞાનદં કસ્માદ્ભૂતં નૈવ પ્રકીર્તિતમ્ ॥ ૧૩॥

તથૈવ પઞ્ચકં સર્વં જાનીહિ મુનિસત્તમ ।
માયામાયિકસંયુક્તં બ્રહ્મ સ્વાનન્દસંજ્ઞિતમ્ ॥ ૧૪॥

કર્મેન્દ્રિયાણિ પઞ્ચૈવ પઞ્ચજ્ઞાનેન્દ્રિયાણિ ચ ।
પઞ્ચતન્માતૃકાઃ પ્રોક્તા એવં જાનીહિ માનદ ॥ ૧૫॥

પઞ્ચ દેવા નિજે દેહે કર્મેન્દ્રિયવિકાશકાઃ ।
તથા જ્ઞાનેન્દ્રિયાણાં ચ પ્રકથ્યન્તે પ્રકાશકાઃ ॥ ૧૬॥

સ્થૂલં સૂક્ષ્મં સમં ચૈવાત્મપ્રતીતિપ્રદાયકમ્ ।
બિન્દુઃ પઞ્ચમમત્રસ્થં દેહપઞ્ચકમુચ્યતે ॥ ૧૭॥

સ્વર્ગો મૃત્યુશ્ચ પાતાલં બ્રહ્માણ્ડં ચ તુરીયકમ્ ।
ગુણેશઃ પઞ્ચમઃ પૂર્ણોઽઽપઞ્ચકમુદાહૃતમ્ ॥ ૧૮॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાશ્ચૈવ મહામુને ।
યોગિભિર્વર્ણહીનાશ્ચ વર્ણપઞ્ચકમુચ્યતે ॥ ૧૯॥

બ્રહ્મચારી ગૃહસ્થશ્ચ વાનપ્રસ્થો યતિસ્તથા ।
આશ્રમૈર્હીનરૂપશ્ચાશ્રમપઞ્ચકમુચ્યતે ॥ ૨૦॥

અણ્ડજઃ ખેદજો વિપ્રૈરુદ્ભિજ્જો જારજઃ સ્મૃતઃ ।
માનસશ્ચૈવ વિપેન્દ્ર યોનિપઞ્ચકમુચ્યતે ॥ ૨૧॥

રક્તઃ શ્વેતસ્તથા શ્યામો નીલઃ પીતશ્ચ પઞ્ચમઃ ।
એવં કથયિતું રઙ્ગપઞ્ચકં ન પ્રશક્યતે ॥ ૨૨॥

દેહેષુ દેહરૂપં યદભિમાનેન પઞ્ચધા ।
દેહિપઞ્ચકમેતચ્ચ જ્ઞાતવ્યં મુનિસત્તમ ॥ ૨૩॥

શક્તિઃ સૂર્યસ્તથા બ્રહ્મા વિષ્ણૂ રુદ્રો મહામતે ।
ગુણપઞ્ચકમિત્યુક્તં ભિન્નભાવધરં પિતઃ ॥ ૨૪॥

શક્તિઃ સૂર્યશ્ચ વિષ્ણુશ્ચ શિવશ્ચાઽત્ર તુરીયકઃ ।
ગણેશઃ પઞ્ચમો વિપ્રૈઃ પઞ્ચાયતનમુચ્યતે ॥ ૨૫॥

પ્રકૃતિઃ પુરુષશ્ચૈવ સ્વત ઉત્થાનસંજ્ઞિતમ્ ।
પરતોત્થાનરૂપં ચ સંયોગઃ પઞ્ચમઃ સ્મૃતઃ ॥ ૨૬॥

અસદ્ભેદેષુ સદ્વિપ્રૈરાનન્દશ્ચોભયાત્મકઃ ।
અવ્યક્તશ્ચ નિજાનન્દો નૈજં પઞ્ચકમુચ્યતે ॥ ૨૭॥

દેહો દેહી ચ બોધાખ્યં સાઙ્ખ્યમત્ર ચતુર્થકમ્ ।
પઞ્ચમં ચ સ્વસંવેદ્યં ભવપઞ્ચકમુચ્યતે ॥ ૨૮॥

પ્રકૃત્યાલયસંજ્ઞશ્ચ વિદેહો ભવપ્રત્યયઃ ।
ઉપાયપ્રત્યયો યોગો યોગપઞ્ચકમુચ્યતે ॥ ૨૯॥

એવં સર્વં ચ જાનીહિ પઞ્ચકં પઞ્ચકં પરમ્ ।
મયાઽશક્યં કથયિતું તસ્માન્ મુખ્યં પ્રકીર્તિતમ્ ॥ ૩૦॥

તત્ર યોગે મહાશાન્તિર્લભ્યતે યોગસેવયા ।
યોગાચ્ચ ન પરં બ્રહ્મ વેદેષુ પરિકીર્તિતમ્ ॥ ૩૧॥

સર્વબ્રહ્મસુયોગસ્ય યોગસ્તેન મહામુને ।
(Page ખં. ૨ અ. ૬૯ પાન ૧૪૬)
ન યોગે કસ્યચિદ્ભાવો બ્રહ્મણશ્ચ પ્રજાપતે ॥ ૩૨॥

ગૃત્સમદ ઉવાચ ।
એવં પુત્રં વદન્તં સ પ્રણિપત્ય મહામુનિઃ ।

ઉવાચ કર્દમો યજ્ઞં યોગેપ્સુઃ પરમાદૃતઃ ॥ ૩૩॥

કર્દમ ઉવાચ ।
કેનોપાયેન ભો વત્સ યોગશાન્તિઃ પ્રલભ્યતે ।
તદર્થં પૂજનીયં કિં તદ્વદસ્વ જનાર્દન ॥ ૩૪॥

કપિલ ઉવાચ ।
ગણેશભજનં મુખ્યં શાન્તિયોગપ્રદં મતમ્ ।
યોગાકારસ્વરૂપં તં બ્રહ્મેશં ભજ માનદ ॥ ૩૫॥

સર્વાદિઃ સર્વપૂજ્યોઽયં સર્વાધારો મહામુને ।
ય આદિઃ પ્રલયાન્તે સ તિષ્ઠતિ શ્રુતિસમ્મતમ્ ॥ ૩૬॥

જ્યેષ્ઠરાજં ગણેશાનં વેદેષુ પ્રવદન્તિ તમ્ ।
ગણાઃ સમૂહરૂપાશ્ચ તેષાં સ્વામી પ્રકથ્યતે ॥ ૩૭॥

નાનાજગત્સ્વરૂપં વૈ દેહરૂપં કૃતં મુને ।
મહાત્મના તેન કૃતં નાનાબ્રહ્મમયં શિરઃ ॥ ૩૮॥

યસ્માજ્જાતમિદં યત્રાન્તે ગચ્છતિ મહામતે ।
તદ્વેદે ગજશબ્દાખ્યં શિરસ્તેન ગજાનનઃ ॥ ૩૯॥

ત્રિવિધં ભેદયુક્તં યદખણ્ડં વૈ તુરીયકમ્ ।
તયોર્યોગે ગણેશોઽયં દેહમસ્તકયોગતઃ ॥ ૪૦॥

ચિત્તં પઞ્ચવિધં પ્રોક્તં તત્ર મોહશ્ચ પઞ્ચધા ।
મોહરૂપા મહાસિદ્ધિર્બુદ્ધિર્વૈ મોહધારિકા ॥ ૪૧॥

તયોઃ સ્વામી ગણાધીશશ્ચિત્તે નિત્યં પ્રતિષ્ઠિતઃ ।
ચિન્તામણિર્મહાભાગો લભ્યતે યોગસેવયા ॥ ૪૨॥

પઞ્ચધા ચિત્તમુત્સૃજ્ય તદૈશ્વર્યં તથૈવ ચ ।
યોગશાન્તિમયઃ સદ્યઃ પ્રાપ્યતે બ્રહ્મણસ્પતિઃ ॥ ૪૩॥

તસ્માત્તં ભજ મન્ત્રેણૈકાક્ષરેણ મહામુને ।
તેન તુષ્ટો ગણેશાનો યોગં દાસ્યતિ શાન્તિદમ્ ॥ ૪૪॥

એવમુક્ત્વા મહાયોગી કપિલસ્તત્ત્વધારકઃ ।
વિરરામ મહાસાધો વિષ્ણુઃ પ્રહ્લાદ સોઽવ્યયઃ ॥ ૪૫॥

તતઃ પ્રણમ્ય તં પુત્રં કપિલં કર્દમો મુનિઃ ।

યયૌ તપોવનં સદ્યસ્તતાપ પરમં તપઃ ॥ ૪૬॥

એકાક્ષરવિધાનેન પરિતુષ્ટો ગજાનનઃ ।
યોગં શાન્તિમયં તસ્મૈ પ્રદદૌ ભક્તવત્સલઃ ॥ ૪૭॥

કર્દમઃ શાન્તભાવેન ગણેશમભજત્ પરમ્ ।
વિચચાર મહાયોગી ધરણીં લોકધારકઃ ॥ ૪૮॥

દેવહૂતિશ્ચ તત્રૈવ યોગં ચાસાધયત્ પરમ્ ।
ગણેશં હૃદિ ભાવેન ધૃત્વા કપિલસન્નિધૌ ॥ ૪૯॥

ક્રમેણ શાન્તિમાપન્ના ચિત્તં ત્યક્ત્વા મહાસતી ।
ચિન્તામણૌ તદાકારા બભૂવ ભ્રમવર્જિતા ॥ ૫૦॥

તાં દૃષ્ટ્વા સિદ્ધિમાપન્નાં કપિલઃ સ યયૌ તતઃ ।
ગઙ્ગાયા દક્ષિણે તીરેઽભજત્તં ગણનાયકમ્ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે દેવહૂતિકર્દમશાન્તિપ્રાપ્તિવર્ણનં નામૈકોનસપ્તતિતમોઽધ્યાયઃ ॥ ૨.૬૯
(Page ખં. ૨ અ. ૭૦ પાન ૧૪૭)

## ૨.૭૦ ચિન્તામણિહરણં નામ સપ્તતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
એકદા કપિલસ્યૈવાશ્રમં દેવપતિર્યયૌ ।
સર્વામરસમાયુક્તસ્તં નનામ કૃતાઞ્જલિઃ ॥ ૧॥

અપરાહ્ણે ચ સમ્પ્રાપ્તમિન્દ્રં દૃષ્ટ્વા મહામુનિઃ ।
ન્યમન્ત્રયત્ ક્ષુધાયુક્તં સર્વૈર્યોગીશ્વરો મુદા ॥ ૨॥

સિદ્ધિયુક્તં ગણેશાનં ધ્યાત્વા હ્યમૃતમુત્તમમ્ ।
દેવાર્થં કલ્પયિત્વા સ ભોજયામાસ તેન તાન્ ॥ ૩॥

પૃથિવ્યમૃતભોગેન સન્તુષ્ટઃ સુરનાયકઃ ।
મુનયે વાયુનાઽઽનાય્ય પ્રદદૌ મણિમુત્તમમ્ ॥ ૪॥

ગણેશભૂષણં ચિન્તામણિર્મુખ્યં પ્રકથ્યતે ।
યોગી ધૃત્વા તમાત્માનં મન્યતે સ્મ કૃતાર્થકમ્ ॥ ૫॥

કપિલસ્તત્ર મનસિ વિચારમકરોત્ પરમ્ ।
ગણેશોઽહં ન ભિન્નશ્ચ યોગમાર્ગપરાયણઃ ॥ ૬॥

અતો ગણેશદેવેન પ્રેરિતોઽયં મણિર્મહાન્ ।
કણ્ઠે ચ તં બબન્ધાઽસૌ યથા ગણપતિસ્તથા ॥ ૭॥

તં દૃષ્ટ્વા હર્ષિતા દેવા સેન્દ્રાઃ સ્વસ્વસ્થલં યયુઃ ।
કપિલઃ સ્વાશ્રમે તત્ર સંસ્થિતો મણિસંયુતઃ ॥ ૮॥

પ્રલ્હાદ ઉવાચ ।
સ્વાનન્દવાસકારી ચ ગણેશો બ્રહ્મનાયકઃ ।
તસ્યેન્દ્રેણ મણિર્યોગિન્ કથં લબ્ધો વદસ્વ મામ્ ॥ ૯॥

ગૃત્સમદ ઉવાચ ।
શૃણુ પ્રહ્લાદ માહાત્મ્યં ચિન્તામણિસમુદ્ભવમ્ ।
કથયામિ ચ તે પ્રીત્યા સર્વપાપપ્રણાશનમ્ ॥ ૧૦॥

એકદા વિષ્ણુના પૂર્વં તપસ્તમં સુદારુણમ્ ।
તેન શાન્તિરનુપ્રાપ્તા ષડક્ષરવિધાનતઃ ॥ ૧૧॥

તસ્મૈ ભક્તિપરીક્ષાર્થં દદૌ ચિન્તામણિં પ્રભુઃ ।
ગણેશો ભક્તિદાનાર્થં ચિન્તિતાર્થપ્રદાયિનમ્ ॥ ૧૨॥

વિષ્ણુના પૂજને ક્ષિપ્તો મણિશ્ચિન્તામણિઃ પ્રભો ।
અહં ભક્તો ગણેશસ્ય ન યોગ્યો ધારણે મણિઃ ॥ ૧૩॥

ભૂષણં ગણનાથસ્ય પૂજનીયં વિશેષતઃ ।
ન ધાર્યં દેવદાસૈસ્તત્ પૂજા કાર્યા ચ નિત્યદા ॥ ૧૪॥

શાન્તિયોગેન વિઘ્નેશો મયા હૃદિ હૃતઃ સ્વકે ।
ન ભિન્નસ્તદપિ સ્વામી સ દાસોઽહં સ્વભાવતઃ ॥ ૧૫॥

તતો બહુગતે કાલ ઇન્દ્રસ્તપસિ સંસ્થિતઃ ।
એકાક્ષરવિધાનેનાઽતોષયદ્ગણનાયકમ્ ॥ ૧૬॥

બભૂવ યુક્તો ધ્યાનેન સતતં દેવનાયકઃ ।
યોગયુક્તઃ ક્રમેણૈવ ગાણપત્યો બભૂવ સઃ ॥ ૧૭॥

શાન્તિં પ્રાપ્ય સ્વયં દેવો ગણેશાભેદતાં ગતઃ ।
આયયૌ સ્વગૃહં પશ્ચાદ્ દેવરાજ્યં ચકાર હ ॥ ૧૮॥

એતસ્મિન્નન્તરે દૈત્યગૃહે શુશ્રાવ કેશવઃ ।
અશરીરાં મહાવાણીં શ ૃણુ તત્ કથયામિ તે ॥ ૧૯॥

ચિન્તામણિં મહાવિષ્ણો દેહીન્દ્રાય મહામતે ।
શાન્તિયોગધરાયાદ્ય મદ્ભક્તાય દદામ્યહમ્ ॥ ૨૦॥

શ્રુત્વાઽઽકાશભવાં વાણીં યયૌ વિષ્ણુર્દદૌ પરમ્ ।
મહેન્દ્રાયામરાવત્યાં મણિં તં ચિન્તિતાર્થદમ્ ॥ ૨૧॥

મઘવા દાસભાવેન સંસ્થાપ્યાઽપૂજયન્ મણિમ્ ।
ન યોગમદતાં પ્રાપ્તો મહેન્દ્રશ્ચ પ્રતાપવાન્ ॥ ૨૨॥

તં મણિં કપિલં દૃષ્ટ્વા શાન્તિયોગધરં પ્રભુમ્ ।
દદૌ તસ્મૈ મહેન્દ્રઃ સ ભાવયુક્તેન ચેતસા ॥ ૨૩॥

અયં સિદ્ધેશ્વરઃ સાક્ષાદ્યોગ્યઃ સન્ધારણે મણેઃ ।
વયં ગૃહસ્થસંશીલા ન યોગ્યા ઇત્યધારયત્ ॥ ૨૪॥

એવં ક્રમેણ જાનીહિ ચિન્તામણિસમાગમમ્ ।
કપિલઃ સ્વગલે નિત્યં બબન્ધ ગણરાજવત્ ॥ ૨૫॥

(Page ખં. ૨ અ. ૭૦ પાન ૧૪૮)
ગતે કિયતિ કાલે વૈ કપિલસ્યાશ્રમં યયૌ ।
મૃગયાભિરતો દૈત્યો ગણાસુર ઇતિ સ્મૃતઃ ॥ ૨૬॥

સેનાં બહિઃ સમાસ્થાપ્ય એકાકી મુનિમાયયૌ ।
કપિલં પ્રણનામૈવ કૃતાઞ્જલિપુટઃ સ્થિતઃ ॥ ૨૭॥

વિનીતં તં વિલોક્યૈવ કપિલસ્તમુવાચ હ ।
કોઽસિ કસ્માદિહાઽઽયાતો વદ સર્વં નરોત્તમ ॥ ૨૮॥

ગણાસુર ઉવાચ ।
ગણાસુર ઇતિ ખ્યાતો નામ્નાઽહં મુનિસત્તમ ।
મૃગયાભિરતો હ્યત્ર દૈવેનૈવોપસાદિતઃ ॥ ૨૯॥

તવાશ્રમે ક્ષુધાયુક્તઃ શ્રાન્તવાહન એવ ચ ।
સસૈન્યઃ સહસાઽઽગત્ય સન્તૃપ્તઃ સુખદાયકે ॥ ૩૦॥

જલં ફલાન્યહં પીત્વા ભક્ષયિત્વા સસૈનિકઃ ।
દર્શનાર્થં સમાયાતઃ સેના મે સરસિ સ્થિતા ॥ ૩૧॥

ત્વદ્દર્શનેન નિષ્પાપો જાતોઽહં મુનિસત્તમ ।
આજ્ઞાં દેહિ ગમિષ્યામિ સસૈન્યો નગરં સ્વકમ્ ॥ ૩૨॥

તસ્ય તદ્વચનં શ્રુત્વા સન્તુષ્ટઃ કપિલોઽવદત્ ।
સસૈન્યો ભુઙ્ક્ષ્વ કિઞ્ચિત્ત્વં મદ્દત્તં નૃપસત્તમ ॥ ૩૩॥

મમાશ્રમે ચ દૈત્યેન્દ્ર ક્ષુધિતસ્ત્વં સમાગતઃ ।
અતસ્ત્વાં પ્રાર્થયે ભૂપ અતિથિં સુસમાગતમ્ ॥ ૩૪॥

તથેતિ સંસ્થિતસ્તત્ર ગણદૈત્યઃ પ્રતાપવાન્ ।
ઉક્ત્વા વિનયસંયુક્તઃ કપિલેન સુસત્કૃતઃ ॥ ૩૫॥

તતઃ કપિલશિષ્યેણ સેનાઽઽનીતા ગણસ્ય વૈ ।
સેનયા સહ દૈત્યેશં પૂજયામાસ તં મુનિઃ ॥ ૩૬॥

ચિન્તામણિં સ સમ્પૂજ્ય પ્રાર્થયામાસ ભોજનમ્ ।
યથારુચિ ચ સર્વેષાં તથા દેયં મહામણે ॥ ૩૭॥

તતો મણિપ્રસાદેન ષડ્રસૈઃ સંયુતં પરમ્ ।
સ્થિતં પાત્રેષુ સર્વત્ર પ્રેષિતં ત્વન્નમાદરાત્ ॥ ૩૮॥

તતસ્તૈર્ભુક્તમત્યન્તં સ્વાદયુક્તં વિશેષતઃ ।
સસૈન્યો ગણદૈત્યોઽભૂદ્વિસ્મિતો ચેતસા ભૃશમ્ ॥ ૩૯॥

મુનિં પ્રણમ્ય દૈત્યેશ આર્થયત્તં મહામણિમ્ ।
ન દદૌ તં મુનિશ્રેષ્ઠો ગાણેશં ભૂષણં મણિમ્ ॥ ૪૦॥

તતો મુનિં તિરસ્કૃત્ય હસ્તાત્તસ્ય પ્રગૃહ્ય તમ્ ।
મણિં સ પ્રયયૌ સ્થાનં હર્ષનિર્ભરમાનસઃ ॥ ૪૧॥

મુનિઃ ક્ષુબ્ધો મહાભાગ તસ્ય નાશાય દુર્મતેઃ ।
વિચારમકરોચ્ચિત્તે મણિગ્રહણલાલસઃ ॥ ૪૨॥

સુસાધુવદહો દૈત્યોઽવિનીતઃ સુસમાગતઃ ।
ચકાર કર્મ પ્રહ્લાદ પશ્ય તત્ જાતિવત્ પરમ્ ॥ ૪૩॥

અતો દુષ્ટોઽવિનીતશ્ચ ન વિશ્વાસ્યઃ કદાચન ।
દુષ્ટસઙ્ગતિયોગેન જ્ઞાનભ્રંશઃ પ્રજાયતે ॥ ૪૪॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ચિન્તામણિહરણં નામ સપ્તતિતમોઽધ્યાયઃ ॥ ૨.૭૦

(Page ખં. ૨ અ. ૭૧ પાન ૧૪૯)

## ૨.૭૧ કપિલવરપ્રદાનં નામૈકસપ્તતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

પ્રલ્હાદ ઉવાચ ।
કોઽસૌ ગણાસુરો દૈત્યો યેન ચાસત્કૃતો મુનિઃ ।
સમર્થઃ કપિલઃ સાક્ષાત્ પ્રલયાગ્નિસમદ્યુતિઃ ॥ ૧॥

યસ્ય ક્રોધયુતા દૃષ્ટિઃ સગરાન્ પ્રદદાહ સા ।
તં તિરસ્કૃત્ય જીવન્ સ કથં સ્વનગરે ગતઃ ॥ ૨॥

ગૃત્સમદ ઉવાચ ।
શ‍ૃણુ પ્રહ્લાદ યત્નેન ગણાસુરવિચેષ્ટિતમ્ ।
સર્વં વદામિ પાપઘ્નં ગણેશચરિતાશ્રિતમ્ ॥ ૩॥

અભિજિન્નામ રાજર્ષિરપુત્રઃ સમ્બભૂવ હ ।
પુત્રાર્થં સ વનં રાજા યયૌ ત્યક્ત્વા સ્વરાજ્યકમ્ ॥ ૪॥

ભ્રમન્ દદર્શ યોગીશં વૈશમ્પાયનમઞ્જસા ।
તં પ્રણમ્ય સપત્નીકઃ પપ્રચ્છ વિનયાન્વિતઃ ॥ ૫॥

પુત્રપ્રાપ્તેરુપાયં મે વદ સર્વજ્ઞ તે નમઃ ।
મુનિના મન્ત્રરાજસ્તુ દત્તસ્તસ્મૈ પ્રજાપતે ॥ ૬॥

ચાતુર્માસ્યપ્રયોગં તં વિધિયુક્તં નૃપસ્ય સઃ ।
ઉપદિશ્ય તતસ્તીર્થં પ્રભાસં સંસ્થિતોઽભવત્ ॥ ૭॥

અભિજિત્તં પ્રણમ્યૈવ સસ્ત્રીકઃ પ્રયયૌ મહત્ ।
તીર્થં તત્ર યથાયોગ્યમનુષ્ઠાનપરોઽભવત્ ॥ ૮॥

તત્ર બ્રહ્મા તપસ્તેપે સરસ્વત્યા સમન્વિતઃ ।
સ્નાનાર્થં સુતયા યુક્તઃ કદાચિત્ સ જગામ હ ॥ ૯॥

તત્રૈકવસ્ત્રસંયુક્તાં વિધિર્દૃષ્ટ્વા સરસ્વતીમ્ ।
યૌવનસ્થાં કુચાભ્યાં તાં રૂપિણીં વિસ્મિતોઽભવત્ ॥ ૧૦॥

અકસ્માજ્જલમધ્યેઽસૌ કામબાણાર્દિતોઽભવત્ ।
પુત્રીભાવં સમાગૃહ્ય ચઞ્ચલં ચિત્તમાદદે ॥ ૧૧॥

કામેનાત્યન્તમુગ્રેણ પીડિતસ્ય જગદ્ગુરોઃ ।
વીર્યં તસ્યાસ્ખલત્તત્ર જલમધ્યે સુરેશ્વર ॥ ૧૨॥

તતઃ સુમનસા યુક્તઃ સત્યલોકં યયૌ વિધિઃ ।
પ્રયોગોઽભિજિતઃ સોઽથ સમાપ્તસ્તદ્દિનેઽભવત્ ॥ ૧૩॥

સસ્ત્રીકઃ સ્નાનસિદ્ધ્યર્થં યયૌ તીર્થં નૃપસ્તદા ।
તૃષિતા તસ્ય પત્ની સા જલપાનરતાઽભવત્ ॥ ૧૪॥

દૈવયોગેન તદ્વીર્યં બ્રહ્મણો વારિણા સહ ।
તસ્યા ઉદરગં જાતમમોઘમસુરોત્તમ ॥ ૧૫॥

રાજા સમાપ્ય તત્ સર્વં મન્ત્રાનુષ્ઠાનમાદરાત્ ।
યયૌ સ્વનગરં પૂર્ણં ચક્રે વૈ રાજ્યમુત્તમમ્ ॥ ૧૬॥

કાલેન સુષુવે રાજ્ઞી પુત્રં સા ચારુહાસિની ।
તેજોયુક્તં મહાવીર્યં લક્ષણૈરુપશોભિતમ્ ॥ ૧૭॥

જાતકર્માદિકં રાજા ચકાર વિધિવદ્ દ્વિજૈઃ ।
દત્ત્વોપવીતદાનં સ વેદાભ્યાસે મતિં દદૌ ॥ ૧૮॥

સ્વલ્પકાલેન પુત્રોઽસૌ ગણો નામ્ના મહાબલઃ ।
વેદશાસ્ત્રનિધિર્જાતસ્તતોઽયાત્ સ વનં સ્વયમ્ ॥ ૧૯॥

માર્ગે ચ સહસાઽઽગત્ય શુક્રઃ પઞ્ચાક્ષરીં દદૌ ।
તસ્મૈ દીક્ષાં શિવસ્યાઽસૌ તથા ચક્રે સ ભાવતઃ ॥ ૨૦॥

શિવં ધ્યાત્વા તપસ્તેપે મહોગ્રં વાયુભક્ષકઃ ।
દશવર્ષસહસ્રૈસ્તં યયૌ ભક્ત્યા સદાશિવઃ ॥ ૨૧॥

આગતં શઙ્કરં દૃષ્ટ્વાઽપૂજયદ્ ભક્તિભાવતઃ ।
તુષ્ટાવ વિવિધૈસ્તોત્રૈર્વરદં તં જગાદ સઃ ॥ ૨૨॥

આરોગ્યાદિસમાયુક્તં ત્રિગુણાન્ન ભયં ચ મે ।
ત્રૈલોક્યરાજ્યમુગ્રં વૈ દેહિ મે ત્વં સદાશિવ ॥ ૨૩॥

ઓમિત્યુક્ત્વા મહાદેવઃ સ્વસ્થાનં પ્રજગામ હ ।
ગણશ્ચ સ્વગૃહં દૈત્ય યયૌ પરમહર્ષિતઃ ॥ ૨૪॥

સર્વાનાનન્દયામાસ સુહૃદઃ પિતરૌ સ્વકૌ ।
તતો વિજિગ્યે પૃથિવીં સેનયા સ્વેન તેજસા ॥ ૨૫॥

(Page  ખં. ૨ અ. ૭૧ પાન ૧૫૦)
તતો પિત્રાઽભિષિક્તોઽભૂત્ સ્વરાજ્યે વનગેન સઃ ।
સપત્નીકેન ભૂપાલો ગણઃ સ્થાને બભૂવ હ ॥ ૨૬॥

તતો દૈત્યૈઃ સમાયાતૈર્નાનાદિગ્ભ્યો નૃપો ગણઃ ।
તૈર્યુક્તઃ સકલાં પૃથ્વીં વિજિગ્યે દ્વીપસંયુતામ્ ॥ ૨૭॥

પાતાલં સ તતો નાગૈર્જિગાય બલસંયુતઃ ।
યુદ્ધં કૃત્વા મહાઘોરં તતઃ સ્વર્ગં યયૌ ગણઃ ॥ ૨૮॥

સ્વર્ગં જિત્વા સહેન્દ્રૈઃ સ તતો બ્રહ્માણમઞ્જસા ।
વિષ્ણું શિવં ક્રમેણૈવાજયત્તેજઃસમન્વિતઃ ॥ ૨૯॥

તતસ્તાન્ કરદાન્ કૃત્વા સ્થાપયામાસ દેવપાન્ ।
સ્વસ્વસ્થાનેષુ તત્રૈકં દૈત્યં ન્યસ્ય ધરાં યયૌ ॥ ૩૦॥

એવં ત્રૈલોક્યરાજ્યં સ જિત્વા સર્વાંશ્ચકાર હ ।
તતશ્ચિન્તામણિં દુષ્ટો જહાર કપિલસ્ય સઃ ॥ ૩૧॥

કપિલો ગણનાથસ્ય ભક્તઃ પરમભાવિકઃ ।
તતાપ સ તપો ઘોરં ગણેશસ્ય મહાત્મનઃ ॥ ૩૨॥

વર્ષેણૈકેન દેવેશો યયૌ મૂષકવાહનઃ ।
સિદ્ધિબુદ્ધિસમાયુક્તો બોધયત્તં મહામુનિમ્ ॥ ૩૩॥

કપિલસ્તં ગણાધ્યક્ષમાગતં પૂજયન્ પ્રભુમ્ ।
તુષ્ટાવ સાશ્રુનેત્રશ્ચ પ્રેમગદ્ગદયા ગિરા ॥ ૩૪॥

કપિલ ઉવાચ ।
નમસ્તે વિઘ્નરાજાય નમસ્તે વિઘ્નહારિણે ।
અભક્તાનાં વિશેષેણ વિઘ્નકર્ત્રે નમો નમઃ ॥ ૩૫॥

આકાશાય ચ ભૂતાનાં મનસે ચામરેષુ તે ।
બુદ્ધ્યૈ ચેન્દ્રિયવર્ગેષુ ત્રિવિધાય નમો નમઃ ॥ ૩૬॥

દેહાનાં બિન્દુરૂપાય સોઽહંરૂપાય દેહિનામ્ ।
તયોરભેદભાવેષુ બોધાય તુ નમો નમઃ ॥ ૩૭॥

સાઙ્ખ્યાય વૈ વિદેહાનાં સયોગાનાં નિજાત્મને ।

ચતુર્ણાં પઞ્ચમાયૈવ સર્વત્ર તુ નમો નમઃ ॥ ૩૮॥

નામરૂપાત્મકાનાં વૈ શક્તિરૂપાય તે નમઃ ।
આત્મનાં રવયે તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૩૯॥

આનન્દાનાં મહાવિષ્ણુરૂપિણે નેતિધારિણામ્ ।
શઙ્કરાય ચ સર્વેષાં સંયોગે ગણપાય તે ॥ ૪૦॥

કર્મણાં કર્મયોગાય જ્ઞાનયોગાય જાનતામ્ ।
સમેષુ સમરૂપાય લમ્બોદર નમોઽસ્તુ તે ॥ ૪૧॥

સ્વાધીનાનાં ગણાધ્યક્ષ સહજાય નમો નમઃ ।
તેષામભેદભાવેષુ સ્વાનન્દાય ચ તે નમઃ ॥ ૪૨॥

નિર્માયિકસ્વરૂપાણામયોગાય નમો નમઃ ।
યોગાનાં યોગરૂપાય ગણેશાય નમો નમઃ ॥ ૪૩॥

શાન્તિયોગપ્રદાત્રે તે શાન્તિયોગમયાય ચ ।
કિં સ્તૌમિ તત્ર દેવેશ અતસ્ત્વાં પ્રણમામ્યહમ્ ॥ ૪૪॥

જગાદ ગણનાથો વૈ તતસ્તં ભક્તમુત્તમમ્ ।
હર્ષેણ મહતા યુક્તો હર્ષયન્ મુનિસત્તમમ્ ॥ ૪૫॥

ગણેશ ઉવાચ ।
ત્વયા કૃતં મદીયં યત્ સ્તોત્રં યોગપ્રદં ભવેત્ ।
ધર્માર્થકામમોક્ષાણાં દાયકં ચ ન સંશયઃ ॥ ૪૬॥

વરં વરય દાસ્યામિ મત્તસ્ત્વં ભક્તિયન્ત્રિતઃ ।
ત્વત્સમો ન ભવેત્તાત તત્ત્વજ્ઞાનપ્રકાશકઃ ॥ ૪૭॥

તસ્ય તદ્વચનં શ્રુત્વા કપિલસ્તમુવાચ હ ।
ત્વદીયામચલાં ભક્તિં દેહિ વિઘ્નેશ મે પરામ્ ॥ ૪૮॥

ત્વદીયભૂષણં દૈત્યો ગણો હૃત્વા જગામ હ ।
મત્તશ્ચિન્તામણિં નાથ જહિ તં મણિમાનય ॥ ૪૯॥

સ્મરામિ ચેદ્યદાઽહં ત્વાં તદાત્માનં પ્રદર્શય ।
એતમેવ વરં પૂર્ણં દેહિ નાથ નમોઽસ્તુ તે ॥ ૫૦॥

ગૃત્સમદ ઉવાચ ।
તસ્ય તદ્વચનં શ્રુત્વા હર્ષયુક્તો ગજાનનઃ ।

ઉવાચ તં મહાભાગં પ્રેમયુક્તં વિશેષતઃ ॥ ૫૧॥

(Page ખં. ૨ અ. ૭૨ પાન ૧૫૧)
ગણેશ ઉવાચ ।
ત્વયા યત્ પ્રાર્થિતં વિષ્ણો તત્ સર્વં પ્રભવિષ્યતિ ।
તવ પુત્રો ભવિષ્યામિ ગણાસુરવધાય ચ ॥ ૫૨॥

એવમુક્ત્વાન્તર્દધેઽસૌ ઢુણ્ઢિરાજઃ પ્રતાપવાન્ ।
મુનિસ્તં હૃદિ સઞ્ચિન્ત્ય સ્વાશ્રમસ્થો બભૂવ હ ॥ ૫૩॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે કપિલવરપ્રદાનં નામૈકસપ્તતિતમોઽધ્યાયઃ ॥ ૨.૭૧

## ૨.૭૨ ગણાસુરવધો નામ દ્વિસપ્તતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગૃત્સમદ ઉવાચ ।
તતઃ સ્વલ્પે ગતે કાલે મુનિર્હોમપરાયણઃ ।
હુત્વાઽગ્નિં ધ્યાનનિષ્ઠોઽભૂદ્ગણેશસ્ય મહાત્મનઃ ॥ ૧॥

તતોઽગ્નિકુણ્ડમધ્યાદ્વૈ ગણેશો નિઃસૃતઃ પુરઃ ।
ચતુર્બાહુધરો રક્તઃ સ બભૌ પરમશ્રિયા ॥ ૨॥

સિદ્ધિબુદ્ધિસમાયુક્તં સિંહગં પરશોર્ધરમ્ ।
એકદન્તં વિશાલાક્ષં શુણ્ડાદણ્ડવિરાજિતમ્ ॥ ૩॥

નાભિશેષ ક્વણત્પાદં દદર્શ કપિલઃ પરમ્ ।
ઉત્થાય તં નનામાઽસૌ ભક્તિયુક્તેન ચેતસા ॥ ૪॥

પૂજયિત્વા પ્રતુષ્ટાવાથર્વશીર્ષભવેન વૈ ।
સ્તોત્રેણ તેન સન્તુષ્ટસ્તમુવાચ ગજાનનઃ ॥ ૫॥

ગણેશ ઉવાચ ।
તવ પુત્રો મુનેઽહં વૈ જાતો ગણવધાય ચ ।
હનિષ્યામિ મહાદૈત્યં ગ્રહીષ્યામિ મહામણિમ્ ॥ ૬॥

તતસ્તં મુનિશાર્દૂલઃ પ્રણમ્ય પ્રત્યુવાચ હ ।
ધન્યં મે જન્મ દેવેશ પિતરૌ તપ આશ્રમઃ ॥ ૭॥

વિદ્યા વ્રતાદિકં સર્વં તવ પાદસ્ય દર્શનાત્ ।
પુત્રભાવેન સમ્પ્રાપ્તસ્તારણાન્ માં ન સંશયઃ ॥ ૮॥

તતસ્તસ્ય મહાભક્તિં ચક્રે વૈ નિત્યમાદરાત્ ।
તેન ભક્તિરહસ્યં યત્તજ્જ્ઞાત્વા દુઃખિતોઽભવત્ ॥ ૯॥

તતઃ સ્વાત્માનમત્યુગ્રં નિન્દયામાસ માનસે ।
અહો માનવરૂપોઽહં શાન્તિયોગેન સઙ્ગતઃ ॥ ૧૦॥

મયા જ્ઞાનમદેનૈવ ગલે ચિન્તામણિર્ધૃતઃ ।
ગણેશવન્ન સન્દેહસ્તદ્ભક્ત્યા હીનચેતસા ॥ ૧૧॥

દેવસ્ય સમતા નૈવ કર્તવ્યા ભજનાર્થિના ।
બ્રહ્મણસ્પતિનામા સ ગણેશશ્ચૈકરાટ્ બભૌ ॥ ૧૨॥

તસ્ય દેહે મદર્થં વૈ સત્તા પૂર્ણા પ્રવર્તતે ।
યોગિદેહેન સા સત્તા તસ્માત્તં ભજતે મહાન્ ॥ ૧૩॥

ચિન્તામણિર્મયા પ્રાપ્તઃ પૂજાયાં સ્થાપિતો ન સઃ ।
ગલે ધૃતો મયા મોહાદ્ગતશ્ચિન્તામણિર્ધ્રુવમ્ ॥ ૧૪॥

દેવસ્ય ભક્તિમાહાત્મ્યાત્ પ્રાપ્તં ભક્તેન ભૂષણમ્ ।
વસ્ત્રં વાહનકાદ્યં ચ પૂજનીયં ન સંશયઃ ॥ ૧૫॥

ગન્ધપુષ્પાદિકં તસ્યોચ્છિષ્ટં ધાર્યં વિશેષતઃ ।
નૈવેદ્યં ભક્ષણીયં વૈ સદા ભક્ત્યાઽઽદરેણ ચ ॥ ૧૬॥

ન દેવસમતા કાર્યા દાસૈર્વૈ નિત્યમાદરાત્ ।
ભયયુક્તેન સંસેવા કાર્યા ભક્તેન ધીમતા ॥ ૧૭॥

મદીયસઙ્ગતશ્ચિન્તામણિશ્ચાહો સુદુઃખિતઃ ।
ગતો દૈત્યકરે સાક્ષાદસુરસ્તં પ્રપીડયેત્ ॥ ૧૮॥

અતો ગણેશમત્યન્તં પ્રાર્થયામિ વધાય ચ ।
ગણસ્ય તદ્વધાચ્ચિન્તામણિઃ સદ્યઃ સુલભ્યતે ॥ ૧૯॥

(Page ખં. ૨ અ. ૭૨ પાન ૧૫૨)
વિચાર્યેતિ સ યોગીન્દ્ર એકદન્તં જગાદ ચ ।
સ્વામિન્ હત્વા ગણં શીઘ્રં મણિમાનય વિઘ્નપ ॥ ૨૦॥

કપિલસ્ય વચઃ શ્રુત્વા હૃષ્ટસ્તં ત્વેકદન્તકઃ ।

જગાદ તે પ્રિયં તાત કરિષ્યામિ ન સંશયઃ ॥ ૨૧॥

એકદન્તેન તદ્રાત્રૌ સ્વપ્નો દત્તો ગણસ્ય ચ ।
સ્વપ્નેન ભ્રાન્તરૂપોઽભૂદ્વિચારમકરોત્ સ્વયમ્ ॥ ૨૨॥

સિંહારૂઢશ્ચતુર્બાહુઃ કુઞ્જરાનનધારકઃ ।
પરશ્વધધરઃ ક્રૂરઃ કોઽયં સ્વપ્ને પ્રદર્શિતઃ ॥ ૨૩॥

કપિલેન સમાદિષ્ટો મસ્તકં મે ચ સોઽચ્છિનત્ ।
મણિં સમાગૃહ્ય દદૌ કપિલાય મહાત્મને ॥ ૨૪॥

અયં સ્વપ્નો મયા દુષ્ટો દૃષ્ટઃ કિં વા ભવિષ્યતિ ।
અતઃ કપિલનાશાર્થં યામિ સૈન્યસમન્વિતઃ ॥ ૨૫॥

તતો ધૃત્વા ચ શસ્ત્રાદીન્ નાનાવીરસમન્વિતઃ ।
રાત્રૌ કપિલમુગ્રોઽસૌ યયૌ હન્તું તદાશ્રમમ્ ॥ ૨૬॥

પ્રભાતે દૈત્યરાજઃ સ સમ્પ્રાપ્તઃ કપિલાશ્રમમ્ ।
શિષ્યૈર્દૃષ્ટો મહાદુષ્ટઃ કપિલં તે યયુસ્તતઃ ॥ ૨૭॥

સ્વામિન્ સમાગતો દૈત્યો ગણનામા સસૈનિકઃ ।
ઊચુઃ શિષ્યાઃ પ્રણમ્યૈનં કપિલં ભયસંયુતાઃ ॥ ૨૮॥

તતો ગણપતિં નત્વા વધાર્થં તસ્ય વૈ મુનિઃ ।
પ્રાર્થયામાસ શીઘ્રં સ ગણસ્ય વિનયાન્વિતઃ ॥ ૨૯॥

તતઃ ક્રુદ્ધો ગણેશાનઃ સિંહારૂઢો યયૌ ગણમ્ ।
ગણેન પુરુષો દૃષ્ટઃ સ્વપ્નગઃ સ ચ નિશ્ચિતમ્ ॥ ૩૦॥

તતો ગણેન યોધાશ્ચ દૈત્યેશાઃ પ્રેરિતા રણે ।
ઉદાયુધા મહોગ્રાસ્ત આયયુર્દેવસન્નિધિમ્ ॥ ૩૧॥

તાન્ દૃષ્ટ્વા કુપિતા દેવી સિદ્ધિર્વામાઙ્ગસંસ્થિતા ।
ગણેશં મનસિ ધ્યાત્વા પુત્રં સા નિર્મમેઽતુલમ્ ॥ ૩૨॥

તેન સર્વં હતં સૈન્યં પ્રેરિતેન ગણસ્ય વૈ ।
સિદ્ધ્યા પલાયત તતઃ સૈન્યં તસ્ય દિશો દશ ॥ ૩૩॥

વિજયી પુરુષઃ સોઽપિ ગણેશં પ્રણનામ હ ।
સસ્ત્રીકં તેન નામ્ના સ કૃતો લક્ષ ઇતિ પ્રભુઃ ॥ ૩૪॥

જગતિ બ્રહ્મણિ ત્વં વૈ તિષ્ઠ સર્વત્ર પુત્રક ।
નરેણ યાદૃશં લક્ષં ક્રિયતે ભુઙ્ક્ષ્વ તાદૃશમ્ ॥ ૩૫॥

હૃદિ લક્ષપ્રતાપી ત્વં સર્વેભ્યો નાઽત્ર સંશયઃ ।
સિદ્ધિપુત્ર મહાભાગ મદ્ભક્તાન્ રક્ષ યત્નતઃ ॥ ૩૬॥

બુદ્ધિપુત્રઃ સ્વયં લાભઃ ફલદાતા ભવિષ્યતિ ।
અનુસારેણ લક્ષસ્ય તવ ભ્રાતા મહાબલઃ ॥ ૩૭॥

ભુક્તૌ મુક્તૌ તથા પાપે હૃદિ બ્રહ્મણિ જન્તવઃ ।
લક્ષં કુર્વન્તિ યે તેષાં લાભશ્ચૈતાદૃશો ભવેત્ ॥ ૩૮॥

એવમુક્ત્વા સ્વપુત્રં તં લક્ષમેકરદસ્તતઃ ।
યુદ્ધાય સ યયૌ તત્ર યત્ર દૈત્યાધિપોઽભવત્ ॥ ૩૯॥

તમાગતં સ વિજ્ઞાય પ્રતાપી સ ગણાસુરઃ ।
હન્તું શસ્ત્રમમોઘં યદાદદે ધનુષિ સ્વયમ્ ॥ ૪૦॥

તાવચ્ચ ગણરાજેન પર્શુના તૂગ્રવેગિના ।
દૈત્યરાજગણસ્યૈવ શિરશ્છિન્નં પપાત સઃ ॥ ૪૧॥

હાહાકૃત્વાઽસુરાઃ સર્વે પાતાલં વિવિશુસ્તતઃ ।
દેવા હર્ષયુતાઃ સર્વે મુનયસ્તે યયુર્વિભુમ્ ॥ ૪૨॥

કપિલં સાન્ત્વયામાસાગૃહ્ય દત્વા મણિં પુનઃ ।
કપિલાયૈકદન્તસ્તુ કપિલઃ પ્રણનામ તમ્ ॥ ૪૩॥

જગાદ ભક્તિસંયુક્તઃ કપિલો ગણનાયકમ્ ।
સ્વામિંસ્ત્વદીયમેતદ્વૈ ભૂષણં તદ્ ગૃહાણ ભોઃ ॥ ૪૪॥

અસ્માભિઃ પૂજનીયં તચ્ચાયોગ્યં ધારણે પ્રભો ।
અતસ્ત્વમેવ વિઘ્નેશ સ્વગલે ધારયસ્વ તત્ ॥ ૪૫॥

(Page ખં. ૨ અ. ૭૩ પાન ૧૫૩)
ચિત્તે નિવાસિના સ્વામિંસ્ત્વયા જ્ઞાતમતઃ પ્રભો ।
મદીયં ચિન્તિતં સર્વં તાદૃશં સફલં કૃતમ્ ॥ ૪૬॥

અતસ્તે ભવિતા ચિન્તા મણિર્નામ ન સંશયઃ ।
એવમુક્ત્વા સ્વયં તસ્યારોપયત્તં મણિં ગલે ॥ ૪૭॥

તતઃ સ મણિમાદાય સ્વાનન્દં ચૈકદન્તકઃ ।

અન્તર્ધાનં ચકારાઽપિ દેવેશા વિસ્મિતા યયુઃ ॥ ૪૮॥

કપિલેન સદા ધ્યાનબલેન હૃદયે વિભુઃ ।
ચિન્તામણિઃ સુભાવેન પૂજિતસ્તત્ત્વબોધિના ॥ ૪૯॥

એવં ગણાસુરં હત્વા ભક્તિં દત્વા સુરેશ્વર ।
કપિલાયૈકદન્તસ્તુ ચક્રે વૈ સાધુરક્ષણમ્ ॥ ૫૦॥

ઇદમેકરદસ્યૈવ ચરિતં સર્વદં પરમ્ ।
શ ृણુયાત્ સર્વપાપઘ્નં પઠેદ્વા તસ્ય સમ્ભવેત્ ॥ ૫૧॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ગણાસુરવધો નામ દ્વિસપ્તતિતમોઽધ્યાયઃ ॥ ૨.૭૨

## ૨.૭૩ ગૃત્સમદપ્રહ્લાદસંવાદસમાપ્તિવર્ણનં નામ ત્રિસપ્તતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

ગત્સમદ ઉવાચ ।
એવં નાનાવતારા ય એકદન્તસ્ય ધીમતઃ ।
તેષાં ચરિત્રવિસ્તારં મયા વક્તું ન શક્યતે ॥ ૧॥

યત્ર વેદાદયો દૈત્ય ન સમર્થા ભવન્તિ વૈ ।
તત્ર કોઽહં મહાસાધો સ્વલ્પબુદ્ધિપ્રધારકઃ ॥ ૨॥

ગણેશ એકદન્તોઽયં સોઽહં બ્રહ્મણિ સંસ્થિતઃ ।
દેહિનાં જ્ઞાનદાને ચ સ્વસ્વવ્યાપારકે પ્રભુઃ ॥ ૩॥

એકદન્તઃ સ સર્વેશઃ પૂર્ણયોગસ્ય ધારકઃ ।
તત્રાર્થાન્તરભાવેન જ્ઞાતવ્યો વિબુધૈઃ પરઃ ॥ ૪॥

એકવાચ્યા મહામાયા તત્ર સત્તાપ્રધારકઃ ।
દન્તશ્ચ માયિકઃ પ્રોક્તસ્તયોર્યોગે હિ સ સ્મૃતઃ ॥ ૫॥

તં ભજસ્વ મહાભાગ પ્રહ્લાદ વિધિપૂર્વકમ્ ।
નષ્ટશાપશ્ચ ભાવી ત્વમેકદન્તપ્રસાદતઃ ॥ ૬॥

મુદ્ગલ ઉવાચ ।
પુનર્ગૃત્સમદં પ્રાહ પ્રહ્લાદો વિનયાન્વિતઃ ।
ગણેશજ્ઞાનભોગાર્થં વૈષ્ણવાનાં શિરોમણિઃ ॥ ૭॥

પ્રલ્હાદ ઉવાચ ।
વિષ્ણુભક્તોઽહમત્યન્તં મુને જન્માદિતઃ ખલુ ।
અતઃ કેન પ્રકારેણ ભજામિ ગણનાયકમ્ ॥ ૮॥

સર્વજ્ઞસ્ત્વં વિશેષેણ પૃચ્છામિ ત્વામતઃ પ્રભો ।
વદ સર્વં ગણેશસ્ય યોગસાધનમુત્તમમ્ ॥ ૯॥

ગૃત્સમદ ઉવાચ ।
ગણેશસ્યાવતારાશ્ચ ચત્વારઃ પરિકીર્તિતાઃ ।
ગૌણાંસ્તાંસ્તે વદામીહ સંશયચ્છેદનાય વૈ ॥ ૧૦॥

સ્વાનન્દનગરે દેવો ગણેશાનઃ પ્રતિષ્ઠતે ।
સ્વયં સસર્જ લીલાર્થં જગદ્બ્રહ્મા સુરેશ્વર ॥ ૧૧॥

તેષુ નાનાવિધાં ક્રીડાં કરોતિ ગણનાયકઃ ।
જગત્સુ બ્રહ્મ જાનીહિ સ ત્વં તં યોગસેવયા ॥ ૧૨॥

સ બ્રહ્મણિ ચતુર્ધા વૈ જાતઃ ક્રીડાર્થમાદરાત્ ।
પઞ્ચમો નિજલોકસ્થસ્તેષાં સંયોગધારકઃ ॥ ૧૩॥

ચતુરો મોહયિત્વા વૈ માયયા સ ગણેશ્વરઃ ।
તિષ્ઠતિ સ્વસ્વરૂપેણ તેષાં હૃદિ ગજાનનઃ ॥ ૧૪॥

(Page  ખં. ૨ અ. ૭૩ પાન ૧૫૪)
નામરૂપાત્મકેષ્વેવ બ્રહ્મ યત્ પરિતિષ્ઠતિ ।
જાનીહિ વેદેષુ તદસદ્રૂપં શક્તિવાચકમ્ ॥ ૧૫॥

તેષ્વાત્માઽમૃતરૂપશ્ચ ભાનુઃ સદ્રૂપવાચકઃ ।
તયોરભેદભાવેષ્વાનન્દો વિષ્ણુઃ સ ઉચ્યતે ॥ ૧૬॥

ત્રિષ્વવ્યક્તસ્વરૂપં યન્નેતિ કર્તા વિશેષતઃ ।
નિર્મોહઃ શિવ એવાઽસૌ તુર્યો વેદે પ્રકથ્યતે ॥ ૧૭॥

ચતુર્ણાં ચૈવ સંયોગે સ્વાનન્દઃ પરિકીર્તિતઃ ।
તદ્બ્રહ્મ ગણનાથોઽયં નાનાખેલકરોઽભવત્ ॥ ૧૮॥

એવં તસ્યાવતારાશ્ચ ચત્વારઃ પરિકીર્તિતાઃ ।
ચતુર્ભાવપ્રસિદ્ધ્યર્થં ગૌણરૂપાસ્તતોઽભવન્ ॥ ૧૯॥

આનન્દાત્મકલાંશેન વિષ્ણું ગણપરૂપિણમ્ ।

જાનીહિ તં ગણેશાનાન્ન ભિન્નં દાનવોત્તમ ॥ ૨૦॥

ચતુર્ણાં ભજનેનૈવ મનઃ શુદ્ધિમવાપ્નુયાત્ ।
તતો ગાણેશયોગે સોઽધિકારી ભવતિ સ્વયમ્ ॥ ૨૧॥

યથાઽઽશ્રમવિભાગેન નરઃ ક્રમપરાયણઃ ।
એકં ત્યક્ત્વા સ ગૃહ્ણાતિ દ્વિતીયં ભક્તિસંયુતઃ ॥ ૨૨॥

અન્તે યોગી સ શાન્તિસ્થ આશ્રમૈ રહિતો ભવેત્ ।
તદ્વત્ ક્રમેણ ગાણેશા ભવેયુર્વૈષ્ણવાદિકાઃ ॥ ૨૩॥

અધુના શ ૃણુ દેવસ્ય સાધનં યોગદં પરમ્ ।
સાધયિત્વા સ્વયં યોગી ભવિષ્યતિ ન સંશયઃ ॥ ૨૪॥

સ્વાનન્દઃ સ વિહારેણ સંયુક્તશ્ચ વિશેષતઃ ।
સર્વસંયોગકારિત્વાદ્ગણેશો માયયા યુતઃ ॥ ૨૫॥

વિહારેણ વિહીનશ્ચાયોગો નિર્માયિકઃ સ્મૃતઃ ।
સંયોગાભેદહીનત્વાદ્ભવહા ગણનાયકઃ ॥ ૨૬॥

સંયોગાયોગયોર્યોગઃ પૂર્ણયોગઃ પ્રકીર્તિતઃ ।
પ્રહ્લાદ ગણનાથસ્તુ પૂર્ણો બ્રહ્મમયઃ પરઃ ॥ ૨૭॥

યોગેન તં ગણાધીશં પ્રાપ્નુવન્તીહ યોગિનઃ ।
તં વિદ્ધિ પૂર્ણભાવેન સંયોગાયોગવર્જિતમ્ ॥ ૨૮॥

તસ્ય માયા દ્વિધા પ્રોક્તા સિદ્ધિર્બુદ્ધિશ્ચ દૈત્યપ ।
બુદ્ધિઃ સા પઞ્ચધા જાતા ચિત્તરૂપા સ્વભાવતઃ ॥ ૨૯॥

ક્ષિપ્તં મૂઢં ચ વિક્ષિપ્તમેકાગ્રં ચ નિરોધકમ્ ।
પઞ્ચધા ચિત્તવૃત્તિશ્ચ સા માયા ગણપસ્ય વૈ ॥ ૩૦॥

ક્ષિપ્તં મૂઢં ચ ચિત્તં યત્ કર્મણ્યપિ વિકર્મણિ ।
સંસ્થિતં તેન વિશ્વં વૈ ચલતિ સ્વસ્વભાવતઃ ॥ ૩૧॥

અકર્મણિ ચ વિક્ષિપ્તં ચિત્તં જાનીહિ માનદ ।
તેન મોક્ષમવાપ્નોતિ શુક્લગત્યા ન સંશયઃ ॥ ૩૨॥

એકાગ્રમષ્ટધા ચિત્તં તદેવૈકાત્મનિ સ્થિતમ્ ।
સમ્પ્રજ્ઞાતસમાધિસ્થં સાધુ જાનીહિ સત્તમ ॥ ૩૩॥

નિરોધસંજ્ઞિતં ચિત્તં નિવૃત્તે રૂપધારકમ્ ।
અસમ્પ્રજ્ઞાતયોગસ્થં જાનીયાદ્યોગસેવયા ॥ ૩૪॥

પઞ્ચધા ચિત્તવૃત્તિશ્ચ બુદ્ધિરૂપા પ્રકીર્તિતા ।
માયા સા ગણનાથસ્ય ત્યક્તવ્યા યોગસેવયા ॥ ૩૫॥

સિદ્ધિર્નાનાવિધા પ્રોક્તા ભ્રાન્તિદા તત્ર સમ્મતા ।
સિદ્ધ્યર્થં તત્ર લોકાશ્ચ ભ્રમયુક્તા ભવન્ત્યતઃ ॥ ૩૬॥

ધર્માર્થકામમોક્ષાણાં સિદ્ધિર્ભિન્ના પ્રકીર્તિતા ।
બ્રહ્મભૂતકરી સિદ્ધિસ્ત્યક્તવ્યા પઞ્ચધા સદા ॥ ૩૭॥

મોહદા સિદ્ધિરત્યન્તં મોહધારકતાં ગતા ।
બુદ્ધિશ્ચૈવ સ સર્વત્ર તાભ્યાં ખેલતિ વિઘ્નપઃ ॥ ૩૮॥

બુદ્ધ્યા યદ્ બુધ્યતે તત્ર પશ્ચાન્ મોહઃ પ્રવર્તતે ।
અતો ગણેશભક્ત્યા સ માયાભ્યાં વર્જિતો ભવેત્ ॥ ૩૯॥

(Page ખં. ૨ અ. ૭૪ પાન ૧૫૫)
પઞ્ચધા ચિત્તવૃત્તિં ચ પઞ્ચધા સિદ્ધિમાદરાત્ ।
ત્યક્ત્વા ગાણેશયોગેન ગણેશં ભજ ભાવતઃ ॥ ૪૦॥

તતઃ સ ગણરાજસ્ય મન્ત્રં તસ્મૈ દદૌ સ્વયમ્ ।
ગણાનાં ત્વેતિ વેદોક્તં સ વિધિં મુનિસત્તમઃ ॥ ૪૧॥

તેન સમ્પૂજિતો યોગી પ્રહ્લાદેન મહાત્મના ।
યયૌ ગૃત્સમદો દક્ષ સ્વર્ગલોકં વિહાયસા ॥ ૪૨॥

પ્રહ્લાદશ્ચ તથા સાધુઃ સાધયિત્વા વિશેષતઃ ।
યોગી યોગીન્દ્રવન્દ્યઃ સ શાન્તિસન્ધારકોઽભવત્ ॥ ૪૩॥

વિરોચનાય રાજ્યં સ દદૌ પુત્રાય દૈત્યપઃ ।
ગણેશભજને યોગી સંસક્તઃ સર્વદાઽભવત્ ॥ ૪૪॥

સગુણં વિષ્ણુરૂપં ચ નિર્ગુણં બ્રહ્મવાચકમ્ ।
ગણેશેન ધૃતં સર્વં કલાંશેન ન સંશયઃ ॥ ૪૫॥

એવં જ્ઞાત્વા મહાયોગી પ્રહ્લાદોઽભેદમાશ્રિતઃ ।
હૃદિ ચિન્તામણિં જ્ઞાત્વાઽભજચ્ચાનન્યભાવતઃ ॥ ૪૬॥

સ્વલ્પકાલેન દૈત્યેન્દ્રઃ શાન્તિયોગપરાયણઃ ।

શાન્તિં પ્રાપ્તો ગણેશે ચૈકભાવઃ સોઽભવત્પરઃ ॥ ૪૭॥

શાપશ્ચૈવ ગણેશેન પ્રહ્લાદસ્ય નિરાકૃતઃ ।
ન પુનર્દુષ્ટસઙ્ગેનાઽભવદ્ ભ્રાન્તઃ સ માનદ ॥ ૪૮॥

એવં મદં પરિત્યજ્યૈકદન્તસ્ય સમાશ્રયાત્ ।
અસુરોઽપિ મહાયોગી પ્રહ્લાદઃ સમ્બભૂવ હ ॥ ૪૯॥

એતત્ પ્રહ્લાદમાહાત્મ્યં યઃ શ‍ૃણોતિ નરોત્તમઃ ।
પઠેત્તુ તસ્ય વૈ દક્ષ ભવેદીપ્સિતદાયકમ્ ॥ ૫૦॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ગૃત્સમદપ્રલ્હાદસંવાદસમાપ્તિવર્ણનં નામ ત્રિસપ્તતિતમોઽધ્યાયઃ ॥ ૨.૭૩

## ૨.૭૪ ચરિતમાહાત્મ્યં નામ ચતુઃસપ્તતિતમોઽધ્યાયઃ

॥ શ્રીગણેશાય નમઃ ॥

દક્ષ ઉવાચ ।
એકદન્તસ્ય યત્ ક્ષેત્રં સઙ્ક્ષેપેણ મયા શ્રુતમ્ ।
યાત્રાદિ વિસ્તરેણૈવ કથયસ્વ મહામુને ॥ ૧॥

મુદ્ગલ ઉવાચ ।
અગ્નિકોણે દિશાં પ્રાન્તે સ્વસ્વખણ્ડેષુ માનદ ।
એકદન્તસ્ય ચ ક્ષેત્રં જ્ઞાતવ્યં જલધેસ્તટે ॥ ૨॥

દશ યોજનવિસ્તારં સમન્તાત્તત્ર મધ્યગઃ ।
એકદન્તો ગણેશાનઃ પૂજ્યતે સિદ્ધસાધકૈઃ ॥ ૩॥

તદ્વામાઙ્ગે સ્વયં સિદ્ધિર્દક્ષિણાઙ્ગે પ્રજાપતે ।
બુદ્ધિશ્ચ મૂષકસ્તસ્ય સમીપે સંસ્થિતઃ પ્રભોઃ ॥ ૪॥

સિદ્ધયોઽષ્ટૌ પુરસ્તસ્ય સંસ્થિતા ભક્તિકારિકાઃ ।
વામે દેવાદયઃ સર્વે ભક્ત્યા તિષ્ઠન્તિ સંયુતાઃ ॥ ૫॥

દક્ષિણાઙ્ગે ચ વેદાદિ શાસ્ત્રાણિ પ્રસ્તુવન્તિ તમ્ ।
પૃષ્ઠે કાશ્યાદિ ક્ષેત્રાણિ તીર્થાનિ ચ ભજન્તિ તમ્ ॥ ૬॥

શ્રેષ્ઠસ્વરૂપકાઃ સંસ્થાઃ સર્વે ત્રિભુવનેષુ યે ।
તે ક્ષેત્રવાસિનો ભૂત્વા ભજન્તે ત્વેકદન્તકમ્ ॥ ૭॥

સમુદ્રે સ્નાનકર્તારઃ સ્વસ્વનામ્નાઙ્કિતેષુ વૈ ।
તીર્થેષુ સૂક્ષ્મરૂપેષુ સૂક્ષ્મરૂપધરાઃ સદા ॥ ૮॥

તત્રૈકદન્તતીર્થં વૈ સર્વલોકેષુ વિશ્રુતમ્ ।
દર્શનાત્ સર્વપાપઘ્નં ભુક્તિમુક્તિપ્રદં ભવેત્ ॥ ૯॥

ભાદ્રશુક્લચતુર્થ્યાં મહોત્સવસ્તત્ર વર્તતે ।
યાત્રાર્થં સર્વલોકશ્ચ ત્રિલોકસ્થા વ્રજન્તિ તમ્ ॥ ૧૦॥

(Page ખં. ૨ અ. ૭૪ પાન ૧૫૬)
બ્રહ્મભૂયકરં ક્ષેત્રં ગાણેશં શાસ્ત્રસમ્મતમ્ ।
મરણે તત્ર સમ્પ્રાપ્તે સ્વાનન્દે વસતિર્ભવેત્ ॥ ૧૧॥

સઙ્ક્ષેપેણ મયા પ્રોક્તં યત્ક્ષેત્રસ્ય યશોઽમલમ્ ।
અયુતાયુતવર્ષૈશ્ચ વિસ્તારે કઃ ક્ષમો ભવેત્ ॥ ૧૨॥

એતચ્ચરિત્રમાદ્યં વૈ કથિતં તે મહામતે ।
એકદન્તસ્ય માહાત્મ્યં સઙ્ક્ષેપેણ તથા મયા ॥ ૧૩॥

વિસ્તરેણ ન શેષોઽપિ બ્રહ્મા વિષ્ણુર્મહેશ્વરઃ ।
શુકો નૈવ સમર્થશ્ચ ભવેત્ કથયિતું કદા ॥ ૧૪॥

ય એતદેકદન્તસ્ય ચરિત્રં સર્વસિદ્ધિદમ્ ।
શ ૃણુયાચ્છ્રાવયેદ્વાપિ પઠેત્ સ લભતેઽખિલમ્ ॥ ૧૫॥

પુત્રપૌત્રાદિકં સર્વં ધનધાન્યસમન્વિતમ્ ।
કલત્રં સુખદં જન્તુર્લભતે નાત્ર સંશયઃ ॥ ૧૬॥

અનેન ભાવસંયુક્ત એકદન્તં પ્રજાપતે ।
નિત્યં સ્તુયાત્ સ એવૈકદન્તરૂપો ધરાતલે ॥ ૧૭॥

તસ્ય દર્શનમાત્રેણ કૃતકૃત્યા ભવન્તિ ચ ।
દેવાદયો ન સન્દેહો બ્રહ્માકારસ્વરૂપિણઃ ॥ ૧૮॥

શ્રવણેનૈવ ખણ્ડસ્ય કૃતકૃત્યો નરો ભવેત્ ।
નારી વા પશુરૂપો વા નિશ્ચિતં મુનિભિઃ પુરા ॥ ૧૯॥

સર્વતીર્થેષુ યઃ સ્નાયાત્ સર્વદાનં કરોતિ યઃ ।
તપાંસિ યસ્તપેન્નિત્યં યાત્રાઃ સર્વાઃ કરોતિ યઃ ॥ ૨૦॥

ઇષ્ટાપૂર્તાદિકં સર્વં કુરુતે ભક્તિસંયુતઃ ।

તેભ્યઃ સંશ્રવણાત્ પુણ્યં લભેદસ્ય શતાધિકમ્ ॥ ૨૧॥

ધર્માર્થકામમોક્ષાન્ વૈ લભતે શ્રવણેન ચ ।
ખણ્ડસ્યાસ્ય ન સન્દેહો બ્રહ્મભૂતો ભવેન્નરઃ ॥ ૨૨॥

યદ્યદિચ્છતિ તત્તદ્વૈ સફલં પ્રભવેત્ સદા ।
શ્રવણેનૈકદન્તસ્ય ચરિત્રસ્ય નરો મહાન્ ॥ ૨૩॥

સમ્પૂર્ણો મહિમા દક્ષ ન વક્તું શક્યતે મયા ।
બ્રહ્માદિભિશ્ચ તસ્માત્તે કથિતં સારમઞ્જસા ॥ ૨૪॥

સૂત ઉવાચ ।
એવમુક્ત્વા મહાયોગી મુદ્ગલો વિરરામ હ ।
દક્ષસ્તં હર્ષિતોઽત્યન્તં પ્રણનામ કૃતાઞ્જલિઃ ॥ ૨૫॥

મહોદરસ્ય માહાત્મ્યશ્રવણે લાલસી સ્વયમ્ ।
દક્ષસ્તં પુનરપ્યાહ તદગ્રે વર્ણયામ્યહમ્ ॥ ૨૬॥

એતચ્છૌનક મુખ્યં તે ચરિત્રં કથિતં મયા ।
યથા દક્ષેણ સર્વં વૈ મુદ્ગલાત્ સંશ્રુતં તથા ॥ ૨૭॥

સર્વસિદ્ધિકરં પ્રોક્તમેકદન્તચરિત્રકમ્ ।
શ્રુતં ભાવેન ભો વિપ્ર કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૨૮॥

॥ ૐ તત્સદિતિ શ્રીમદાન્ત્યે પુરાણોપનિષદિ શ્રીમન્મૌદ્ગલે મહાપુરાણે
દ્વિતીયે ખણ્ડે એકદન્તચરિતે ચરિતમાહાત્મ્યં નામ ચતુઃસપ્તતિતમોઽધ્યાયઃ ॥ ૨.૭૪
॥ ઇતિ દ્વિતીયઃ ખણ્ડઃ સમાપ્તઃ ॥

॥ ઇતિ શ્રીમુદ્ગલપુરાણે દ્વિતીયઃ ખણ્ડઃ સમાપ્તઃ ॥

Proofread by Yash Khasbage

---

*MudgalapurAna Khanda 2 Ekadantacharitam*

pdf was typeset on September 18, 2023

Please send corrections to *sanskrit@cheerful.com*